Digitized by Madhuban Trust



कात्यायनशुल्बसूत्रम्

(सोपपत्तिकं पर्यालोचनम्)

डॉ० रमेशचन्द्र दाश शर्मा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

कात्यायनशुल्बसूत्रम्

(सोपपत्तिकं पर्यालोचनम्)

डॉ० रमेशचन्द्र दाश शर्मा

NAG PUBLISHERS

gitized by Madhuban Tru
omain. Vipin Kumar Colle

Digitized by Madhuban Trust

वैदिक वाङ्मय में शुल्व सूत्रों का स्थान अति महत्वपूर्ण है। श्रौत यज्ञों में कुण्डमण्डप तथा इष्टकाओं का निर्माण इसी शास्त्र से होता है। "सर्ववेदे प्रतिष्ठितम्" वचन के अनुसार श्रुतिमूलक यह ग्रन्थ रेखा गणित (जमेट्री) शास्त्र का जनक है।

क्षेत्र द्वैगुण्य का मानदण्ड, समचतुष्कोण को आयताकार में परिवर्तित करना, आयत को सम-चतुरस्र में। भुजकोटि के समिष्ट क्षेत्र फल प्रतिपादक प्रमाण का निर्धारण, त्रिकोण को चतुष्कोण में, चतुष्कोण को त्रिकोण में, वृत्त को चतुरस्र एवं चतुरस्र को वृत्त में परिवर्तित करना इत्यादि शुल्व प्रमेय इस शास्त्र में वर्णित है।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

महर्षिकात्यायनप्रणीतम्

कात्यायनशुल्बसूत्रम्

(सोपपत्तिकं पर्यालोचनम्)

लेखकः

डॉ० रमेश चन्द्र दाश शर्मा

व्याख्याता, वेद विभागः
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
कटवारियासराय, नई दिल्ली - १६

NAG PUBLISHERS

नाग प्रकाशक

११. ए. यू. ए., जवाहर नगर,
दिल्ली -११०००७

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

THIS PUBLICATION HAS BEEN BROUGHT OUT WITH THE FINANCIAL ASSISTANCE FROM RASHTRIYA SANSKRIT SANSTHAN, NEW DELHI.

NAG PUBLISHERS

(i) 11A/U.A. (Post Office Building), Jawahar Nagar, Delhi 110 007.

(ii) Sanskrit Bhawan, 12,15, Sanskrit Nagar, Plot No. 3, Sector-14, Rohini, New Delhi - 110 085

(iii) Jalalpur Mafi, Chunar, Dist. Mirzapur, U. P.

© **Author**

ISBN 81-7081-272-0

FIRST EDITION : 1994

Price : Rs. 88.00

PRINTED IN INDIA

Published by Surendra Pratap for Nag Publishers, 11A/U.A., Jawahar Nagar, Delhi-110007 and printed at G. Print Process, 308/2, Shahzada Bagh, Dayabasti, Delhi-110035.

Laser Typesetting By:
Compu-Media-The D.T.P. People,
43, Bunglow Road, Kamla Nagar, Delhi-110 007
Phone : 2911869

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समर्पणम्

वेदविद्याद्योतितान्तःकरणानां श्रौतस्मार्तकर्मनिष्णातानां
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य वेदविभागाध्यक्षचराणां
स्व डॉ. श्रीगोपाल चन्द्रमिश्रमहोदयानां पुण्यस्मृतौ
सादरं ग्रन्थरत्नमिदं
समर्प्यते ।

यस्याद्वितीयगतिरस्ति समस्तशास्त्रे
वेदार्थनिर्णयविधौ किमु शुल्बशास्त्रम् ।
तस्मादधीत्य लिखितं सुविचार्य मत्या
सेवाधियाऽर्पयति ते पदयोः रमेशः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सम्मतिः

षड्भावविकारप्रधानेऽस्मिन् जगति लब्धजन्मनां जनानां सकलकल्याणसम्पादनायैव वेदा आविर्बभूवुः । उच्यते च - "वेदा हि यज्ञार्थमभिप्रवृत्ताः" इति । ऋषयश्च यज्ञोपासनेनैव प्रजासर्गं प्रतेनुः । ते च यज्ञाः कस्मिँश्चिदधिष्ठाने समाचर्यन्ते । तान्यधिष्ठानानि कुण्डमण्डपस्थण्डिलादीनि भवन्ति । यज्ञानुष्ठानविधानन्तु श्रौतसूत्रग्रन्थेषु प्रतिपाद्यते । परन्तु तत्रापेक्षितानां कुण्डमण्डपेष्टकाद्युपकरणानां निर्देशः शुल्वग्रन्थेषु विधीयते । अतो वैदिकवाङ्मये शुल्वसूत्राणां स्थानं महनीयमस्ति । नास्मिन् वैदिकवेदीष्टकानामेव विधानमस्ति, अपितु रेखागणितस्य प्रवर्त्तकरूपेण शुल्वशास्त्रमिदं पुरस्तिष्ठति प्रेक्षावताम् ।

शुल्वसूत्रेषु प्रत्यक्षश्रुतीनां वाक्योपलम्भाद् वैदिकयुगेऽपि रेखागणितस्य व्यवहार आसीदिति ज्ञायते । आधुनातनरेखागणितस्य प्राक्तनस्वरूपं शल्वसूत्राणां प्रयोगेषु चकास्ति । भारतीयशुल्वसूत्रपरिशीलनेन पाश्चात्यविदुषां रेखागणितविषये स्वजनकत्वख्यापनं निरस्तं भवति । वस्तुतः पाश्चात्यविदुषां मनसि विषयस्फुरणात् प्रागेव वैदिकवाङ्मये भारतीयविदुषां क्रियाकौशले च ज्यामितिविषयो विलसति स्म । गणितीयविषयसमीक्षणाय प्रवृत्तेषु पाटीगणित-रेखागणित-बीजगणितादिविषयेषु रेखागणितस्यान्यतमं स्थानं वर्तते । शुल्वग्रन्थेषु रेखागणितविषयः सूत्रैर्निबद्धो वर्तते, क्वचिच्छ्लोकैरपि ।

अत्रतावद्वैदिकेन विदुषा डा.रमेशचन्द्रदाशशर्मणा कात्यायनशुल्वसूत्रस्य सोपपत्तिकं व्याख्यानं सपरिश्रमं सुविस्तृतं च कृतमिति नूनमुपकरिष्यतीदं शुल्बतत्वजिज्ञासूनाम्, । व्याख्यात्रात्र विषयस्पष्टीकरणाय अस्योपपत्तिः, अत्रायं विशेषः अत्रायमाशय इत्यादि प्रकरणमाध्यमेन सूत्रसारः सम्यगुद्घाटितो वर्तते । एधन्तामस्याभिनवस्य भविष्णोः प्रवृत्तयः सदैव शास्त्रालोडनदिशेति नितरां कामये ।

डॉ. मण्डन मिश्रः
कुलपतिः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
कटवारिया सराय, नई दिल्ली

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

FOREWORD

Among the six doctrines, commonly comprehended under the title of Vedāṅgas, the Kalpa (ceremonial) is considered necessary for employing the Veda at sacrifices. As a member of Kalpa treatise the Śulba-sūtras are intended to lay down the rules of demarcation of the various sacrificial altars, pandals and places for sacred fire etc. provided according to directions quoted in the Vedas and Śrauta-sūtras for performing the various rituals.

The Geometrical procedure, required for constructing the various forms of altars, which are either a square, a triangle, a trapezium or a circle in shape and the construction of various cities, which have the shape of birds with spread out wings and tails etc. are given only in the Śulba-sūtras.

The rich tradition of Ancient Hindu Mathematics and the wisdom of our fore-fathers, have exclusively reflected in the Śulba-treatise. In India, the steps leading to the growth and development of the theorem of the hypotenuse, which is unfortunately later known as the "Theorem of Pythagoras" had been established firstly by our sages. As the period of the development of Vedic Geometry is prior to the era of Pythagoras, the question of Greek influence in this case does not arise. The other important items focused by the Śulba-treatise are :-

(1) The circle can be divided into any number of equal parts, such as 8, 16, 32 and 64 by drawing the diameters.

(2) A triangle can be divided into a number of equal and similar parts by dividing the sides into an equal number of parts and then joining the points of division. This is used in the construction of प्रउग and उभयतःप्रउग cities, by moulding bricks of that shape.

(3) The diagonals of a rectangle or a square, bisect one another and divide the figure into four parts. Here, in the case of a rectangle, the two and two opposite parts (triangles) are similar and equal to one another. The four triangles so formed are all equal in area.

(4) To inscribe a square as large as possible in a circle by joining the ends of diameters, situated on the circumference

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

of a circle. The diameters are at rt. angles to one another.

(5) The value of $\sqrt{2}$ etc.

The present edition of Kātyāyana Śulba-sūtra consists of the text with the Bhāṣya written by the editor.

The editor, Dr. Ramesh Chandra Dash Sharma has carefully edited the text and composed its Bhāṣya providing diagrams, wherever necessary and giving its exposition in Sanskrit. Some intricate words have also been explained by the editor.

I hope, this edition of Kātyāyana Śulba-sūtra will be most helpful to the scholars engaged in vedic studies. I congratulate Dr. Dash on this fine work.

YUGAL KISHOR MISHRA
Professor and Head
Deptt. of Vedic Studies
Sampurnanand Sanskrit University
VARANASI

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुरोवाक्

वैदिकवाङ्मये श्रौतयज्ञानां महत्वं सर्वोपरिवर्तते । श्रौतयज्ञीय कुण्डमण्डपेष्टकादीनां निर्माणार्थं शुल्वसूत्राणां प्रणयनमभूत् । पुरा तु ऋषीणां समक्षं समस्तं विधिनिषेधजातं प्रत्यक्षमासीत् । एवमेव यज्ञीयविहारप्रमाणान्यपि । परन्तु त्रिकालदर्शिभिस्तैर्महर्षिभिर्भाविप्रयोक्तृभ्यः विहरणजातं दुर्बोधं स्यादिति कृत्वा श्रौतानुसारं शुल्वसूत्राणि प्रणीतानि । प्रतिवेदं शुल्वसूत्रमस्ति । कतिपयशाखानां सूत्राणि नोपलभ्यन्ते कतिपयानाञ्चोपलभ्यन्ते । समुपलब्धेषु कात्यायनबौधायनापस्तम्बेति त्रीण्येवसूत्राणि विशेषेण गण्यन्ते । कात्यायन शुल्वसूत्रस्य व्याख्यातारो बहवो भवेयुः, परन्तु साम्प्रतं कर्कमहीधर-विद्याधरगौडकृतभाष्याण्येवोपलभ्यन्ते । तदानीं प्रयोगबाहुल्यात् सूत्राणि विस्तृतव्याख्यासापेक्षाणि नासन्निति कर्कभाष्यावलोकनेन ज्ञायते । ततो महीधर समये क्रमशः प्रयोगह्रासाद् व्याख्याविषयस्पष्टीकरणाय परिवर्धिता तत्पश्चाद्भूयः प्रयोगविरलाद् विद्याधरगौडपादैः व्याख्यया उपपत्तिरपि कानिचित्सूत्राणां प्रदर्शिता । अथ शुल्वसूत्राणां प्रायः प्रयोगाभावात्सूत्रोक्तविषयः केवलं व्याख्याश्रयेणोपपत्ति विरहेण च नितरां दुर्बोधः प्रतीयते । अतो ऽहं स्व. डा. श्रीगोपालचन्द्र मिश्रमहोदयेभ्यो ब्रह्मचारी श्रीविन्ध्येश्वरीप्रसाद शुक्लमहोदये भ्यश्च पारम्परिकं शौल्वीयविहरणज्ञानमधिगत्य ग्रन्थस्यास्य सोपपत्तिके व्याख्याने प्रवृत्तः ।

अधुनातनसमये शुल्वसूत्राणामर्थावबोधाय यादृशः प्रयत्नः मया कृतोऽसौ विदुषां समक्षं प्रस्तूयते ।

"कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः ।
वचो विन्यास वैचित्र्यमात्रमत्रावधार्यताम् ।।"

इति वचनानुरूपं नात्र मया कश्चन नवीनोऽर्थ उद्भावितः, अपि तु य एवार्थः पूर्वाचार्यैः प्रतिपादितो यश्च प्रयोगप्रकारः सम्प्रदायप्रसिद्ध आसीदसावेव प्रतिपादितः । कुत्रचित्तर्कैर्विषयस्पष्टतायै प्रयासः कृतः । शुल्वसूत्रव्याख्यानानि तावद्विहरणपर्यवसन्नानि भवन्तीति कृत्वा विहरणापेक्षितानां सूत्राणां विहरणं मया यथासम्भवं प्रदर्शितम् । यन्मया प्रतिपादितं तदेवालमितिनाहं मन्ये, इतोऽप्यग्रेकार्यं भवितुमर्हति ।

प्रथमन्तावत्पण्डितमण्डलमण्डितानां विद्वत्सुश्रद्दधतां गुणाभिरामाणामस्मत्कुलपतिमहोदयानां डॉ. श्रीमण्डन मिश्राणां चरणयोः स्वकीयं कृतज्ञतां ज्ञापयामि, यत्ते स्वकीयाशीर्वचनं प्रदाय मामनुगृहीतवन्त इति ।

अस्मद् गुरुचरणानां स्व. डा. श्रीगोपालचन्द्रमिश्रमहोदयानां ज्येष्ठपुत्राणां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

डॉ. युगलकिशोरमिश्रमहोदयानां साम्प्रतं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदविभागाध्यक्षपदमलङ्कुर्वतां गुरुवर्याणां सन्मार्गनिर्देशो ग्रन्थस्यास्य सामग्रं विभर्त्तीति तेभ्यः स्वकीय कृतज्ञतामहर्निशं पुटाञ्जलिः ज्ञापये ।

श्रौतस्मार्तविद्यावरिष्ठाः ज्ञानश्रेष्ठास्तपोनिष्ठाः कुलज्येष्ठाः श्रीमन्तो विन्ध्येश्वरीप्रसादशुक्लमहोदयाः ब्रह्मचारिपादाः ग्रन्थग्रन्थिच्छेदने यन्मामुपकृतवन्तस्तदर्थं तच्चरणयोः श्रद्धावनतशिरसा प्रणमामि । डॉ. श्रीकिशोरमहोदयाः विविधप्रकरणेषु सन्मार्गनिर्देशं कृतवन्तोऽतस्तेभ्योऽप्यहं हार्दिकीं कृतज्ञतां ज्ञापये ।

नाहं तान्सुहृद्वरान् विस्मरामि ये खलु मम सततोत्साहं वर्धिवन्तो ऽतस्तेभ्योऽपि स्व कृतज्ञतां ज्ञापयामि ।

किमधिकं गृहजञ्जालेषुव्यापृतापि जगन्नियन्तुश्चरणयोर्दत्तचित्ता मे पत्नी श्रीमती अम्बिकादाश सदैवसारस्वतसपर्यायां सहयोगिन्यभवदतस्तां नाहं धन्यवादैरेव सभाजयामि, अपि त्वभिन्नत्वात्सदैव मनसा सत्करोति । अथ पित्रोश्चरणयोर्भूयो भूयो नत्वा सर्वं तदाशीर्वादादितिस्मृत्वा विरमामि ।

ग्रन्थेऽस्मिन् मुद्रणसौविध्यर्थं क्वचिच्चित्राणां मानपरिवर्तनं जातम् । अतस्तज्जन्यदोषः कुत्रचित्स्याच्चेद्विद्वद्भिः क्षन्तव्यः । अथान्यत्रापि यदि कुत्रचित्त्रुटिः सम्भवेत्तर्हि तत्सर्वं यथायथं संशोध्य पठनीयम् । सूचनीयश्चाहं येनाग्रिमसंस्करणे सर्वं त्रुटिजातं निराकुर्याम् ।

अन्ते न्यस्तेर्ष्येभ्यो विद्वज्जनेभ्यः प्रार्थये यत्- येगुणास्ते ऋषीणां हि दोषा मे वुद्धि सम्भवा इति मत्वा सर्वं समाधास्यन्तीति ।

विदुषामाश्रवः
रमेश चन्द्र दाश शर्मा

सम्वत् 2050 चैत शुक्ल
श्री रामनवमी
1.4.1993

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विषयानुक्रमणिका

सम्मतिः - डॉ० मण्डन मिश्र — v

FOREWORD - Prof. Yugal Kishore Mishra — vii

पुरोवाक् — ix

भूमिका — 1-26

- वैदिकवाङ्मये शास्त्रविकाशक्रमः,। — 1
- ग्राकर्तुः कालः कृतयश्च । — 5
- शुल्वसूत्रमपिकल्पसूत्रमेव । — 10
- शुल्वसूत्रोपयोगः। — 11
- शुल्वसूत्रस्य लौकिकं प्रयोजनम् । — 12
- वैतानिकं रहस्यम् — 13
- कण्डिकागतविषयपरिचयः। — 15
- कात्यायनशुल्वसूत्रस्य शुल्वान्तरैः सह विषय समीक्षा । — 16
- अत्राविष्कृतविषयोपक्रमः । — 18
- इष्टका परिचयः । — 24

प्रथमा कण्डिका — 27-89

- मङ्गलाचरणम् । — 27
- ग्रन्थारम्भ प्रतिज्ञा । — 27
- अनुबन्ध चतुष्टय प्रतिपादनम् । — 28
- दिक् साधनम् । — 29
- द्वितीयतृतीय सूत्रयोरुपपत्तिः । — 38
- क्षेत्रसाधनपरिभाषा । — 39
- प्रमाणरज्ज्वां चिन्हानि । — 39
- विहारसाधनम् । — 40
- निरञ्छनोपपादनम् । — 42
- निरञ्छनलक्षणपरीक्षा । — 50
- अपरिमितपदार्थविवेचनम् । — 60
- दक्षिणाग्निसाधनम् । — 62
- उत्करसाधनम् । — 67
- द्वादशप्रक्रमपक्षेदर्शपूर्णमासवेदिनिर्माणप्रकारः । — 69
- सङ्ग्रहनिर्माणप्रकारः । — 74

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अष्टप्रक्रमपक्षे विहरणप्रकारः ।	76
दक्षिणाग्न्युत्कर विहरणे पक्षान्तरम् ।	78
दर्शवेदिनिर्माणेमतान्तराणि ।	82
द्वितीया कण्डिका	**90-105**
रथप्रमाणम् ।	90
ईषाप्रमाणम् ।	90
अक्षप्रमाणम् ।	90
युगप्रमाणम् ।	91
शम्याप्रमाणम् ।	91
पितृमेधवेदि निरूपणम्	96
रज्जुसंज्ञाः ।	98
दशपद्यायाः वेदेः करणी	98
चत्वारिंशत्पद्यायाः वेदेः करणी ।	99
क्षेत्रफल ज्ञानप्रकारः ।	99
क्षेत्रद्वैगुण्यंप्रकारः ।	100
त्रिकरणीसाधनप्रकारः ।	101
तृतीयकरण्याः प्रयोजनम् ।	102
नवधा विभागप्रकारः ।	103
तृतीयकरणीस्वरूपम् ।	104
त्रिकरण्याः प्रयोजनम् ।	104
तुल्यप्रमाणसमचतुरस्राणां समसनप्रकारः ।	104
तृतीया कण्डिका	**106-124**
महतोह्रस्वक्षेत्रस्य पृथक्करणप्रकारः ।	106
दीर्घस्य समचतुरस्रीकरणम् ।	108
अतिदीर्घस्य चतुरस्रीकरणम् ।	110
सम-विषमयो र्दीर्घचतुरस्रीकरणम्	112
अनादेशे चतुरस्रस्य ग्राह्यता	119
करणीक्षेत्रफलनिरूपणम् ।	120
क्षेत्रफलनिर्णय सिद्धान्तः ।	120
क्षेत्रफलप्रदर्शने नियमविशेषः ।	120
चतुरस्रस्यमण्डलीकरणम् ।	122
मण्डलस्य चतुरस्री करणम् ।	124
चतुर्थी कण्डिका	**125-146**
चितिनामानि ।	125
सुपर्णचितेः स्वरूपोपत्तिः ।	131
द्रोणचितिनिर्माण प्रकारः ।	133
वृन्तनिर्माण प्रकारः ।	134

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मण्डलाकारचितेर्निर्माणम्	136
प्रउगचितिसाधनम् ।	139
उभयतः प्रउगसाधनम् ।	139
प्रउगस्य चतुरस्त्रीकरणम्	140
उभयतः प्रउगस्य चतुरस्त्रीकरणोपायः ।	142
पंचकर्णानां समासः ।	143
पञ्चमी कण्डिका	**147-161**
पुरुष वृद्धिकथनम् ।	147
अश्वमेधचयने विशेषः।	148
एकविंशतिविधस्याग्नेः कथनम् ।	150
पुरुषवर्धनप्रकारः।	151
पक्षिप्तपुरुषमान परीक्षा ।	152
इष्टका मानम् ।	154
पुरुषवर्धने द्वितीय प्रकारः ।	156
पुरुषवर्धने तृतीयः प्रकारः ।	158
अधिमानस्य पुरुषे प्रक्षेपः ।	160
षष्ठी कण्डिका	**162-178**
वेदीष्टका वृद्धि कथनम् ।	162
वेदिवर्धन प्रकारः ।	162
द्वितीयचयने प्रक्रममानम् ।	167
एकशत विधेऽग्नौ प्रक्रमः ।	171
अन्तः पात्यगार्हपत्ययोर्वृद्धिर्न ।	171
एकाधिकानां समचतुरस्त्राणां समासः ।	172
यूपैकादशिन्यां वेदिवर्धन प्रकारः ।	174
यूपैकादशिन्यां प्रक्रममानम् ।	175
यूपविन्यासे सिद्धान्तः ।	176
यूपनिखननेमतम् ।	177
सप्तमी कण्डिका	**179-190**
शुल्बश्लोकाः ।	179
सङ्कुलक्षणम् ।	181
मुद्गरलक्षणम् ।	181
रज्जुलक्षणम् ।	182
सौत्रामणीवेदिमानम् ।	182
खरस्वरूपम् ।	183
इष्टकानिर्माणे नियमविशेषः ।	185
नक्षत्रवेधेन प्राचीसाधनम् ।	187

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अग्न्याधाने सर्करासंख्या ।	187
दक्षिणाग्निविहरणम् ।	187
शङ्कुसमीकरणम् ।	188
प्रकृति वेदिः ।	188
संग्रहविधिः ।	189
पशुवेदिः ।	189
शालामानम् ।	189
सौमिकीवेदिः ।	190
परिशिष्टो भागः	**191-258**
प्रथमा कण्डिका ।	191
द्वितीया ,,	197
तृतीया ,,	204
चतुर्थी ,,	209
पञ्चमी ,,	212
षष्ठी ,,	215
सप्तमी ,,	219
अष्ठमी ,,	221
नवमी ,,	223
दशमी ,,	229
यूपलक्षणम् ।	234
वैदिक वाङ्मयस्यसंक्षिप्तविवरणम् ।	236
ऋग्वेदखण्डः ।	236
यजुर्वेदखण्डः ।	237
सामवेद खण्डः ।	239
अथर्ववेदखण्डः ।	240
शुल्वप्रयुक्तपारिभाषिकशब्दानां विवरणम् ।	241
पारिभाषिकशब्दानामर्थः ।	242
मानवाचकशब्दानामङ्गुलैर्विवरणम् ।	242
इष्टिवितान मानचक्रम् ।	244
मानेषु वैमत्यम् ।	245
कात्यायनशुल्वसूत्रस्य सूत्रान्तरेषुप्रभावः ।	246
ग्रन्थसन्दर्भाणां संक्षिप्तनामावलिः ।	250
शुल्वसूत्राणांश्लोकानाञ्चाकारनुक्रमणिका ।	253

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भूमिका

ॐ नमः श्रुतिभ्यः श्रुतिविद्यासम्प्रदायकर्तृभ्यः श्रुतिर्षिभ्यो नमो गुरुभ्यः ।।

त्रयीसुसंवित्तिविवेक निर्मलाः
समग्रनिः श्रेयससिद्धिहेतवः ।
समस्तशास्त्रार्थसतत्त्वबोधकाः ।।
जयन्ति कात्यायन पादपांसवः ।।

वैदिक्वाङ्मयविषये समुपलब्धानां शास्त्रवचनानां[1] सम्यगवगाहने सति पुराएक एव वेदआसीदित्येवं निश्चीयते । कलावल्पायुषो मन्दधियोमनुष्या भविष्यन्तीति प्रेक्ष्य द्वापरे भगवान् वेदव्यासावतीर्य समग्रं वैदिक वाङ्मयं चतुर्धा व्यभजत् । तस्मादन्वर्थैव व्यसनात्तस्य व्यासोनामाभूत् । ततः पैलवैशम्पायन जैमिनिसुमन्त्वादिभ्यः शिष्येभ्यः क्रमेण ऋग्जुस्सामाथर्वछन्दाँसि पाठयामास । ते च स्वशिष्येभ्यः पाठयामासुः । एवं परम्परया क्रमेण सहस्रशाखो वेदो जातः ।

ननु व्यासेन कथं समग्रं वैदिकवाङ्मयं पञ्चधा न विभाजितमितिचेदत्रोच्यते- श्रौतयज्ञेषु मुख्यतः कर्मचतुष्टयस्य[2] प्राधान्यात् चतुर्धावेदविभागोऽदोषः

---

1. श्रीमद्भा 12.6.44-60
2. ऋचान्त्वः पोषमास्ते पुपुष्वान् गायत्रन्त्वो गायति शक्वरीषु ।
ब्रह्मात्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उत्वः ।।
(ऋ.सं. 8/2/24/5)
बृहस्ततेरार्षम् ऋत्विक्कर्मणां विनियोगमनयार्चाऽऽचष्टे"। ऋचां त्व इति । य एते चत्वारो महर्त्विजः एतेषां त्वः एकः किमेकः करोति ? ऋचां पोषं पुष्टि पपुष्वान् पुनः पुनः भृशं वा देवता याथात्म्यानुचिन्तनसन्तानमर्मस्थान करणानुप्रदानवतीर्यथाकालमृचोऽधीयानः आस्ते स हि तासां पोषः, कतमः ? एकः एतत्कर्म कुर्वन्नास्ते इति-होता, एतत्तावदृगध्ययनकर्म, तस्मिन् होतरि विनियुक्तम्, उक्तं च " ..यदृ चैव होत्रं क्रियते" इति (ऐ.ब्रा. 5/5/8) गायत्रंत्व ? गायत्रमेकोगायति शक्वरीषु ऋक्षु । कतमः ? उद्गाता तस्मिन्नप्येतत्सामगानकर्म विनियुक्तम् । उक्तं च- साम्नोद्गीथम्" इति (ऐ.ब्रा.5/5/8) । ब्रह्मात्वः ब्रह्मा नाम एक ऋत्विक् जाते प्रायश्चित्ते विद्यांवदति । विद्यात्रयहेतुत्वादात्मनो विद्यां विज्ञानं वदतीतरेभ्यः ऋत्विग्भ्यः इदमत्र कुरुतेति । तत्रापि ह्येतत्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कर्मचतुष्टयञ्च हौत्रमाध्वर्यवोद्गात्रब्रह्मत्वमिति । हौत्रमृग्वेदस्य, आध्वर्यवंयजुर्वेदस्य औद्गात्रं सामवेदस्य, ब्रह्मत्वं चाथर्ववेदस्येति । एतदुक्तं यास्काचार्येण होतर्गर्चनी, गायत्रमेकोगायति, शक्वरीषूद्गाता । ब्रह्मासर्वविद्यः[1] "अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं कामयत " इति ।

यज्ञेविद्यते सर्वेषां प्रयोजनमत एव वेदाः परस्परसम्बद्धाः तत्त्वतो ऽभिन्नाः । तत्रापि विद्यते सम्प्रदाय द्वयम् । साक्षाद् ब्रह्मणः सम्प्राप्तोव्यासेन महर्षिणा शिष्येषु वितरितो वेदो यातयामत्वेन विख्यातो ब्रह्मसम्प्रदायान्तर्गतः, अपरश्च श्रीमतायोगीश्वर याज्ञवल्क्येन प्रवर्तितः[2] स चादित्यसम्प्रदायो योगीश्वरेण तपसासम्पादितः सूर्याराधनाऽऽदित्यानुग्रहेंण यातयामत्वेन विख्यातः । आदित्यसम्प्रदायान्तर्गतो यजुर्वेदः शुक्लयजुर्वेदः, अन्यश्च कृष्णयजुर्वेदो- ब्रह्मसम्प्रदायार्न्तभूतः ।

शुक्लयजुर्वेदस्य पंचदशशाखाः भवन्ति । तद्यथा- वाजसनेया नाम-पंचदशभेदा भवन्ति । जाबाला बौधायना, कण्वा माध्यन्दिनेयाः, शाफेया, स्तापनीयाः, कपोला, पौण्ड्रवत्सा, आवटिकाः परमावटिकाः, पाराशारा, वैणेया, वैधेया, अद्धाबौधेयाश्चेति[3] ।

आसां सर्वासां शाखानां कृते एकमेवकात्यायन श्रौतसूत्रम् । एतस्मिन्विषये शुक्लयजुश्शाखीयप्रातिशाख्यस्यान्यतमो भाष्यकारोऽनन्तदेवः स्वभाष्ये सुस्पष्टमभिलिखति- माध्यन्दिनीयमेवेति[4] न नियमः । किन्तु कण्वादिपंचदशशाखानुगतं यतस्तासु शाखासु नियमः स्वल्पभेददर्शनेन । तल्लक्षणस्यासकृदुक्त्या बहूपकारार्थ तन्त्रेणाचार्यप्रवृत्तेः । तथा पंचदशसु शाखासु एकमेव कात्यायनश्रौतसूत्रमिति । अपि च शुक्लयजुषं पंचदशशाखीयानां[5] पारस्करापरनामधेय कात्यायन चरणैः प्रणीतं पारस्करगृह्यसूत्रं कात्यायन श्रौतसूत्रं

कर्मविनियुक्तम् । स पुनरेष सर्वविद्यः सर्वविज्ञानस्तथाविधो ह्यसावधिकारी त्रयीविद्यासंयुक्तो येनासौ सर्वमेव वेदितुमर्हति । न ह्यसर्ववित् तमधिकारं शक्नुयान्निवर्तयितुम् । उक्तंच -- अथ केनब्रह्मत्वं क्रियत इति (ऐ.ब्रा. 5/5/8) यज्ञस्य मात्रा विमिमीत उत्वःएक इति । मीयत मानंकर्म, तन्मात्रेत्युच्यते या काचिदितिकर्तव्यता यज्ञस्य तां विमिमीतेऽध्वर्युः नानाप्रकारं करोतीत्यर्थः । (नि०रु 1/3/3.)

1. नि.रु. 1/3/3,
2. श्री०भा 12/6
3. च. व्यू. यजुर्वेदखण्डः,
4. वा.स. प्रा.शा., अनन्तभाष्ये ।।
5. उपोद्घातः, पृ. 17.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धर्मांशपूरकं यज्ञपार्श्वादि चैकमेव, न प्रतिशाखं पृथक्-पृथगिति श्रीधरशर्माणः लिखन्ति ।

ननु कस्तावच्छाखापदार्थ इति चेत् –

शाखा नाम वेदैकदेशः । यथा काण्डपर्वादिभिरवयवभूतैः प्रविभक्ताः वाल्मीकिमहाभारतादय स्तैः समस्ता एव वाल्मीकिमहाभारतमित्युच्यते न तु व्यस्ताः, एवं वेदाअपि सन्तु । यथा एकविंशतिशाखाभिः प्रविभक्तः ऋग्वेदः । तस्यैकविंशतिशाखाना मध्ययनेनैव ऋग्वेदाध्ययनं सम्पन्नं स्यात् ।एवं यजुर्वेदा-दीनामिति चेन्न । नात्र शाखाभेदो वेदावयववाची भवितुमर्हति । सर्वासमापि शाखानांशाखान्तरनैरपेक्ष्येण यावदपेक्षितार्थः समृद्धत्वात् । अत एव एकशाखाध्ययननेनापि एकस्य वेदस्य समग्राध्ययनं संजातमित्येवार्थावबोधयितुं स्वाध्यायोऽध्येतव्यः [1] इतीय श्रुतिरभिप्रवृत्ता ।

एवमेकैकवेदगताया एकैकस्याः शाखाया अध्ययनेनापि वेदाध्ययनं सुसम्पन्नं भवति । न हि कश्चिचदेकस्मिन् जन्मनि अनेकशाखाप्रभिन्नं एकं वेदमध्येतुं प्रभवेत् । अतो वस्तुत एकैवशाखा वेद इति निश्चीयते । अत एव "वेदानधीत्यवेदौ वा वेदं वापि यथा क्रममि " तिप्रोवाच मनुः।[2]

प्राचीन विदुषां मते अपौरुषेयो वेदः सोऽपि मन्त्रब्राह्मणात्मकः । परन्तु पुरा कल्पादिवेदाङ्गानीतरे सूत्रग्रन्थाः ग्रन्थान्तराश्च नासन् । एतस्मिन् विषये निरुक्तकारो यास्को वदति-"साक्षात्कृत धर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽ साक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः" एतेनेदमनुमीयते यत् – साक्षात्कृतो धर्मः यैस्ते साक्षात्कृत

---

1. अथब्रह्मयज्ञः । स्वाध्यायो वै ब्रह्मयज्ञस्तस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन उपभृच्चक्षुध्रर्वा मेधा स्रुवः सत्यमवभृथः स्वर्गो लोक उदगयनं यावन्तीं हवा इमां पृथिवीं वित्तेन पूर्णां ददन् लोकं जयति त्रिस्तावन्तं जयति भूयासं चाक्षय्यं य एवं विद्वान हरहः स्वाध्यायमधीयते तस्मात्स्वाध्यायोऽ ध्येतव्यः । (शा.ब्रा. 11/5/6/3)
2. अपि स-एकवेदगतानां सर्वासामपि शाखानां परस्परं साकांङ्क्षत्वमस्त्येव, नो चेत्कर्मणोऽसिद्धिः स्यात् । यथा दर्शपूर्णमासयागीयो मंत्रकदम्बको माध्यन्दिनशाखायां यो नासीत्सः "यस्ते प्राणः पशुषु प्रविष्टः आप्यायतां ध्रुवा हविषा, ततांसि तंतुरसि" इत्यादिः कण्वादिशाखात उपसंहृत्य पूरितः सूत्रकृता । एष न्याय इतरेषामपि कर्मणाम् । अत एव च "सर्वशाखा प्रत्याय्यैकं कर्म " इति जैमिन्यृषिणा शाखोपसंहारः सूत्रितः । तथा तत्तत्कल्पकारैः शाखोपसंहारं कृत्वैव स्व-स्वसूत्रजातं प्राणायि । तथा च ममाग्ने वर्चः (का.श्रौ.सू.2/3.) इत्यत्र सूत्रे कर्कोपाध्यायाः स्मरन्ति हि-पञ्चदश शाखोपनिबन्धनं कृतमाचार्येणेति । शाखाद्वयमधिकृत्य तात्पर्येणानुप्रवृत्त आचार्य इत्यादि स्पष्टं प्राचः यदाचाचार्यैः कल्पाः प्रणीतास्तदा तु शाखानां परस्परं नासाकाङ्क्षत्वं सम्पन्नम् । (श.ब्रा. क उपोद्धातः)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धर्माणः, यद्वा-साक्षात् दृष्टः स्वप्रतिविशिष्टेन तपसा त इमे साक्षात् कृतधर्माणः ऋषयः। तेषां समक्षं पदपदार्थादि सकलं विधिनिषेध प्रपंचजातं प्रत्यक्षमासीत् । अत एव साक्षात् कृतधर्माण ऋषय इत्युच्यन्ते स्म । ऋषिः पुनर्दर्शनात् । तेहि कर्मणो वैगुण्यजन्यानिष्टं प्रत्यक्षं ददर्शुः । अमुनाविधिना क्रियमाणे सति कर्मणो वैगुण्यं जायते, तेनामुकस्य हानिर्भवतीति प्रत्यक्षं पश्यन्ति स्म । अतस्ते ऋषयः त्रिकालदर्शिनो मन्त्रद्रष्टार आसन् । तस्मात्तेऽवरेभ्यो जनेभ्यः[1] प्रत्यक्षज्ञान रहितेभ्यः शास्त्रमाध्यमेनोपदेशं प्रादुः । अथ किञ्चित् कालं यावत् श्रवणमात्रेण धारणसक्षमाः मुनयस्तदुपदेशं श्रवणपरम्परया व्यवहारं चक्रुः । ततोऽर्वाचीना मन्दधियो मनुष्याःसमग्रं विधिनिषेधोपेतमुपदेशं धारयितुमात्मानं नालंमन्यमानाः लेखन्या पत्रादिषुग्रन्थयामासुः । अयमेवविषयः नरसिंहाचार्यै रेवं प्रतिपाद्यतेयत् "कालवशाच्च उपदेशधारणपाटवे ह्रासमुपेयुषि परमर्षिसूत्राणीतराणीव इमान्यपि व्याख्यासापेक्षाण्यासन् । ततश्च तैस्तैः यज्ञप्रक्रियानिष्णातैः स्वं स्वं सदुपदेशमालम्ब्य व्यव्रियन्त शुल्बसूत्राणि भाविभ्यो यज्ञानुतिष्ठासुभ्यः ।

ततो विकासक्रमेण तेषां श्रुतर्षीणां विचारवीचयोऽद्यास्माकं पुरः कात्यायनश्रौतसूत्र निरूक्तादि विविधशास्त्ररूपेण सर्वतः समुल्लसन्ति ।

---

1. जन्म-संस्कार-विद्यादेः शक्तेः स्वाध्याय-कर्मणोः ।
ह्रास-दर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ।
सम्प्रदायस्य -वेदस्य ह्रासोऽनुमीयताम् । कुतः? जन्मादेर्ह्रासिर्शनात् । प्रयोगश्च वेदादिसम्प्रदायोऽयमत्यन्तमुच्छिद्यते ह्रसमानत्वात्, प्रदीपवत् । स्वरूप सिद्ध्युद्धारायाह-जन्मेति । पूर्वं मानस्यः प्रजाः । ततः पुत्रमात्रार्थि प्रयुक्त मैथुनजाः सम्प्रति सम्भोग-कामिप्रवृत्त्यावर्जितजन्मानः इति जन्म ह्रासः । पूर्वं चरुप्रभृषितु संस्कारः, ततो गर्भे, ततो जननान्तरं, इदानीं तु कथञ्चिदिति संस्कारह्रासः । पूर्वं सहस्रशाखस्य चतुर्वेदस्याध्ययनं, ततःएकस्याः शाखायाः इत्यादिक्रमेण विद्याह्रासः । विद्यादेरित्यादिना वृत्तिधर्मादिसंग्रहः । पूर्वमुञ्छशिलावृत्तयः, ततोऽयाचितवृत्तयः, ततः कृष्यादिवृत्तयः, ततः सेवावृत्तयः इति वृत्तिह्रासः । पूर्वं तपोज्ञान- यज्ञदानात्मकचतुष्पाद्धर्मः। ततस्त्रेतादौ एकैक ह्रासः। कलौतु विसंष्ठुलस्खलद्यानैकपादिति धर्मह्रासः। पूर्वं यज्ञशेषभुजस्ततोऽतिथिशेषभुजस्ततः स्वार्थसाधितभुजस्ततो भृत्यादिसहभुज इत्यादिधर्मह्रासः । स्वाध्यायस्याध्ययनस्य कर्मणोयागादेः शक्तेः सामर्थ्यस्यह्रासात् । अध्ययनशक्तेः कारणस्यह्रासात् विद्याशक्तेः कार्यस्य ह्रास इति पृथङ्निर्देशः । एवं च ब्रह्माण्डनाशे तदन्तर्गतप्राणिनां नाश इति प्रलयसिद्धिः ।। (न्या.कु.ज. 2 स्तवकस्य 3 कारिका)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ग्रन्थकर्तुः कालः कृतयश्च

महर्षिकात्यायन विषये सन्ति विद्वत्सु विप्रतिपत्तयः । शुक्लयजुर्वेदस्य श्रौतसूत्रं महर्षिणा कात्यायनेन प्रणीतम् । एवं कात्यायनः याज्ञवल्क्यस्यपुत्रः याज्ञवक्यस्य द्वितीयायां पत्न्यां कात्यायन्यां प्रसूतः । कात्यायन सुतं प्राप्यवेदसूत्रस्यकारकम्[1] इति स्कन्दपुराणे लिखितम् । यज्ञविद्यायां प्रवीण एष आसीत् यज्ञविचारमुखाः बहवोग्रन्थाः ग्रन्थिताः अनेन । न केवलं स्वशाखोपयुक्तानां ग्रन्थानां निर्माणं कृमनेन, अपितु परशाखोपयोगिनां ग्रन्थनामपि । अत एव पारक्यं करोतीति व्युत्पत्त्या अन्वर्थमेव तस्यनाम पारस्कर इति ख्यातिमगात् । बह्वृचाचर्यसिंहइत्यपरापदवीसंम्प्राप्तानेनान्यशाखासुग्रन्थ प्रणयनात् । ब्रह्वृचाचार्यसिंहेन कात्यायनमहर्षिणा इति ऋक्सर्वानुक्रमभाष्येषड्गुरुशिष्यः ।[2] आवश्वालायन सर्वानुक्रमभाष्येऽस्योल्लेखो दरीदृश्यते । "एकोहि शौनकाचार्यशिष्योभगवान् कात्यायनः[3]" अनेन कात्यायनमहर्षिणा वटनगर क्षेत्रे वास्तुपदं नामतीर्थ महागणपति पीठमनयोर्द्वयोः संस्थापनं कृतमिति स्कन्दपुरोणेवर्णितमस्ति ।

एकस्तावत्कात्यायनः येन शुक्लयजुर्वेदान्तर्गता कात्यायनीया शाखा प्रवर्तिता । स च श्रुतर्षिः वेदशाखा प्रवर्तकः । अपरश्चयाज्ञवल्क्यसुतो महर्षिकात्यायनः सूत्रकारः । अयमेवाष्टदशपरिशिष्टानां प्रणेता । एष विश्वामित्रगणन्तर्भूतः कतगणान्तर्गतस्तस्य प्रवराः[4] वैश्वामित्र-कात्यकैलेति विद्यन्ते, सोहं कौशिकपक्षः शिष्यः इति तेन स्वयमेवाभिहितं तृतीये प्रतिज्ञासूत्रे परिशिष्टे । शाखा प्रवर्तककात्यानस्तु-अंगिरागणान्तर्भूतः[5] कपिगणान्तर्गतस्तस्य प्रवराः-

---

1. का.प.द., भूमिका, पृ. 2.
2. का.प.द. भूमिका, पृ. 2.
3. का.प.द. भूमिका, पृ. 2.
4. औदुम्बरायणि शौशिरि टैटिकि रायणि ताक्ष्याणि वेलायनि वेदायनि गोदायनि मोदायनि चोदायनि गांगायनि कात्यायनि शालकंयनि स्तोकायनि तैकायनि मौजायनि करीरामि लानकिकालिरावषरातकि मौजहायनाः कताः ।
   इत्येषामविवाह स्तेषां त्र्यर्षेयः प्रवरो भवति । विश्वामित्रकात्य कैलेति होता । विश्वामित्रवत् कातवत् किलवदित्यध्वर्युः ।। 15 ।।
   (का.प.द., प्रवराध्यायः)
5. अथां गिरसोभारद्वाजाः कपयः-
   कुशायरि पंचजलि कलसि सासवि संश्रयि जलसंवि सावकश्यायन्यामौलितंकि विदिदण्डि सलिसालि शक्ति भूवसि सौजटि राजकेशि भोजसि कपिस्तर स्वस्तिर जलन्धव कुशितक विन्दु ध्वंस्त कण्व वान्यायन मात्स्यायन तैत्तिरायण वेतलयनै तिशायनीनां कारीरयौ भाजिनस्तरस्विनस्ताण्डिनः कारयाः कपरयः शारकणाः इत्येषामविवाहस्तेषां त्र्यर्षेयः प्रवरो भवति । आंगिरसा महीयौ वोरुक्ष्येति हांता । अंगिरोवदामही[illegible] ।। 8 ।। (का.प.द., प्रवराध्यायः)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आंगिरसबार्हस्पत्य कापेय इति विद्यन्ते ।

तृतीयस्तुकात्यायनः पाणिनीयसूत्रेषुयेनवृत्तिर्विरचितावर्तिकमिति नाम्नाविख्याता । अस्योल्लेखः कथासरित्सागरे वररुचिरित्यनेन नाम्ना सम्प्राप्यते । तत्र विद्यते कथानकं सौमदत्ताद्वसुदत्तायां सम्प्राप्त एष शंकरगणस्य पुष्पदन्तस्यावतार इति । श्रुतधर इत्यपरं नाम तत्रोल्लिखितं च । एष वररुचिरथ च कात्यायनसुतो वररुचिरनयोर्मध्ये विद्यते व्यक्तिभेदः । वार्त्तिककारकात्यायनो भृगुगणान्तर्गतो वात्स्यायनगणान्तर्गतोऽस्य प्रवराः भार्गवच्यवनाप्नवानेत्यादयो विद्यन्ते ।[1] एतेन-परिशिष्टकारः कात्यायनः शाखाप्रवर्तकादथ च वार्तिककारादन्य एवेति स्पष्टम् ।

अस्यशुक्लयजुर्वेदीय श्रौतसूत्रप्रणेतुः कात्यायनस्य कालनिर्णयेऽपीदमित्थं वक्तुं न शक्यते । तथापि जैमिनीय सूत्रग्रन्थस्य तथा कात्यायनश्रौतसूत्रग्रन्थ-स्यचावलोकनेनेदमनुमीयते यदनयोः जनिः स्वल्पव्यवधानेनाभूदिति ।

तदेतयोः रचनाशैल्या अनुमीयते । तद्यथा--

क्रमसं.	कात्यायनश्रौतसूत्राणि	क्रमसं.	जैमिनिसूत्राणि
1.	रथकरस्याधाने 1/1/8.	1.	वचनाद्रथकारस्य 6.1.44.
2.	विष्णुर्वामावास्यायां होत्राम्नानात् 3/3/24.	2.	विष्णुर्वास्याद्धौत्राम्नानात् । . 10/8/53
3.	अर्हगणेसुब्रह्मण्यायाः सर्वोप लक्षणं प्रकृतिवत् 1/7/6	3.	सुत्यविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयात् । 1/4/ 28.
4.	परार्थेष्वेकः कृतत्वान् 12/1/14	4.	-परार्थेष्वेकः 12/4/ 32.
5.	अर्थद्रष्ययोर्विरोधेऽर्थसामान्यं तत्परत्वात् ।	5.	अर्थद्रव्ययो विरोधेऽर्थः 1/3/39.
6.	चैत्र्यानन्तर्यात् 13/1/5.	6.	आनन्तर्यात्तु चैत्रीस्यात् 6/5/31.

1. कातीयपरिशिष्टदशकमित्यस्य ग्रन्थस्य भूमिकायां श्रीधराशास्त्रिण एवं लिखिन्ति परन्त्वस्य पाठः प्रवराध्याये नोपलभ्यते । (का.प.द. भूमिका, पृ.3) एतेनेद मनुमातुं शक्यते यत् -तस्यभार्गवच्यावनादयः प्रवराः अतोऽयं कात्यायनः नूनं वात्स्यायनगणान्तर्गतः । एवमेव अंगिरसोभारद्वाजगणान्तर्गत कपिगणे कात्यायन नामालाभेऽपि तस्य प्रवरसाम्यत्वदर्शनात् सोऽपि कपिगणान्तर्ग एव ।
प्रत्येकेषु गणेषु ये खलु मन्त्र द्रष्टारः सन्ति तेषामेव नामानि प्रवरेषु पठ्यन्ते । प्रवरशब्दस्य विग्रहो यथा प्रकृष्टाश्चतेवराः प्रवरा, अर्थात् गणेषु श्रेष्ठतमाः मन्त्रदर्शनात् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्रमसं.	कात्यायनश्रौतसूत्राणि	क्रमसं.	जैमिनिसूत्राणि
7.	माघीवाक्रयश्रुतेः 12/7/8.	7.	माघीवैकाष्टका श्रुतेः 6/5/32
8.	छागंमंत्राम्नानात् 6/3/1	8.	-छागोमंत्रवर्णात् 6/8/31.
9.	प्रकृतेर्वा नामत्वात् 5/4/5.	9.	प्रकृतंवानामत्वात् 7/ 3/21.
10.	विषयेलौकिकमयुक्तसत्वात् 4/3/7	10.	विषयेलौकिकः स्यात् 7/3/30.
11.	दध्नः संघातात् 4/3/12.	11.	दधिसंघातसामान्यात् 8/2/21.
12.	द्वादशाहः सत्रमहीनश्च	12.	सत्रमहीनश्चद्वादशाहः 8/2/24.
13.	होता वावचन-मन्त्रवर्णकारणेभ्यः : 9/11/12	13.	होतावा मन्त्रवर्णाद्वचनाच्चा कर णानुपूर्वाच्च 3/5/37-39.
14.	उपगादर्शनाच्च 6/7/3.	14.	उपगाश्चलिंगदर्शनात् 2/7/30.
15.	स तद्धर्मा कर्मयोगात् 1/6/12.	15.	सतद्धर्मा स्यात्कर्मसंयोगात् 6/3/26.
16.	कालान्तरेऽर्थवत्वंस्यात् 1/8/6.	16.	कालान्तरेऽर्थवत्त्वंस्यात् 12/3/5.

अथापिवहुत्र अर्थसाम्यं दृश्यते । तद्यथा-

1.	पशोःसन्नाय्यस्यतदुक्तम् 4/3/14.	1.	सान्नाय्यं वाततत्प्रभवत्वात् 8/2/13.
2.	हिरण्यगर्भइत्यृचास्रुवाघारः 16/2/3	2.	हिरण्यगर्भः पूर्वस्यमंत्रलिंगात् 10/3/13.
3.	नित्यानुवादोऽनुयाजप्रतिषेधः 7/4/26	3.	नित्यानुवादो वा कर्मणः स्यात् 10/7/39.

एवं बहूनि सूत्राणि कात्यायनस्य श्रौतसूत्रार्थानुवादकानि सन्ति । तानि तत एवावगन्तव्यानि ।

यथा कात्यायनेन पूर्व विचारशबलितानि सूत्राणि प्रथमं विरचितान्यथ विचारेण सिद्धं विषयमात्रमवलम्ब्य तदनुष्ठान क्रममात्रबोधनार्थं विचाररहितानि सूत्राणि रचितानि तथैव जैमिरिनरपि निरमायि । अतः कस्तावत्प्राचीनः कश्चार्वाचीन इति सम्यक् न निश्चीयते ।

अर्थ गम्भीर रहितानि बौधायनापस्तम्बादिसूत्राणि नूनमर्वाचीनानीति । आपस्तम्बस्य कालो विक्रमसम्बत्सरात्पूर्व दशमशताब्दी इति आपस्तम्बगृह्यसूत्र भूमिकां काशीचौखम्बामुद्रितायां मीमांसा केसरिभिः श्रीचिन्नस्वामिशास्त्रिभिः युक्त्या साधितम् ।

ततः पूर्वकालिकेनानेन वैक्रमात्संवत्सरात् पूर्वमेकादशशताब्दीगतेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वादशशताब्दीगतेन वा भाव्यमितिप्रतिभाति । यद्येवमस्मद् वार्तिकप्रणेता भगवान्कात्यायनोऽन्य एवेति बलादायाति वार्तिककारोऽयं वैक्रमात्पूर्वं चतुर्थ्यां पंचम्यां वा शताब्द्यामासीदिति निर्णीतं विमर्शकैः भण्डारकर विल्वलकर इत्यादिभिः । अतो वैक्रमाब्दात् पूर्व मेकादशशताब्दीतेनास्मत् सूत्रकारेण कथं-वररुचेः कात्यायनस्य चैकत्वं भवितुमर्हति । उक्त युक्त्या इतो वर्षसहस्रत्रितयात् पूर्वमस्मत् सूत्रकार आविर्बभूवेतिगम्यते । अस्यकृतयो यथा--

1 श्रौतसूत्रम्
2. श्राद्धकल्पः
3.पारस्करगृह्यसूत्रम्
4. ऋक्सर्वानुक्रमसूत्रम्
5. शुक्लयजुः सर्वानुक्रमसूत्रम्
6. यूपलक्षणम्
7. छागलक्षणम्
8. प्रतिज्ञासूत्रम्
9. अनुवाक संख्यासूत्रम्
10. - चरणव्यूहः
11. श्राद्धकल्पः
12. शुल्बम्
13 इष्टकापूरणम्
14. प्रवराध्यायः
15. मूल्याध्यायः
16. उञ्छशास्त्रम्
17. निगमाः
18. यज्ञपार्श्वे
19. हौत्रम्
20. प्रसवोत्थनम्
21. त्रिकण्डिकासूत्रम्[1]
22. कात्यायनस्मृतिः
23. उपग्रन्थसूत्रम्
24. प्रतिपदम्[2]
25. अनुपदम्[3]
26. यज्ञपार्श्वे
27. क्रतुसंख्या
28. भाषिकसूत्रम्[4]
29. मंत्रभ्रांतिहरसूत्रम्[5]
30.यजुर्विधानम्[6]
31. उक्थशास्त्रम्
32. कर्मप्रदीपः[7]
33. ऋग्यजुषम्[8]
34. त्रिकण्डिकासूत्रम्
35. परिसंख्या
36. गृह्यासंग्रहः
37. प्रतिहारसूत्रम्
38.स्वरव्यञ्जनम्
39. सावित्रम्
40. मन्त्रज्योति
41. मंत्रदीपिका

---

1. त्रिकण्डिकं माध्यान्हिकं नित्यस्नानविधिसूत्रम् ।
2. कात्यानप्रणीत औद्गातृसूत्रम् ।
3. कात्यायनप्रणीतं औद्गातृसूत्रम्
4. त्रिकण्डिकं ब्राह्मणाम्नायस्वरसन्धिप्रक्रियाबोधकं भाषिकसूत्रम् ।
5. सूत्रमन्त्रप्रकाशिका भ्रान्तिहरं वा त्रयोदशोत्तरशतश्लोकम् ।
6. मन्त्राम्नायाधीतमन्त्राणां फलोद्देशेन काम्यकर्मबोधकं षडध्यायं यजुर्विधानम् ।
7. छन्दोगपरिशिष्टं= त्रिप्रपाठकं कर्मप्रदीप इति नामान्तरम् ।
8. ऋचां यजुषां च विभागप्रर्दर्शकं ऋग्यजुषम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कात्यायनशुल्बसूत्रस्य प्राचीनत्वम्

सूत्रकारस्य प्राचीनत्वेसिद्धे तत्कृतिभूतस्य शूल्वसूत्रस्यापि प्राचीनत्वमनवद्यमेव। बौधायनशुल्वसूत्रस्य भूमिकायां वागीशशास्त्रिमहोदयैरभिहितं यत् "शुल्वसूत्राणामाद्य[१] प्रवर्तको नासीद् बौधायनः तस्मात्पूर्वं बहुभिराचार्यैः शुल्वसूत्राणि सूत्रितान्यासन्निति निर्विवादं शक्यते प्रतिपादयितुम्"। बौधयनेनेह शुल्वसूत्रे पूर्ववर्तिना बहूनामाचार्याणां मतानि "अपरं" "एकेषां" एके इत्यादिशब्दैः समुद्धतानि सन्ति। यथा चतुस्त्रिंशंत्तिलाः[२] पृथुसंश्लिष्टाइत्यपरम्, अथ [३] हैके. ....चिन्वते। चतुरस्त्रे[४] त्यकेषाम्।

अतः कात्यायनशुल्वसूत्रस्य प्राचीनत्वं निर्विवादमेव। वेदाटव्यांस्वच्छन्दमटन्तो भगवतः कात्यायनस्य शल्वसूत्रेऽयमपरोऽपि महान् गुणो विद्यते-यदत्र बौधायनवत् न कुत्रापि अपरे, एकेषामित्यादिपूर्वाचार्य परामर्शकं लिङ्गं मिलति। एतेन नूनं कात्यायनशुल्वसूत्रं प्राचीनतरमेव।

आपस्तम्बशुल्वसूत्रमपि कात्यायनतोऽर्वाचीनकालिकमिति तदीयमूलव्याख्याभ्यां निर्धारयितुं शक्यते। तद्यथा- अनेनाचार्येण पूर्वं मूले दिक्साधनं नैवसाधितम्। अत एव तद् व्याख्यायां करविन्दीयाधिपाः लिखन्ति यत् एवमन्यैरपि[५] बहुप्रकारं दिशां ग्रहणं तत्रतत्रोक्तमिति प्रसिद्धत्वादेवाचार्येणेह नोक्तम्। अपि च बहूनि सूत्राणि कात्यायनशुल्वसूत्राद् बौधायनाऽऽपस्तम्बाभ्यामनुकृतानि। तानि परिशिष्ट प्रदत्त तालिकातोऽवगन्तव्यानि।[६] विषयोपक्रमोप्याभ्यामाचार्याभ्यां प्रायोऽन्यैरप्याचार्यैः तथैवाङ्गीकृतं यथा कात्यायनेन स्वीकृतम्। अन्येषु शुल्वग्रन्थेषु इदमेव वैशिष्ट्यं यच्छाखान्तरीयसम्बद्धशुल्वग्रन्थत्वात् तत्तच्छाखीय श्रौतसूत्रोपर्णितवितानविकरानुतत्तद्वेदीनां विहरणोपयोगिनां कुण्डमण्डपादीनां च विरहणप्रकारजातमुपदिष्टं तैस्तैरचार्यैः। यथा- शुक्लयजुर्वेदीनां सुपर्णचितिः। श्रुत्याविकल्पेनविहिता द्रोणादयः। द्रोणादीनां चितीनां रचनाकार श्रौतसूत्रेऽनूक्तत्वात्तच्छुल्वसूत्र उच्यते। एवं बौधायनेन श्येनचिदादयः, तथैवाऽऽपस्तम्बेनापि विहिताः। इतिकृत्वा कात्यायनशुल्वसूत्रस्य प्राचीनत्वं निःशंकमेव।

---

1. बौ.सु.सू. भूमिका, पृ. 4.
2. बौ.शु.सू. 1/4,
3. बौ.शु.सू. 2/6,
4. बौ.शु.सू.2/30,
5. आप.शु.सू., पृ. 6.
6. परिशिष्टान्तर्गत-"कात्यायन शुल्वसूत्रेण सूत्रान्तरैः सह साम्यत्वावलोकन" मिति प्रकरणं द्रष्टव्यम्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शुल्बसूत्रमपिकल्पसूत्रमेव

वेदाङ्ग साहित्ये कल्पसूत्रस्य स्थानं प्रमुखं विद्यते। कल्पो हि वेदविहितानां कर्मणामानुपूर्व्येणकल्पनाशास्त्रम् । कल्पना-रचना इति नार्थान्तरम् । प्रयोग शास्त्रामिति यावत् । श्रुतौप्रतिपादितानां, दर्शादीनां विरहणं विद्यते । अत्र वर्णनावसरेऽवशिष्टानां विषयाणां प्रतिपादनार्थं ग्रन्थकृताऽऽष्टादशपरिशिष्टानि पृथक् विरचितानि । यद्वा- प्रमुखविषय प्रतिपादनावसरे प्रमुख विषयेतराणां कथनेन क्रमभङ्गभीतिमाशंक्य अभीष्ट विषयजातस्य सुव्यवस्थापनार्थमष्टादशपरिशिष्टानि पृथगुपदिष्टानीति ।[१]

कल्पसूत्राणां चत्वारो भागाः सन्ति । श्रौतसूत्रं, गृह्यसूत्रं (स्मार्तसूत्र) शुल्बसूत्रं, धर्मसूत्रमिति ।[२] बौधायनशुल्बसूत्रस्य प्रास्तविके श्रीमन्तो वागीशशस्त्रिणोऽपि लिखन्ति-श्रौत-गृह्य-धर्म- शुल्बाऽऽख्यानि चतुर्विधानि सन्तिकल्पसूत्राणि प्रतिवेद सम्बद्धानि । तत्र शुल्बसूत्राणि श्रौतसूत्रान्तर्गतानि समाम्नायन्ते । अथाऽऽपस्तम्बशुल्बसूत्रस्य भूमिकायां नरसिंहाचार्यैरवं प्रतिपाद्यते -"कल्पाः-[३] कल्पसूत्राणि प्रयोगप्रतिपादकानि इति । इहापि शुल्बशब्दस्य स्थाने कल्पशब्दपाठः कपर्दिभाष्ये दृश्यते ।[४] इयं च परिभाषा श्रौतशुल्बगृह्यपितृमेधरूपानेक भागबद्धेषु कल्पेष्वेव शुल्बसूत्रमपि कश्चित् प्रश्नरूपांभागः ।"

वस्तुतस्तु यथा भगवतः पाणिनेः सूत्राणां परिशिष्टानि -(गण- पाठः धातुपाठः उणादिःफिट्सूत्रं लिङ्गानुशासनं च) सन्ति तानि सूत्रणांमङ्गतया न पृथग्गणयितुं शक्यन्ते । यथैतानि पंचपरिशिष्टानि सूत्रवार्तिकभाष्याणि चेत्यष्टाङ्गमेवव्याकरणं वक्तुं युक्तं तथैव कुत्रापि सूत्राणां परिशिष्टानि सूत्रान्तर्गतान्येव ज्ञेयानि । अतः शुल्बसूत्राण्यपि कल्पसूत्रान्तर्गतानीति ।

प्रतिशाखं शुल्बसूत्राणिसन्तीति साम्प्रतं समुपलब्धानि शाखान्तरीयानि शुल्बसूत्राणि प्रत्यक्षीकृत्यानुमीयते । मदुपलम्भगोचरं कात्यायनबौधायनाऽऽपस्तम्ब चेति सूत्रत्रयमेवास्ति साम्प्रतम् । वाधूल-मानव-मैत्रायण-वाराह - मशकशुल्बसूत्राणि च कुत्रचिल्लभ्यन्ते ।

---

1. तत्र परिशिष्टानि भवन्ति, -यूपलक्षणं छागलक्षणं, प्रतिज्ञानुवाक सङ्ख्या, चरणव्यूह श्राद्धकल्पशुल्बकानि पार्षदमृग्ययूषीष्टकापूरणं प्रवराध्यायोक्थशास्त्र क्रतुसंख्या निगमा यज्ञपार्श्व हौत्रकं प्रसवोत्थानं कूर्मलक्षणमित्यष्टादशं परिशिष्टानि भवन्ति ।
   (च.व्यू.सू., यजुर्वेदखण्डः,)
2. बौ.श.सू. प्रास्ताविकम् । पृ. 3.
3. आप.शु.सू., भूमिका पृ. 1.
4. आप.शु.सू. भूमिका पृ. 1.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शुल्बसूत्रोपयोगः

इह हि समेषां वैदिकविदुषामन्येषां शास्त्राऽऽलोडकानां च दृष्टौ यदा शुल्बसूत्रग्रन्थोऽयं समायाति तदेयं जिज्ञासासमुदेति यत्-कथमस्य ग्रन्थस्याविर्भावः कश्चास्यविषयः ? किञ्च प्रयोजनमिति । युक्तञ्चैतत् प्रेक्षावतामधिकारविषयसम्बन्ध प्रयोजनानां परिज्ञानम् । तत्राऽऽदौ शुल्बनाम किमिति विचार्यते-तत्र शुल्बशब्दो बहुधाव्युत्पाद्यत आचार्यैः । तद्यथा-उल्वादयश्च[१] इत्यौणादिकेन सूत्रेण शुल्बशब्द स्ताम्रार्थको निपात्यते ।[२] हेमचन्द्रमतानुसारेणापि "ताम्रेयज्ञकर्मण्याचारे जलसिन्धा विति" चतुर्ष्वर्थेषु प्रयुज्यते । "रज्जु[३] शुल्बा वराटोनेत्यादि" रज्जोः पंचनामानि । रज्ज्वर्थकशुल्बशब्दस्तु मानार्थका च्चौरादिकाच्छुल्बधातो र्व्युत्पाद्यते । उक्तं च श्रीमद्भागवते-

गृहणीत यद् यदुपबन्ध ममुष्य माता
शुल्बं सुतस्य न तु तत्तदमुष्यमाति ।।[४]

अत्र तु शुल्बस्यरज्ज्वर्थ इतिस्फुट एव । एवं तु "शुल्बयति वेधापृथिवीं परिमाति सृजति वेतिदुर्गादासः"। "प्रकरणश एव मन्त्राः निर्वक्त्व्या[५] यास्कोक्तनियमादत्र, प्रकरणानुरोधेनैवार्थः क्रियते । शुल्बनाम शुल्बयतेः मानकर्मणः। रज्जुमानादिना प्रसाधितमिदं क्षेत्रगणितमुच्यते । अयमाशयः-कुण्डमण्डपादि- निर्माणप्रसङ्गे मानार्थमुपादीयमानारज्जुः । श्रौतपदार्थ निवर्चने तु-"एतद्वर्हि सन्नहन[६] नाम शुल्बनामकम्, इदं बन्धनार्थं इध्मसन्नहनं शुल्बनामक मिति"। संनाहश्च संनिवेशविशेषसम्पादनार्थोघटन विशेषः । एवं च वेद्याकारविशेषनिष्पादकघटनाविशेषादि[७] परमिदं सूत्रमिति अन्वर्थैवशुल्बसूत्रमिति-सञ्ज्ञां प्रथते ।

वेदे समाम्नातानां मन्त्राणां कस्मिन् कर्मणिविनियोग । इति कल्पसूत्रस्यविषयः । प्रतिशाखं कल्पसूत्राणि भवन्ति । तत्र विहरणार्हाणि कुण्डमण्ड पादीनि निर्देशमात्रेण सूचितानि न तु सर्वाणि निराकाङ् क्ष्यानि । "यथा अपरेणाहवनीयं[८] खनतीति" सूत्रं सम्यग्विचारिते सति पूर्वमाहवनीयं ततो वेदीकर्तव्येति गम्यते, परन्तु गार्हपत्याहवनीयदक्षिणाग्नीनामग्न्याधारभूतानां खराणां साधनं तत्र न कुत्रापि

1. सि.कौ. उणादि-535,
2. बौ.शु.सू., प्रास्ताविकम् । पृ. 1.
3. अ.को. ख. पृ. 399, श्लोक 27.
4. श्री.भा. 2/7/30.
5. निरु., दैवतकाण्डम्, पृ. 1170.
6. पृ. 13. 89/90
7. आप० भूमिका ।।
8. का०श्रौ०सू 2/6/1.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

साधितम् । सौत्रामण्याः वेदेः निर्माणं कथं कर्तव्यम् । चयने सप्तविधस्याग्नेः आएकशतविधपर्यन्तं केनप्रकारेण वर्द्धनीयम्, अपि च चातुर्मास्यान्तर्गत वरुणप्रघासवेदिः कयारीत्या संसाधनीया । सुपर्णचितेः विकल्पेन विहिताः द्रोणचिदादयः कथं साधनीया इत्यादीनां समाधानं तत्र नोपलभ्यते ।

अत एवाचार्येण यज्ञीयकुण्डमण्डपादि रचनाविषयोपबृंहितः शुल्बसुत्रनामकः ग्रन्थः पृथक् प्रणीतः । यज्ञीयविहाराणां विहरणावसरे योगविभागकरणार्थं गणितज्ञान मपेक्ष्यते । गणित शास्त्रन्तर्भूतं अंकगणितं बीजगणितं रेखागणितमिति शास्त्रत्रयं विद्यते इति गणितविदो वदन्ति । गणितानभिज्ञैरपि विहरणपरिज्ञानार्थं परमकारुणिको भगवान् कात्यायनः सुगमशब्दावल्या सरलसाधनोपेतं शुल्बसूत्रं प्रणिनाय । अस्मिन् शास्त्रे योगविभागकरणार्थं ये खलूपायाः सूत्रकारेण प्रद र्शितास्तेगणितरीत्यापि गणितविचक्षणाः सम्यगभ्युपगन्तुं शक्यन्ते । अस्मिन् विषये-कात्यायनशुल्बसूत्रस्य कण्डिकागतविषयोपवर्णन समयेऽस्माभिस्तत्रैव चर्चाकरिष्यते ।

शुल्बसूत्रस्य लौकिकं प्रयोजनम्

शुल्बसूत्रस्य प्रमुखं प्रयोजनं तु शुल्बसूत्रोपयोगः इत्यस्मिन् प्रकरणे अभिहितं अत्र तस्य लौकिकं प्रयोजनं किमिति विचार्यते ।

रज्ज्वा क्षेत्राणां समासः व्यासश्च अस्य शुल्बग्रन्थस्य प्रधानविषयः । लोकेऽप्यस्य कार्यकलापस्य व्यवहारो दृश्यते, यथा चकबन्दी । अस्यचकबन्दी विभागस्य इदं लक्ष्यं विद्यते यत् जनानां विभिन्न स्थानेषु स्थितानां भूखण्डानां क्षेत्रफलान् संकलय्य सौविध्यर्थं तावत् प्रमाणकं क्षेत्र मेकस्मिन् स्थाने प्रदान मिति । क्षेत्रसंकलनप्रकारो यद्यपि पाटिगणित बीजगणितादिषु गणितशास्त्रेषु निर्दिष्टो विद्यते । तथापि गणितानभिज्ञानां न तत्र प्रवृत्तिः स्यात् ज्ञानं वा । अतः परमकारुणिकेन भगवता कात्यायनेन शुल्बसूत्रमिदं प्रवर्तितम् । यत्रगणितानभिज्ञा अपि पारयन्ति विभिन्नप्रकारान् क्षेत्रान् समसितुं व्यष्टुञ्च। यद्यप्ययं वेदवैदिक यज्ञीय क्षेत्राणां समास व्यासार्थं प्रवृत्तः तथाप्यानुषङ्गतः लोके लौकिकव्यवहारानपि सम्पादयति यथा-

कस्यचिज्जनस्य चतुर्षुस्थानेषु विभिन्नक्षेत्रफलकानि क्षेत्राणि सन्ति । तेषां क्षेत्राणां संकलित क्षेत्रफलेनतुल्यं एकं क्षेत्रं तस्मै प्रदातव्यं विद्यते । तर्हि "नानाप्रमाण समासे "[1] इति सूत्रोक्तप्रकारेण विभिन्नप्रकारान् समचतुरस्रानेकीकृत्य विषमानि क्षेत्राणि चेत् - "विषमं चेद्यथाययोगमुपसंहरेदिति[2]" सूत्रोक्त प्रकारेण एकीकृत्य दद्यादिति । क्षेत्रसमसन साधकानि भगवतः कात्यायनस्येमानि शुल्बसूत्राणि क्षेत्रसमासजिज्ञासूनां जिज्ञासां नूनं पूरयिष्यन्तीति । तानीमानि यथा

1. का.शु.सू. 3/4.
2. का.शु.सू. 2/22

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

"नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयासोऽपच्छिन्द्यात्तस्याक्षणयारज्जुरुभे समस्यतीति समासः" (2/22.)

दीर्घचतुरस्रं समचतुरस्रं चिकीर्षन्मध्ये तिर्यगपच्छिद्यान्यतरद्विभज्येतरत्पुर-स्ताद्दक्षिणतश्चोपदध्याच्छेषमागन्तुनापूरये त्तस्योक्तो निर्ह्रासः । (3/2.)

अतिदीर्घ ञ्चेत्तिर्यङ् मान्यापच्छिद्यापच्छिद्यैकसमासेन समस्य शेषं यथायोगमुपसं हरेदित्येकःसमासः (3/3)

समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन्मध्येऽक्ष्णयापच्छि विभज्येतरत्पुसस्त-दुत्तरतश्चोपदध्याद्, विषमं चेयथायोगमुपसंहरेदिति व्यासः । (3/4) यावत्प्रमाणानि समचतुरस्राण्येकीकर्तुं चिकीर्षेदेकोनानि तानि भवन्ति तिर्यग्द्विगुणान्येकत एकाधिकानि त्र्यस्रिर्भवति तस्येषुस्तकरोति । (6/7)

अपरं, चेदं वैशिष्ट्यमत्रावलोक्यते यत् यत्र कुत्रापि समभूप्रदेशे रज्ज्वा समदीर्घचतुरस्रनिर्माणार्थं या परिपाटी सूत्रकारेण सूत्रैः सूत्रिताविद्यते सा स्व स्मिन्नद्वितीया वर्त्तते । एतस्मिन्विषये परिज्ञानार्थ-

समचतुरस्रस्याक्ष्णया रज्जुर्द्विकरणी । (2/12).

करणीं तृतीयेन वर्धयेत्तच्च स्वचतुर्थेनात्मचतुस्त्रिं शोनेन सविशेष इति विशेषः (2/13)

प्रमाणं तिर्यग्द्विकरण्यायामस्तस्याक्ष्णयारज्जुस्त्रिकरणी । (2/14)

तृतीयकरण्येतेन व्याख्याता । (2/15.)

प्रमाणविभागस्तु नवधा । (2/16)

करणीतृतीयं नवभागः (2/17)

सूत्राणामुपत्तयोद्रष्टव्यानि । एवं समचतुरस्रस्य वृत्तं[1] तस्य समचतुरस्रीकर णमपि[2] नूनमुपकारकं लेके सिद्ध्यति ।

अथ वैतानिकं रहस्यम्

श्रौतयज्ञानुष्ठानार्थं श्रुतौप्रतिक्रतुं विविधप्रमाणकानि कुण्डमण्डप स्थण्डिलानि प्रतिनियतानि सन्ति । तेषां शास्त्रचोदितं स्वरूपजातमपि रहस्यात्मकमेव । यथा-दर्शपूर्णमासवेदिः । इयमेव प्रकृतिवेदिः, अस्याः स्वरूपं श्रुत्या एवं प्रतिपादितं यत्-"व्याममात्री[3] पश्चादित्युपक्रम्य अभितोऽग्निमंसा[4] उन्नयन्ति । योषा वै वेदिर्वृषाग्निः परिगृह्य वै योषा वृषाणं शेते । मिथुनमेवैतत्प्रजननं क्रियते । तस्मादभितोऽग्निनमंसा उन्नयति ।

---

1. का.शू.सू. 3/13.
2. का.शु.सू., 3/14.
3. श.ब्रा. 1/2/6/14.
4. श.ब्रा. 1/2/6/15.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्र प्रकृतिरूपेयं वेदिः स्त्रीरूपेण श्रुत्याभिहिता[१]। अंसतः श्रोणि पर्यन्त क्रमशःपृथ्वी मध्य संगृहीता चेयं वेदिः देवानां जुष्टतमा विद्यते। तथैव मनुष्याणां येयं स्त्री सापि पृथुश्रोणियुक्ता मध्यसंकुचिता कृशोदरीति यावत् सैव प्रशस्ता।

ननु कथं स्त्रीरूपेत्युक्तमिति चेदत्रोच्यते-यथा स्त्रीप्रजानां सम्भूत्यै प्रमुखमधिष्ठानं तथैव प्रकृतिभूतेयं वेदिरपि समग्रस्य ब्रह्माण्डान्तर्गत वस्तु जातस्य सम्भवे प्रमुखं क्षेत्रं विद्यते। अत एवोक्तं प्रकृतरिति। प्रकृतिनाम प्रक्रियन्ते भूतान्यस्यामिति। यद्वा-प्रजायन्ते भूतान्यस्या इति। यज्ञाद्वैप्रजाः प्रजायन्ते। अस्यामेव प्रकृतिभूतायां वेद्यां देवर्षयः प्रजाः सिसृक्षयेष्ट्वा समग्रं प्रजासर्गं प्रतेनुः। अथ तेषां परिरक्षायै वेदोक्तान् विविधयज्ञान् समुपदिष्टवन्तः। ते च दर्शपूर्ण मासाग्नि-होत्रादयो यज्ञाः।

यथाशरीरसम्बन्धीनामाधिव्याधीनामुपशमनार्थं शास्त्रेषुमणिमन्त्रौषधादय उपचाराः उपदिष्टाः, तथैवब्रह्माण्डन्तःस्थानां पृथिव्यापतेजोवाय्वाकाशादि पंचभूत-जनितोपद्रवाणामुपचारार्थं विविधयज्ञाः क्रियन्ते, पिण्डब्रह्माण्डयोरैक्यात्।[२] यदि ब्रह्माण्डान्तस्थानि तत्त्वानि प्रकृप्यन्ते तर्हि पिण्डेऽपि तस्य प्रभावो नूनमभिव्याप्नोति। लक्ष्यते हि अतिवृष्टिरनावृष्टिःसूर्याग्न्योः प्रकोपः भूकम्पादय उपद्रवाः। एतेन नूनं पिण्डानि प्राणिजातानि पीड्यन्ते। अतस्तेषामुपचारं यज्ञैनैव ऋषयोऽकुर्वन्।

श्रौतयज्ञेषु सर्वत्र दर्शपूर्णमासवदेव वेदिर्भवति। उत्तरेषु विकृतिभूतेषु क्रतुषु वचनात् संग्रहाभाव एव भवति। पुरस्तात्संकीर्णः पश्चाद्विस्तीर्णः इति नियमसामान्यः पितृमेधगत श्माशानिकीं वेदिं विहाय सार्वत्रिकः। सैषा वेदी जनयित्री धात्री परिपालयित्री शक्तिः योषारूपेण श्रुत्याप्रतिपादिता। उक्तञ्च-

"इयं वेदिः परोऽन्तः पृथिव्या अयं यज्ञो भुवनस्यनाभिः" इत्येन मन्त्रेण इयं समग्रापृथिवी वेदिरूपेणाभिधीयते। इयमेव वेदिः यज्ञसम्पादनयोग्यस्थानं भुवनस्य समस्तसंसारस्य नाभिः विद्यते। नाभिर्नाम संनहनयोग्यस्थानम्। यथा रथचक्रनाभावराः प्रोताः तमेवाधारीकृत्य परिभ्रमन्ते तथैवेयं यज्ञसाधन योग्यावेदि समस्तसत्त्वानामाधारभूताविद्यते। समेषां जननीत्वात्। उक्तंहि यज्ञाद्वैप्रजाः[३] प्रजायन्त इति। उपर्युक्तमन्त्रेणेदमपि विज्ञापितं भवति यत् इयं पृथिवी वर्त्तुला एव। यतो हि वर्तुवलाकारस्यैव वस्तुनः कस्मिंश्चित् स्थाने लक्ष्मकृते तन्मध्य एव स्यात्। अथ वेदिशब्दनिर्वचनं श्रुत्या एवं क्रियते-"विष्णुमन्वविदंस्तस्माद् वेदिर्नाम"।[४]

---

1. सावैपश्चाद्वरीयसी स्यात्। मध्येसंह्वारिता पुनः पुरस्तादुर्यवमिवहि योषां प्रसंशन्ति पृथुश्रोणिर्विमृष्टान्तरां सा मध्ये संग्राह्येति जुष्टा एवैनामेतद् देवेभ्यः करोति। (श.ब्रा. 1/2/6/16.)
2. बौ.शु.सू., प्रास्ताविकम्, पृ. 1.
3. श.ब्रा. 1/9.3.5.
4. श.ब्रा. 1/2/6/10.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत् त्र्यङ् गुलखाता कथमित्यत्रापि हेतुनिदर्शनं शतब्राह्मणे सुष्ठुतयाऽभिहितम् ।[1]

कण्डिकागतविषयपरिचयः

तत्रप्रथमायां कण्डिकायां त्रिशंत् सूत्राणि समाम्नातानिसन्ति । तत्र प्रथमसूत्रेण वस्तुनिर्देश पूर्वकं मंगलाचरणं कृतम् । द्वितीयतृतीयाभ्यां दिक्साधनमुक्त्वा चतुर्थाद्येकादशान्तैः सूत्रैः चतुरस्रविहरणार्थं पारिभाषिकानि सूत्राण्युक्तानि । द्वादश-त्रयोदशाभ्यां समचतुरस्रविरणार्थं निरंछनाक्ष्णयातिर्यङ्मानीनां चिन्हानि प्रदिष्टानि । तथैव दीर्घचतुरस्रसम्पादनार्थं चतुर्दशपञ्चदशसूत्राभ्यां पूर्ववत् निरंछनादीनां लक्ष्ममाह । ततो द्वाभ्यां समदीर्घचतुरस्रयोःश्रोण्यंस साधनार्थं नियमः कृतः । एतेनाभिहितानां शकट मुख प्राग्वंशोदग्वंशशालासदसां निर्देशः कृतः पञ्चसूत्रैः । त्रयोविंशसूत्रेणापरिमितशब्दस्य तात्पर्यमुक्तं, ततो द्वाभ्यां यज्ञीयह्रासविवृद्ध्यादौ मर्यादावधारिता । ततः पञ्चभिःसूत्रै दर्शवेदेः गार्हपत्याऽऽहवनीयदक्षिणाग्न्युत्करानङ्गभूतान् निरूपयामासेति प्रथमकण्डिकागत विषयसंक्षेपः ।

द्वितीयकण्डिकायां द्वाविंशति सूत्राणि । तत्रप्रथमादि पंचमान्तैः सूत्रैः वरुपाप्रघासवेदेः ईषाक्षयुगशम्यादीनामङ्गुल्या मानमाह । तत एकेन पितृमेधगत विदिक् स्रक्तवेदेः विहरणप्रकारमाह । ततः सप्तमेन शास्त्रेऽस्मिन् व्यहारार्थं रज्जूनां संज्ञामाह । ततो द्वाभ्यां भुजकोट्योर्वर्गक्षेत्रफलयोगः कर्णवर्गक्षेत्रफलेन समंभवतीति सुगमशैल्या निरूपिता । दशमेन युगादिप्रमाणान्युक्तानीति दर्शयन्नेकादशसूत्रेण नवमसूत्रोक्तार्थो भंग्यन्तरेणाऽऽह । ततो द्वाभ्यां क्षेत्रद्वैगुण्यकरणविधिमाह । चतुर्द-शसूत्रेण क्षेत्रत्रिगुणीकरणमुक्त्वा, ततः सप्तभिस्तत् प्रयोजनमाह । ततो द्वाविंशतितमेन सूत्रेणैकस्मिन् समचतुरस्रेऽपरस्य समचतुरस्रस्य सन्निवेश प्रकारमाहेति द्वितीयाकण्डिका ।

तृतीयकण्डिकायां चतुर्दशसूत्राणि सन्ति । तत्राद्येनैकस्माद् बृहत्समचतुरस्रादल्पप्रमाणकस्य समचतुरस्रस्य निर्ह्रासोपाय उक्तः । दीर्घचतुरस्रस्य समचतुरस्रीकरणोपायो द्वितीयेन, तृतीयेनातिदीर्घचतुरस्रस्य समचतुरस्रीकरणोपायो दर्शितः । चतुर्थेन समविषमचतुरस्रयोः दीर्घचतुरस्रीकरणोपाय उक्तः । चतुरस्रमित्युक्ते समचतुरस्रमेवग्राह्यमिति नियमविशेषमुक्त्वाथ द्वाभ्यां क्षेत्रफलाऽऽनयनप्रकार माह । ततोऽष्टमेनार्द्धप्रमाणस्य क्षेत्रस्य तुरीयांशानयन प्रकार मुक्तम् । एवं नवमेन नवमांशं दशमेन च षोडशांश मानयन प्रकारमभिहितम् । एषां चतुर्थनवमषोड शांशभूतानां लघुरूपाणां समचतुरस्राणां निर्ह्रासोपायः पूर्व-मेवदर्शित इत्याशयमेकादशसूत्रेणाभिधाय अष्टमसूत्रोक्तह्रासविषयः

---

1. ते ह देवा ऊचुः । क्व नु विष्णुरभूत् क्वनु यज्ञोऽभूदिति । ते होचुश्छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमस्त्यत्रैवान्विच्छतेतितं खनन्त इवान्वीषुस्तं त्र्यङ्गुलेऽन्वविन्दँस्तस्मात् त्र्यङ्गुलावेदिः । (श.ब्रा.1/2/6/9.)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सप्तमसूत्रोक्तविवृद्धेरवगन्तव्य इति द्वादशसूत्रेणदर्शयति । त्रयोदशसूत्रेण चतुरस्रस्य मण्डलीकरणं चतुर्दशेन मण्डलस्य चतुरस्रीकरणं विनिर्दिष्ट मिति तृतीय काण्डिका ।

चतुर्थ्यांदशसूत्राणिसन्ति । तत्राद्येनश्रौतसूत्रोक्त वैकल्पिकानां चितीनां नामानि गणयन् द्वितीयेन द्रोणादिचिते र्विहरणं, तृतीयेन तदुपरिवृन्ताऽऽधानप्रकारं, मण्डलेप्येवंवृन्ताधानमिति चतुर्थेप्रतिपादितम् । ततः पञ्चमेन प्रउगचितिः, षष्ठ उभयतः प्रउगचितिं सप्तमेन प्रउगस्य समचतुरस्रीकरणमष्ट मेनोभयतः प्रउगस्य चतुरस्रीकरण मित्येतेषां प्रतिपादनेन त्रिकर्णानां पंचकर्णानाञ्च समचतुरस्री करणोपायो दर्शितः नवमदशमसूत्राभ्यामिति चतुर्थीकण्डिका ।

पंचम्यामेकादशसूत्राणि सन्ति । द्वितीयादिष्वष्टविधाद्यग्निषु पुरुषाभ्युच्चयं प्रथमेन, आश्वमेधिकाग्निद्वयं द्वितीयतृतीयाभ्याम् । पुरुषाभ्यासः तुरीयेण, द्वितीयचयने प्रक्षिप्तांशज्ञातुमुपायः पञ्चमेन । षष्ठेन तत् प्रक्षिप्तांशज्ञानस्य प्रयोजनम् । सप्तमेन पुरुषवर्द्धने द्वितीयप्रकारः । ततोद्वाभ्यां व्यवहारार्थ मानवाचकानां पुरुषादीनामंगुल्यामानकथनम् । दशमेन पुरुषवर्द्धने तृतीय प्रकारः, एकादशेनाधिमानभूतानां पुरुषे प्रक्षेपो निषेध उच्यते इति पंचमीकण्डिका ।

षष्ठ्यां-त्रयोदशसूत्राणि समाम्नातानि । प्रथमेनवेदीष्टका विषये वक्तुकामः प्रतिज्ञांकृत्वा एकशतविधेऽग्नौ प्रक्रममानमाह-द्वितीयेन । तृतीयेनद्वितीयचयने प्रक्रमप्रमाणं चतुर्थे तदेव प्रकारान्तरेणाऽऽह । तेनैवप्रकममानेन आ एकशतविधपर्यन्तं वेदिवर्द्धनं कर्तव्यमिति पञ्चमेनाभिधीयते । षष्ठेऽन्तःपात्यगार्हपत्ययोर्वृद्धिनिषेधः। सप्तमे-एकाधिकानां समचतुरस्राणां संक्षेपोपायः । अष्टमे यूपैकादशिनीविषये वक्तुंप्रतिजानीते । नवमे-यूपैकादशिनीपक्षे वदिवर्द्धनार्थ प्रक्रममानं प्रतिपादितम् । दशमे- वेदिनिर्माणप्रकारस्तत्र पूर्वपक्षः, एकादशेन सिद्धान्त माह । तत्रापि मतान्तरं प्रतिपादितं द्वादशतमे सूत्रे, तस्यशिखण्डिनी नामेति त्रयोदशतमे सूत्र इति षष्ठीकण्डिका ।

सप्तम्यां परिशेषविषययोपेताः शुल्बश्लोका उच्यन्ते ।

।। इति कण्डिकागतविषयसंक्षेपः ।।

कात्यायनशुल्बसूत्रस्य शुल्बान्तरैः सह विषय समीक्षा

कात्यायनबौधायनापस्तम्बादिभिः बहुभिराचार्यैः शुल्बसूत्राणि प्रणीतानि । मया त्वेव मनुमीयते-यावन्ति श्रौतसूत्राणिसन्ति तेषां समेषां शूल्बसूत्राणि नूनं स्युः प्रत्यक्षोपलम्भनात् । बहुप्रयासेन निपुणमन्विष्यमाणेनापि मया कात्यायन बौधायनापस्तबेतिसूत्रत्रयमेव प्रत्यक्षीकृतम् । प्रत्यक्षीकृतानेवग्रन्थानाधारी कृत्यमयात्रसमीक्षा प्रस्तूयते ।

कात्यायनशुल्बसूत्रमिदं स्वल्पकायोऽपि स्वविषयप्रतिपादन वैशिष्ट्ये नान्येभ्य शुल्वग्रन्थेभ्यो महद्गौरवस्थांनमाटीकते ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्वल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखं ।
अस्तोभ मनवद्य ञ्च सूत्रं सूत्रविदो विदुः ।

इति वाक्यार्थै रलंकृतानिसूत्राणि कस्य विदुषोमनांसि नावर्जयन्ति । अत्र सूत्रे दिक्साधनपुरः सरं विहरणार्थं योगविभागकरणोपायाः अनुसंगतस्तदारादुपकारिणामुपकरणानां सप्रयोजनलक्षणञ्च विनिर्दिष्टम् । शुल्बशब्दार्थमग्रतोनिधाय कात्यायनेन शुल्बसूत्रमकारि । अत एवास्य ग्रन्थस्यकलेवरोऽनतिपिचण्डिलो जातः । श्रौतसूत्रे ये खलुविषयाः अवश्योल्लेखनीया विचारणीया वा तां स्तत्रैव निरुप्य ग्रन्थान्तरेषु ग्रन्थन योग्यानां विषयाणा मुल्लेखस्तेष्वेव चकार ।

बौधायनापस्तम्बयोः शुल्बसूत्रग्रन्थयोरामूलचूलाध्ययने कृते सति कात्यायनशुल्बसूत्रतो विस्तृता विमाविति नूनमध्यवस्यति तयोः परीक्षणार्थं प्रस्थितः परीक्षकः । अत्र हि बह्वयः सार्थवादेनयुक्ताः पुरुषप्रयोजिकाः श्रुतयः समाम्नाताः । सूत्रकारेणात्र वेदि निमार्णार्थ मपेक्षिताः केचन निर्देशाः प्रवचनवत् प्रदिष्टाः । अपि चेष्टकादिनिर्माणपूरणविषया स्तत्रैवोपनिबद्धाः अतएव एतयोर्विस्तारः स्वाभाविक एव । अथायमप्य परोहेतुर्ग्रथविस्तारे यत् -तच्छाखायामलजसाररथ चक्रकूर्मादयः समाम्नायन्ते । अतस्तेषां तूपदेश उचित मास्ते ।

कात्यायनेन तु प्रत्यग्नौवर्द्धमानयोः वेदीष्टकयोः प्रमाणमात्रमुपदिश्य इष्टका निर्माणर्थ मिष्टका पूरणमिति परिशिष्टं पृथक् निरमायि । इष्टकोपधानप्रकारश्च श्रौतसूत्र एव निर्दिष्टः ।

कात्यायनो हि स्वग्रन्थं सप्तकण्डिकाभिः विभज्य व्यरचत् । तत्रप्रथमायां विहरणार्थं पारिभाषिक सूत्राणि, द्वितीयायां, वेदिनिर्माणकथनम् । तृतीयायां विहरणार्थं योगविभागसम्बद्धाः युक्तयः, चतुर्थ्यां चितिनिरूपणम् । पंचम्यां पुरुषाभ्युच्चय कथनम्, षष्ठ्यां वेदीष्टका वर्द्धनम् । सप्तम्यां विविधप्रयोजनोपेतं श्लोकशुल्बं व्याजहार ।

बौधायनाऽऽपस्तम्बाभ्यामपि प्राग् पारिभाषिकाणिसूत्राण्युक्त्वा ततः स्वशाखीय यज्ञीयविषयकथनार्थमुपक्रमः कृतः । पूर्वं दिङ् निर्णयमाभ्यां नैव प्रदर्शितम् । वृत्तनिर्माणस्य सुकरत्वात् सर्वैराचार्यैः[1] पूर्वं चतुरस्रसाधनोपायो-दर्शितः । बौधायनेन तु पूर्वं वृत्तैः समचतुरस्रं[2] साधितं तत् प्रपंचातिशयादथापर मित्युक्त्वा ततः कात्यायनोक्तदिशैव चतुरस्रं साधितम् । एवमेव चतुरस्र साधनमादौ दृश्यते ।

---

1. बौधायनोयथा- चतुरस्रं चिकीर्षन् यावच्चिकीर्षेत् तावतीं रज्जु मुभयतः पाशां कृत्वा मध्ये लक्षणं करोति । 1/20, आपस्म्बो यथा-
तदर्धमभ्यस्यापरस्मिँतृतीयेषड्भागोने लक्षणं करोति ।। 3 ।।,
कात्यायनस्तु 1/4, तः प्रारभ्य 1/11,सूत्रैः समचतुरस्र साधनमाह ।
2. लेखामालिख्य तस्या मध्ये शंकुं निहन्यात् तस्मिन् पाशौ प्रतिमुच्य लक्षणेन मण्डलं परिलिखेत्विष्कम्भान्तयोः शंकूनिहन्यात् ।। 1/21 । ।
(बौ.शु.सू.,पृ.)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत उपसंहार रूपेणदं वक्तव्यं भवति यद्भगवता कात्यायनेन यज्ञीयवहार विहरणार्थ ये खलूपायाः प्रदर्शिता स्तेनूनं प्रपञ्चविधुरा इति सर्वै राचार्यैः स्वीक्रिते ।

अत्राविष्कृतविषयोपक्रमः

कात्यायनशुल्बसूत्रं कर्कमहीधर रामचन्द्रवाजपेयी गंगाधरादिभिः व्याख्यातृभिः व्याकृतिमिति यद्यपि श्रूयते तथा प्येतेषु मदुपलम्भगोचरं कर्कमहीधर कृत भाष्यद्वयमेवास्ति । अपरं विद्याधरगौडकृत भाष्यमपि चास्ति ।

कर्काचार्येण स्वभास्यं न विशदीकृतमिति तदीयभाष्यावलोकेनैव ज्ञायते । कुत्रचित्तु सूत्राणां भाष्यमपि न कृतम् । एतेन ज्ञायते यत्तदानीं शुल्बसूत्राणामर्थ विवेक्तारो बहवो विद्वांसो भवेयुः । अत एव तेन-"ऋजुम्"। "स्पष्टम्" भवतीति बहुत्र लिखितम् । अथवैवं वक्तव्यं भवति-तदानीं यत्र सूत्रार्थः क्लिष्टतरं प्रतीयतेस्म तत्रैव तेन किञ्चिदुक्तं तदपि विस्तारविधुरम् ।

ततो महीधरो गूढ़ार्थोपित मिमं ग्रन्थं लोकजिघृक्षया किञ्चिद् विस्तार्य सन्दिग्धस्थलान् प्रकाशयन्स्वभाष्यं प्राणिनाय । ततो ह्रासमुपेयुषिजगति जायमानानां जनानां बुद्धेरपि दौर्बल्यं पश्यन्तोऽनुभवन्तश्च रामचन्द्र वाजपेयी गंगाधरादयो विद्वल्ललामाः कात्यायनशुल्बसूत्रस्यार्थः सुस्पष्टाभिव्यक्तये स्व-स्व शैल्या भाष्यानप्रणयन् ।

ततो विद्यारगौडमहोदया अपि क्वचित्सोपपत्तिकं स्वमतं समुपस्थापयन् । उपपत्यर्हाणांसूत्राणां न केनाप्युपपत्तिः प्रतिपादिता । उपपत्तेर भावाद् व्याख्यासाकाङ्क्षा एव तिष्ठति । मन्ये पं. विद्याधरपादैः केषांचित्सू-त्राणामुपपत्तिः प्रतिपादिता । न तु सर्वेषा मुपयत्यर्हाणां सूत्राणाम् । अतोऽहं समग्रस्य शुल्बग्रन्थ-स्यव्याख्यानावसरे उपपत्तिसापेक्षितानि स्थलानि प्रतिपिपादयिषयाप्रवृऽत्तांत्राविष्कृतानां विषयाणां संक्षिप्त परिचय दातुमुपक्रमे ।

तत्र प्रथमकण्डिकायामाविष्कृतानां विषयाणां संक्षिप्तपरिचयः

पूर्वं सर्वग्रन्थसामान्यं मंगलाचरणमाचर्येण कृतं न कृतंवेति विचारः कृतः । समेशङ्कुमित्यत्राग्र ग्रहणं किमर्थम् ? शंकुसम्मितया रज्ज्वेति कथमुच्यते ? शंकुमानतः वृत्तस्यन्यूनत्वे, वृत्तमानतः शंको र्वान्यूनत्वे का हानिः ? सहैवदिक् साधनोपपत्तिः । एतस्मिन् क्रमे शास्त्रान्तराणां मतोपस्थापनपूर्वकं सोपपत्तिकं याम्योत्तरसाधनं, तत् प्रकारान्तरेणापि तत्साधनोपाय वर्णनम् पारिभाषिकसूत्रणां क्रमे दोषाविष्कारपूर्वकन्तस्य परिहारः। तेषामादौसमाम्नाने किं प्रयोजनम् । श्रोण्यंसनिरंछन संख्यासमासभंगादीनां स्थानं सोपपत्तिकं प्रदर्शनम् । निरञ्छनशब्द

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तात्पर्यप्रतिपादन पुरः सरं तस्य द्वैविध्यप्रयोजनकथनम् । यस्मिन् स्थाने निरञ्छन चिन्हं प्राप्यते ततो न्यूनाधिक्ये चिन्हे दीयमाने सति का हानिस्तत्र सोपपत्तिकमालोचनम् । अक्ष्णयातिर्यङ्मान्योस्तात्पर्यकथनं प्रणामार्द्धं शास्त्रवदर्द्ध इत्यनयोरुपदेशः कथम् ? शुल्वसूत्रमिदमारभ्यं नारभ्यं वेत्यत्र विचारः । विषयाधिकारिसम्बन्ध प्रयोजनानां प्रतिपादनम् ।

श्रुतिप्रतिपादित दर्शपूर्णमासयोः शास्त्रोक्तदिशाष्टद्वादशैकादशादिपक्षमाश्रित्य सप्रमाणं सयुक्तिकञ्च वेदि साधनम् । तत्र "अन्तः सर्वः बहिः सर्वो बहिरन्तश्चभागत" इत्यत्र वामनाचार्यैः प्रदर्शितपक्षानाधारी कृत्य नियमहेतोरभावात्तत्र सम्भावितान् दर्शवेदेः सप्तप्रकारान् विहरणभेदान् प्रदर्श्य शिष्टाचारात् सम्प्रदायाच्च पक्षत्रयस्यैव वैधत्वेन प्रतिपादनम् । अत्रावसरे सूत्रोक्त "गार्हपत्याहवनीयोरन्तरालं षड्धा सप्तधावा विभज्य, अपि वा त्रिभागोन " येत्यनयोः सोपपत्तिकं प्रदर्शन पूर्वकं कस्मिन् पक्षे वेद्या उत्करो बहिर्निगच्छति कस्मिन् पक्षे वेद्यन्तराल एव पततीत्यपि प्रतिपादितम् ।

अत्रायं विशेषोयत् संग्रहनिर्माणार्थं महीधरेण एकपक्षीयोदाहरणं प्रत्युपस्थापितम् । अन्तः सर्वः बहिः सर्वोबहिरन्तश्च भागत इति पक्षत्रयमाश्रित्य विहरणवेलायां श्रोण्यंससंयोजयित्र्योः पार्श्वमान्योः माने भिद्येते, आहवनीय मध्यात् पुरस्तादंसयोः वेदेश्च विमानात् । आहवनीय केन्द्रादंसौ वैदिश्चमीयते चेत्तर्हि आहवनीयस्यार्द्धं वेदेः बहिः अर्द्धञ्चान्तर्निपतति । एवं बहिरन्तश्चभागत इत्यस्मिन् पक्षे भवति । आहनीयस्य प्रतीचीशंकोः यदांसौ वेदिश्च विह्रियते तदा बहिःसर्वः, पक्षः सेत्स्यति । अनयोः पक्षयोः यौपर्श्वमान्यौ (73) त्रिसप्तत्यङ्गुलिके स्तः । ततो वेदेः प्राचीशंकोः सकाशादारभ्य प्रादक्षिण्येन पृष्ठ्याः पश्चाद्भागेस्थितस्य शंकोः पर्यन्तं रज्ज्वां दीयमानायां सत्यां 36 + 73 + 48 = 157 सप्तपंचाशद धिकशतांगुला रज्जुर्भवति । इममेवपक्षमाश्रित्य महीधरेण गणितः कृतो विद्यते ।

आहवनीयस्य प्राचीशंकोः सकाशादंसौ, केन्द्राद् वेदिश्च यदा निर्मीयते तदान्तःसर्व इत्ययं पक्षः सेत्स्यति। अस्मिन् पक्षे पार्श्वमान्योः मानं (85) पंचाशीतिर्भविष्यति । ततः पूवशंकोः पश्चिम शंकुंयावदानीता रज्जुः (36 + 85 + 48 = 169) नवष्टयुत्तरशतांगुला भवति । एतस्मिन् पक्षे संग्रहनिर्माणं कथं स्यादित्यत्रमहीधराचार्यैः न किञ्चिदुच्यते । अतो यस्मिन् कस्मिन्नपि पक्षे संग्रहनिर्माणार्थमुपायो मया श्लोकैर्निर्दिष्टः ।

वेदीनां विहरणभेदेन पार्श्वमानीमानमपि भिद्यतेऽतः कस्मिन्पक्षे पार्श्वमान्याः मानं कियद्भवतीति सर्वं मया यथामत्युपस्थापितम् ।

द्वितीयायां कण्डिकायां रथसम्मितायाः वरुणघासीयवेदेरुपपत्तिप्रदर्शनपुरः सरं मानार्थमुपयुज्यमानानां करणी तत्करणी तिर्यङ्मानी पार्श्वमान्यक्षणयादीनां रज्जूनां परिचयः प्रदत्तः। पितृमेधगत दिक्स्रक्तेः समचतुरस्रस्योपपत्तिः, चित्यादौ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वेदीष्टकानां निर्माणाय मानार्थं गृहीतायां रज्ज्वां योगाविभागकरमणपेक्षते तदर्थं सूत्रकारेण सरलगणितपरिपाट्यः सूत्रैरुक्ताः, तेषां गणितरीत्यापि विन्यासः मयास्तत्रैव कृतो वर्तते ।

प्रमाणविभागस्तु नवधा ।। 1 ।। इत्यस्य सूत्रस्य व्याख्या पं. श्री गौडपादैः पृथक् प्रतिपादिता । त्रिपदरूपस्य प्रक्रमस्यैव तिर्यङ्मान्यौ त्रेधाविभक्तााायां सत्या तस्यैकैकोभागः पद-पदक्षेफलकः स्यात् । परन्तु तैःद्वादशाङ्गुलपदम् । द्विपदः प्रक्रम (श्लोक.शु. 34) इति उदाह्रियते । द्विपदप्रक्रमरुपाया रज्ज्वाः क्षेत्रं चतुरस्रीकृत्य तस्य तिर्यङ्मान्यौ पार्श्वमान्यौ च त्रेधाविभक्तायां सत्यां, तस्यैकैकोभागः पदः पद-पदक्षेत्रफलकः कथं स्यादिति तत्र मीमांसयन्तुमीमांसकाः । यद्येवं स्वीक्रियते तर्हि पूर्वापरसूत्रैः संगतिरेव न स्यादिति । विभिन्न प्रकाराणां समचतुरस्राणा मेकस्मिन् समचतुरस्रे संक्षेपः कथंस्यादिति सोपपत्तिकं प्रतिपादितम् ।

तृतीयकण्डिकायां- बृहत्समचतुरस्राद् ह्रस्वमचतुरस्रस्य पृथक्करणं सापेपत्तिकं प्रतिपादितम् । अत्रापि सरलावृत्ते रूपपत्तिशैली न सुस्पष्टा । तत्तु तत एवावगन्तव्या । दीर्घचतुरस्रस्य समचतुरस्रीकरणोपायः सोमपत्तिकः साधितः ।

अस्य सूत्रस्योपपत्तिसरणिरपि सरलावृत्यासरलैव विहिता । अति दीर्घचतुरसस्य समचतुरस्रीकरणं, समचतुरस्रस्यदीर्घचतुरस्रीकरणं विषचतुरस्रस्य दीर्घचतुरस्रीकरणं, मण्डलस्य समचतुरस्रीकरणं, समचतुरस्रस्यमण्डलीकरणं सर्वञ्चैतत् सोमपत्तिकं साधितम् ।

चतुर्थ्यां-चितीनां स्वरूपोपपत्तिः । चितिनाम- श्रौतसूत्रोक्तयागोपयुक्तभूमौ विहितेष्टकानां निर्माणपूर्वकसुपर्णाद्याकारविशेष इष्टकोपधानेन स्थण्डिलविनिवर्त्तकं चयनत्वम् । चितिः, चयनं अग्निचयनम् इति तस्यैव पर्यायाः ।[1]

चितेः प्रकरणस्याध्ययने कृतेसति इयं जिज्ञासा जायते यत् ननु कथं सप्तविधस्याग्नेरेवोपदेशः ? प्रथमादिषडन्तानां चितीनां वा कथं नोपदेश इति । इयमेव जिज्ञासावेदवादी मुखे स्वयमुत्थापिता ।[2] एके आचार्याः प्रथम न्तावदेक पुरुषप्रमाणामग्निमेकविधं कुर्वन्ति । तदेकोत्तरं द्विपुरुषप्रमाणं त्रिपुरुषप्रमाण मित्यैकैक पुरुषाधिक्येनापरिमित पुरुषप्रमाणपर्यन्तमग्निं वर्द्धयन्तीति । तथा न कर्तव्यम् । तत्रकारणमाह-- "सप्तविधोवा[3] अग्रेप्रजापतिरस्रृज्यत स आत्मनं विदधात ऐत्स एकशतविधेऽतिष्ठत स योऽर्वाचीनं सप्तविधाद्विधत्त एतं हस पितरं प्रजापतिं विच्छिनत्ति स इष्ट्वा पायीयान्भवति यथा श्रेयांॅसं हिंसित्वा थ य एकशतविधमति विधत्तेऽस्मात्स सर्वस्माद्वहिर्धा निष्पद्यते सर्वमुहीदं प्रजापतिस्तस्मादु सप्तविधेमेव

1. तद्धैके एकविधं प्रथमं विदधत्यथैकोत्तरमा परिमितविधान्न तथा कुर्यात् (शा.ब्रा., 10/2/3/17)
2. शा.ब्रा. 10/2/3/18.
3. श्रीवेङ्कटेश्वरदीक्षितैस्त्वेवमुक्तं-कल्पसूत्रप्रतिपाद्यमान मन्त्रकरणेष्टकासाधनकक्रमविशेषस्थण्डिल निवृत्यौपायिकव्यापारात्मक चयनोपयुक्तक्षेत्रविशेषोपधेयेष्टकारकरणश्येनाद्याकार परिज्ञानोपायभूतव्यापापरत्वम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रथमं विदधीतार्थं कोत्तर मैकशतविधादेकशतविधं तु नातिविदधीत नाहैतं पितरं प्रजापतिं विछिनत्ति नोऽस्मात् सर्वस्माद्बहिर्धा निष्पद्यते ।"

अयमर्थः--पूर्वं प्रजापतिः सप्तभिः प्राणैः सप्तपुरुषात्मकः एकः पुरुषः सृष्टः । सोऽयं प्रजापतिः आत्मानमेकोत्तरवृद्धया विदधानो अगच्छत् । स एक शतविधेऽतिष्ठत्ततः परं नाग्रेगतवान् । अतः सप्तविधादर्वाचीन पुरुष प्रमाणमग्निं यश्चिनुयादसौ महान्तं हिंसित्वा पापीयान् भवति । अथ चराचरपितामह प्रजापितं विछिद्य इष्ट्वा पापीभवति । य एवं मेकशतविधाग्नि मतिक्रम्याधिक पुरुष प्रमाणं मग्नि चिनुयात् स सर्वस्माद् बहिर्भूतो भवति । अतः सप्तविधादेवाऽऽरभ्य एकशतपुरुषविधपर्यन्तमग्निश्चेतव्यः इति ।

त इमेऽग्नयः सौमिक्यां वेद्यां चीयन्ते । पूर्वमध्वर्युः देवयजनक्षेत्रं निश्चित्य पूर्वद्वारेण प्राग्वशां पत्नीशालां प्रविश्य गार्हपत्यार्थं मृत्तिकामुद्धृत्य खात्वा तत्क्षेत्रं वारिणा सिंचेत् । ततो गार्हपत्यं कुर्यात् । गार्हपत्यकल्पितस्थानात् सप्तप्रक्रमान् प्रागायतान् गृह्णीयात् । सप्तप्रक्रमाः गार्हपत्या हवनीयायोर्मध्यमिति । ततः सप्तप्रक्रमेभ्यः प्रांचं व्याममात्रीं[1] विमिमीते । तस्य व्यामस्यमध्ये आहवनीयस्थानं कल्पयेत् । एष आहवनीयोवक्ष्यमाणायाश्चयन महावेदेः गार्हपत्यो भवति । अतएव कात्यायनोऽब्रवीत्- "उख्यस्थानेऽर्द्धव्यामेन गार्हपत्यस्य मण्डलं परिलखति" आपस्तम्बोऽपि -"एतच्छुत्यपेक्षया व्याममात्रेण गार्हपत्यस्य चयनम्"। गार्हपत्यचित्यर्थं कल्पितस्य व्यामस्य पूर्वार्द्धात् प्रदेशादारभ्य त्रीन्प्रक्रमान् प्राचः क्रमेत् स वेद्यन्तः, स प्रक्रमत्रयान्तः प्रदेशो महावेदेः पश्चिम भागस्यान्तः । ततो वेद्यन्तात् प्रागायतां षट्त्रिंशत् प्रक्रमपरिमितां मिमीते । वेदेः पश्चाद्भागे दक्षिणोत्तरगतान् त्रिंशत्प्रक्रमान्, पूर्वभागे दक्षिणोत्तरगतश्चतुर्विंशति संख्यकान् प्रक्रमान् मिमीते । तेन प्रांचः षट्त्रिंशत्प्रक्रमाः पश्चिमभागे, तिर्यञ्चः त्रिंशत्, पुरस्तात्तिर्यञ्चः चतुर्विंशतिः सर्वसंकलिते नवतिः सम्पद्यते । तस्यां नवतिप्रक्रमपरिमितायां वेद्यां सप्तविधं पुरुषप्रमाणमग्नि विदधातीष्टकाभिः। सप्तविधस्याग्नेः सोपपत्तिकं विहरणं मया तत्रैव प्रतिपादितम् ।

अत्रेदंविचार्यते-यथा सप्तविधस्य प्राकृताग्नेर्व्यामैकादशाः प्रक्रमाःएवमष्टविधनवविधादिपुरुषप्रमाणानामेकशतविधपुरुष- पर्यन्तानामग्नीना व्यामैकदशप्रक्रमा प्राकृती वेदिः किं पुरुषसंख्ययावर्द्धयितव्या आहोस्विन्नवेति । तत्र पूर्वपक्षः- अष्टविधाद्येकशतपर्यन्तानग्नि प्रकारान् करिष्यन्तः गार्हपत्यात् प्राचः सप्त, आहवनीय पूर्वार्द्धात् प्राचस्त्रीन् इत्येतान् प्रक्रमान् अनुवर्द्धयन्ति केचित् यतो हि "सैषा वेदेयोनिरित्यनया" श्रुत्या प्राकृतीवेदिः महावेदेर्योनित्वेन समाम्नायते । तर्हि-अष्टविधाद्यग्नि महावेदीनां योनिभूतवेदिवृद्धिं विना महावेदेर्वृद्धिर्न युक्तेति ।

1. व्यामश्चतुररत्निप्रामाणको भवति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्रोच्यते-लोके उत्पन्न गर्भमनुलक्ष्य योनि र्न वर्द्धते । किन्तु गर्भोवर्द्धमानो यावान्भवति तावती योनिर्वर्धते । गर्भं ततोऽपसारयितुम् । गर्भोऽग्निः स हि सार्धसप्तपुरुषप्रमाण एव प्राकृतेऽष्टविधादीनामपि भवति, जातस्यैवतस्याष्टविधादिरूपेण वृद्धिः अतस्तस्य योनिभूता वेदिर्व्यामैकादशप्रक्रममात्रैव । अत उत्तरासु विधास्वपि गर्भस्यैकरूपेणतद्वृद्ध्यभावाद्योनि र्न वर्धते । अत उत्तरेष्वग्निषु योनिभूता वेदिर्न वर्धयितव्येति तात्पर्यम् ।

यदि केचिद् वर्द्धयन्ति तेऽसमृद्धिमेवप्राप्नुवन्ति । नान्तः पात्यगार्ह पत्ययोर्वृद्धिर्भवति । तस्मादष्टविधाद्येक शतविधान्तासु विकृतिषु प्राग्वंशगता वेदिगार्हपत्य चितिश्च प्रकृतिभूतसप्तविधैकपरिमाणैव कार्या । अग्निक्षेत्रं महावेदिरिष्टका इत्येतत्सर्वमुत्तरोत्तरं वर्द्धते । तद् वृद्धिपकारः सूत्रेदर्शितः उत्तरेषु पुरुषोच्चयेनैकशतविधादिति ।

आद्योऽग्निर्द्विगुणस्त्रिगुण इत्यत्र किञ्चिदुच्यते-

आद्योऽग्निः सार्द्धसप्तपुरुषप्रमाणः तमग्निं नानाप्रमाणसमासविधिना समचतुरस्रीकृत्य द्विकरणीसमासेन समस्येत् त्रिगुणोऽप्येवमेव त्रिकरणीसमासेन समसितव्यः । उभयत्राग्निमानाय द्विपुरुषारज्जुरुत्पादयितव्या । एवं मानं कुर्वन्नष्टविधादिषु सप्तविधक्षेत्राधिक्येनोत्तरोत्तर मेकैकपुरुषपरिमितक्षेत्रमभ्यसेत् । अभ्यस्त पुरुषपरिमितिक्षेत्रसंज्ञस्य प्राकृतस्याग्निक्षेत्रस्य पंचदशधाविभक्तस्य भागद्वयमेकः पुरुषस्तेन पुरुषेणाष्टविधादिष्वग्निक्षेत्रमानंकर्तव्यम् । तच्च वेदिवृद्धिमन्तरेण न घटत इति । तद्वृद्धि प्रकारोऽग्रेवक्ष्यते । पंचम्यां कण्डिकायां प्रत्यग्नौपुरुषप्रक्षेपः कथं क्रियत इति सर्वं सोपपत्तिकं प्रदर्शितम् ।

"अथ त्रिपुरुषां रज्जुं मिमीते तां सप्तधासमस्यति तस्यै चतुरो भागानात्मन्नुपदधाति त्रीन्पक्षपुच्छेषु[1] ।" इतीयंश्रुति विद्याधरगौडपादैः सूत्ररुपेणाङ्गीकृता ।[2] परन्तु कर्काचार्यैः नाङ्गीकृता । अतो मयाप्यत्र व्याख्या वसरे सूत्ररूपेणनाङ्गीकृता । अत्र सायण एवं व्याचष्टे-

अथैकशतविधाग्नेः प्रकारं दर्शयति-अथ त्रिपुरुषां रज्जुंमिमीत इति । पूर्व-

---

1. श.ब्रा. 10/2/3/12.
2. अस्यार्थःत्रिपुरुषां त्रिपुरुषमितफलासाधनकां रज्जुं मित्वा तया रज्ज्वा त्रिपुरुषफलकं चतुरस्रं विधाय तत् सप्तधाविभज्यचत्वारो भागा अष्टनवतिविधाग्नेरात्मनि षट्पंचाशत्पुरुषात्मके प्रक्षेप्याः । एकैको भागः अरत्निवितस्तिरहिते चतुर्दशपुरुषात्मके अष्टानवतिविधाग्नेः पक्षपुच्छे क्षेप्यः। एवं सति पुरुषसप्तमांशेन पंचगुणेन सहितः सप्तपंचाशत्पुरुषा एक शतविधाग्नेरात्मा भवति । पुरुषसप्तमांशेन त्रिगुणेनसहितश्चतुर्दशपुरुषः प्रत्येकं पक्षौ पुच्छश्च भवति । एवं सर्वयोगेन एकशतपुरुषात्मक एक शतविधोऽग्निः । ततः पक्षपुच्छेषु स्वकीयारत्निवितस्तिवर्द्धनेन अष्टोत्तरशतपुरुषात्मक एकशतविधोऽग्निर्भवती त्यरत्निवितस्तिवर्द्धनं पृथगुक्तम् । (का.शु.सू., पृ.41-42)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मुक्ताया अष्टानवतेरुपरि[1] त्रिपुरुषसम्मितां रज्जुंमिमीते पुरुष त्रयप्रमस्यैकत्र पक्षे पुच्छेऽचात्मानि योजने पक्षिरूपोऽग्निः समो न भवतीत्याशंक्य योजनस्थानं विभज्याह-तां सप्तधासमस्यतीति । तस्याः रज्ज्वाश्चतुरोभागानात्मनिमध्यभाग उपदधाति त्रीन् भागान् पक्षपुच्छेषु ।[2] त्रिपदकरणीकसमचतुरस्रस्य यः सप्तमोंऽशः षट्त्रिंशदंगुलायामोऽङ्गुलसप्तमांशसहितपंचांगुलविस्तारो भूभागः कृतः, पंचदशाङ्गुलानि त्रिसप्तमभागयुतानि विस्तारे षट्त्रिंशदङ्गुलान्यायामे भवन्ति । तं चतुरस्रीकृत्य या करणी चतुर्दशगुणं त्रिपदकरणीकं संक्षिपति तत्करणीके चतुरस्रे नानाप्रमाणसमास विधिना तं क्षिपेत् । तत्क्षेत्रस्य करणी एकशतिविधे चयने प्रक्रमपदवाच्या । तेन प्रक्रमेण प्रकृति वद्वेदिः साध्या । स चान्तिसमचयनप्रक्रमः किञ्चिदूनसप्तत्रिंशदधिकशताङ्गुल-प्रमितो भवति । तच्चैवं विधेयम् । पूर्वमग्निक्षेत्रं सार्द्धसप्तपुरुषात्मकं समचतुरस्रीकृतं स्वसप्तमभागेन द्वितीयचयनेवर्द्धयेत् । एवं तृतीयादिष्वपि एकैकोच्चयेन स्वसप्तमभागवृद्धिः । तृतीये द्वासप्तमभागावधिकौ, चतुर्थे त्रयः, पंचमेचत्वारः, षष्ठे पंच, सप्तमेषद् । अष्टमेप्रथमक्षेत्रस्य द्विकरणी । एवं क्रमेण पञ्चनवतितमे चयने चतुर्णवतिः सप्तभागाः वर्द्धन्ते ।

तत् साधनोपायस्तु प्रथमेचयने पद्याप्रमाणेन पृथक् चतुर्दश चतुरस्राणि संसाध्य तानि नानाप्रमाणसमासविधिना एकीकृत्य चतुर्दकरणीकमेकं चतुरस्रं साधयेत् । ततः पद्याप्रमाणक्षेत्रं सप्तधाविभज्य तस्य त्रीन्भागान् समस्य चतुरस्रं कृत्वा तत्सप्तमभागत्रयसाधितं चतुरस्रं चतुर्दशकरणीके चतुरस्रे नाना प्रमाणसमासविधिनाऽऽवपेत् । तदावापे कृते यावच्चतुरस्रंजायते सैकशतविधे पद्याभिर्दक्षिणोत्तरं पूर्वापरं वा पंक्तिभिः स्थापिताभिरेकः पुरुषः । एवं विधेन

---

1. अत्रप्रसंगादग्निमानमुच्यते-सर्वेषां सप्तविधाद्येकशतपर्यन्तानामग्नीनामिष्टकोपधानप्रदेश एतावान् महावेदिषु भवति । प्रथमं वेद्यन्तात् प्रागायत षट्त्रिंशत्प्रक्रमांरज्जुंमित्वा तां सप्तधाविभज्य तस्याः रज्ज्वाः सप्तसु भागेषु मध्ये प्राचस्त्रीन्, भागान् उपदधाति । इष्टकाभिरुपदध्यादित्यर्थः । अवशिष्टान् चतुरोभागान् उपधानार्थं न विनियुंजीत किन्तु हविर्धानसदः प्रभृत्यर्थं परित्यजेदिति । एवं त्रिंशत् प्रक्रमायां चतुर्विंशति प्रक्रमायां रज्ज्वां च सप्तधाविभक्तायामभितो द्वौ द्वौ भगागौ विहाय मध्ये भागत्रयपरिग्रहेणाग्निक्षेत्रस्य पश्चात् पुरस्तात्तिर्यग्विस्तार उक्तो भवति । तत्राष्टानवतिपुरुषप्रमाणस्याग्नेरेतावदात्मपक्षपुच्छप्रमाणमित्युच्यते । सप्तपुरुषाणां चतुर्दशकृत्व आवर्तनेऽष्टानवतिः । तत्राष्टाविशंतिः प्रांचः पुरुषाः, तावन्तः तिर्यञ्चः उभये आत्मा अष्टानवतेरग्नेर्मध्यदेहो भवति । पक्षपुच्छानि प्रत्येकचतुर्दशपुरुषपरिमितानि । पूर्वं सप्तविधे पक्षयोरूपहि ताग्न्योश्चतुर्दशारत्नयः उभयोः पक्षयोर्भवन्ति । वितस्तयोऽपि तथा पुच्छे भवन्ति । एवं साधिमानानां पक्षपुच्छेष्वाधिक्येन निक्षिप्तारत्निवितस्तिप्रमाणरहितानां पुरुषाणां मात्रा ष्टानवतेरग्नेरुक्तेत्यर्थः ।
2. श.ब्रा. क पृ. 41.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुरुषेणद्विपुरुषां रज्जुमित्वोभयतइत्यादि[1] कल्पोक्त विधिनाऽऽत्मपक्षपुच्छादिकं साध्यम् । एवं विधाभिस्तिसृभिः पूर्वापरस्थापिताभिरेकः प्रक्रमः इति ।

अष्टविधादिषु प्राकृते प्रक्रमे एकैकं प्रक्रमसप्तमांशमधिकं प्रक्षिप्यतत्तदधिकसहितेन प्रक्रमेण षट्त्रिंशत् प्रक्रमां प्राचीमित्युक्तप्रकारेण वेदिमाने तत्तदग्निक्षेत्रपर्याप्ता महावेदिरपि वर्द्धते । एतत्सर्वं न्यायसिद्धमिति कृत्वा चाद्यन्तभूतयोः सप्तविधैकशतविधयोरेवाग्निवेदिमानमुक्तम् । तत्रैकशतविधे त्रिभिः सप्तमप्रक्रमांशैः सहिताश्चतुर्दशप्रक्रामाः सम्भूयैकः प्रक्रमस्तेन वेदिमानं कर्तव्यम् । सप्तपुरुषाश्चतुर्दभिर्गुणनेनाष्टनवतिः सम्पद्यन्ते । अत्र त्रिपुरुषप्रमाणयोजनेन एकशतविधोग्निरुत्पाद्यत इति षष्टकण्डिकायामुच्यते ।

वेदिवृद्धिंविना वर्द्धितस्याग्नेर्मानासम्भवात् पञ्चम्यामग्निवर्द्धनप्रकारमुक्त्वा षष्ठ्यां वेदिवर्द्धनमुक्तम् । अत्रापि मया यथामतिः सोपपत्तिकं सूत्रसमाधनं कृतम् । तुल्यप्रमाणानां सहस्राधिकानामपि समचतुरस्राणा मेकस्मिन् समचतुरस्रे संक्षेपः कथं कुर्यादित्यत्रयुक्त्या मयोपपतिः साधिता । एवं यूपैका दशीन्यादि सूत्राणां व्याख्यानं संग्रहेणकृतम् ।

अथेष्टकानां विषये किञ्चिदुच्यते

सर्वेषां सप्तविधाद्येकशतपर्यन्तानामग्नीनामिष्टकोपधान प्रदेश एतावान् माहेवेदिरेव भवति । ताश्चेष्टकाश्चतुर्दशविधाः भवन्ति-पद्या, अर्धपद्या, पादोनपद्या, जंघमात्री, अध्यर्द्धा, अर्द्धोत्सेधापद्या, अर्धोत्सेधा, अर्धपद्या, पादभागा, त्रिग्राहिणी, अर्धपादभागा वृहती, वक्रा, अर्द्धवृहती , चतुर्भागाइति । तत्रषडङ्गुलं समचतुरस्राणां पादभागानां प्रमाणम् । द्वादशाङ् गुलं पद्यानां प्रमाणम् । अष्टादशाङ्गुलं जंघामात्रीप्रमाणम् । चतुर्विंशत्यंगुलं वृहतीनाम् । इतिसमचतुरस्रणां प्रमाणम् ।

त्र्यङ्गुलविस्तारा षडङ्गुलदीर्घा दीर्घचतुरस्रा इष्टका भवन्ति । तस्याार्धपादभाग संज्ञाभवति । तथा षडङ गुलविस्तारा द्वादशाङ्गुलदीर्घा एवं विधा दीर्घचतुरस्रा अपरा इष्टकाभवन्ति तासां अर्धपद्या इति संज्ञा । तथा द्वादशाङ्गुलविस्तारा चतुर्विंशत्यङ् गुलादीर्घा एवंविधादीर्घचतुरस्रा अन्य इष्टका भवन्ति । तासा मर्द्धवृहतीतिसंज्ञा । एवं त्रीणिदीर्घचतुरस्राणामिष्टकानि । द्वादशाङ् गुलविस्तारा अष्टादशाङ्गुलदीर्घा चाध्यर्धा संज्ञा इष्टका भवन्ति । चतुर्विंशतिभिरङ्गुलैर्दीर्घा अष्टादशभिरंगुलैस्तर्यक्प्रमाणा एवं विधा दीर्धचतुरस्रा इष्टका त्रिग्राहिणी संज्ञिका भवति । द्वादशांगुलसमचतुरस्राः एकेनपादेन (कोणेन) न्यूनाः त्रुटिताः पादोनपद्याः । अष्टादशांगुलदीर्घा द्वादशाङ् गुलविस्तृता अध्यर्द्धाः। द्वादशांगुलसमचतुरस्रास्त्र्यङ्गुलोच्चा द्व्यङ्गुलो वा अर्धोत्सेधापद्याः । द्वादशाङ्गुलदीर्घाः षडङ्गुलविस्तृतास्त्र्यंगुलोच्चा द्व्यङ्गुलोच्चा वा अर्धोत्सेधा अर्धपद्याः । त्र्यङ्गुलसमचतुरस्राश्चतुर्भागाः । उच्चता तु षडङ्गुलमिता सर्वासां

1. कौ.श्रौ.सू. 16/8/1

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चतुरङ् गुलमिता वा ।

वक्रेष्टकानां साधनं त्वेवम् --

चतुर्विंशत्यङ्गुलं समचतुरस्रं साधयित्वा तस्योत्तरांसे शङ्कुं निखायार्धप्रमाण रज्जुमुयतः पाशां कृत्वोत्तरांस निहितशंङ्कावेकं पाशं प्रतिमुच्य-दक्षिणांसस्योपरिलम्बायमानां रज्जुंदक्षिणास्या माकृष्यार्धप्रमाणां रेखां कृत्वा पाशप्रोतशंकुना तावद्वृत्तंलिखेद् यावत् सा रज्जुश्चतुरस्रस्य दक्षिण श्रोणेरूपर्य्यायाति । ततो दक्षिणश्रोणेरारभ्य रज्जुप्रान्तं यावद्रेखां कुर्यात् । ततश्चतुरस्रस्य पश्चिमोत्तरपूर्वपार्श्वानि मार्जयेत् । अवशिष्टं वक्राप्रमाणम् । द्वितीयतृतीयादिष्वपि चयनेषु गार्हपत्यचितीष्टकाप्रमाणमाद्यचयनवदेव भवति ।

एवमेकादशसहस्राण्येकशतं च सप्तत्यधिकं समस्तानामिष्टाकानामिय संख्या भवति । तत्रदशसहस्राण्यष्टौशतानिलोकम्पृणाः । त्रीणिशतानि सप्तत्यधिकानि यजुष्मत्यः । ब्राह्मणेतु दर्भस्तम्ब दूर्वेष्टका स्वयमातृण्णा कूर्मोलूखलाद्याः पंचविशंतिसंख्याक इष्टकाः आसांमध्येऽधिकाः पठित्वा त्रीणिशतानि पंचनवति-र्यजुष्मत्य उक्ताः । एतापंचविशंतिरिष्टकास्तिस्रोर्नैऋत्याश्चोक्तसंख्यातोऽधिका प्रथमायां चितौ यावत्य इष्टकाश्चीयन्ते ताभिरेव आएकशतविधमग्निपर्यन्तम-ग्नयश्चेतव्याः । तत्रोत्तरोत्तरं परिमाणपरमेव वर्द्धते न संख्यातो वर्धनीयाः . अत्रेदमेव वैशिष्ट्यं यत् पाकशोपाभ्यामासामिष्टकानां प्रमाणं द्वात्रिंशांशै ह्रसते । अत्राहमहीधरः -

ह्रसतेपाक शोषाभ्यां द्वात्रिंशद्भागमिष्टकाः ।
तस्मादाद्रप्रमाणन्तु कार्यामानाधिकं बुधः ।।

पचनं पाकः शोषणं शोषः-ताभ्यां, पाकेनशोषेण चेष्टाकाद्वास्त्रिंशमानात् द्वात्रिंशद्भागाद् ह्रसीयन्ते । आद्रावस्था प्रमाणाः शोषणेन पचनेन च ऊनप्रमाणाः सम्पद्यन्ते । आद्रावस्थाप्रमाणं द्वात्रिंशद्भागाधिकं सर्वेष्टकानां कर्तव्यम् । अयं ह्रासः पादभागविषयः । पद्यादिषु द्विगुणत्रिगुणादि यथायथमधिको ज्ञेयः इति रामचन्द्राचार्या आहुः। तेनपादभागायाः द्वात्रिंशद्भागो ह्रासः, पद्यायाः षोडशभागोह्रासः । जंघामात्र्यादेः द्वात्रिशंद् भागत्रयो ह्रासः। बृहत्या अष्टमांशंः । तस्मात्पादभागस्यार्ध प्रमाणं स्वत्रिंशांशाधिकं कार्यम् । स्वद्वात्रिंशाधिकं वा पद्याप्रमाणं स्वत्रिंशांशद्वयधिकं वा । स्व द्वात्रिंशांशद्वयाधिकं वा कार्यम् । अध्दर्द्धा दैर्धप्रमाण जंघमात्री प्रमाण त्रिग्राहिणीतिर्यक् प्रमाणानि स्व त्रिंशांशत्रयाधिकानि वा स्वद्वात्रिंशांशत्रयाधिकानि कार्याणि । बृहतीचक्रा त्रिग्राहिणी दैर्ध्यप्रमाणानि स्वत्रिंशांशचतुष्काधिक कार्याणीति ।

अत आसां निर्माणं द्वात्रिंशांशवर्धनेन कार्यम् । तच्चेत्थम्-पूर्वं यजमानेनोद्धर्वबाहुना प्रपदोच्छ्रितेन वा समं वंश मिनुयात् स पुरुषः । तस्य पुरुषप्रमाणस्य द्वात्रिशांशं तत्र वर्धयित्वा वंशं तावत् प्रमाणं कुर्यात् । ततो वर्धित द्वात्रिंशांशैः वैणवदण्डं पुरुषप्रमाणं मत्वा ततः सुत्रोक्तप्रकारेणेष्टकाः कर्तव्याः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्वास्विष्टकासु अंगुलिकाष्ठादिनात्रीणि त्रीणि चिन्हानिकर्तव्यानि । तानि च चिन्हानि वक्राणि, ऋजूनि, तिरश्चालिखितानि च । तासु चिन्हानि कार्याणि । तत्रवक्राणि चिन्हानि (⌣) एतादृशानि भवन्ति । ऋजूनि च (।।।) एतादृशानि भवन्ति । तिरश्चालिखितानि (---) एतादृशानिभवन्ति ।

तदिदं सप्तकण्डिकात्मकं कातीयशुल्वशास्त्रं महताप्रयत्नेन व्याख्योपपत्तिभ्यां ज्यामिति शैल्या परिशिष्टादिभिः समलं कृत्य समुपस्थापितमिति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रथम कण्डिका

मङ्गलाचरणम्

विघ्नराजं नमस्कृत्य सर्वविघ्नोपशान्तये ।
व्याख्यां करोमि शुल्वस्य विघ्नराज प्रसीद मे ।। १ ।।
नमस्तेऽस्तुदेवि त्वदीयप्रसादा-
ज्जडा वा शठाः पापिनो वा विमूढाः ।
सदा शारदे त्वत्सुनीर प्रधौता-
अवुद्धाः प्रवुद्धाः प्रकाशं प्रयान्ति ।। २ ।।

ग्रन्थारम्भप्रतिज्ञा

विदितमेवैतद् यत्सर्वतन्त्रस्वतन्त्रो धर्मैकपक्षपातीकल्पसूत्राद्यनेकविध-शास्त्रप्रवर्तको भगवान्कात्यायनः कल्पसूत्रोक्त दर्शपूर्णमासादि क्रत्वर्थं कुण्डमण्डपस्थण्डिलादिनिर्माण प्रकारं विवक्षुः अन्वर्थैव शुल्वसूत्रनाम्ना ग्रन्थं प्रणिनाय । तस्यैतस्यादिमं सूत्रम् ।

रज्जुसमासं वक्ष्यामः ।। 1/1 ।।

समसनं समासः । रज्जोः समासः रज्जुसमासस्तम् । अत्रसमासशब्दस्तु-ल्यातुल्यक्षेत्राणामेकीकरण परामर्शकः । वक्ष्यति हि-

"तुल्यप्रमाणानां चतुरस्त्राणामुक्तः समासः[१] ।"

"नानाप्रमाण समासे ह्रसीयसः करण्यावर्षीयसोऽपच्छिन्द्यान्तस्याक्ष्णया-रज्जुसभेसमस्यतीति समासः[२] ।"

"अतिदीर्घञ्चेत्तिर्यङ्मान्यापच्छिद्यापच्छिद्यैक समासे समस्य शेषं यथायोगमुपसंहरे दित्येकसमासः[३] ।"

"यावत्प्रमाणारज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तान् समस्येदि-त्यादिः ।[४]"

---

1. का.शु.सू. 2/21.
2. का.शु.सू. 2/22
3. का.श.सू. 3/3
4. का.शु.सू. 3/4

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

"अत्रसमास शब्दो नैकान्तेन समासस्यैवोपलक्षकः अपितु व्यासस्यापि। यथा वक्ष्यति-

"समचतुरस्रं दीर्घचतुरस्रं मध्येऽक्षणया पच्छिद्य विभज्येतरत् पुरास्तादुत्तरतश्चोपदध्याद् विषमं चेद्यथायोगमुपसंहरे दितिव्यासः ।"[१]

अतः समासग्रहणमेतच्छास्त्र प्रतिपाद्यसकलविषयस्योपक्षणम् । यद्यप्यापस्तम्बेन "वेणुना मिमीत"[२] इति वेणोर्मान साधनत्वेना भिहितं, तथापि कात्यायनेन रज्जूपदानं त्रृज्वर्थमुक्त म्। तथा चोक्तं--"नान्यत्सूत्रादृजु र्भवेदिति।"[३] रज्ज्वा यथा संक्षिप्यते विस्तार्यते च तत् प्रकारं वक्ष्यामः कथयिष्याम इत्यर्थः। रज्जुलक्षणं चाह कात्यायनः-"अजीर्णाग्रन्थिनी सूक्ष्मे"[४] त्युपक्रम्य कुशवल्वजै रित्येतैः श्लोकैः ।

"ज्ञातार्थज्ञातसम्बन्धं श्रोतुं श्रोताप्रवर्तत" इति वचनानुरूपं शिष्यबुद्धिसमाधानार्थं रज्जु समासमिति" व्याजहार ।

ननु शिष्टाचार मनुसृत्य सर्वैराचार्यैर्मङ्गलाचरणं विधीयते, परन्तु नायमाचार्येणाकारीत्यतः शिष्टाचारभङ् गदोषोऽत्र प्रसज्यत इति चेन्न ।

आशीर्वाद नमस्कार वस्तुनिर्देश पूर्वकम् ।
मङ्गलं त्रिविधं प्रोक्तं ग्रन्थादौ तद् विचारयेत् ।।

इति वाक्यप्रामाण्याद् वस्तुनिर्देशात्मकं मङ्गलं कृतमत्र। अस्तु ।

शुल्बशास्त्रानुबन्धचतुष्टयप्रतिपादनम् -

कोऽत्राधिक्रियते ? कश्च विषयः ? कः सम्बन्धः ? किञ्चास्य प्रयोजनमिति ? चेदुच्यते--

अधीतमन्त्रब्राह्मणसूत्रग्रन्थः अधिकारी । कुण्डमण्डपेष्टकारचना विषयः । विषयःविषयीभावः सम्बन्धः । अधीतमन्त्रब्राह्मणसूत्रग्रन्थस्य यज्ञकर्मण्यधिकारः । यज्ञश्च कुण्डमपडपरापेक्षः । कुण्डमण्डपरचनादौ कथम्भावाकाङ्क्षां पूरयितुं ग्रन्थोऽयं प्रवृत्तः । एतदेवास्यप्रयोजनमिति ।

---

1. का.शु.सू. 3/4.
2. आ.शु.सू. 3/8/7,
3. का.श्लो. शु.4.
4. का.श्लो.शु. 12-14, अन्यत्ररज्जुलक्षणं यथा-
   गुणमुञ्जकौशेय कार्पाससूत्रप्रसूतं च गोवाल वेण्यादिभूतम् ।
   दृढंग्रन्थिखोडादि हीनञ्च कुर्याच्चतुर्भिर्यवैस्तदिष्टः ।।
   (कुण्डरत्नाकरः श्लो । 10 ।
   क्षौमकार्पासमयं दीर्घह्रस्वभाववर्जं सूत्रं प्रोक्तं । (म.कु.सि.,)
   सूत्रस्यवचतुष्टयमितः परीणाह उक्तः । म. कु. सि.)
   एवं मुञ्जशण वल्वजक्षौमकार्पासादि तन्तुनिर्मितं दृढरामशमग्रन्थिदीर्घह्रस्वभाववर्जं यवचतुष्टयमितं त्रिवृत् सूत्रं ग्राह्यमिति पर्यवसन्नोऽर्थः । (म.कु.सि.)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ननु आचार्येण तु सुस्पष्टमभिहितं वेदिमानं पुरस्कृत्य "व्याममात्रीं पश्चात् त्र्यत्निं प्राचीम् ।"[१] "षट्त्रिंशत्प्रक्रमां प्राचीमित्यादि "[२] तर्हि "अर्कैचेन्मधुविन्देत किमर्थ पर्वतं व्रजेदिति " न्याय वदेकेनैव शास्त्रेण सम्यग्यज्ञानं जायमाने सति को नाम शास्त्रान्तरं जिज्ञासेत ? अतो व्यर्थ एष शास्त्रारम्भ इति चेत् । सत्यम् । कात्यायन श्रौतसूत्रे वेद्यादेर्मानमात्रमुपदिष्टम्, न तु विभिन्न प्रकाराणां समविषमचतुरस्रणां योगविभागकरणमुपदिष्टम् । अपि च "रथमात्र्युत्तरे[३] त्युपक्रम्य ईशाक्षयुगशम्यदीनां प्रमाणं नैवोक्तम् । "युपैकादशिनी चेद्रथाक्षमात्रान्ताराणी "[४] त्यत्राक्षव्देनकियत् प्रमाणं गृह्यत इति नोक्तम् । सर्वञ्चैतस्माच्छास्त्रात् ज्ञायते । अतोऽस्याध्ययने नूनं प्रवृत्तिः स्यात्प्रेक्षावताम् । "द्विपुरुषां रज्जुमित्वोभायतः पाशां मध्येलक्षणमि[५]त्युपक्रम्य कत्यायन श्रौतसूत्रस्य शाषोडध्यायन्तर्गत सम्पूर्णा अष्टमी कण्डिकावलोकितायां सत्यां तत्रोत्थिता कथं भावाकांक्षां पूरयितुं शुल्बसूत्रमिदमलं भवतीति नूनमध्यवस्याति तत्र परीक्षार्थं प्रस्तिथः परीक्षकः ।

दिक्साधनम्

व्याममात्रीं पश्चाद् द्व्यरत्निं प्राचीमिति श्रूयते ।[६] तथा "प्राग्वंश[७]" मित्येवमादि दिगायत्तमुक्तम् । अतो दिशांज्ञानमन्तरा नाभ्युपगच्छेयुर्विहारकाः कुण्डस्थण्डिलादिस्थानमिति सर्वत्र कुण्डमण्डपरचनाऽऽदौ दिग्ज्ञानमावश्यकं मत्वाऽऽदौ दिक्साधनमाह :-

समेशङ्कुनिखाय शंकुसम्मितयारज्ज्वामण्डलं परिलिख्य यत्र लेखयोः शङ्क्वग्रच्छाया निपतति तत्र शंकू निहन्ति सा प्राची ।। 1/2 ।।

समे समायां भूमौ शंकुं निहननयोग्यंकाष्ठविशेषं[८] निखाय भूमौ प्रवेशयित्वा

---

1. का.श्रौ.सू. 2/6/1.
2. का.श्रौ.सू. 8/3/8.
3. का.श्रौ.सू. 5/3/11.
4. का.श्रौ.सू. 8/8/6.
5. का.श्रौ.सू. 16/8/1.
6. का.क्षौ.सू. 2/6/1.
7. का.श्रौ.सू. 7/1/15.
8. पैप्पलं खादिरं वापि तथाषाढमुदुम्बरम् ।
   अलाभे यज्ञवार्क्षं वा तत्रसंस्थापयेत् सुधीः ।।
   खादिरार्जुनशालोत्थं युगपत्र तरूद्भवम् ।
   रक्तचन्दनपालाशरक्तशालविशालजम् ।
   नीपकारञ्जगुटजैर्वैणवं बिल्ववृक्षजम् ।।
   द्वादशाङ्गुलमानोच्चं शंकुंखादिर निर्मितम् ।
   अलाभे यज्ञवार्क्षं वा तत्रसंस्थापयेत् सुधीः ।।
   उपर्युक्तानां वाक्यानामयमेव निर्गलितोऽर्थो यत् केनचिद् यज्ञीय काष्ठेन शङ्कुनिर्माणं कर्तव्यमिति । स च शंकुः- मूलेषडङ् गुलपरीणाहो द्वादशाङ् गुल

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शंकु सम्मितया[१] शङ्कुप्रमाणपरिमितया रज्ज्वा सूत्रेण, यद्वाशङ्कौ सम्यक्मितया प्रक्षिप्तया धारितया रज्ज्वा मण्डलं वृत्तं परिलिख्य यत्रलेखयोः शङ् क्वग्रच्छायानिपतति तत्र शंकुंनिहन्ति सा प्राची ।

अयमर्थः- समभुविशङ्कुपरिमितया रज्ज्वा मण्डलंपरिलिख्य मण्डलमध्ये शङ्कुमेकं निवेशयेत् । ततः सूर्योदयादारभ्य यदा शङ्क्वग्रच्छाया वृत्तपरिधिं स्पृशेत् तत्र शङ् कुमेकं निहन्यात् सा प्रतीची । यत्र चापराह्ने वृत्तपरिधिं छायास्पृशेत्तत्र शङ् कुमेकं निहन्यात् सा प्राची ।[२]

ननु शास्त्रान्तरेषु वृत्तशाङ् क्वोर्विषये बहुधाश्रूयते, वृत्तं क्वचित्षोडाशाङ् गुलं[३] द्वादशाङ् गुलं च शङ्कुः । क्वचिच्च- एकादशांङ् गुलं [४] वृत्तमेकादशाङ् गुलं च शङ् कुः । अन्यच्च षड्वृत्तनिर्माणं[५] व्यपदिश्यते । तेषांवचानां सम्यगवगाहने सति प्रश्नत्रयं पुरस्तिष्ठति । तद्यथा-

प्रथमः प्रश्नः

षोडाशाङ्गुले वृत्ते द्वादशाङ्गुलात्मकः शङ्कुः कथं निहन्यते ?

द्वितीयः प्रश्नः

शंकुमानतो वृत्तस्यन्यूनाधिक्ये वृत्तप्रमाणतः शङ्कोर्न्यूनाधिक्ये वा का हानिः?

तृतीयः प्रश्नः

कथञ्च शंक्वग्रच्छाया यत्रनिपतति तत्रैववृत्तपरिधौ लक्षणं कर्तव्यम्, एवं समेशङ्कु[६] रित्यत्र अग्रग्रहणं किमर्थमति ?

उच्छ्रायः सूच्यग्रो वृत्तः सरलश्चेति प्रायः सर्वेषु ग्रन्थेषु प्रतिपादितम् ।

1. "सम्मितया" इत्ययं शब्दः समुपरार्गपूर्वक मामाने, डुमिन् प्रक्षेपे इत्येताभ्यां धातुभ्यां निष्पन्नो भवति । तेन पक्षे सम्मितये त्यस्य सदृश प्रमाणयेत्यर्थो भवति अपररिमन् पक्षे च प्रक्षिप्तया धारितयेत्यर्थो भवति ।
2. संशोधिते क्षितितले विनिखन्यशंकुम्, तस्याग्रलग्न सुदृढाऽऽयत सूक्ष्म रज्ज्वा सम्भ्राम्य मण्डलाया विरचय्य रेखां, सूर्योदये पपतति यत्र समेऽह्नि शङ्कोः छाया प्रतीच्यभिमतास्तमये च पूर्वा, याम्योत्तरे तदुभयोः परिमाय मध्ये । तन्मध्यतो विदिगिति स्वधियावगच्छेत् ।। (सूरिसर्वस्वे, श्लो. 61, 62) ।
3. नृपाङ्गुलैः सम्मित कर्कटेन सूत्रेण वा वृत्तवरं विलिख्य । रव्यङ्गुलंशङ्कु ममुष्य मध्ये निवेशयेत् खाक्षिमिताङ्गुलिभिः ।। (म.कु.सि., श्लो. 6,)
4. समेशंकुमेकादशाङ् गुलं निधाय शङ्कुसम्मितया रज्ज्वा मण्डलं परिलिख्य यत्रलेखयोः शङ्क्वग्रच्छाया निपतति तत्र शंकूनिहन्ति साप्राची । (म.कु.सि.,)
5. प्रथमं शङ् कुमूलमितं षडगुलं, द्वितीयं द्वादशाङ्गुलं, तृतीयं द्विगुणं, चतुर्थं त्रिगुणमिति वृत्तचतुष्टयं सम्पाद्य द्वितीयद्विवृत्तत्रितये पूर्वाह्णच्छाया चिह्नं षट्कं कृत्वा द्वितीय चिन्हान्तरं समसूत्रं पूर्वापरं दद्यादिति । (म.कु.सि.,पृ. १९)
6. का.शु.सू. 1/1.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रश्नत्रयस्योत्तर साधनात् प्राक् पूर्वपीठिका बोद्धव्याभवति । अत्र दिने शङ्कुछायातः, रात्रौ च नक्षत्र वेधेन दिक्साधने भूगोल-खगोलविषुववृत्तादि विज्ञानमावश्यकम् ।

इयं धरित्रीसार्द्धत्रयोविंशत्यंशैर्नता विद्यते ।[1] उत्तरायणं मकरादारभ्यते[2] मिथुनराशिस्तद्गोलस्यान्तिमोविन्दुः । ततः कर्कादद्दक्षिणायनं तस्य धनूराशिः परमोऽन्तः ।

अनन्तकोटिब्रह्माण्डेषु दूरातिदूरं स्थितं नक्षत्रमण्डलम् ।[3] तन्मण्डलाधः कल्पिता मेषादिद्वादशराशयः । पृथिवीराशिचक्रयोरन्तरे सूर्यादि सप्तग्रहणां तत्तत्कल्पितराशिचक्रेषु त्रिंशदंशैर्गणितज्ञैः प्राचीनसूरिभिः सुप्रतिष्ठापिता सप्रमाणं वरीवर्ति ।

अक्षांशरेखांशंभेदेन तत्तद् देशानां पलभाक्षभापर्यायेण निगदिता । एवं लङ्कायां पलभा नाम मध्याह्नसमये शंकुछाया शून्य अङ्गुल शून्यव्यङ् गुलमिता विद्यते । इदमेव सूर्यभ्रमणमध्यचक्रम् । क्रमेणैधमानेयमक्षभादिल्ली-भवानी मौरादावादादिषु (29) एकोनत्रिंशदक्षांश प्रदेशेषु (6) षडङ् गुल (36) षट्त्रिंश व्यङ्गुलमिता वर्तते । एवं (60) षष्ठ्यक्षांशप्रदेशेषु पलभा (20) विंशत्यदङ्गुल (38) अष्टत्रिंशद्

1. इत्याधुनिकानां मतम् ।
2. भानोर्मकरसंङ्क्रान्तेः, षण्मासा उत्तरायणम् । कर्कादिस्तु तथैवस्यात् षण्मासा दक्षिणायनम् ।। (सू.सि. मानाध्यायः श्लो.9)
3. पञ्चसिद्धान्तिका--
चन्द्रादूर्ध्ववुधसितरविकुज जीवार्कजातास्ततो भानि ।।
ब्रह्मगुप्त -
शशिवुधासितार्ककुजागरुशनि कक्षावेष्टितो भकक्षान्तः ।।
लल्ल :-
-चन्द्रज्ञभार्गवदिनेशकुजार्य सौरि भानि क्षितेः क्रमत ऊर्ध्व गतिस्थितानि इति ।
श्रीपतिः-
अधोभचक्राच्छनिर्जीवभौम सूर्यास्फजि द्योधनशीतभासा ।
कक्षाक्रमेणार्क सुतादयोऽमी स्मृताश्च शीघ्रा कलिकां च भुक्त्या ।।
इतीमानि प्रमाणानि सिद्धान्त शिरोमणेः भूमिकाया सङ्कलितानि सन्ति । ("क" सि.शि.भू.-पृ.9)
अपि च-
यासांगतिर्दिविभवेद्गणितेन गम्या, तास्तारकाः सकलखेचरतोऽति दूरे ।
तिष्ठन्ति या अनियता गतयश्च तारा-श्चन्द्रादधो हि निवसन्ति तदाश्रिताश्च ।
("ख" सि.शि. (टिप्पण्यां) पृ.190 गोलाध्यायः

अन्यच्च-
ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभिधीयते ।
तन्मध्ये भ्रमणं भानामधोधः क्रमशस्तथा ।।
मन्दामरेज्यभूत सूर्य शुक्रेन्दुजेन्दवः ।
परिभ्रमन्त्यधोधस्थाः सिद्धविद्याधराधनाः ।
(सू.सि. भूगोलाध्यायः,श्लो. 31-32.)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



व्यङ्गुलमिता, (66) षष्ठषष्ठचक्षांश प्रदेशेषु च (29) एकोनत्रिशंदङ् गुल (46) षष्ट्चत्वारिंशद्व्यङ्गुलमिता प्रत्यक्ष पंचाङगकृद्भिर्गाणिता प्रकाशिता च विद्यते । अङ्गुलं प्रसिद्धम् । व्यङ्गुलं षष्टितमोभागोऽङ्गुलस्य । इयं प्रश्नोत्तर समाधये पूर्वभूमिका प्रस्तुता ।

अत्रेदमवधेयम्-सूर्यः शुद्धप्राच्यामुदेति । पूर्वाह्ने शंकुछायाग्रं प्रतीच्यां निपतति सा शुद्धैव प्रतीची। ततोऽपराह्णे गतिवशाद्यच्छायाग्रं प्राच्यां पतति तत्तु स सङ्क्रान्तिवशेनायनवशाच्च चालनसापेक्षम् । एतदनुरूध्यैव सर्वग्रन्थ कृद्भिः प्राचीचालनं[1] निर्दिदष्टम् । न प्रतीची चालनं कस्मिन्नपि ग्रन्थ इत्यलम् । इदानीं प्रकृतमनुसराम : ।

---

1. पूर्वस्मिन्दिवसे यथा परदिनेऽप्येवं विधायाङ् कनं ।
छायासङ् गमनिर्गमान्तरघटी निघ्नं दिनं द्वन्द्वजम् ।।
निर्गत्यन्तरमिष्टक्रमलवकं षष्ट्या हृताप्तांशकं ।
प्राच्यां चालयताद्रवेर्गतिवशात्सूक्ष्मेन्द्रकाष्ठास्फुटम् ।। (कु.र .श्लो.20)
यां काष्ठां रविरेति तत्र चलनं पूर्वादथो यूकया
कीटे कर्कटके वृषेऽपिमकरे नोचालनं कार्मुके ।
युग्मेऽन्यासु तु चालनं परिमितं यूकाद्वयेनोत्तमं
प्राक्चिह्नस्य ततःस्थिरांवुपदिशः सूत्रस्य पातोऽङ्कतः ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मण्डपकुण्डसिद्धौ (6-7) षट्सप्तपद्याभ्यां सूर्यप्रकाशपतितशङ् कुछायाग्राभ्यां प्रतीची प्राची साधनं निर्दिदष्टम् । (8) अष्टम पद्येन संक्रांन्तिभेदेन सिद्धप्राची विन्दोरयनवशातत्तद्दिशि यूकामात्रं यूकाद्वयमितं मिथुनधनुः सङ्क्रान्त्योश्च चालनाभाव उपपादितः । (9) नवमपद्ये सिद्धप्राचीप्रतीभ्यां दक्षिणोत्तरदिक्साधनमुपवर्णितम् । (10-11) दशमैकादशपद्ययो र्निशिदिक् सिषाधयिषायां श्रवण कृतिका पुष्पचित्रास्वात्यन्तराल वेधेन प्राचीप्रतीची साधनमुपन्यस्तम् । (12) द्वादशतमे पद्ये मध्याह्ने सप्ताङ्गुलशङ् कुछायाग्रत उदग् दक्षिणा साधनं प्रपंचितम् । ततः प्राक्प्रतीच्यौ संसाधनीय इति- विषयोपक्रमः ।

षोडशाङ्गुले वृत्ते द्वादशाङगुलः शङ्कुःकथं निहन्यत इति प्रथम प्रश्नस्योत्तरं प्रतिपादयामः ।

(क) मण्डपकुण्डसिद्धि ग्रन्थे षोडशाङ्गुलव्यासार्द्धेन[१] वृत्तम् । (ख) शुल्वेशङ्कुपरिमितया रज्ज्वा वृत्तम् ।[२] (ग) आथर्वणे-एकादशाङ् गुलमितं वृत्तम् ।[३] (घ) हयशीर्ष पञ्चरात्रे-द्वादशाङ् गुलं वृत्तम्[४] (ङ) कुण्डमार्तण्डे-द्वादशाङ् गुल[५] वृत्तम् । (च) कुण्डतत्वप्रदीपेशङ् कुप्रमाणाधिक विस्तारार्द्धे[६] वृत्तसम् ।

मध्याह्न समये दिक्साधने "समकुगते[७] नगाङ् गुले..." समपृथिवी गतः

(कुण्डोद्योतः, श्लो.15)

शङ् कु प्रमाणाधिकविस्तरार्द्धे वृत्ते यतः संविशति प्रभाग्रम् ।
यतो वहिर्याति च शङ् कुभाग्रं प्राचीतयोश्चिह्नगुण प्रदानात् ।।
शंकुप्रभासंग वियोगमध्यघटी हतं श्वस्तनयानमिष्टैः ।
भक्तान्तरं खन्तु विभागलब्धे प्राक्चिह्नतश्चालनमायनाशम् ।।

(कु. तत्त्व, प्र., श्लो.15)

द्युतिप्रवेशोद् भवनाडिगाभिर्द्विघ्नाभिरूनेन दिनेन विघ्नाः
दिनद्वयस्यापगमान्तरालभागाहृताः स्युः खरसैरभीष्टाः ।
तैश्चालयेदैन्द्रिगुणं तु भावाद्वामोदितोऽयं विधिरत्र सूक्ष्मः ।। (कु.क.द्रु., श्लो.13)

1.. "नृपाङ् गुलैः सम्मितकर्कटेन सूत्रेणवा वृत्तवरं विलिख्य...." ।
(म.कु.सि. श्लो.6)

2. "समेशङ् कुनिखाय सङ् कुंसम्मितया रज्ज्वामण्डलंपरिलिख्य .." ।
(का.शु.सू.,1/1.)

3. "समेशङ्कुमेकादशाङ् गुलं निधाय शङ् कुसम्मितयारज्ज्वा मण्डलं-परिलिख्य.." । (म.कु.सि.,पृ-१९)

4. "द्वादशाङ् गुलमानेन तत्र वृत्तन्तु भ्रामयेत्.." (म. कु.सि.,पृ-१९)

5. "दिवाकरमितां गुल प्रमितकर्कटेन प्रगे गुणेन भुवि वा.. " ।
(कु.मा., श्लो.10)।

6. "शङ्कुप्रमाधिक विस्तरार्द्धे वृत्ते यतः संविशति प्रभाग्रम्.." ।।
(कु.त.प्र.श्लो.14)

7.. म.कु. सि., श्लो 12.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नवाङ्गुलः नरः शंकुः निर्दिष्टः । एवं पूर्वकथित षट्पक्षेषु प्रधान्येन द्वादशाङ्गुलः, आथर्वणमते त्वेकादशाङ्गुलः ।

मण्डपकुण्डसिद्धिग्रन्थः सङ्गमनेरस्थपण्डितप्रवर विट्ठलदीक्षितैः कृतः । तैरेव स्वस्य ग्रन्थस्य स्वयमेव टीकाकृता विद्यते । तत्र टीकायां षोडशाङ्गुलवृत्त करणे हेतुनिर्दिद्ष्टः, यस्मिन् देशे अक्षभा (पलभा) षडङ्गुला तदधिका वा तत्र धनुः सङ्क्रान्तौ द्वादशाङ्गुल शङ्कोश्च्छाया प्रवेशनिर्गमौ न स्यातामेविति षोडशाङ्गुलवृत्तकरणम् । एतत्पङ्क्त्याशयो गणितखगोलवविद्भिरेव बोद्धुंशक्यः । दिल्ली नगरे तदुत्तरत्र कश्मीरेषु, ततोऽप्यपरत्राक्षांशभेदेन पलभायाः क्रमेणैधमानत्वाद्द्वादशाङ्गुले धनुः सङ्क्रान्तौ वा वृत्ते तन्न्यूने सूर्यस्य परमायन-स्थितत्वाद् द्वदशाङ्गुलशङ्कोः वृत्तपरिध्योश्च्छाया प्रवेशनिर्गमौ नैव भविष्यत इति विचार्य षोडशाङ्गुलवृत्तकरणमुपदिष्टम् । येन षङ्गुलाधिक पलभा प्रदेशे धनुः सङ्क्रान्तावपिद्वादशाङ्गुलशङ्कु छाया प्रवेशनिर्गमौ सुकरौस्यातामिति तात्पर्यम् ।

त्रिचतुष्पञ्चाङ्गुलपलभा प्रदेशेषु द्वादशाङ्गुलव्यसार्द्धकरणेऽपि न हानिः । कन्याकुमारीतः कश्मीरान्तमेकेनैव पक्षेण दिक्साधनं सहजं भवेदित्याशयेन षोडाशाङ् गुलव्यासार्द्धवृत्तं स्वीकृतं ग्रन्थकृतेति मन्ये ।

मध्याह्न समये सप्ताङ्गुलशङ्कुना छायाग्रतो दिकसाधनेऽप्ययं पलभा विचार एव पुरतः समुल्लसति ।

शङ्कुमानं[1] मूलभागे खडङ्गुलव्यासमितं तत्परिधिमानंस्थूलतया ((22) द्वाविंशतिगुणितं (7) सप्तभिर्विभक्तं भागत्याग लक्षणया (18) अष्टादशाङ्गुलं (7) सप्त यवतः किंचिदूनामायति । एतद्व्यासमित मूलभागेन भूतलेशङ्कुस्थैर्यं सुकरम् । शङ्कोरूच्चतामानं द्वादशराशिभेदेन द्वादशादित्यत्वेन[2] च द्वादशाङ्गुलत्वं प्रतिपादितम् । तस्य शङ्कोः सूच्यग्रत्वं तु सम्यक्दिक् चिन्हकरणाय

---

1. शङ्कुलक्षण यथा–
   रम्यं वृत्तं कुशाग्रं खदिरतरुद् भवं यज्ञदारुद्भवं वा,
   दीर्घं मासाङ्गुलीभिः पृथुलतरतलं षट्परीणाहभाजम् ।
   श्लक्ष्णं मूलैकतष्टं समतरमभितः कोटरं ग्रन्थि हीनं ।
   रेखारान्धि प्रहीणं तनुतरतलकं वापि कुर्वीत शङ्कुम् ।।
   (कु.र., श्लो. 11)
   सूचीसमाग्रः सरलैकतष्टः षडङ्गुलैर्मूलपृथुश्च शङ्कुः ।
   अधोऽपि सूक्ष्माग्र युगार्कपर्व दीर्घोनवांशैः कृतमण्डलेऽन्तः ।।
   (कु.त.प्र.,श्लो. 12)
   सूच्यग्रः सरलः शंकुः पृथुमूलधृतः स्थिरः ।
   अधोऽपिवा सूक्ष्ममुखो निहितः प्रविशेद् भुवि ।।
   (कु.रा. वा. , श्लो. 12)
2. दीर्घोऽन्नार्कांशकः शंकुः सुक्ष्माग्रः सरलः पृथुः ।
   मूलेऽथवापि सूक्ष्मोऽसौनिखेयोमूलतोऽपि च ।।
   (कु.द्यो., श्लो. 11)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नितरामावश्यकम् । एतावतः सन्दर्भस्यायं सारो यत शङ्कुमानापेक्षयाऽधिकं वृत्तं कार्यं न न्यूनमिति । येन कस्यामपि सङ्क्रान्तौ दिक्साधनं निर्बाधं भवेदित्यमुमेवाशयं ग्रन्थकृतान्यैश्च विद्वद्भिः षोडाशङ्गुलव्यासार्धकं वृत्तं दिक्साधने स्वीकृतमिति प्रथमप्रश्नस्योत्तरं समपद्यत ।

शङ्कुमानतो वृत्तस्यन्यूनाधिक्ये वृत्तप्रमाणतः शङ्कोर्वान्यूनाधिक्ये का हानि-रिति द्वितीयप्रश्नः ।

अत्रब्रूमः-

प्रथमप्रश्नोत्तरे वृत्तप्रमाणाधिक्ये या युक्ति राविष्कृता सैवास्मिन् द्वितीयस्मिन् प्रश्नोत्तरे पुरस्तिष्ठति । शङ्कुमानतो वृत्तस्य न्यूनत्वे षडङ गुल तदधिक पलभा प्रदेशेषु छाया प्रवेश निर्गमाभावः । शङ्कुमानाद् वृत्ताधिक्ये तु न काचिद् व्यापत्तिः वृत्तप्रमाणतः शङ्कोर्न्यूनत्व इष्टापत्तिः । शङ्कोराधिक्ये तु प्रथमप्रश्नोत्तर निर्द्दिष्टा व्यापत्तिरिति कृत्वा कुण्डतत्व प्रदीपोक्तं शङ्कुप्रमाणाधिक विस्तारार्धं वृत्तम् । अयमेव पक्षः समीचीनः सूपपद्यते ।

कथंच शङ्क्वग्रच्छाया यत्र निपतति तत्रैव वृत्तपरिधौ लक्षणं कर्तव्यम् ? कथं वा सूत्रे अग्रग्रहणं कृतमिति तृतीयः प्रश्नः ।

अत्रोच्यते - शङ्कोः षडङ् गुलपरीणाहः द्वादशाङ् गुलदैहर्ध्यं सूच्यग्रत्वं च सर्वग्रन्थ सम्मतम् । वृक्षलतागुल्माद्यनावृत्ते भूतले प्रातः सूर्योदये निखातस्य शङ् कोश्छायाग्रद्राधिष्ठं वहुदूरं वृत्ताद् वहिर्निर्गच्छति । शनैः शनैः स्वभ्रमण चक्राश्रयेण ऊर्ध्वंगच्छति दिनकरे क्रमेणछायालघीयसी भवन्ती दृश्यते । तच्छायाग्रं प्रातर्नवैकादशवादनाभ्यन्तरे प्रतीच्यां यत्र वृत्तपरिधिंस्पृशति तत्र लक्ष्मकार्यम् । मध्याह्नात् परं प्रतीचीमवतरति भास्करे त्रिपञ्चवादनाभ्यन्तरे छायाग्रं वृत्तान्तः परिचरत् क्रमेण वहिर्गन्तुकाम यदा प्राच्यां वृत्तपरिधिं स्पृशति तत्र प्राची चिन्हं विधेयम् । इयं प्राची छायाग्र सिद्धास्थूला, तत्सौक्ष्मयाय तत्तत्सङ्क्रा-त्यनुरोधेनायनदिशि यूकामात्रं यूकाद्वयमितं वा ग्रन्थोक्तरीत्या [१] चालनं सम्पादनीयम् ।

---

1. कर्के कीटे गोमृगे यूकया सा द्वाभ्यां चाल्या सिंहकुम्भत्रिकेऽपि ।
यां वै काष्ठां भानुमान् याति तस्यां चाल्या द्वन्द्वेकार्मके चालनं न ।।
अस्यार्थः- पूर्वोक्त रीत्यासाधितस्थूलप्राच्याः सूक्ष्मत्व सम्पादनमाह -कर्क इति । सा पूर्वरीत्या संसाधिता प्राची कर्कवृश्चिक राशिस्थिते सूर्ये दक्षिणायनवशाद् दक्षिणदिग्भाग एकया यूकया चाल्या । गोमृगेवृषभमकर संक्रान्त्योरुत्तरायणवंशादुदग्भाग एकया यूकया चालनीया । सिंहत्रिके= सिंहकन्यातुलासंक्रान्तित्रयनवशाद्दक्षिण दिग्भागे कुम्भमीनमेषराशिगते दिनमणावुदीची भागे च यूकाद्वयेन क्रामणीया । अयनवशत्वमुद्दिश्यैव ग्रन्थकृता यां काष्ठां भानुमान् यातीतिनिर्दिष्टम् । द्वन्द्वेमिथुने कार्मुकेधनुषि च सूर्यस्य दक्षिणोत्तर गोलयोर्मध्यविन्दौ वर्तमानत्वाच्चालनं नेष्टम् । इदं

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृत्तपरिधौ शङ् कुछायाग्रचिन्हमपि स्वमानेन यूकामात्रं यूका द्वयमात्रं वा भवति । अङ्गुलस्याष्टमांशो यवः यवस्याष्टमांशो यूका । छायाग्रंविहाय छायोपान्तयोश्चिन्हं ततस्तदर्द्धकरणं तदपि कर्णसूत्रे इति भवन्मतेन शुद्धप्राची प्रतीचीसाधनं कष्टदं स्थूलं च भवेत् । तदपेक्षया छायाग्रयोः सूच्यग्रत्वात् निर्दिष्टस्थानाङ्कनाय न काचिदापद् व्यामोहः कष्टं वा ।

एतदेवाभिप्रेत्य समग्रशङ्कुछायां परिहाय दिक्साधने छायाग्रस्यैव प्राधान्यमुररीकृत्य अग्रग्रहणं कृतमिति सर्वं सुस्थम् ।

शङ् कुपरिमितया वृत्तं विरच्य तन्मध्ये शंकुनिखननमुच्यते । वृत्तमध्ये निखेय शङ्कु सरलेन भाव्यम् । अन्यथा नम्रीभूतस्य शङ् कोश्चछायया शुद्धनिर्णयो न भविष्यति ।.अतस्तदुपायमत्र ब्रूमः-

वृत्तमध्ये यः शङ्कुः निखातः तस्म कल्पितासु चतसृषुदिक्षु चत्वारः समाः शलाकाः निधेयाः तेन शङ् क्वग्रः वृत्तमध्य एव पतिष्यति । अत्र कर्णरूपेणनिधेयाः शलाकाः कति प्रमाणकाः स्युरिति प्रश्न उपस्थितो भवति ।

अत्रोच्यते-वृत्तमध्ये स्थितः शङ्कुः भुजत्वेन कल्पनीयः । वृत्तकेन्द्रतः परिधिपर्यन्तं यत् प्रमाणं तत् कोटित्वेन कल्पनीयम् । वृत्तकेन्द्रतः परिधिपर्यन्तं दैर्घ्यस्य यत् प्रमाणं तदपि शङ्कोरपिस्यात्यतो हि-शङ्कुपरिमितयेत्युक्त म् । भुजकोट्योर्ज्ञाने कर्णज्ञानार्थमुपायो गणितशास्त्रे[1] उक्तम् । कर्णरूपायाः शलाकायाः मानमानयनार्थं भुजकोट्योर्वर्गः पृथगानीय तयोर्योगः कार्यः । लब्धाङ्कस्य वर्गमूलं यत् स्यात् तदेवकर्णरूपायाः शलाकायाः मानमिति बोध्यम् । अस्योपपत्तिः --

मन्ये शङ्कोर्मानं (12) द्वादशाङ् गुलम् । तस्यवर्गः (144)

सूक्ष्मप्राचीसाधनं प्राक्सम्पादित पूर्वदिक् चिन्ह एव कर्तव्यम् । तत्तद्राशिवशेनापसरितेऽपि प्राची चिन्हे प्रतीची चिन्हस्य स्थिरत्वात्, प्रतीची चिन्हस्य स्थिरत्वमुपपादितं कुण्डोद्योते स्थिराम्बुपदिश इति ।
(म.कु.सि., पृ. 24, श्लोक.8, व्याख्या ।)

1. इष्टो वाहुर्यः स्यात् तत्स्वर्धिन्यां दिशीतरो बाहुः ।
त्र्यस्त्रे चतुरस्त्रे वा सा कोटिः कीर्तिता तज्ज्ञैः ।। । ।।
तत्कृत्योर्योगपदं कर्णो, दोः कर्णवर्गयोर्विवरात् ।
(लीलावती, क्षेत्रव्यवहारः, श्लो. 1-2,)
त्रिभुजे वा चतुर्भुजे वा यदि कश्चिद् बाहुः स्यात् (बाहु संज्ञिका रेखा स्यात्) तत्स्पर्धिन्यां दिशि नवत्यंश कोण कारिण्यां दिशि, (यथा यदिबाहुः = पूर्वापरस्तर्हि कोटिर्दक्षिणोत्तरः) सा कोटि कथ्यते ।
कोटिवर्गभुजवर्गयोः योगः कर्णवर्गोभवति । (का.शु. 2/11) आप .शु.सू. 1/8, बौ.शु.सू 1/37) अयमेवशुल्वप्रमेय इत्युच्यते ।
रेखागणिते । 1/47 प्रमेयेऽस्योपपत्तिर्द्रष्टव्या । बीजगणिते चापि श्रीभास्करा चार्येण " उपपत्तिश्चास्यरूढस्य गणितस्य निगद्यताम् " इतिप्रश्नमुक्त्वा बीजगणितीयोपपत्तिर्दर्शिता । सा च तत्रैव द्रष्टव्या । बहूनां सैद्धान्तिक सूत्राणा मुपजीव्योऽयं शुल्वप्रमेयः ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चतुश्चत्वारिंशदधिकशतम् । एवमेव कोटेरपिवर्गः 144 । उभयोर्योफलं (288) अष्टाशीत्याधिक द्विशतम् । अस्यवर्गमूलं 16.59, एतदेव कर्णशलाकायाः मानम् ।

अत्र परीक्षा--समेशङ् कुरितिसूत्रांनुसारेण मयापरीक्षा कृता । द्वादशाङ्गुल शङ् कु निखाय तत्परिमितया रज्ज्वा मण्डलं परिलिख्य तत्रच्छाया प्रतीक्षाकृता । अन्येषु मासेषु तत्रच्छाया प्रवेश निर्गमौ भवतः । परन्तु धनुर्मासे वृत्ते छाया प्रवेशनिर्गमौ नैव भवतः ।

अत्र पूर्वोक्त (यस्मिन् देशे अक्षभा (पलभा) षडङ् गुला तदधिका वा तत्र धनुः सङ्क्रान्तौ द्वादशाङ् गुल शङ्कोश्च्छाया प्रवेशनिर्गमौ न स्याता मिति वचनमेव बीजमस्ति ।

देवरिया जनपदस्य पलभा षड्ङ् गुला विद्यते । अतोऽत्र धनुर्मासे द्वादशाङ्गुल परिमितया रज्वा सम्पादिते वृत्ते द्वादशाङ्गुलशङ् कोच्छाया प्रवेशनिर्गमौ नैव भवतः। अत एतदेव बिमृश्य मण्डपकुण्डसिद्धिकाराः स्वग्रन्थे दिक्साधनार्थं षोडशाङ्गुले वृत्ते द्वादशाङ् गुलशङ् कुनिहननमुपदिष्टवन्तः ।

त्रिचतुष्पञ्चपलभा प्रदेशेषु कात्यायनोक्त दिक्साधनं सदैव सुकरं स्यात्। तेषु प्रदेशेषु द्वादशाङ् गुलं शङ्कोच्छाया धर्नुर्मासेऽपि वृत्ते प्रवेश निर्गमौस्याताम् ।।

अथ दक्षिणोत्तर साधनमुच्यते

तदन्तरं रज्ज्वाभ्यस्य,[१] पाशौ कृत्वा, शङ्कोः पाशौ प्रतिमुच्य, दक्षिणाऽऽयम्य, मध्ये शंकुं निहन्त्येवमुत्तरतः सोदीची ।। 1/3 ।।

तयोरन्तरं तदन्तरं, तयोः निखातयोः शङ्क्वोरन्तरालपरिमितां रज्जुंमित्वा, तदन्तरालभूभागस्य द्विगुणीकर्तुमशक्यत्वात् तां रज्जुमभ्यस्य द्विगुणी कृत्य, द्विगुणी कृतरज्जोरन्तयोः पाशौ कृत्वा तौ पाशौ शङ्कोरुपरि प्रक्षिप्य द्विगुणीकृत रज्जुमध्यं कृत चिन्हं दक्षिणस्यांदिश्याकृष्य यत्र रज्जुमध्यं स्पृशति तत्र मध्ये मध्यचिन्हेन स्पृष्टे भूभागे शङ् कुं निहन्ति सा दक्षिणा दिक् । तामेव मध्यचिन्हां रज्जुं विपरिणम्याकृष्टे यत्र लक्ष्म भवति तत्र मुद्गरेण शङ्कुं निहन्ति । लक्ष्म द्रढिम्ने कर्मकुशलः, एवं संसाधिता सा उदीची[२] दिग् भवति ।

---

1. रज्जुर्द्विघ्नां मध्यचिन्हां सपाशां प्राचीशङ्कौ पश्चिमे चापि दत्वा ।
कर्षयेद्धीमान् दक्षिणे चोत्तरे तच्चिन्हे स्याद्दक्षिणाचोत्तरा दिक् ।।
(म.कु.सि. श्लो. 9)
2. कुण्डार्कदक्षिणोत्तरदिक्साधनाय भिन्नाप्रणाली निर्दिष्टा, तस्यायमाशयः- प्राची-प्रतीची सूत्रे कर्कटेन सूत्रमध्याधिकमानेनोभयतो धनुर्द्वयं परस्परं सलग्नं विधाय धनुर्द्वयसम्पातयोः समसूत्रदानेन दक्षिणोत्तर दिक्साधनं कर्तव्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्र विशेषः-

ननु कुण्डमण्डप रचनादौ तत् प्रतिपादकेषु मण्डपकुण्डसिद्धयादि ग्रन्थेषु स्तम्भादीनां निखनन विधौ पञ्चमांश एव उक्तः । [1] एवमन्यत्रापि बोध्यमिति चेन्न । भिन्नविषयत्वात् । उच्छ्रायार्हाणां लम्बस्तम्भादीनां प्रवर्तकं तत् । अत्र तुप्रमाप्तव्यानां स्थलानां लक्ष्मद्रढिम्ने शङ्कवो निखन्यन्ते । अतस्तस्यार्धगमयेन्महीमित्युक्तमतः शङ्कोरर्धमेव भूमौ निखातव्यमिति सर्वत्रापि शङ्कुनिखनन विधावुक्तविधिरवगन्तव्यः।

द्वितीयतृतीय सूत्रयोरूपपत्तिरत्रोच्यते ।

तत्र प्राचीसाधनं यथा-

चित्र-1



चित्र-2



प्रथम चित्रे "क" शङ्कुः । तत्सम्मितया रज्ज्वा तत्सभन्ताद् वृत्तं विलिखितम् । सूर्योदयादारभ्य यदा शङ्कोरग्रच्छाया वृत्तपरिधिं स्पृशेत्तदातत्र लक्ष्म कुर्यात् । एवमपराह्णे यत्र वृत्तपरिधिं स्पृशेत्तदा तत्र लक्ष्म कुर्यात् । एतावता चिन्ह द्वयं भवति । तत्र प्राच्यां "ख" शङ्कुं निहन्यात् प्रतीच्यां च "ग" शङ्कुं निहन्यात् एवं ख, ग प्राची प्रतीच्यौ सिद्धयतः ।

अथोदीचीसाधनं यथा -

ततस्तृतीय सूत्रोक्त दिशा ख, ग रज्जुं द्विगुणी कृत्यान्तयोःपाशौ कृत्वा तन्मध्ये लक्ष्म कुर्यात् । ततस्तस्याः पाशमेक 'ख' शङ्कौ नियम्य अपरंच 'ग' शङ्कौ

---

1. पचंमांशं तु भूमौदद्यात् । (म.कु. सि., पृ. 70, श्लो. 19.)
शङ्कुः कार्यस्तु शुल्बज्ञैस्तस्यार्द्धं गमयेन्महीम् । (का.श्लो.शु. 9)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रक्षिप्य मध्यमेन चिन्हेन दक्षिणस्यामाकृष्य लक्षणे 'ङ' शङ्कुं निहन्यात् । एवमुत्तरतः कृत्वा तत्र 'घ' शङ्कुं निहन्यादिति । एवं दक्षिणोत्तरसाधन' सेत्स्यति ।

अथ कुण्डार्कोक्त दक्षिणोत्तरसाधनं द्वितीय चित्रतोऽवगन्तव्यम् ।

'छ' 'ज' प्राची-प्रतीचीसूत्रे कर्कटेन सूत्रमध्याधिकमानेनोभयतो धनुर्द्वयचिन्हेनापच्छिद्यतयोः सम्पातजनितचिन्हयोः समसूत्रप्रदानेन 'ट' दक्षिणादिक्, 'ठ' चोत्तरादिक् निष्पद्यते ।। ३ ।।

अथ सर्वत्रक्षेत्रसाधनाय परिभाषा

रज्ज्वन्तयोः पाशौ करोति ।। 1/4 ।।

रज्जोः अन्तयोः रज्ज्वन्तयोः । रज्जोः[१] नाम क्षेत्रमानार्थमुपादीयमानस्य शुल्वस्य अन्तयोः प्रान्तयोः पाशौ करोति शुल्ववित् । पाशो नाम रज्जुप्रान्त आशुबन्धमोक्षार्थ दत्तोग्रन्थिविशेषः। अयं पाशः सर्वत्र विहरणार्थमभ्यासादिकं कृत्वा ततः रज्ज्वन्तयोः पाशौ कुर्यान्नियमेन । एवं वक्तव्यं भवति अभीष्ट क्षेत्राऽऽयमसम्मितारज्जुः प्रमाणम् । सा सर्वमानेषू भयतः पाशा भवति ।। 1/4 ।।

मानार्थ गृहीतायां रज्ज्वां चिन्हस्थानानि

श्रोण्यसं-निरञ्छन-संख्यासमासभङ्गेषु लक्षणानि ।। 1/5 ।।

श्रोणी च अंसौ च निरञ्छन च संख्यासमासभङ्गश्च तेषु लक्षणानि चिन्हानि कुर्यात् । वेद्यादेर्नैऋत्यवायव्यकोणौ श्रोणी पदवाच्यौ[२] आग्नेयेशान कोणावंसावुच्येते। निरंछनं- "प्रमाणमभ्यस्याभ्या चतुर्थलक्षणं करोती" त्याकारकम् । संख्याया प्रमाणरज्ज्वभ्यासरज्ज्वो र्यः समासः संयोगः एकीकरणं तस्य भङ्गः समानविभागः स संख्यासमास भङ्गपदवाच्यः ।

अयमर्थः-- द्विगुण रज्ज्वा मध्ये यो विन्दुः स एव संख्यासमासभङ्ग-पदवाच्यः । अभीष्टक्षेत्रयाममिता रज्जुः प्रमाणरज्जुः । तावत् परिमिता द्वितीयारज्जुरभ्यासरज्जुरित्युच्यते ।

अस्योपपत्तिः--

अत्र "क -ग" प्रमाणरज्जुः । तस्याभ्यासः "ग-ख " रज्जुः । "ग-ख" अभ्यासरज्ज्वा चतुर्धाविभाक्तायां सत्यां "ग-घ" "घ-ङ् ", "ङ-च", "च-ख",इति

---

1. गुणं मुन्ज कौशेयकार्पाससूत्रप्रभूतं च गोवालवेण्यादिभूतम् ।
दृढं ग्रन्थिखोडादिहीनं च कुर्याद्यतुर्भिर्यवैस्तत्परिणाह इष्टः ।।
(कु.र., पृ. 64, श्लोक. 10)
गुणञ्च मौजंशणसूत्रवेणु गोवालकौशेय कुशादिभूतम् ।
श्लक्ष्णं समं ग्रन्थिविहीनमब्धियवैः परीणद्धमरोमशं च ।।
(कु.त.प्र. पृ. 104, श्लोक 11)

2. का.शु.सू. 1/1.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



चत्वारो भागाः सम्पद्यन्ते । "क-ग" प्रमाणस्य "ज" प्रमाणार्द्धं विद्यते । अत्रद्विगुणरज्ज्वार्मध्ये यो "ग" बिन्दुः स संख्यासमासभङ्ग-पदवाच्यः । "ग-ख" अभ्यासरज्ज्व;' "घ" निरञ्छन चिन्हम् । "क-ग" प्रमाणरज्ज्वां "ज" चिन्हं श्रोण्यंसावङ्कनार्थम् । श्रोण्यंसाविति नामकरणमेतस्मिच्छास्त्रे व्यवहारार्थम् ।।5।।

विहार साधनम्

इत आरभ्य एकादश सूत्र पर्यन्तं विहारनिर्माणे या याः प्रक्रियाः सर्वत्र अपेक्षिताः सन्ति ताः वक्ष्यति वक्ष्यमाणसूत्रैः ।

प्राच्यन्तयोः शङ्कू निहन्ति ।। 1/6 ।।

प्राची पूर्वादिक्, अन्तः प्रतीचीदिक् । तयोः शङ्कूनिहन्ति । अत्रेदमुच्यते--सर्वत्र विहार निर्माणार्थं स्वाभीष्टेषु विमातव्येषु क्षेत्रेषु प्राच्यन्तयोः, प्रान्तयोः शङ्कू निहन्ति मण्डपकुण्डविदित्यर्थः ।

यथा--दर्शपूर्णमासवेदिनिर्माणे शास्त्रचोदितद्वादशादिप्रक्रमपक्षेषु,[1]

1. "पश्चादाहवनीयादष्टासुप्रक्रमेष्वेकादशसु द्वादशसु मत्या वा" । (क श्रौ.सू. 4/8/17.)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अभिमतपक्षमाश्रित्य रचनावेलायां पूर्वं प्रतीच्यां शङ्कुमेकं निखाय ततोऽभिमतदूरेऽपरं प्राचीशङ्कुं निहन्ति शुल्बविदः, अन्यथा हि-विहरणं न स्यात् । एवमस्य सूत्रस्य प्रयोजन भूतानि वाक्यान्यपराण्यपि सन्ति । यतो हि-कात्यायन श्रौतसूत्रे - "त्र्यरत्निं प्राचीं चतुररत्निं पश्चात्" [1] पुरस्तात् षट्त्रिंशदित्याद्युक्तमतो[2] युक्त मेवात्र प्राच्यन्तयोः शङ्कूनिहन्तीति सूत्रपाठः । सूत्रस्यैतस्येदं तात्पर्यं यत् - सर्वत्र विहरण सौविध्यर्थं प्राच्यन्तयोः शङ्कू निहननमावश्यकमिति । 6 ।।

अपि च--

श्रोण्यंसयोश्च ।। 1/7 ।।

श्रोणिश्च अंसौ च श्रोण्यंसौ तयोः । चकारः समुच्चयार्थबोधकः। श्रोणिद्वयेंऽसद्वये च शङ्कू निहन्याद् वक्ष्यमाणविधिना । प्राच्यन्तयोः शङ्कू निखननानन्तरं श्रोण्यंसयोश्च शङ्कू निखननमावश्यकमितिभावः ।। 7 ।।

ननु श्रोण्यंसयोः शङ्कुनिखनमुच्यते, तत् कथं स्यादित्याकाङ्क्षायामाह--

शङ्क्वोः पाशौ प्रतिमुच्य निरंछनेन गृहीत्वा दक्षिणपूर्वां दिशं हन्ति ।।1/8 ।।

प्राक् निहितयोः शङ्क्वोः = पूर्वापरयोः शङ्क्वोः द्विगुणितया रज्ज्वा अन्तयोः कृतौ पाशौ प्रतिमुच्य धारयित्वा निरंछनेन तत् संज्ञकेन चिन्हेन गृहीत्वा नीत्वा, दक्षिणपूर्वा दक्षिणा च पूर्वा च तयोरन्तरमाग्नेयीं दिशं प्रत्याकर्षन्ति कर्मकुशलाः, कथं ? श्रोण्यंस साधनार्थम् । एवं कृते सति क्षेत्रप्रमाणकं पार्श्वमानीकं सपादक्षेत्रप्रमाणाक्ष्णयाकं, पादोनक्षेत्रप्रमाणकं तिर्यङ् मानीकं त्रयस्त्रिक्षेत्रमुत्पद्यते । रेखागणितशास्त्रदिशा तु एवं वक्तव्यं भवति पादोनक्षेत्रप्रमाणकं कोटिः । क्षेत्रप्रमाणकं भुजः पादाधिकक्षेत्रप्रमाणकं कर्ण इति ।। 7 ।।

एवमुत्तरतः ।। 1/9 ।।

एवमयमेव प्रकारः उत्तरतोऽपि कर्तव्यः । अयमर्थः-येन प्रकारेण- साभ्यास प्रमाण रज्जोः निरछंन लक्षणेन विहरणं कृतमाग्नेय्यां दिशि, तेनैव प्रकारेणोत्तरतः ऐशान्यां दिशि रज्ज्वाकृष्य असंसाधनार्थं त्र्यस्त्रिक्षेत्रमुत्पादयेत् ।। 9 ।।

विपर्यस्येतरतः ।। 1/10 ।।

इतरतः = पूर्वेतरतः पश्चिमभागस्येति, पाशं विपर्यस्य विपर्ययं कृत्वा "व्यत्यासो विपर्यासो व्यत्ययश्च विपर्ययेत्यमरः"[3] पाशयोः परिवर्तनं विपर्यास शब्देनोच्यते । इयं परिभाषा अस्मिन् शास्त्रे सर्वत्र लगिष्यति । तेनायमर्थः सम्पद्यते पूर्व पाशं पश्चिम शङ्कौ पश्चिमपाशं पूर्वशङ्कौ च नियम्य निरंछनलक्षणेन नैऋत्यकोणं प्रत्याकृषेत् । यत्र निपतति तत्र शङ्कुमेकं निहन्यात् । सा दक्षिणा श्रोणिः। एवं

1. का.श्रौ.सू. 2/6/1.
2. का.श्रौ.सू. 8/8/3.
3. संकीर्णवर्ग, श्लोक 23/5.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वायव्यकोणं प्रत्याकृषेत् यत्र पतेत् तत्र शङ्कुमेकं निहन्यात् । सा उत्तराश्रोणिः । एते शङ्कवः प्राच्यन्तयोरित्यादि सूत्रद्वयेनोक्ताः ।। 10 ।।[1]

स समाधिः सर्वत्र ।। 1/11 ।।

सोऽयं पूर्वोक्तः समाधिः क्षेत्रसाधनेपायः सर्वत्र समदीर्घ चतुरस्रक्षेत्रेषु वेदितव्यः । स शब्दः सम्यगर्थे समशब्दार्थे वा । आङ् समन्ततोभावे, दधातिः कोरोत्यर्थे । एवं मुक्तं भवति सम्यगन्यूनातिरिक्तं क्षेत्रं समन्तादापादयतीति समाधिः । यद्वा-समानानामाधिः समाधिः । अधिर्नाम अधिष्ठानमिति मेदिनिः ।[2] पार्श्वमान्यौ तिर्यङ् मान्यौ अक्षणया रज्जुश्च परस्परमन्योन्यसमास्सम्पादयति चतुर्दिक्षु समं क्षेत्रमापदयतीति समाधिः । अयमर्थः- विमीयमानस्य क्षेत्रस्यन्यूनाधिक राहित्येनावस्थानं समाधानम् । तच्च-सम्यक् संसाधितस्य क्षेत्रस्य फलम् । समीचः श्रोण्यंसान् सम्पादयतीति समाधिः ।। 11 ।।

निरञ्छनोपपादनम्

चतुरस्रे श्रोण्यंस साधनमुक्त्वेदानीं प्रसङ्गान्निरञ्छन चिन्हं ब्रवीति ।

प्रमाणमभ्यस्याभ्यास चतुर्थे लक्षण करोति तन्निरञ्छनम् ।। 1/12 ।।

प्रमाणमभीष्ट क्षेत्रयाममितां रज्जुमभ्यस्य द्विगुणीकृत्य, अभ्यास चतुर्थे-- अभ्यासरज्जुंचतुर्धा विभज्य मूलतः प्रारम्भ अभ्यास रज्जोः यश्चतुर्थो भागः तस्यारम्भस्थाने लक्षणं चिन्हं कुर्यात् तदेव निरंछनम् ।

अयमाशयः -"यावदायामं[3] प्रमाणामि" त्युक्तत्वात्, यावदायामं प्रमाणरज्जुः स्यात्तावदेव प्रमाणं सम्वर्द्ध्य वर्द्धिताभ्यास रज्जुं चतुर्धा विभजेत् । अभ्यासरज्जोः मूलतः प्रारभ्य भागत्रयस्यान्ते चतुर्थभागस्यारम्भस्थाने यल्लक्षणं तदेव निरञ्छन पदेनोच्यते । निरञ्छनमिति नामकरणं विहरणसौविध्यर्थम् ।। 12 ।।

अक्षणया तिर्यङ् मानीशीषोः ।। 1/13 ।।

तिर्यङ्मीयतेऽनया सा तिर्यङ्मानी । तिर्यङ्मान्याः शेषः तिर्यङ्मानीशेषः । तिर्यङ्मान्याः साभ्यासरज्ज्वाः मूलतस्त्रयोभागाः तिर्यङ् मानी तस्याः शेषभूता या रज्जुः अक्षणयेत्यभिधीयते । अथवा एवं वक्तव्यं भवति त्रिभागारज्जुस्तिर्यङ्मानी तस्याः शेषस्तिर्यङ्मानीशेषः पंचभागात्मिकारज्जुः सा अक्षणयेत्युच्यते । निरञ्छनेनाकृष्टे श्रोण्यंसपरिच्छेदिका या रज्जुः सा तिर्यङ्मानी भवति । प्राचीसूत्राऽऽयाम श्रोण्यंसमानातिरिक्ता रज्जुः शेषः शब्देनोच्यते ।

एतेनायमर्थः सम्पद्यते--सर्वेष्वभ्यासेषु साभ्यासस्यागन्तुपरिमिता यावन्तोभागाः सम्पद्यन्ते तद् द्विगुणभागमागन्तुं कृत्वा तस्मिन् भागेनैकेन हीने

1. का.शु.सू., 1/6,7.
2. धान्तवर्गः, श्लोक. 4.
3. आ.प.शु.सू, 1/1/2,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

लक्षणकरणमिति। तद्यथा-प्रामाणाभ्यासे प्रमाणमे कोभागो, अभ्यासस्ततसदृश एको भागः, तेन साभ्यासस्य प्रमाणस्य द्वौ भागौ तद् द्विगुणच्छेदे अभ्यासे चत्वारोभागाः। तत्र चतुर्भागोने लक्षणं कर्तव्यमिति।

अत्रविशेषोच्यते--

नन्वाचार्यः प्रथमन्तवात् सर्वकर्मारम्भात् पूर्वं दिग्ज्ञानं परमावश्यकमितिमत्वा ग्रन्थादौ दिक्साधनमाह तत् समीचीनम्। परन्तु ततः--"प्राच्य[1] न्तयोः शङ्कू निहन्ति', "श्रोण्योरसंयोश्च"[2] ततः रज्ज्वन्तयोः[3] "पाशौकरोति" इति पठित्वा ततो निरञ्छनलक्षणमुक्त्वा[4] ततः श्रोण्यंस[5] संख्यासमासभङ्गेषु लक्षणानि, ततः शङ्क्वोः[6] पाशौ प्रतिमुच्य निरञ्छनेनगृहीत्वा दक्षिणपूर्वां दिशं हरन्ति, इत्यादि क्रमेण सूत्रक्रमांऽपेक्षतंस्म इति चेन्न।

आचार्येण प्रथमन्तावत् रज्जुसमासं वक्ष्याम[7] इति ग्रन्थादौ प्रतिज्ञा कृता। अथ प्रतिज्ञामनुसृत्य वृत्तकरणस्यसुकरत्वात् दिक्साधनानन्तरं रज्जुभिः सम्पद्यमानस्य चतुरस्रक्षेत्रस्योपदेशः कृतः षड्भिः सूत्रैः। तत्रैवोपसंहाररूपेण "स समाधिः"[8] सर्वत्रेति सूत्रं व्याजहार।

अयमाशयः - सर्वत्र चतुरस्रनिर्माणे अयेमव प्रकारः ज्ञातव्यः इति। किमधिकमत्रतावदाचर्येण सर्वज्ञेन सर्वानुग्रहकारिणा प्रयुक्तस्याक्षरावयवस्यापि नानर्थकता युक्ता, किं पुनः एतावानक्षर समुदायसंघटितस्य सूत्रसमूहस्य प्रकरणस्य वा। मुख्यवृत्त्या प्रयोजनालाभेऽपि यथा शब्दः अर्थवान् स्यात्तथैव सर्वत्र व्याख्येयः ॥ 13 ॥

अथ 1/4-13 सूत्राणामुपपत्तिः प्रदर्श्यते।

प्रथमं चित्रं द्रष्टव्यम् -अत्र "क-ख" प्रमाण रज्जुत्वेनोपात्तम्। तस्याभ्यासः "ग-ख" रज्जुः। ' "ग-ख" अभ्याररज्ज्वां चतुर्धाविभक्तायां सत्यां "ग- ख, "घ-ङ", "ङ-च", . "च-ख" इति चत्वारोभागाः सम्पद्यन्ते। "क-ग " प्रमाणस्य "ज" प्रमाणार्द्धं विद्यते। अत्र द्विगुणितरज्ज्वामध्ये यो "ग" विन्दुः स एव संख्यासमासभङ्गपदवच्यः। "घ" विन्दुतः प्रारभ्य "क" बिन्दुपर्यन्तं पंचभागात्मिकाऽक्ष्णयारज्जुः। "ख" बिन्दुतःप्रारभ्य "घ" बिन्दुपर्यन्तं त्रयोभागात्मिकारज्जुस्तिङ्मानी शब्देनोच्यते।

प्रथम चित्रस्थ "क-ग" प्रमाणरज्ज्वा समं द्वितीययचित्रस्थ "ङ-ट" प्रमाण रज्जुः

1. का.शु.सू.1/6.
2. का.शू.सू. 1/7.
3. का.शु.सू. 1/4.
4. का.शु.सू. 1/12
5. का.शु.सू. 1/5.
6. का.शु.सू. 1/8.
7. का.शु.सू. 1/1.
8. का.शु.सू. 1/11.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

1/4-13 सत्राणामुपपत्तिः



। श्रोण्यंससाधनाय चतुरस्रं करिष्यन् "ङ" "ट" बिन्द्वोः शङ्कू दृढ़ं निखनेत्। ततः शङ्क्वोः पाशौ नियम्य, तद्यथा "क" - पाशं 'ङ' शङ्कौ नियम्य "ख" पाशं च "ट" शङ्कौ नियम्य "घ" चिन्हेन निरञ्छन संज्ञकेन निर्ऋतिदिशं प्रत्याकृषेत्। तत्र "ध" चिन्हे शङ्कुमेकं निहन्यात्। ततः पाशौ विपर्यस्य "ङ" पाशं "ट" शङ्कौ "ट" पाश "ङ" शङ्कौ नियम्य तेनैव चिन्हेनाऽऽग्नेयीदिशं प्रत्याकृषेत्। तत्र "त" बिन्दौ शङ्कुमेकं निहन्यात्। एवमुत्तरदिश्याकृष्य "थ" बिन्दौ शङ्कुमेकं निहन्यात्। एवं त्र्यस्रिक्षेत्रद्वयमुभयतः[१] सम्पद्यते।

ततः "प्रमाणर्द्धसमचतुरस्रस्य[२] शंकुरिति" वक्ष्यमाणसूत्रानुसारेण साभ्यास "क-ख" रज्जुं "ङ-ढ" शङ्क्वौ नियम्य "ज" चिन्हेनाऽऽग्नेयीदिशं प्रत्याकृषेत्। तत्र "फ" बिन्दौ शङ्कुमेकं निहन्यात्। एवमीशानं प्रत्याकृषेत्। तत्र "प" चिन्हे शङ्कुमेकं निहन्यात्।

अत्र "प-फ-ब -भ" समचतुरस्रे "प" "फ" अंसौ। "ब" "भ" श्रोणी पदवाच्यौ। अयमेवप्रकारः सर्वत्र समचतुरस्रक्षेत्रसाधनेऽवगन्तव्यः। सूत्रान्तरेषु वृत्तैः सम्पद्यमानस्य समचतुरस्रस्य प्रपंचातिशयादत्रतावदाचार्येण सुकरोपायः प्रदर्शितः ॥ 13 ॥

---

1. त्र्यस्रिक्षेत्रद्वयं यथा-दक्षिणतः "ङ-ट-ध", "ट-ङ-त" । उत्तरतो यथा--"ट-ङ-द", "ङ-ट-थ" इति।
2. का.शु.सू. 1/16.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दीर्घचतुरस्त्रे-महावेदि-पत्निशाला-सदादौनिरञ्छनस्य लक्षणमाह-

प्रमाणार्द्धं वाभ्यस्याभ्यसषष्ठे लक्षणं करोति तन्निरञ्छनम् ।। 1/14 ।।

प्रमाणं नाम किम् "यावदायाम[1] प्रमाणमित्या" हापस्तम्बः । प्रमाणं नाम इष्टक्षेत्रायाममितैकारज्जुः । तस्याः अर्द्धं तदर्द्धं प्रमाणार्द्धमितियावत् । वेति विकल्पाववोधकः, विषमदीर्घचतुरस्त्रयोः न समचतुरस्त्रस्य, असम्भवात् । अभ्यस्य द्विगुणी कृत्य प्रमाणार्द्धमितां रज्जुं पुनः सम्वर्द्धय वर्द्धितरज्ज्वां षड्भागान् कृत्वा, अभ्यासरज्ज्वाः पाशादारभ्य पंचसुभागेषु अर्थात् पंचभागस्यान्ते षड्भागस्यारम्भ स्थाने लक्ष्मकरोति निरञ्छनार्थम् ।

अयमर्थः- सोमयागे षट् त्रिशंद्धस्तामहावेदिः[2], तत्र प्रमाणरज्जुः षट्त्रिंशद्धस्तदीर्घा । तदर्द्धमष्टादशः, तत्राष्टादशवृद्धौ चतुष्पंचाशद्धस्तमिता रज्जुः सम्पद्यते । तत्राभ्यासरज्जौ षोढाविभक्तायां हस्तत्रयात्मक एकैको भागो भवति । तत्रषष्ठेंऽशेचिन्हे दीयमाने ऊनचत्वारिंशद्धस्तेषु भवति । तन्निरञ्छनम् । त्रयो हस्तात्मकाःपंचभागाः अवशिष्टाः तिर्यङ्मानी शब्देनोच्यते । एतेनेदं वक्यव्यं भवति-प्रमाण रज्जुः षट्त्रिंशद्धस्तदीर्घा, तिर्यङ्मानी पंचदशहस्तदीर्घा, अक्ष्णया रज्जुरेकोनचवारिंशद्धस्तदीर्घेत्यवगन्तव्यम् ।

अत्रतावद् यदुक्तं करविन्दाधिपेन आपस्तम्बशुल्वसूत्रे[3] "सर्वेष्वभ्यासेषु साभ्यासस्य प्रमाणस्यागन्तुपरिमिता यावन्तो भागाः सम्पद्यन्ते तद् द्विगुणमागन्तु कृत्वा तस्मिन् , भागेनैकेन हीने लक्षणकरणमिति" तत्तु मन्मतेन सर्वेषां निरञ्छन प्रतिपादकानां सूत्राणां सारभूतमिति प्रतिभाति । तत्रैव तैः आयामाभ्यासे आयामर्द्धाभ्यासे, आयामतृतीयाभ्यासेषु च समीचीना शैली निर्दिष्टा ।

अत्रस्वमतम् --

सूक्ष्मेक्षिकया सर्वत्र सर्वतोभावेन पर्यालोचिते सति मन्मते इदं प्रतिभाति यत् -सर्वत्र विहरणादौ निरञ्छनार्थं सर्वाभ्यासेषु साभ्यासस्य प्रमाणस्य द्विगुणभागमागन्तौ कृत्वेकभागहीने लक्षणमित्येतावन्मात्रं लक्षणमलम् । तथाप्यत्राचार्येण यत् पृथगुपदेशकृतस्तच्छास्त्रल्येनावगमार्थमिति ।

नन्वत्र निरञ्छनद्वयस्य किं प्रयोजनमितिचेदत्रोच्यते- समदीर्घचतुरस्त्र निर्माणार्थं शास्त्रेऽस्मिन् निरञ्छनलक्षणद्वय मुपदिष्टं विद्यते ।

प्रथम निरञ्छनेन तावत् समचतुरस्त्रं साध्यते । तदग्रेऽस्याः कण्डिकायाः षोडशतमसूत्रस्य व्याख्यायां दर्शयिष्यते । द्वितीयेनतावत् दीर्घचतुरस्त्रं क्रियते । तस्योपपत्तिरपि "शास्त्रवदर्द्धदीर्घचतुरस्त्रेति" सूत्रव्याख्यायां दर्शयिष्यते ।। 14 ।।

अक्ष्णया तिर्यङ् मानीशेषः ।। 1/15 ।।

पूर्वोक्त चतुष्पंचाशद्धस्त दीर्घायां रज्ज्वां पञ्चदशहस्ता रज्जुस्तिर्यङ् मानी,

---

1. आ.प.शु.सू. 1/1/2
2. का.श्रौ.सु. 8/3/8.
3. आप.शु.सू. (करविन्दीयाव्याख्या) पृ. 11, पंक्ति 12.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्याः एकोन चत्वारिंशद्धस्तदीर्घारज्जुः अक्षणयेत्युच्यते । अत्र- तिर्यङ्मानी अक्षणयाज्ञानार्थं तत्स्वरूपं प्रस्तूयते ।



अत्र तावत् "क-ख"[1] प्रमाणरज्जुः "क-ट" प्रमाणार्द्धम् । "क- ख" प्रमाणस्य अर्धाभ्यासे "ख-ग" सम्पद्यते । "ख-ग" प्रमाणरज्ज्वां षड्धाविभक्तायां सत्यां "ग-घ", "घ-ङ", "ङ-च", "च-छ" "छ-ज" "ज -ख" इति षड्भागाः सम्पद्यन्ते । तत्र ज चिन्हं निरञ्छनचिन्हं विद्यते ।

ततोऽभीष्टक्षेत्रेऽभीष्टान्तराले च प्राच्यन्तयोः शङ्कुद्वयं निखाय तत्र साभ्यासप्रमाणरज्ज्वाः पाशौ पूर्वापर शङ्क्वोर्नियच्छेत् ।

तद्यथा--"क-ख" अभीष्टक्षेत्रे "क" पाशं-कशङ्कौ, "ग" पाशं "ख" शङ्कौ च नियम्य "ज" संज्ञकेन निरञ्छनचिन्हेन दक्षिणस्यामाकृष्टे सति यत्र निपतति तत्र "झ" चिन्हे शङ्कुमेकं निहन्यात् । अत्र "ख- झ" तिर्यग्गामित्वात्तिर्यङ्मानी "क-झ" अक्षणया रज्जुः । अक्षणया कर्णेति नार्थान्तरम् । अत्र परीक्षणार्थं "क झ " "ख-झ" सूत्रद्वयं संयुक्ते कृतेसति "क-ग" इत्यस्य समानं भवति ।। 15 ।।

1. का.शु.सू 1/17.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उभाभ्यां हि निरञ्छनाभ्यां विहृते सति दीर्घचतुरस्रमेव संभवत्यतः स्वाभिमतस्थले (लंक्ष्ये) व्यवस्थापनाय सूत्रमिदमाह-

प्रमाणार्द्धेसमचतुरस्रस्य शङ्कुः ।। 1/16 ।।

चतुरस्रनिर्माणार्थं निरञ्छनस्थानं पूर्वमुक्तम् । ततः समचतुरस्रं कथंस्यादित्याकाङ्क्षायां समचतुरस्रे श्रोण्यंसस्थानमानयनार्थं पारिभाषिकसूत्रमिदं व्याजहार प्रमाणार्द्ध इति ।

पूर्वोक्त निरञ्छनेन विहरणं कृत्वा समचतुरस्र करणार्थं प्रमाणार्द्धेशंङ्कुर्देयः । प्रमाणस्य अर्द्ध प्रमाणार्द्धं तस्मिन् शङ्कुर्देयः । यथा- हस्तमितेक्षेत्रे हस्तार्द्धे शङ्कुः ततः पूर्वपाशं पूर्वशङ्कौ पश्चिमपाशं च पश्चिमशंङ्कौ दत्वा प्रमाणार्द्ध चिन्हेन उभयत आकृष्य यत्र चिन्हं भवति । तत्र शङ्कुं निहन्यात् । ततश्चतुर्षु चिन्हस्थानेषु सूत्रार्पणात् समचतुरस्रं[1] सिद्ध्यति । समास्तुल्याश्चत्वारोऽस्रयः कोणाः यस्य तत् समचतुरस्रम् ।

ननु किमस्य प्रयोजनमितिचेदत्रोच्यते-कात्यायन श्रौतसूत्रे कुण्डमण्डपस्थण्डिलादयः ये खलु रचनाकदम्बकाः सन्ति तेषां सारल्येन समाधानार्थं सूत्रमिदं समाम्नातं वर्तते । ते च- आहवनीयाऽऽग्नीध्रमार्जालीयादयः । तेषां रचना परिज्ञानार्थमत्रोदाहरणरूपेणा हवनीयखरोपपत्तिरूपपाद्यते ।



चित्र-2



चित्र-1

अरत्निमात्रंचतुरस्रमाहवनीयम् । "क-ख" अरत्निमात्रं प्रमाणसूत्रं विद्यते । "ख-ग" तस्याभ्यासः "ख-ग" अभ्यासं चतुर्धा विभक्ते सति "ग-घ" "घ-ङ", "ङ-च" "च- ख" इति चत्वारोभागाः सम्पद्यन्ते । ततः "क-ग" पाशौ क्रमेण "क"

1. चत्वारोऽपि भुजा यत्र चतुरस्रे मिथः समाः ।
कोणाश्चसमनामानो वर्गक्षेत्रं तदीर्यते ।
समाख्यं चतुरस्रेतत् वर्ग च ब्रुवतेवुधाः ।
(पूर्णिमा पत्रिका) पृ. 64)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तथा "ख" शङ्कौ प्रतिमुच्य "च" चिन्हेन निरञ्छनसंज्ञेकेन दक्षिणदिश्याकृष्टे सति यत्रपतति तत्र "ड" चिन्हे शङ्कुमेकं निहन्यात्। एवमुत्तरदिश्याकृष्य "ढ" चिन्हें शङ्कुमेकं निहन्यात्। ततः पाशौ विपर्यस्य उभयत आकृष्टे सति "त-ण" शङ्कु स्थानद्वयं भवतः। श्रोण्यंसावानयनार्थं प्रमाणार्द्धेन "ज" चिन्हेनाकृषेत्। तेन "घ-न" प्रतीच्यां "थ-प" च प्राच्यां भवतः। चतुर्षु "थ-प", "ध- न" स्थानेषु सूत्रार्पणात् समचतुरस्त्रं निष्पन्नं भवति ॥16॥

दीर्घचतुरस्त्रनिर्माणे शङ्कुस्थाननिर्णयः

शास्त्रवदर्द्धे दीर्घ चतुरस्त्रस्य ॥ 1/17 ॥

पूर्वं समचतुरस्त्र निर्माणार्थ शङ्कुस्थानमभिहितम्। इदानीं दीर्घचतुरस्त्रनिर्माणार्थं शङ्कुस्थानजिज्ञासायामाह शास्त्रवदिति -[1]

शास्त्रेण समं शास्त्रवत्। अर्द्धे समानभागमध्ये दीर्घचतुरस्त्रनिर्माणार्थं चिन्हं कुर्यात्। अयमाशयः-दीर्घचतुरस्त्रं चिकीर्षन् शास्त्रोक्तविस्तारार्द्धे रज्ज्वां तिर्यङ् मानचिन्हं कुर्यात् यथा ज्योतिष्टोमे महावेद्याः श्रोणिः त्रिंशद्धस्ता त्रयस्त्रिंशद्धस्ता वा[2] विहिता। तत्र त्रिंशद्धस्तपक्षे पंचदशसु चिन्हं कुर्यात्। त्रयस्त्रिशद्धस्तपक्षे सार्द्धषोडशसु हस्तेषु चिन्हं कुर्यादिति।

प्रथमचित्रं द्रष्टव्यम्

अत्र "क-ख" प्रमाणरज्जुः षट्त्रिंशद्धस्तदीर्घा विद्यते। तस्याः "ग" प्रमाणार्द्ध विद्यते। प्रमाणार्द्ध "ग- ख" भाग मभ्यासे कृते सति "ख-घ" सम्पद्यते। तेन "ख-घ" भागेन समं "ग-ख" भागो भवति। अभ्यास रज्जुंषोढाविभक्तायां सत्यां "घङ", ङच, चछ, छज, जझ, झख, इतिषडभागाः सम्पद्यन्ते। षट्त्रिंशद् स्तदीर्घा प्रमाणरज्जुस्तस्याभ्यासोऽष्टादशहस्तः। उभयोः संयोगे चतुष्पंचाशद्धस्तदीर्घा सार्द्धाभ्यास, प्रमाणरज्जुर्भुवति। ततोऽभ्यासषष्ठे लक्षणं करोतीति वचनात् पंचमभागस्यान्ते षड्भागस्यारम्भे चिन्हं भवति। तेन "झ". चिन्हं निरञ्छनं भवति "क-झ" अक्षणया रज्जुः "घ-झ" तिर्यङ् मानी च भवति।

द्वितीयचित्रं द्रष्टव्यम् -

ततो वेदिं करिष्यन् "ख" शङ्कुं प्रतीच्यां निहत्य ततः प्राच्यां षट्त्रिंशद्धस्ते "क" शंकु निहन्यात्। अत्र प्रथमचित्रस्थ "क-ख" प्रमाणरज्ज्वासमं द्वितीयचित्रस्थ

---

1. यस्मिँश्चतुर्भुजेकोणाश्चत्वारः स्युः समाभिधाः।
संमुखीनेभुजद्वन्दे एवं स्यातां मिथः समे। बुधास्तदायतं प्राहुस्तत्रकोणाभिषक्तयोः। (पू.प.पृ 65)
2. का.श्रौ.सू., 8/3/9-10.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

1 /14,15 एवं 16 सूत्राणामुपपत्तिः





चित्र-2

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

"क- ख" रज्जुरितिबोध्यम् । ततः "क" पाशं "क" शङ्कौ नियम्य "घ" पाशं "च ख" शङ्कौ नियम्य "झ" निन्हेन दक्षिणदिश्याकृषेत् । यत्र पतति तत्र "ड" चिन्हं कुर्यात् एवमुत्तरतः आकृष्य "ढ" चिन्हं कुर्यात् ततः "शास्त्रवदर्द्धेदीर्घचतुरस्रेति" वचनात् त्रिंशद्धस्तदीर्घाया वेद्या उभयतः पञ्चदशसु पंचदशसु चिन्हं कुर्यात् एतेन "दक्षिणोत्तरौ च[1] पंचदशसु पंचदशस्विति" कल्पसूत्रं घटते । ततः "ढ-ड" महावेद्याः श्रोणी भवतः ।

अथ पाशौ विपर्यस्य "क" पाशं "ख" शङ्कौ "ख" पाश ञ्च ' 'क" शङ्कौ धारयित्वा पूर्ववत् दक्षिणदिश्याकृष्य यत्र निपतति तत्र ' 'ण" चिन्हं कुर्यात् । उत्तरदिश्याकृष्य यत्र निपतति तत्र "त"चिन्हं कुर्यात् । ततः "पूर्वार्द्धयाश्च[2] द्वादशसु द्वादनशस्विति वचनात्" "ज" चिन्हं धृत्वा दक्षिणस्यामुत्तरस्यां च दिश्याकृषेत् यत्र पतति तत्र क्रमेण "न -ध" चिन्हं कुर्यात्, एवं कृते सति महावेद्याः "न-ध" अंसौ "ड-ढ" श्रोणी च भवतः । ततश्चतुर्षुकोणेषु सूत्रार्पणात् पश्चिमतः प्राचीपर्यन्तं षट्त्रिंशद्धस्ताऽऽयत्ता, पश्चाद्दक्षिणोत्तरौ त्रिंशद्धस्तदीर्घा, प्राच्यां चतुर्विंशति हस्तविस्तृता च महावेदी निष्पन्ना भवति । अयं त्रिंशद्धस्त पक्षे[3] साधनोपायः ।

अत्रविशेषः

अत्र घ-झ तिर्यङ् मान्याः रज्ज्वाः पंचदशहस्तपरिमितत्वात्, महावेद्याः श्रोण्याः त्रिंशद्धस्तविहितत्वाच्च प्रमाणार्द्धेति शास्त्रमनुसृत्य श्रोण्यपच्छेदाय पुनः पंचदश हस्तेषु चिन्हकरणमनावश्यकम्, तस्य निरञ्छनेनैवगतार्थत्वात् । यत्र तु न्यूनेऽ पच्छेदोभवेत्तत्रैव निरञ्छनाकर्षणानन्तरं श्रोण्यपच्छेदाय शास्त्रोक्त प्रामाणार्द्धचिन्हं गृहीत्वाऽ पच्छिन्द्यात् । यथा- त्रयस्त्रिंशद्धस्तपक्षे सप्तविशंति प्रक्रमे निरञ्छनम् । ततः श्रोणीसाधनाय सार्द्धषोडश हस्तोक्तविस्तारार्द्धे चिन्हं कृत्वापच्छिन्द्यादिति दिक् ।

निरञ्छनलक्षण परीक्षा

ननु किं नाम निरञ्छनम् ? तस्य किमत्र प्रयोजनम् ? कथं चास्य अभ्यास चतुर्थेषष्ठे वा लक्षणं करणीयम् ? कथं न न्यूनाधिक्ये वा लक्षणं करणीयमिति ?

अत्र ब्रूमः- निरञ्छनमिति पारिभाषिकशब्दोऽयं विमानार्थं गृहीतायां रज्ज्वां स्थानविशेषेसंज्ञावाचकः । अस्य प्रयोजनञ्च केवलं चतुरस्रनिर्माणे वर्तते । तच्च

1. का.श्रौ.सू. 8/3/9.
2. का.श्रौ.सू. 8/3/11.
3. त्रयस्त्रिंशद्धस्तपक्षे तु- षट्त्रिंशद्धस्तप्रमाणं द्विगुणीकृते द्विसप्ततिहस्तपरिमितं भवति । ततोऽभ्यासं चतुर्धाविभज्य चतुर्थे अर्थात् मूलादारभ्य सप्तविंशतिहस्ते निरञ्छनस्थानं कुर्यात् । सार्द्धषोडशसु हस्तेषु श्रोण्यपच्छेदाय चिन्हं कुर्यात् । अंसच्छेदाय तु द्वादशसुचिन्हं कुर्यादिति वामनाचार्यः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

साभ्यासस्य प्रमाणस्य चतुर्थ एव दीयमाने सति सम्पद्यते । अथ च साभ्यास-प्रामाणस्य षष्ठे दीयमाने सति सम्पद्यते ।

यदुक्तं कथं वा न्यूनाधिक्य इत्यत्र ब्रूमः-अत्रतावदयमाचार्यो भगवान् कात्यायनः समदीर्घचतुरस्र निर्माणार्थं निरञ्छनलक्षणद्वयमुपदिदेश । अत्रेदं वैशिष्ट्यं विद्यते यत्-चतुरस्रनिर्माणार्थं निरञ्छनेनाकृष्टे सति क्षेत्रविस्तारं तावत् अभीष्ट क्षेत्राऽयामतो लेशमात्रं न प्रच्यवते । अयमाशयः-निरञ्छनेनाकृष्टे सति अभीष्ट क्षेत्राऽऽयामपरिमितं पूर्वापराऽऽयतं, ततः किञ्चिदधिकं तिर्यग् विस्तृतं समद्विबाहुकंचतुरस्रक्षेत्रं सम्पद्यते । इतरथाहि स्तोकमपि न्यूनाधिक्ये सति अभिमतक्षेत्रविस्तारचतुर्भुजं न सम्भवति । अत्र परीक्षाणार्थं 3,4,5,6,7,8 चित्राणि द्रष्टव्यानि ।

तत्र तृतीयेचित्रे-"क-च" प्रमाणरज्जुः । "च-ख" अभ्यासरज्जुः । अभ्यासरज्ज्वां चत्वारोभागास्तेषु "ङ" चिन्हं निरञ्छनस्थानं विद्यते । "ङ -क" अक्षणया रज्जुः "ङ-ख" तिर्यङ्मानी । ततश्चतुर्थचित्रस्थ-"छ-ज" प्रमाणरज्जुः तृतीयचित्रस्थ "क- च" प्रमाणरज्ज्वा समंविद्यते । अथ "क-ख', साभ्यासप्रमाणरज्ज्वाः "क" पाशं ज" शङ्कौ, "ख" पाशं "छ" शङ्कौ च क्रमेण नियम्य "च- ङ" चिन्हयोर्मध्यं गृहीत्वा दक्षिणस्यामुत्तरस्यां चाकृष्टे सति "ट-ठ" शङ्कुस्थानद्वयं भवति । एवं पाशौ विपर्यस्य पूर्ववत् उभयत आकृष्टे सति "ञ-झ" शङ्कुस्थानद्वयं भवति । ततश्चतुर्षुकोणेषु सूत्रार्पणात् अभीष्ट क्षेत्रप्रमाणतो विस्तृतं क्षेत्रं सम्पद्यते, न त्वभीष्ट प्रमाणक्षेत्रतुल्यं, निरञ्छन चिन्हतोऽधिकं गृहीतत्वात् ।

पंचमचित्रे तु निरञ्छन चिन्हेना कृष्टेसति "ड-ढ" क्षेत्राऽऽयामपरिमितं "थ-द-त-ण" बृहच्चतुरस्रं सम्पन्नम् । ततः समचतुरस्रं विहरिष्यन् प्रमाणार्द्धसमचतुरस्र स्येतिसूत्रंप्रवर्तते[1] । प्रमाणार्द्धं गृहीत्वा च तिर्यङ् मान्यां चिन्हितायां सत्यां "व-भ-य-म" समचतुरस्रक्षेत्रं जायते । एवं द्वितीय निरञ्छनेऽप्यवगन्तव्यम् ।

अत्र षष्ठचित्रस्थ "अ-आ" प्रमाणरज्ज्वा समं सप्तमाष्टमचित्रयोः "औ-क", "ञ- ण" प्रमाणरज्जू ।

अत्र निरञ्छन चिन्हतोऽपचयोपचयाभ्यां विहरणफलं प्रदर्श्यते ।

"अ-आ" साभ्यासप्रमाणरज्ज्वाः "ऐ" निरञ्जन स्थानम् । ततो "अ" पाशं "औ" शङ्कौ " आ" पाशं "क" शङ्कौ "च" प्रक्षिप्य "ऐ" निरञ्छन चिन्हादधिकं गृहीत्वोभयत आकृष्टे सति "ज-झ" शङ्कुस्थानद्वयं भवति । ततः पाशौ विपर्यस्य पूर्ववदुभयत आकृष्टे सति "च -छ" चिन्हद्वयं भवति । ततश्चतुर्षु चिन्ह-स्थानेषु सूत्रार्पणात् "च-छ-झ-ज" दीर्घचतुरस्रं जायते । "औ-क" प्रामाणतोऽधिकंविद्यते ।

1. का.शु.सू. 1/16.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

1/16 सूत्रान्तर्गतनिरञ्छनपरीक्षा



चित्र-4



चित्र-3



चित्र-5

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



चित्र-7



चित्र-6



चित्र-8

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एवमेव निरञ्छन चिन्हात् न्यूनप्रमाणं गृहीत्वा पूर्ववद्रचनाकृतायां "ख-घ-ङ-ग चतुरस्रंनिष्पद्ये, [1] यत् "औ-क" प्रमाणतो न्यूनप्रमाणं वर्तते ।

अष्टमचित्रे निरञ्छनेनविहरणं कृतेसति "ठ-ट-ड-ढ" दीर्घचतुरस्रं निष्पन्नं भवति । ततः "शास्त्रवदर्द्धइति सूत्रं, तेन च शास्त्रोक्तमानार्द्धे तिर्यङ्मान्यां चिन्हं क्रियमाणायां अभीष्टविहरणं जायते ।

यथा समचतुरस्रविहरणार्थं प्रमाणं द्विगुणीकृत्य अभ्यासरज्जुं चतुर्धाविभज्य चतुर्थे निरञ्छलणं क्रियते । तेनैव लक्षणे चतुरस्रंकृत्वा प्रमाणार्द्धे छिद्यते । तथैव दीर्घचतुरस्रेऽप्यस्तु । तद्यथा षट्त्रिंशद्धस्तपरिमितायां रज्ज्वां पूर्ववदभ्यासादिकं कृते सति मूलादारभ्य सप्तविशंतितमे हस्ते निरंछनं भवति । ततो निरञ्छनेन विहृत्य तत्र प्रमाणार्द्धे अष्टादशहस्ते तिर्यङ्मान्यां च्छिन्द्यात् एवं कृतेऽपि दीर्घचतुरस्रं सिद्व्यत्येव ।[2] तर्हिकथं सूत्रान्तरस्योपदेशः शस्त्रवदिति चेत् ? सत्यम् । अत्रतावदिदमवगन्तव्यं यत् -शास्त्रमिदं वैदिक वितानविहरणार्थं प्रवृत्तम् । कात्यायनश्रौतसूत्रे यावत्यः वेद्यः निर्दिष्टाः सन्ति तावतीनां वेदीनां सारल्येनविहरणार्थ मत्ररचनोपायाः सूत्रै र्निर्दिष्टाः। अत्रवातवत् प्रमाणार्द्ध इति सूत्रं समचतुररस्रनिर्माणार्थं लक्षणत्वेनोपात्तम् । लक्ष्णन्तु तदेववरं यदव्याप्ति अतिव्याप्ति असम्भवादि दोषत्रय-रहितं स्यात् । अतो यद्यत्र प्रमाणार्द्ध इत्येवं सर्वत्र समदीर्घचतुरस्रनिर्माणार्थं क्रियते तर्हि लक्षण मव्याप्तिदोषग्रस्तं भविष्यति, स्वलक्ष्यदेशेऽप्रवर्तनात् । अतः सूत्रान्तरमाह शास्त्रवदिति । यतो हि त्रिशंत्प्रक्रमा पश्चाद् भवतीति सोमयागे सौमिकी वेदी पश्चात् त्रिंशद्धस्ता त्रयस्त्रिंशद्धस्ता वा श्रुत्या[3] विहिता । तत्र प्रमाणार्द्ध इतिलक्षणं मत्वा विहृतेसति इष्टसिद्धि र्न भवति । अतः सर्वमेतदुररीकृत्याह-शास्त्रवदिति ।

अत्रेदं विचरणीयं भवति- ननु कात्यायनबौधायनाऽऽपस्तम्बादिभिराचार्यैः स्व-स्व ग्रन्थे निरञ्छलक्षणद्वयमभिहितम् । तद्यथा-

तदर्धमभ्यस्यापरस्मिँस्तृतीते [4] षड्भागोने लक्षणं करोति । " आयामम्वा-[5] भ्यस्यागन्तु चतुर्थमायामस्याक्ष्णयारज्जुस्तिर्यङ्मानी शेषः "इत्याहाऽऽपस्तम्बः ।

1. अत्र निष्पन्नानांक्षेत्राणां निर्देशःअनया--सरलरेखाया क्रियते । रज्ज्वाकर्षणेन निष्पन्नानां चिन्हानां निर्देशः ......इत्यनेन प्रकारेण क्रियते ।
2. नवमदशमचित्रे द्रष्टव्ये । "क-ग" प्रमाणरज्जुः । "ग- ख" प्रमाणाभ्यासः " च " निरञ्छनस्थानम् । नवमचित्रस्थ "क-ग" प्रमाणेनसमं दशमचित्रस्थ "ज-झ" प्रमाणम् । " क" पाशं "झ" शङ्कौ, "ख" पाशं "ज" शङ्कौ प्रक्षिप्य विहरणनियमेन संसाधिते "ञ-ट-उ-ढ" चतुरस्रंजायते ।
3. श.ब्रा. 3/5/1/7
4. आ.प.शु.सू. 1/1/3,
5. आ.प.शु.सू 1/1/7,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

षट्त्रिंशद्धस्तपरिमितां रज्जुं द्विगुणीकृत्य अभ्यासचतुर्थे लक्षण कृत्वा विहृतेसति चतुरस्रं सिद्धयति नवेत्यत्र परीक्षा ।।



चित्र-9



चित्र-10

अपरस्मिन्नर्धे[1] चतुर्थभागोने लक्षणं करोति तन्यञ्छनम् । "प्रमाणादध्यर्धां[2] रज्जुमुभयतः पाशां कृत्वाऽपरस्मिँस्तृतीये षड्भागोने लक्षणं करोति तन्यञ्छनमिष्टेंऽसार्थ" मित्याह निरञ्छनलणद्वयं बौधायनः ।

एकेनैव निरञ्छनेन यदि सर्वं विहरणजातं सेत्स्यति तर्हिलक्षणद्वयस्य किं प्रयोजनम् ।

1. बौ.शु.सू. 1/25
2. बौ.शु.सू. 1/32

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समदीर्घचतुरस्राभ्यामेव निखिलवितानव्रातस्य सिद्धिः । तस्मात् तत् परिज्ञानार्थं निरञ्छनलक्षणद्वयमुपदिष्ट माचार्यैः ।

यदि समचतुरस्रनिर्माणार्थमुक्तनिरञ्छनलक्षणेनैव दीर्घातुरस्रमपि सेत्स्यतिर्त्तर्हि दीर्घचतुरस्रप्रतिपादक निरञ्छनस्य वैयर्थ्यापत्तेः, उभावपि दोषरहितौ स्तः । तत्कथमिति चेदुच्यते -

समचतुरस्रविहरणायोक्त निरञ्छनेन विहरणं कृत्वा प्रमाणार्द्धं ञ्च गृहीत्वातिर्यङ्मान्यां लक्षणे कृते सति समचतुरस्रं नूनं सेत्स्यति । तथैव दीर्घचतुरस्रविहरणायोक्त निरञ्छनेन विहरणं कृत्वा शास्त्रोक्तक्तप्रमाणार्द्धे स्वप्रमाणार्द्धे वा पच्छेद कृतेऽपि सर्वथा दीर्घचतुरस्रं भवत्येव ।

ननु निरञ्छनमानतो न्यूनमधिकं वा गृहीत्वा कृत विहरणस्य फलं प्रमाणरज्जुतोऽधिके संजाते सति का हानिः ? न्यूने वा का हानिः ? मास्तु प्रमाण वशेन चतुरस्रं मन्यथापि चतुरस्रं भवत्येव । पुनर्यदुक्तं प्रमाणपरिमितं क्षेत्रं सम्पद्यत इत्यत्र ब्रूमः--

कथं प्रमाणपरिमितं क्षेत्रमभिमतं विद्यते । तदभावे का हानिः ? अथापि निरञ्छनेन समदीर्घचतुरस्रविहरणं किमर्थमिति ।

अत्रोच्यते-

श्रुतौ[1] हि वेद्याः अंसौ स्कन्धत्वेन श्रोणी च कटिपार्श्वत्वेनाऽऽम्नायते । यथा मनुष्यस्कन्धौ श्रौणी च स्वशरीरे संलग्नौ स्तः तथैव वेद्या अपि अंसौ श्रौणी च तथा भूतौ संलग्नौ स्तः ।

अत्रेदमवधेयम् -यदि निरञ्छनचिन्हात् सन्निकृष्टं विप्रकृष्टं वा स्थानं धृत्वा विहरणं क्रियते तेन-नूनं प्रमाण क्षेत्रात् तिर्यङ्मान्यौ न्यूनाधिकदूरे भवतः । तेन श्रोण्यंस निष्पत्तिर्न भविष्यति, वेद्याः प्रमाणभूतायाः पृष्ठ्यारज्ज्वा सह असंलग्नत्वात् । वेद्याः पृष्ठ्या रज्ज्वाः प्रान्ताभ्यां सह संलग्नसत्यामेवश्रोण्यंसौ सम्भवेताम् । अन्यथाऽसम्भवात् । यतोह्यग्निमभितोंऽसावित्युक्तम् । [2]अग्नी च असंयोः सन्निकृष्टे भवतः । अंसौ च वेद्याः कोणे भवतः । आग्नेयैशानकोणावंसा विति[3] वचनात् ।

अतएव प्रमाणपरिमितं चतुरस्रमपेक्ष्यते । अन्यथा- चतुरस्रकरणे सति वेद्याः श्रोण्यंसौ न भवतः । स्तोकमपिभ्रेषे[4] प्रत्यवायस्मरणात् निरञ्छनेन समदीर्घचतुरस्र विहरणं, वेद्यादीनां मानं, विहरणं वा साधुसम्पादनार्थमति सर्वं सुस्थम् ।। 17 ।।

---

1. श.ब्रा. 1/2/6/15-16.
2. का.श्रौ.सू. 2/6/1.
3. आ.प.श्रौ.सू. 2/3/1.
4. अथ कुण्डमण्डपादिगुणददोषानाह-आयुः कीर्तिकलत्रपुत्रसुखकृत् कुण्डं स्व[illegible] .... ।(कु.म., पृ. 59, श्लोक.2)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शकटमुखस्य चैवम् ।। 1/18 ।।

शकट मुखस्य = तन्नामककश्चिद्यागाङ्गभूतस्य वेदे रपि श्रोणिसाधनं शास्त्रोक्तमानार्द्धे कर्त्तव्यम् ।

अयमर्थः- सयचने. सोमयागे शकटमुखाकृतिं "एतया[१] विकृत्याभिमन्त्र्यैकेऽन्यचितिं चिन्वन्ति....इत्युपक्रम्य प्रउगः समुह्यपुरीष इति विकल्पेनाग्नयो विहिताः । सेयं प्रउग चितिः शकटमुखशब्देनोच्यते ।

चयनयागेशकटाकारचितिं .."द्वितीयेवा.."[२] प्रक्रमेणवेति[३] सूत्राभ्यामुक्तप्रक्रमदिशा वेदिं विमीय तत्र शास्त्रोक्त[४] विस्तारार्द्धे पंचदशसु प्रक्रमेषु सार्द्धषोडशसु वा प्रक्रमेषु श्रोण्यङ्कनार्थं चन्हं कुर्यात् । शंकटमुखाकार प्रउगवेदेरसंभावात् ।। 18 ।।

एतेनप्राग्वंश वेदिमानानि व्याख्यातानि ।। 1/19 ।।

एतेन= समचतुरस्र -दीर्घचतुरस्रविहरणसाधनकथनेन, प्राग्वंशवेदिमानानि प्राक् = प्रागग्रः वंशः = पृष्ठवंशः मध्यवलो यस्य वेद्यादेः स प्राग्वंशवेदिः[५] तेषां मानानि = प्रमाणानि, व्याख्यातानि = उक्तानि ज्ञेयानि । तेषामप्यर्द्धे शंकुर्देयः ।

अयमर्थः- सर्वत्र प्राग्वंशादि. वेदिमानेषु श्रोण्यंसावपच्छेदाय शास्त्रोक्त विस्तारार्द्धे शङ्कुर्देयः ।

त इमे प्राग्वंशा भवन्ति-

(क) सोमयागे पत्नीशाला, (ख) विमितम्, (ग) हविर्धान मण्डपः, (घ) आग्नीध्रमण्डपः (ङ) मार्जालीयमण्डपः । एतेषु प्राग्वंशेषु मार्जालीयमण्डपस्यात्र स्वरूपं प्रस्तूयते ।

अत्र प्रथमचित्रे "क्-ग" प्रमाणशुल्व विद्यते । "ग-ख" चाभ्यास शुल्वं विद्यते । "क-ख" साभ्यासप्रमाणसूत्रम् । अभ्याससूत्रस्य "च" चिन्हं निरञ्छन-स्थानम्।

प्रथमचित्रस्य साभ्यासप्रमाणायाः "क-ख" रज्ज्वाः "क" पाशं द्वितीय[६] चित्रस्थ "क" शङ्कौ प्रक्षिप्य, "ख" पाशं च "ग" शङ्कौ प्रक्षिप्य, पूर्वोक्त प्रकारेणनिरञ्छन चिन्हेन चतुर्षुदिक्षु क्रमेणाकृष्टे सति "ट-ठ-ड-ढ" इति चत्वारः शङ्कवो निहिताः भवन्ति ।

---

1. का.श्रौ.सू. 16/5/9.
2. का.शु.सू. 6/3.
3. का.शु.सू 6/4.
4. दक्षिणोत्तरौ च पंचदशसु पंचदशसु । अर्धसप्तदशेषु वा ।। (का.श्रौ.सू 8/3/9-10.)
5. यस्यवंशस्योपरि दक्षिणत उतरश्च वंशाःपाता भवन्ति स मध्यमोवंशः पृष्ठवंश इत्युच्यते ।
6. अत्र प्रथमचित्रस्थ "क,ग" प्रमाणरज्ज्वा समं, द्वितीा चित्रस्थ "क,ग", प्रमाणरज्जुः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मार्जलीयमण्डपस्वरूपोपपत्तिः



चित्र-1



चित्र-2

ततः समचतुरस्रं मार्जालीयमण्डपं चिकीर्षन् प्रमाणार्द्ध चिन्हेन सर्वतः तिर्यङ् मान्यां चिन्हिते सति "झ,ञ,छ,ज," चत्वारः शङ्कवो निहिता भवन्ति । ततश्चतुर्भ्यः कोणशङ्कुभ्यः सूत्रप्रसारणात् "छ,ज,ञ,झ " समचतुरस्रं मार्जालीयमण्डपः[१] सिद्धयति ।

वेदिमानानीतिकथम् ? उच्यते-समदीर्घ चतुरस्रं निर्माणं कृत्वा वेद्याः श्रोण्यंसावानयनार्थं शास्त्रोक्त मानार्द्धे चिन्हं कर्तव्यम् । अत्रेदं तात्पर्यम् - सर्वत्रवेदीनां निर्माणं शास्त्रोक्त मानार्द्धवशेनैव कर्तव्यम् । श्रोण्यंसार्थ चतुरस्रनिर्माणन्तु शास्त्रोक्त निरञ्छन लक्षणेन कर्तव्यम् । यथात्र-मार्जालीयमण्डप निर्माणार्थं निरञ्छन चिन्हेन चतुरस्रंकृत्वा ततः सस्त्रोक्तमानार्द्धे सार्द्धद्विहस्ते[२] कृते सति मार्जालीयमण्डपः सेत्स्यति ।। 19 ।।

---

1. आग्नीध्राद्दक्षिणं सम्प्रति वेद्यन्ते दक्षिणामुखो मार्जालीयम् । (का.श्रौ.सू. 8/6/20,)
2. पंचारत्निर्मण्डपः स्यान्मध्ये कुण्डं तु धिष्ण्यवत् । मार्जालीयोऽप्येवमेव दक्षिणश्रोणितो भवेत् । (अष्टा.प. श्लो . 27, पृ. 4)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शालामानंच ।। 1/20 ।।

शालाम्वेति[1] सूत्रेण ज्योतिष्टोमे विमितेन सह शाला विकल्प्यते । तस्याः शालायाः निर्माण प्रकारं दीर्घचतुरस्र निर्माण कथनेन व्याख्यातम् । "विशंत्यरत्नि शालास्यात्तदर्द्धेन तु विस्तृतेति"[2] वचनाच्छालानिर्माणं करिष्यन्-विंशति हस्तपरिमितायां रज्ज्वां तदर्द्धमुपरिक्षिप्य प्रक्षिप्तां प्रमाणर्द्धपरिमितां रज्जुं षोढाविभज्य अभ्यासरज्ज्वाः षष्ठेंऽशे निरञ्छनार्थं चिन्हं कुर्यात् । ततः पूर्वोक्तप्रकारेणाभीष्टक्षेत्रं विरचय्य तिर्यङ् मान्यां दशहस्तेषु चिन्हं कुर्यात् । तेन दीर्घचतुरस्राशाला भवति । इयमपि प्राग्वंशा भवति ।

अयमाशयः-

शालानिर्माणार्थं विंशतिहस्तपरिमितां रज्जुं गृहीत्वा तदुपरिदशहस्त परिमितायां रज्ज्वां प्रक्षिप्तायां त्रिंशद्धस्ता सार्द्धाभ्यासरज्जुर्जायते । ततः प्रक्षिप्ता दशहस्ता षोढाविभजेत् । तेन षोडशाङ्गुलमधिकैकहस्तपरिमितः प्रत्येकं भागो भवति । ततो निरञ्छनेन विहृत्य शालानिर्माणार्थं तिर्यङ् मान्यां पंचसु हस्तेषु चिन्हं कुर्यात् । तदर्द्धेन तु विस्तृतेतिवचनात् ।। 20 ।।

तत्रोदीची प्राचीवत् ।। 1/21 ।।

यथा प्राग्वंशादयो मण्डपा विरच्यन्ते, तथैवोद्वंशा अपि शाला कर्तव्याः। उदीची साधनं तु पूर्ववत्[3] कर्त्तव्यम् । उदग्वंश मण्डपे तु दक्षिणोत्तरस्थ वंशस्योपरि पूर्वतः पश्चिमतश्च वंशाः प्रोता भवन्ति । सत्रेषु सराप्रतिशतारत्निदीर्घा उदग्वंशशाला विहिता । तदर्द्धपंचाशीतिररत्नयः तत्र शङ्कुः ।।12 ।।

सदसश्चैवम् ।। 1/22 ।।

सोमयागे सदोऽभिधानो मण्डपोऽपि शास्त्रोक्त विस्तारार्द्धे विहर्तव्यः । तद्याथा- अष्टादशारत्न्येकविंशतिश्चतुर्विंशति[4] वेतिविहिता । तत्र नवसार्द्धदशद्वादशसु वा चिन्हं कुर्यात् । अयमप्युद्ववंशो दीर्घ च तुरस्रं विद्यते ।

अत्रायं निष्कर्षः- शकटमुखस्यचैवमित्यारभ्य सदसश्चैवमित्येतैः सूत्रैरिदमुच्यते यत् - सर्वत्रमण्डप वेद्यादिकरण विधौ शास्त्रोक्त मानार्द्धे चिन्हं कर्तव्यम् । तच्च चिन्हं निरञ्छनेन चतुरस्रविहरणानन्तरं तिर्यङ्मान्यां कर्तव्यं भवति । अत एव निरञ्छन लक्षणद्वयमुक्त्वा ततः सूत्रमिदं व्याजहार शास्त्रवदिति । तस्यार्थ एव शकट मुखस्य चैवमित्यारभ्य सदसश्चैवमित्येतेषु सूत्रेष्वनु वर्तते ।

ननु कथमेकेनैवसूत्रेण नोक्तम्, कथं वा पृथक -पृथक् सूत्रितम् । एतेन सूत्रलक्षणहानिः प्रसज्येत इति चेन्न । भिन्न विषयत्वात् पृथगुपदिदेश इत्यदोषः ।। 22 ।।

---

1. का.श्रौ.सू. 7/1/19
2. का.शु.सू. पृ. 9.
3. का.शु.सू. 1/3
4. का.श्रौ.सू. 8/6/6.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपरिमित पदार्थ विवेचनम्

अपरिमितं प्रमाणाद्भूयः ॥ 1/23 ॥

यतो हि श्रौतसूत्रे-"अपरिमिता[1] वा" । "द्वादशदीक्षा[2] अपरिमिता वा" । "अपरिमितं[3] वा"।"अपरिमितेष्टका[4] वेत्यादि" विभिन्नप्रकरणेष्वाचार्यै-रपरिमितशब्दः प्रयुक्तः । अपरिमितशब्दस्य को ह्यर्थः तन्निर्णयः तत्र न क्वापि कृतो वर्तते । अतस्तत् परिशिष्टभूते ग्रन्थेऽस्मिन् तन्निर्णयार्थं सूत्रमिदं व्याजहार अपरिमि-तेति ।

नपरिमितमपरिमितमिति विग्रहेणापरिमित शब्दस्य प्रमाणरहिते यथेष्टे वा अर्थो व्यवतिष्ठते । तेन हि- अनवस्था दोषः समुदेति । तन्माभूदित्यतः प्रमाणाद्भूय इत्याह । प्रमाणादुक्त मानाद्भूय एको ग्राह्यः ।

अयमर्थः- यत्रापरिमितशब्दः प्रयुक्तस्तत्रोक्तात् प्रमाणात् पुनः एकः वर्द्धनीयः, येनप्रमाणेनासौ वर्द्धते । यथा- एकादीक्षा, तिस्रः, दीक्षाः, द्वादशदीक्षाः भवन्ति वचनात् । अपरिमितेत्युक्ते तत्र एकादीक्षा भूयो वर्द्धनीया । तेन त्रयोदश एव दीक्षापक्षा भवन्ति ततो नाधिकमित्यवगन्तव्यं वचनाभावात् ।

एवमेव वरुणप्रघासे चतुररत्निर्वा[5] पश्चात्सप्तप्राची षड्वा त्रयः पुरस्तादिति उत्तरवेदेः द्वितीयप्रमाणमुक्त्वा अपरिमिता वेत्याह । तत्रापि तदेवावगन्तव्यम् । अत्रेदं वक्तव्यं भवति-अत्रतावदरत्निप्रमाणेन हि वेदेर्मानमुच्यते । अतो यत्र चतुररत्निर्वि-हितः तत्र पंचारत्निर्ग्राह्यः । यत्र सप्तारत्निस्तत्राष्टा वरत्निरिति बोध्यम् ।

न चेष्टिचयनप्रकरणगतापरिमितशब्दस्यायमेवार्थ इति वाच्यम् । तत्र हि "नात्रमात्रास्ति[6] यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यादिती" ष्टिप्रकरणे वेदिनिर्माण प्रसंगे विहितत्वात् यथा "-न[7]वै मेसर्वाणिरूपाण्युपधत्ताति वैव रेचयथ न वाऽभ्यापयथे" तिचयनेष्टकानिर्माण प्रकरणे श्रुतिसमाम्नातत्वात् तत्रापरिमितशब्दः यथेष्टवाचकः परिमाणरहितवाचको वा । तेन हि अनवस्थास्यादिति चेन्न । इदमेवतात्पर्यं गृहीत्वा तत्समाधित्सयाऽऽचार्योऽग्रे वक्ष्यति "योगश्चेति "।[8] अस्यार्थस्तत्रैव व्याख्यास्यते । कल्पसूत्रे आचार्येणोक्तं हि "अर्थात्

---

1. का.श्रौ.सू. 5/3/14
2. का.श्रौ.सू. 7/1/14.
3. का.श्रौ.सू. 2/6/1
4. का.श्रौ.सू. 17/7/28.
5. का.श्रौ.सू. 5/3/12.
6. श.ब्रा. 1/2/3/14
7. श.ब्रा. 10/4/3/6.
8. का.शु.सू.1/24.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परिमाणमिति"।[१] अयमाशयः-यत्र मानं नोक्तं तत्र स्वेच्छैव नियामिका । यत्र यावता परिमाणेन कार्यं सिद्धयेत्तत्र तावत् परिमाणमेव ग्राह्यम् ।

चतुर्विंशत्यामपरिमिते[२] यावता वा चक्षुषामन्येत तस्मान्नातिदूरमाधेय इति सर्वेषामविशेषेण श्रूयते । अयमाशयः- यावता वा चक्षुषामन्येत तावता प्रमाणेन चक्षुषा गृहीतेन मन्येत इयानष्टप्रक्रम इयानेकादशेत्यादि । अनेन प्राप्तोऽनवस्थादोषोऽपि निषिद्धयते ।

श्रूयते हि – दद्यतिदूरमाधीयते तदा श्वादयो व्यवेयुरिति । अत्राति दूर प्रतिषेधो व्यवाय परिहारार्थः इति ।

अयंनिष्कर्षः - वरुणप्रघासप्रकरणगतश्चयनप्रकरणगतश्चापरिमितशब्दः पूर्वोक्त प्रमाणादधिक प्रमाणे रूढ़ोऽवगन्तव्यः । न तु न परिमिता अपरिमितेति नञ् समासं गृहीत्वा प्रमाणाभाव वाचकः तत्र श्रुत्यभावात् । तत्र तु अधिक प्रमाणता च एकेनैव सम्पादनीया न तु द्वित्र्यादिना, अनवस्थाप्रसंगात् । इष्टि चयनगतापरिमितशब्दस्तु प्रमाणाभाव वाचकस्तत्र श्रुत्यनुरोधादिति ।। २३ ।।

प्रमाणेशास्त्रप्रमाणं निर्ह्रास विवृद्धयोः ।। 1/24 ।।

निर्ह्रासश्च विवृद्धिश्च निर्ह्रासं विविद्धी, तयोः निर्ह्रासिविवृद्धयोः प्रमाणे माने अपेक्षिते सति शास्त्रं प्रमाणं भवति । शास्तीति शास्त्रमितिव्युत्पत्या शास्त्रशब्दस्य सामान्यवाचित्वात्, प्रकरणादत्र शास्त्रपदेन शुल्वशास्त्रं गृह्यते । तदेव प्रमाणं स्यान्नान्यत् । निर्ह्रासः = अपचयः । विवृद्धिः = उपचयः ।

यत्रविहरणे निर्ह्रास विवृद्धिर्वेष्यते तत्रशुल्वसूत्रमेवप्रमाणं स्यात् ! अयमर्थः- क्षेत्रापचयोपचयादौ शुल्वशास्त्रोक्त प्रमाणमेव ग्राह्यं नान्यत् ।

वृद्धेरुदाहरणं यथा-

अग्निचयने द्वितीयविधाद्यग्नौ प्रत्यग्निं पुरुषप्रमाणेनैवोच्चयः। तत्रापि विंशतिशताङ् गुलपुरुषप्रमाणं स्वीकृत्य तेनवृद्धिर्न भवति । तथावचनाभावात् । तत्र तत्र तु सपक्षपुच्छविशेषाग्निं समचतुरस्त्रीकृत्य तस्यसप्तमांशेन वृद्धिर्भवति । चयने पुरुषवृद्धौ तथाशास्त्रवचन[३] श्रवणात् । अथापि वेदेरपि वृद्धि र्भवति . तदाधारभूतत्वात् । तत्र सामान्यशास्त्रप्राप्तनियमेन "अग्नौतु[४] त्रिपदंकुर्यादि" ति त्रिपदात्मक प्रक्रमेण वृद्धिर्भवति । अत्र तु शुल्वसूत्रोक्त[५]विशेषप्रमाणेन वृद्धिर्भवति । एवं यूपैकादशिनी पक्षादौ बोध्यम् ।

---

1. का.श्रौ.सू. 1/3/13
2. आ.प.शु.सू. 2/1/3. पृ. 63.
3. का.शु.सु 5/10.
4. का.श्लो. शु. 34.
5. का.शु.सू. 6.3. 4.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ निर्ह्रासोदारणं यथा-

"चतुरस्राच्चतुरस्रं[1] निर्जिहीर्षन्" इत्यादौ पृथक्करणीय समचतुरस्य कर्णाप्रमाणमेव प्रमाणत्वेन निश्चीयते नान्यत् । अन्यथा हि अभीष्ट सिद्धिरेव न स्यादिति ॥ 24 ॥

योगश्च ॥ 1/25 ॥

शास्त्रप्रमाणवशेनापि क्वचिदभीष्ट विहरणं न सम्पद्यते । अतस्तत्समाधानर्थमिदमाह-योगश्चेति ।

युज्यते घटते स्वाभिमत देश इति योगः । योगोनाम युक्तिः, सा प्याश्रयणीया । यत्र शास्त्रीय प्रमाणेन विहरणेनापि अभीष्टक्षेत्रं न जायते । तत्र युक्तिरप्याश्रयणीया । यथा- चतुर्भागादि बृहत्यन्तानामिष्टकानां न तुल्योह्रासः, तत्रयुक्तिरेव प्रमाणम् । अतएव देवयाज्ञिकैरिष्टकानिर्माण पद्धतौ पुरुषे पुरुषद्वात्रिंशांशं वर्द्धयित्वा तत्रे ष्टका यन्त्र निर्माणमभिहितम् ।

अपि यथा- अष्टप्रक्रमेष्वग्न्याधानपक्षे वेदिरेव न सम्भवति । दक्षिणाग्निनावरुद्धत्वात् । अतस्तत्समाधानार्थं तत्र युक्तिरेवशरणम् ।

तद्यथा --गार्हपत्यस्यप्राचीशङ्कोः- सकाशात्अष्टप्रक्रमेषु शङ्कुमेकं निहन्यात् । तदाहवनीयस्यप्राचीशङ्कुः । तस्मात् प्राच्या माहवनीयं विहरेदित्यनया युक्त्या विहरणे कृते सति "अष्टासु[2] प्रक्रमेषु ब्राह्मणोऽग्निमादधीत, एकादशसु राजन्यः द्वादशसु वैश्य इति" श्रुतिरपि सार्थिका भवति । वेदिरपि निष्पद्यते । अतः सर्व ञ्चैतदुररीकृत्याह योगश्चेति ॥ 25 ॥

दक्षिणाग्निसाधनम्

"इतरस्य वितृतीये दक्षिणत"[3] इति कल्पसूत्रे यद् विहितं तस्य साधनोपपादनम् -

इतरस्य वितृतीये दक्षिणत इत्येतद्वक्ष्यामः ॥ 1/26 ॥

गार्हपत्याऽऽहवनीय दक्षिणाग्निरित्यग्नित्रयम् । यतो हि गार्हपत्याहवनीययोरन्तरालं गृहीत्वा तदनु दक्षिणाग्नेः स्थानं निरूप्यते । अतोऽष्टैकादशद्वादशा[4] भिमतदूरे वा गार्हपत्याहवनीयौ संस्थाप्य, ततो दक्षिणाग्नेः स्थानजिज्ञासायमाह-इतरस्येति । इतरस्य= अन्यस्य दक्षिणाग्नेः, गार्हपत्यस्य दक्षिणतः वितृतीये देशे स्थानं भवतीतीदानीं वक्ष्यामः कथयिष्यामः इति प्रतिज्ञा ।

---

1. का.शु.सू.3/1.
2. आ.प.शु.सू 2/1/2
3. का.श्रौ.सू. 4/8/17
4. आ.प.शु.सू. 2/1/4

CC-0. In Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ननु कथं वितृतीयेत्युच्यते? आपस्तम्बस्तु "विभज्यापरस्मिँस्तृतीये-३ त्याह । बौधायनस्तु- विभज्यपूर्वस्मादन्ताद्[1] द्वयोर्भागयोर्लक्षणं करोतीत्याह ।

अत्रोच्यते --

अपरस्मिँस्तृतीयेत्युक्ते यत्र कुत्रापि माने तृतीयं ग्रहीतुं शक्यते । तस्मात्तदपि न बोधजनकम् । पूर्वस्मादन्तादित्यत्रापि लक्षणं न सुष्ठुतरं प्रतिभाति । तस्मादाह वितृतीयेति । अयमाशयः-अस्तु यद्यपि बौधायनापस्तम्बाभ्यामन्यैर्वा आचार्यैः दक्षिणाग्नि विहरणार्थं पृष्ठ्यारज्ज्वां लक्षणान्युक्तानि, तथाप्यनेन स्पष्टरूपेणाववोधयितुमुक्तं वितृतीयेति । वितृतीयं नाम गार्हपत्याहवनीययोरन्तरालस्य पृष्ट्यारज्जुं वर्द्धितषष्ठांशं त्रिधाविभज्य आह्वनीयखरादारभ्य संख्यानं कृते सति यस्तृतीयोभागः स विवृतीयशब्देनोच्यते ।

यद्यप्यपरस्मिँस्तृतीये इत्युक्तेऽप्यर्थाववोधयितुं शक्यते तथापि वितृतीयेति संज्ञाकरणं व्यवहारार्थम् । वितृतीय लक्षणेनाकृष्टे सति यत्र लक्षणं पतति तत्र दक्षिणाग्नेः स्थानमिति ज्ञातव्यम् ।। 26 ।।

प्रतिज्ञातमाह--

गार्ह पत्याहवनीययोरन्तरालं षढ्ढा सप्तधा वाऽऽगन्तुसमंवित्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणाऽऽयम्य तस्मिन्नग्निः ।। 1/27 ।।

गार्हपत्यश्च आहवनीयश्च तौ गार्हपत्याहवनीयौ तयोरन्तरं तदन्तरं अन्तरालभूभागपरिमिता रज्जुंषड्धासप्तधा वा विभजेत् । ततो भागमेकं गार्हपत्याहवनीयोरन्तरालभूभागपरिमितया रज्ज्वा संयोजयेत् । अत्रागन्तु शब्देन वर्द्धितांशो गृह्यते । अथ वर्द्धितांशेनयुक्तां गार्हपत्याहवनीययोरन्तरालभूतां प्रमाणरज्जुं त्रेधाविभज्य विभागं कृत्वा आहवनीयादारभ्यगणनाकृतायां यस्तृतीयोभागः तस्यारम्भस्थाने चिन्हं कुर्यात् तदेव वितृतीय चिन्हं विद्यते । ततः पूर्व-पाशमाहवनीय शङ्कौ पश्चिमपाश ञ्च गार्हपत्यशङ्कौ नियम्य वितृतीय लक्षणेन दक्षिणदिश्याकृषेत् । यत्र निपतति दद्दक्षिणाग्नेः स्थानम् ।

अत्रेदं वक्तव्यं भवति-

प्राकृतिकविहारं चिकीर्षन् पूर्वोक्त प्रकारेण दिङ् निर्णयं कृत्वा पश्चिमायां[2] दिशि शङ्कुमेकं निहन्यात्, तद् गार्हपत्याग्नेः स्थानम् । ततः सार्द्धत्रयोदशङ्गुल कर्काटक भ्रामणेन वृत्तमेकं सम्पादयेत् । स गार्हपत्यखरः । "द्वादशाङ्गुलउच्छाये विस्तारे चतुरङ्गुल"[3] इति खरसामान्ये विहितत्वात् अत्र त्रयाणां खराणां

1. बौ.शु.सू.1/56.
2. प्राच्यन्तयां शङ्कु निहन्तीति वचनात् (का.शु.सू. 1/6.)
3. का.श्लो. सू.22

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विहरणमनेनैव प्रकारेण कार्यम् । "चतुरस्रमण्डलयोरनियमेन प्राप्तयोरपि मण्डलमेव[१] गार्हपत्यायतनं आग्नेयो वै त्रयीविद्येत्यनुवाक पर्याये तस्य पृथिवीस्तुतेः तदाकरत्वाच्च तस्याः" इतिवचनात् "रथचक्रा कृतिः पश्चा"[२] दिति वचनाच्च तस्य वृत्ताकारं स्वरूपम् ।

ततः पुरस्तादाहवनीयस्याष्टासु प्रक्रमेष्वेकादशसु द्वादशसु मत्या वेति[३] वचनात् गार्हपत्यकेन्द्रादष्टैकादशद्वादशेति पक्षत्रयेषु कमपि पक्षमाश्रित्य स्वाभिमतदूरे वा शङ्कुमेकं निहन्यात्, तत्र हस्तपरिमितं समचतुरस्रमाहवनीयं कुर्यात् । [४]

ततो दक्षिणाग्निं विहरिष्यन् गार्हपत्याहवनीययोः पृष्ठ्यारज्जुं[५] षोढा सप्तधा वा विभजेत् । ततो भागमेकं तस्यां संयोज्य वर्द्धितैकभागां पृष्ठ्यारज्जुं त्रेधाविभज्य

---

1. आ.प.शु.सू करविन्दीयाव्याख्या, पृ. 68.
2. का.श्लो. शु. 21
3. का.श्रौ.सू. 4/8/17
4. रथचक्राकृतिः पश्चादितिवचनात् (का.श्लो.शु.21.)
5. पृष्ठेभवारज्जुः पृष्ठ्यारज्जुः । गार्हपत्याहवनीययोर्मध्ये या रज्जुः सा पृष्ठ्या । अथैतदुपयोगिन्याः प्रकृत्या मानानुच्यते ।

पृष्ठ्यायामधिकव्यास वृत्तं नर्यस्य कल्पयेत् । । 1 ।।
तन्मध्याद्वसुरुद्रार्कान्यत- मप्रक्रमेष्वथ ।
हस्तमात्राब्ध्यस्रमध्यः प्रक्रमो द्वादशाङ्गुलः ।। 2 ।।
कुण्डमध्यान्तरालांशुं सस्व षष्ठं भजेत् त्रिधा ।
नियम्यान्तौ मध्यशङ्कोर्वर्त्मैकं दक्षिणा नयेत् ।। 3 ।।
समध्यस्तदुद्दङ् नन्दाङ्गुलेवृत्तं प्रकल्पयेत् ।
सपादाष्टत्रिव्यासं तद् दक्षार्धं धनुराकृतिः ।। 4 ।।
वेदास्रमध्यात्पूर्वस्मात् परस्माद्वापिशङ् कुतः ।
पश्चाद्वेदिस्त्ररत्निस्तच्छ्रोणी उभयतस्ततः ।। 5 ।।
करद्वयमिते अंसौ सार्द्धहस्तौतथा पुरः ।
श्रोणितः पार्श्वयोर्मध्यौ सार्द्धद्वात्रिंशदङ्गुले ।। 6 ।।
पंचचत्वारिशंद्व्यासार्धयोः संग्रहयोर्मतौ ।
सभ्यावसथ्ययोः कुण्डे वृत्ते च नर्यसमिते ।। 7 ।।
वृत्तवेदास्रयोश्चोदग् यथा सम्भवमीरिते ।
उद्गंसात्पश्चिमेनोत्करो गर्तः षड्ङ्गुलः ।। 8 ।।
अर्कोच्छ्रिताश्चतुर्व्यासा मेखलाः कुण्डसन्निभाः ।
वेद्याः खातस्र्यङ्गुलादिरखातौ संग्रहौ मतौ ।। 9 ।।
वेद्यां सर्वो वहिः सर्वो वहिरन्तश्चभागतः ।।
त्रिविधोस्त्याहवनीयो वेदिः सर्वत्र तावती ।। 10 ।।
वेदास्र आहवनीयो वृत्तार्ध दक्षिणस्य च ।
त्रीणिकुण्डानीतराणि वृत्तान्युक्तानिधीमता ।। 11 ।।
प्राकृतस्यविहारस्य विज्ञेयैषोपकल्पना ।
एवं विहारं सम्पाद्य यज्वायष्टुंसमाचरेत् ।। 12 ।।
(काशिनाथेन विरचिता कर्मानुसारिणी अग्निष्टोमपद्धती आध्वर्यव पद्धति)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आहवनीयादारभ्य द्वितीयभागस्यान्ते तृतीयभागस्यारम्भे चिन्हं कुर्यात् । तदेव वितृतीय स्थानम् । अथ पूर्व पाशं आहवनीय शङ्कौ पश्चिमपाशं च गार्हपत्यशङ्कौ धारयित्वा वितृतीयलक्षणेन दक्षिण दिश्याकृषेत् । यत्र निपतति तद् दक्षिणाग्नेः स्थानम् । ततो नवाङ्गुलमु[1] त्तरतोऽपसृत्य शङ्कुमेकं निहन्यात् तद् दक्षिणाग्नेः मध्यम् । ततो यवाधिकैकोनविंशत्यङ्गुल परिमितं कर्काटक भ्रामणेन वृत्तमेकं सम्पाद्य वृत्तमध्यबिन्दुं गृहीत्वा प्रागपरामध्य रेखाकार्या । "चन्द्रार्ध" इव दक्षिणे ति वचनात् दक्षिणाग्नेः अर्धचन्द्राकृतिः । वृत्तस्योत्तरभागस्त्याज्यः ।

अत्रविशेषः-

दर्शपूर्णमासवेदिनिर्माण विषये यावन्ति वाक्यानि श्रूयन्ते तेषां सर्वेषां पर्यालोचने सति दर्शवेदि निर्माणविधौ त्रयः पक्षाः जायन्ते । तदित्थं- "वेद्यां सर्वो वहिः सर्वः वहिरन्तश्चभागतः "[2] इति वेदेः निष्पन्न स्वरूपमुररीकृत्य वामनाचार्येण पक्षत्रयमभिहितम् । परन्त्वत्र नियमहेतोरभावात् त एव त्रयः पक्षाः रचनावेलायां यथासम्भवं सप्तधा भिद्यन्ते । तद्यथा-"वैद्यां सर्व इत्यस्मिन् पक्षे रचना प्रकारः ।

१ आहवनीय केन्द्रशङ्कुत आहवनीयः, वेदिश्च[3] । आहवनीय प्राचीशङ्कुतः अंसावित्येक : प्रकारः ।

२. आहवनीय प्राचीशङ्कुतः सर्वम्[4] । इति द्वितीय प्रकारः ।

३. आहवनीय प्राचीशङ्कुतः आहवनीयः अंसौ च । प्रतीचीशङ्कुतः वेदिरिति तृतीयः प्रकारः ।

वहिरन्तश्चभागत इस्यस्मिन् पक्षे-

४. आहवनीय केन्द्रत आहवनीय अंसौ च । आहवनीय प्राचीशङ्कुतो वेदिरिति प्रथमः प्रकारः ।

५. आहवनीय केन्द्रत आहवनीयो अंसौ च । आहवनीय प्रतीचीशङ्कुतो वेदिरिति द्वितीयः प्रकारः ।

६. आहवनीय केन्द्रतो अंसौ वेदिश्चेति तृतीयः प्रकारः ।

वहिः सर्व इत्यस्मिन् पक्षे-

७. आहवनीय प्रतीचीशङ्कुतः सर्वम् ।

---

1. अग्नेरुदक् सार्द्धनवांगुलेऽस्मिन् (कुत.प्र. श्लो. 36)
2. अ. छो.प., पृ. श्लो. 42.
3. अत्र वेदिशब्देन 'व्याममात्रीं पश्चादिति' मानमभिमतं विद्यते ।
4. सर्वमित्युक्ते केन्द्रत आहवनीयविहरणं, वेदेरंसयोश्च विहरणं कर्तव्यमित्यवगन्तव्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चित्र-1





चित्र-2

चित्र-3





चित्र-4

चित्र-5





चित्र-6



चित्र-7

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्र बामपार्श्वे प्रदिष्टानामङ्कानामनुक्रमेणैव चित्राण्यपि विरचितानि सन्ति। तानि ततोऽवगन्तव्यानि[1]। अष्टप्रक्रम पक्षे वेदेरसंभवात् गार्हपत्यस्य प्राचीशङ्कोः आहवनीयस्य प्रतीचीशङ्कु मातव्यः इति तु वचन सार्थककरणोपायः। अत्र तावदिदं विचारणीयं भवति-गार्हपत्य प्राचीशंकुंतोऽष्टसुप्रक्रमेष्वाहवनीयशङ्कुं निखाय इतरस्याग्नेः स्थानमानयनार्थं कया रीत्या विहरेदिति।

किं गार्हपत्यमध्यबिन्दु सकाशात् आहवनीय केन्द्र बिन्दु पर्यन्तं प्रसारितायाः पृष्ठ्यारज्ज्वाः वितृतीयेन विहरेत्। उत गार्हपत्यस्य प्राची बिन्दोः आहवनीयस्य प्राची बिन्दु पर्यन्तं प्रसारितायाः रज्ज्वाः वितृतीयेन विहरेदिति? गार्हपत्यकेन्द्रबिन्दोः आहवनीयकेन्द्र बिन्दु पर्यन्तं प्रसारितायाः रज्ज्वा वितृतीयेन विहरणादपि वेदेरसम्भावन्न प्रथमः पक्षः। गार्हपत्य प्राची शङ्को राहवनीयप्राचीशङ्कु पर्यन्तं रज्जुं प्रसार्य तस्याः वितृतीयेन विहरे दित्यत्र मानाभावान्नापि द्वितीयः पक्षः।

अत्र तु गार्हपत्याहवनीययोर्मध्ये या प्राचीप्रतीची प्रसारिता अष्टप्रक्रमात्मिकारज्जु स्तस्या एव वितृतीयेन दक्षिणाग्निं विहरेदिति।

तद्यथा-- गार्हपत्यावनीयोरन्तरालमिता अष्टप्रक्रमात्मिका रज्जुंषोढा विभज्य भागेनैकेन सम्वर्द्ध्य ततो वर्द्धितैकभागां रज्जुंत्रेधाविभज्य वितृतीयेन दक्षिणाग्निं विहृत्य विपर्यस्योत्करमपि विहरेत्। दक्षिणाग्निः वेद्यन्तराले माभूदतः आवहनीय प्राचीशङ्कुतः त्र्यरत्निं पश्चान्मित्वा श्रोणिविहरणाय शङ्कुं दद्यात्। अथ तत एव दक्षिणत उत्तरतश्च हस्तार्द्धेन विहरेदंसार्थम्। एतेनाष्टासु प्रक्रमेष्वादधीतेति श्रुतिरपि सार्थिका भवति, वेदिरपि सिद्ध्यति च। अन्यथा हि-कल्पनागौरवोमानहानिश्चस्यादिति दिक्। अस्योपपत्तिरग्रेदर्शयिष्यते॥ 27॥

उत्करसाधनम्

अग्नित्रयस्य स्थानं निरूप्येदानीमुत्करस्थानं निरूपयिष्यन्नाह-

विपर्यस्योत्तरत उत्करः॥ 1/28॥

विपर्यासो नाम परिवर्तनम्। कस्य? पाशयोः। अयमर्थः- पूर्वपश्चिमपाशौ विपर्यस्येताम्। तद्यथा-पूर्वपाशं पश्चिमशङ्कौ पश्चिमपाश ञ्च पूर्वशङ्कौ कृत्वा वितृतीय लक्षणेन उत्तरत आकर्षेत्। यत्र निपतति तत्र चिन्हं कुर्यात्, तदुत्करस्थानम्। वचनान्मध्यबिन्दोः त्र्यङ्गुलकर्कटकभ्रामणेन एकांगुलगर्तवच्च वृत्तमेकंसम्पादयेत्तदुत्करम्। उत्कर नाम- उत्किरन्त्यस्मिन् वेद्यादिसम्भ्रन्ध्यवकरादिकमिति व्युत्पत्त्या परिसमूहिततृणधूलिपुंज स्थान मुत्करः।

---

1. यद्यप्यत्र सप्तधा विहरणप्रकारः प्रदर्शितो नियम हेतोरभावात्, तथापि प्रथमषष्ठसप्तमोपपत्तयः पूर्वाचार्यैरमुमोदितत्वात् सम्प्रदाय विदां प्रयोगेषु दर्शनाच्च उपपत्तित्रयमेव प्रमाणिकमिति दिक्।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्रविशेषः-

ननु वेद्यादिनिर्माणार्थ क्वचिदङ्गुल्या, क्वचिदरत्निना, क्वचिद्धस्तेन च मानमुच्यते । तन्मानं कस्य ग्राह्यं यजमानस्यान्यस्य वेत्याकाङ्क्षायामत्रविचार्यते ।

यद्यप्यापस्तम्बः यजमानस्याध्वर्योर्वे[1]ति वैकल्पिकं पक्षं पूर्वं प्रतिपाद्य तदनु "एष हि चेष्टानां कर्तेत्य,[2]" नया श्रुत्या अङ्गुल्यादिमानमध्वार्यरिव स्वीकरोति । तथापि कात्यायनेन यजमानेनोर्ध्व बाहुप्रपदोच्छ्रितेन समस्थितेन[3] वेत्येतेन यजमानस्यैव हस्तादिमानं ग्राह्यमिति प्रत्यपादि । कीदृशस्य यजमानस्येति चेदुच्यते-ऊर्ध्वबाहुरिति ।

यियक्षुर्यजमानः कस्मिंश्चित्समभूभागे पादाग्रेण क्षितिमवलम्ब्य पार्ष्णिद्वयं चोच्छ्रितं कृत्वा तिष्ठेत् । अथवा समपादेन कृतोर्ध्वबाहोर्यजमानस्य वेति विकल्पः । तस्य किम् ? तस्य प्रपदोच्छ्रितस्य समस्थितस्य वा ऊर्ध्वबाह्वोर्यजमानस्य यः पंचमाशं स हस्तः स्यात् । उक्तं हि-- विट्ठलदीक्षितेन कुण्डप सिद्धौ--

कृतोर्ध्वोबाह्वोः समभूर्गतस्य कर्तुः सरांशः प्रपदोच्छ्रितस्य ।
यो वा स हस्तोऽस्य जिनांशकोपि स्यादंगुलं तत्तदिभाशंकाये ।।[4]

अयमर्थः- यियक्षुर्यजमानः प्राङ्मुख उदङ्मुखो वा समभुवि पादौ समौकृत्वा बाहूचोर्ध्वौ कृत्वा, प्रपदः पादयोरग्रं तेना धारभूतेनोर्ध्वीभूय स्थिरस्तिष्ठेत् । ततोऽन्यः कश्चित् सूत्रं वेणुं वा गृहीत्वा स्थितस्योर्ध्वं बाह्वोर्यजमानस्य पादाग्रादारभ्योर्ध्वी कृतबाहुमध्यमान्तेन मानेन सूत्रं वंशं वाङ्कयित्वा तन्मानं समं पंचधाविभजेत् । तस्य यः पंचमोभागः स हस्तपदवाच्यः । अयं हस्तः पुरुषस्य कूपरादि मध्यामान्तपरिमित एव स्यात् । अयमेव हस्तः लोकप्रसिद्धः । कश्चिचदंग दोषरहितस्य समभूगतस्य समपादस्थितस्य पुरुषस्य दैर्घ्यस्य यः पंचमाशः स तस्य कूर्परादारभ्य कनिष्ठिकान्त एव स्यात् । अयमपिहस्त एव । एवं च समपादस्य पादाग्रोच्छ्रितस्य च पंचमांशस्य मानयोः पूर्वस्मादपरस्य माने न्यूनाधिक्येऽपि हस्तेति संज्ञोभयोः । अतएव कात्यायनेन यजमानेनोर्ध्वबाहुना समस्थितेन प्रपदोच्छ्रितेन वेत्युक्तम् । विकल्पद्वययस्यास्य श्रौतत्वात् "श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ । उभावपि हितौ धर्मौ सम्यगुक्तौ मीनिषिभिः "[5]अत्र स्वेच्छैव नियामिका ।

ततो हस्तस्वरूपस्य वंशस्य चतुर्विंशतिभागकृते सति तस्यैकैको भागोऽङ्गुलात्मकः सम्पद्यते । ग्रन्थान्तरेषु क्वचित् षड्सप्तयवैरङ्गुलं निदिर्दष्टं[6] क्वचिच्चाङ्

---

1. आ.प.शु.सू. 1/6/3
2. आ.प.शु.सू 2/6/3
3. का.श्रौ.सू., 16/7/32
4. म.कु.सि., श्लो. 3.
5. म.स्मृ. 2/14,
6. स्यात्तत्माङ्गुलिः सप्तयवाः । षड्यवाः साध्यमाप्तोक्ता" ।। (म.कु.सि.)

CC-0. Public Domain. Vipin Kumar Collection, Deoband.

Digitized by Madhuban Trust

गुष्ठपर्वणो मध्यमामध्यपर्वोणो[1]ऽनामिकामध्यपर्वणश्चाङ्गुलं स्वीकृतम् । तेषां भेदानां प्रकरणादिवशेन तत्तद् विषयकत्वं बोध्यम् ।

अत्र तु "दानवचनान्वारम्भणवरवरण व्रतप्रमाणेषु यजमानं प्रतीया दिति"[2] परिभाषया प्रमाणग्रहणविषये यजमान प्राधान्यनिर्देशात् कृतोर्ध्व वाह्वोर्यजमानस्य यः पंचमाशस्तस्य चतुर्विंशोभागोऽङ्गुलाख्य इत्येतदेव प्रमाणं पुरस्तिष्ठति ।

पंचारत्नि पुरुषों दशपदो, द्वादशाङ् गुलं पदं, प्रक्रमस्त्रिपदः समविभक्तस्य[3] इति । प्रायः प्राचीनैरर्वाचीनैश्चाचार्यैः कुण्डमण्डपादिकरणे देहदैर्घ्य पंचमांशस्य चतुर्विंशांशरूपदेहजाङ्गुलस्यैव प्राधान्यमङ्गीकृतम् । तिर्यग् यवाष्टकरुप स्थूलमानस्वीकारापेक्षया यागफलभोक्तृ यजमान लब्धाङ्गुलस्य प्रथमतयो पस्थित-त्वात् तदेवयुक्तितरम् । एतेन हस्तारत्न्योः[4] नास्त्यन्तरम् । कात्यायनोऽप्याह- "चतुर्विंशाङ् गुलोऽरत्निरिति" । तस्याङ् गुलस्य गजोऽष्टमो भागो यवः,तस्याष्टमो भागो यूका तस्याष्टमो भागो लिक्षादयः । इदं यूकादि परिमाणं कुण्डमण्डपादि करणे न चिन्तयेत् । उक्तं हि- -

"यवादूनं प्रमाणं तु मण्डपादौ न चिन्तयेत् ।
सूत्रस्याधो विलीयन्ते यूकालिक्षादयः शतम् ।।"[5]

अतस्तेषां प्रयोजनं गणितशास्त्रे क्षेत्रफलाऽऽनयनादौ नात्र । सूत्रस्याध स्तिरोहितत्वात् ।

अथ द्वादशप्रक्रमे षड्धापक्षं स्वीकृत्य दर्शपूर्णमास वेदिनिर्माणं लिख्यते-

दर्शपूर्णमासवेदिं चिकीर्षन् पश्चिमायां "क" चिन्हे शङ्कुमेकं निहन्यात् तद्गार्हपत्याग्नेः मध्यस्थानम् । तत उक्तप्रमाणेन तत्र वृत्तमेकं विलिख्य ततः पुरस्ताद् द्वादशप्रक्रमेशङ्कुमेकं "ख" चिन्हे निहन्यात्[6] तदाहवनीयखरमध्य स्थानम् ।[7]।

---

1. कर्तुर्दक्षकराङ्गुष्ठ वृहत्पर्वमितमेकमपरं तु....।" (कु.र.क.,श्लो.-5 पृ. 64.)
2. का.श्रौ.सू. 1/10/12
3. का.श्रौ.सू. 16/8/16.
4. "हस्तोऽङ्गलैः षड्गुणितैश्चतुर्भिरिति ।। (ली.व., श्लोक 5.
5. म.कु.सि., पृ. 8.
6. "अधाने पादिकं कुर्यात्सोमे तु द्विपदो भवेत् ।
   अग्नौ तु त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुधः ।। "
   इति वाक्यप्रामाण्यात् आधाने एक पादात्मकः प्रक्रमोविधीयते । आधानं तु प्राकृतिक वेद्यां क्रियते । इयं प्राकृतिकी वेदिः । तत्र एक पादात्मकः प्रक्रमः प्राप्तः । द्वादशांगुलपदमिति । श्रौतवाक्या दत्र प्रक्रम पदेन द्वादशांङ्गुलो गृहीतः । द्वादशप्रक्रमस्यागुल्या गणनाकृतयां चतुश्चत्वारिशदुत्तरशताङ्गुलं भवति । तेन षड्ढस्ताः भवन्ति । तावद् दूरे आहवनीयाग्नेः शङ्कुं दद्यात् ।
7. अत्रेदं विचारणीयं--श्रौतपदार्थनिर्वचने हि- आहवनीयमध्यशंङ्कु सकाशात् सार्द्धारत्निपरिमित देशे दक्षिणत उत्तरतश्च शङ्कुर्देयः। अथ आहवनीय मध्यशंकोः सकाशात् पश्चिमायां त्र्यरत्निरिमितेदेशे शङ्कुर्देयः इति । यद्यनेन प्रकारेण वेदिरचनाक्रियते तदाऽऽहवनीयाग्नेः खरस्यार्द्ध वेदेर्वहिः स्यात् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust





तच्छुकं केन्द्रीकृत्य तत आहवनीयं विहरेत् । तद्यथा - अरत्निमात्र-समचतुरस्रमाहवनीयम् ।[१] प्रथमचित्रस्थ "क-ख", अरत्निमात्रं प्रमाणसूत्रं विद्यते । "ख- ग" तस्याभ्यासः । "ख-ग" सूत्रं चतुर्धाविभक्ते सति "ग- घ", "घ- ङ", "ङ-च", "च-ख" इति चत्वारोभागाः सम्पद्यन्ते । ततः प्रथम चित्रस्थ "क, ग" पाशौ क्रमेण द्वितीय चित्रे "क" तथा "ख" शंङ्कौप्रतिमुच्य ततः "च" चिन्हेन निरञ्छन संज्ञकेन दक्षिण दिश्याकृष्टे सति यत्र नितति, तत्र "ङ" चिन्हे शंकुमेकं निहन्यात् । एवमुत्तरदिश्याकृष्य "ढ" चिन्हे शंकुमेकं निहन्यात् । ततः पाशौ विपर्यस्य उभयत आकृष्टे सति "त", "ण" शंकु स्थानद्वयं भवति ।ततः श्रोण्यंसावानयनार्थ प्रमाणार्द्धेन "ज" चिन्हेनाकृषेत् । तेन "घ न" प्रतीच्यां, "थ प", च

कात्यायन शुल्बपरिशिष्टे तु आहवनीय मध्यशङ्कोः सकाशात् पश्चिमत स्त्र्यरत्नि व्यवहिते देशे शङ्कुर्देयः । आहवनीय प्राचीन शंङ्कुसकाशात् सार्द्धत्र्यरत्निव्यवहिते देशे दक्षिणत उत्तरतश्च शंकुर्देय इति । " (का.श्रौ.सू., पृ. 87) । यद्यनेनप्रकारेण वेदिरचनाक्रियते तदा हवनीयो वेद्यन्तराले पतति । इममेव पक्षमाश्रित्यात्र वेदिरचना प्रस्तुयेत् ।

1. द्वितीय चित्रस्थ "क ख" शङ्कुरितिवोध्यम् । (द्वितीयचित्रं द्रष्टम्)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राच्यां भवतः । ततश्चतुर्षु "थ, प, ध, न" कोण स्थानेषु सूत्रार्पणात् समचतुरस्रमाहवनीयं निष्पन्नं भवति ।

अथाऽऽहवनीय गार्हपत्ययोः या "क-ख" पृष्ठ्यारज्जुस्तां षड्धा विभजेत्[1] तेनैकहस्तः प्रत्येकभागः स्यात् । ततः "क-ख" पृष्ठ्या रज्जुंहस्तेनैकेन वर्धयेत् । तेन पृष्ठ्या रज्जुः सप्तहस्ता जाता । तस्याः "क-च" वर्द्धितः सप्तमो भागः । "ख-च" पृष्ठ्यारज्ज्वां त्रेधा विभक्तायां सत्यां "च-छ" "छ-ज", "ज- ख" इति त्रयोभागाः सम्पद्यन्ते । ततः "च" पाशं "क" शंकौ "ख" पाशं च "ख" शंकौ नियम्मय "छ" चिन्हेन वितृतीयलक्षेन दक्षिणदिश्याकृषेत् । यत्र निपतति तत्र "ग शंकुं निहन्यात् । स दक्षिणाग्नेर्मध्यः । तत उत्तरतो नवाङ्गुलमपसृत्य[2] तत्र "ट" शंङ्कुं निहन्यात् । "ट" शंङ्कुं केन्द्रीकृत्य यवाधिकैकोनविंशत्यङ्गुल कर्काटकभ्रामणेन वृत्तमेकं सम्पाद्य वृत्तमध्ये केन्द्रसंलग्ना परिधि पूर्वभागमादाय पश्चिमपरिधिं यावत् सरलरेखा कार्या तस्योत्तरभागस्त्याज्यः । स अन्वाहार्यपचनः ।

ततः पाशौ विपर्यस्य "च" पाशं "ख" शंङ्कौ "ख" पाशं च "क" शंङ्कौ धारयित्वा वितृतीयेन "छ" चिन्हेनोत्तरदिश्याकृषेत् यत्र पतति तत्र "घ" शंङ्कु निहन्यात् । तत्स्थानं केन्द्रीकृत्य तत्र त्र्यङ्गुल कर्काटक भ्रामणेन वृत्तमेकाङ् गुलगर्त्तवच्च सम्पादयेत् तदुत्करम् ।

अथ "ख" शङ्कुतः प्रचीच्यां त्र्यरत्नि पश्चादितिवचनात्[3] तावद् दूरे "थ" शङ्कुं निहन्यात् । "थ" शङ्कोरुभयतो द्व्यरत्निदेशे क्रमेण "त-ण" शङ्कू-दद्यात् । तौ श्रोणीपदवाच्यौ । प्राच्यां "ख" शङ्कोरुभयतः सार्द्धारत्निव्यवहिते देशे शङ्कू निंहन्यात् । तौ अंसौ "अखातौ संग्रहौ मता"[4] विति वचनात्, संग्रहौ वर्जयित्वा मध्येऽवशिष्टाभूः त्र्यङ्गुलखाता कर्तव्या ।[5] "ड-ढ- ण- त" विषमदीर्घ चतुरस्रा त्र्यङ्गुलखाता सा वेदिरित्युच्यते

---

1. तृतीय चित्र द्रष्टव्यम् ।
2. अग्नेरुदक्सार्द्ध नवाङ्गुलेऽस्मिन्यूकेषुभिर्वर्धितभूस्तु शंङ्कौ ।
   एकोनविंशांगुलिभिर्यवैकयूकाढ्यं व्यासदलेनवृत्तम् ।।
   विलिख्यपूर्वापरसंस्थजीवां कृत्वा च हित्वोत्तरकार्मुकं हि ।
   याम्यांभवेत्कुण्डमथर्यसज्ञं सभ्यं सभायां चतुरस्रमुक्तम् ।।
   (कु.त.प्र. श्लो. 36, 37)
3. का.श्रौ.सू 2/6/1.
4. अ.ष्टो.प., पृ. 5, श्लो. 41.
5. का.श्रौ.सू. 2/6/1.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वेद्यांसर्वः

1/27 सूत्र दिशाद्वादशप्रक्रमेषड्धापक्षः । **92** प्र = **944** अं = **6** हस्त



चित्र-3

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



प्रथमपक्षमनुसृत्य द्वादश
प्रक्रमेषड्धापक्षः ।
तत्रवेदिस्वरूपम् ।

चित्र-8

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रकरणादत्र संग्रहनिर्माणमुच्यते ।[1] संग्रहपदेन यजतिस्थानं जुहोतिस्थानं च गृह्यते । तत्रोत्तरं संग्रहः जुहोतिस्थानं दक्षिणसंग्रहः यजति स्थानमिति। ननु कथमेतद् ज्ञायत इति चेदत्रोच्यते

सङ्ग्र निर्माण प्रकारः

अध्वर्युः प्रथमन्तावत् -आहवनीयस्य पश्चादुपविश्य-"ओं नमो देवेभ्य" इति पुरस्तत् पुटांजलिं कृत्वा, "स्वधा पितृभ्य " इति दक्षिणस्यामंजलिं करोति । ततो अप उपस्पृश्य "सूयमे म" इति मन्त्रान्ते जुहूपभृतौ सहैव दक्षिणेन पाणिना गृहीत्वा दक्षिणस्यां दिशि यजतिस्थानं गच्छति ।[2] एतेन दक्षिणस्यां यजति स्थानमिति सेत्स्यति । द्वयोः संग्रहयोर्मध्ये दक्षिणस्य यजतिस्थानत्वे, उत्तरस्य च जुहोति-स्थानमिति बलादायाति । "सव्येनेतो दक्षिणेनामुतः" [3] इति सूत्र भाष्ये विद्याधरगौडैरुक्तं-उत्तरतो जुहोतिस्थानं दक्षिणतो यजतिस्थानमि ति ।[4]

---

1. मध्यसंग्रहमाह--
आनीयरज्जुंपूर्वर्द्धात्पश्चार्द्धं यावदेव तु ।
द्विगुणी कृत्यतां रज्जुंतत्र शंकुं निखातयेत् ।।
वेदि श्रोण्यंसयोर्मध्ये तयारज्ज्वाष्टभागया ।
वा पृथुत्व तुरीयेण मध्येनालिख्यसंग्रहौ ।। "
व्याख्या --चतुररत्निः पश्चात्, त्र्यरत्निः पूर्वभागे, त्र्यरत्निः प्रागपराऽऽयता च वेदिरस्ति । तत्र पूर्वार्द्धे पूर्वतिर्यङ्मानार्द्धे यः शङ्कुस्तस्माद्रज्जुं पश्चार्द्धयावदानीय प्रतीच्यां तिर्यङ्मानीमध्ये यः शङ्कुस्तत्पपर्यन्तं दक्षिणांसदक्षिणश्रोणिशंङ्कुं वेष्टयन्नानीय, सात्वानीता रज्जुः सप्तपंचाशदधिकशतांगुला भवति । तां रज्जुंद्विगुणी कृत्य पूर्वार्द्धशंङ्कोर्दक्षिणास वेष्टनपूर्वकं निदध्यात् । एवमुत्तरतोऽपि । तत्र च दक्षिणोत्तरपार्श्वमान्योमध्ये शंङ्कू द्वौ निखनेत् तौ च शंङ्कू अधस्ताद्वाचत्वारिंशदङ्गुलान्ते श्रोण्योरुपरि सार्द्धत्रिंशदङ्गुलान्ते पततः । तया पंञ्चाशदधिकशताङ्गुलमितया रज्ज्वाष्टभागया, अष्टमोभागो यस्याः अष्टौ व भागा यस्याः तयाष्टभागरूपया किञ्चिदधिक सार्द्धकोनविंशत्यंङ्गुलरूपया मध्येन श्रोण्यंसमध्यस्थ शंकुनाऽऽलिख्य द्वौ संग्रहौ वेदेः संक्षेपौ कुर्यात् । अयमर्थः-तद्रज्जोरष्टभागमितया रज्ज्वादि शंङ्कावारोप्य वेद्यन्तर्द्ध कुर्यादिवमितरत्र ।
पक्षान्तरमाह- वा पृथुत्व तुरीयेण । पृथुत्वस्य तुरीयेण चतुर्थांशेन संग्रहौस्तः अयमर्थः- श्रोण्यंसमध्यनिखातशंकोर्यत्पृथुत्वं दक्षिणोत्तरस्थापित सूत्रविस्तारषड्भागोनषडशीत्यङ्गुल मितस्तस्य तुरीयोंऽशः किंचि दून सार्द्धैक विंशत्यङ्गुलात्मकः । तेन शंङ्कोः स्थापितेन वेद्यन्तर्द्धे व्यासार्द्धे उभयत्र कुर्यादिति पौर्णमासिक्या वेदेर्मानम् । अन्यासुवेदिषु मध्यसंग्रहोनास्ति प्रमाणान्तरोपदेशात् ।
(कु.शु.सू. "ख", पृ. 40, श्लो. 19-20)
2. का.श्रौ.सू., 3/1/16 इत्यस्य व्याख्यायाम् ।
3. का.श्रौ.सू, 3/1/18.
4. का.श्रौ.सू. 1/3/18 व्याख्यायाम्,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्रादौ रज्जुमेकां गृहीत्वा आहवनीयपुरस्तात् स्थित "ख" शङ्कौ पाशमेकं प्रक्षिप्य ततस्तां रज्जुंगृहीत्वा प्रादक्षिण्येन क्रमशः "ड-त", शंङ्कू क्रोडीकुर्वन्नानीय "थ" शंङ्कावपरपाशं निक्षिपेत्। "ख" शंकुतः प्रारभ्य प्रादक्षिण्येन "थ" शंकुपर्यन्तं प्रसारितायाः रज्ज्वाः मानं सप्तपंचाशदधिकशताङ्गुलं भवति । तां समं विभज्य तन्मध्ये चिन्हं कुर्यात् । येन द्वौ भागौ सदृशौ स्याताम् । तेनैको भागः पंचयवाधिकाष्टसप्तत्यंगुलो भवति। ततः तस्याः एकं पाशं "ख" शंकौ आसंजयेत्। मध्यचिन्हं "च" धृत्वा पूर्ववत् ' 'ड" शंङ्कु पर्यन्तं प्रादक्षिण्येनानयेत्। मध्यचिन्हं पार्श्वमान्यां यत्र निपतानि, तत्र लक्ष्मकुर्यात्। एतेनोत्तरस्यां "द" शंकुः दक्षिणस्यां "ध" शंङ्कुश्च निहितो भवति । अयमर्थः- "ख" शङ्कुतः मध्य चिन्हितां रज्जुमानीतायां सत्या मुपरिष्टाच्छकुंतः द्वाचत्वारिंशदङ्गुलंसंक्रमिते, अधस्ताच्चैक त्रिंशदङ् गुलसंक्रमिते दक्षिणस्यां "ध" शङ्कुनिहितो भवति । एवमुत्तरस्याम प्युपरिष्टाद् द्वाचत्वारिंशदधस्ता च्चैक त्रिंशदङ्गुले "द" शङ्कुर्निहितो भवति। ततोऽर्द्धप्रमाणां रज्जुं चतुर्धाविभजेत्। नेनैकैकोभागः पञ्चयवाधिकैकोन विंशत्यङ्गुलात्मको भवति । तेन संग्रहौ कार्यौ । उभयत्र दशाङ्गुलमिता अवशिष्टाभूमिः श्रोणी पदवाच्या । तत्र "पूर्वार्द्धे[?] पूर्वतिर्यङ्मान्यर्ध" इत्युपक्रम्य आनीता सा रज्जुः सप्तपञ्चाशदधिकशताङ्गुलाभवतीति यन्महीधरेण प्रत्यपादि तत्तु आहवनीय प्राचीशंङ्कुतः वेद्यसंयोर्निर्माण पक्षे घटते । अयमर्थः-यस्मिन् पक्षे आहवनीय प्राचीशंङ्कुतः वेद्यंसयोर्निर्माणं क्रियते तस्मिन् पक्ष एव श्रोण्यंसयोर्योजयित्री पार्श्वमानी रज्जुः सप्तति र्भवति । स एव पक्षः साधितस्तेन । यतो हि विहरण प्रकारभेदेन पार्श्वमानीमानमपि भिद्यते । तद्यथा-पूर्वोक्त सप्त प्रकाराणां विहरणानां पार्श्वमानीमानमधस्तात्प्रदत्त चक्रतोऽ वगन्तव्यम् ।

चित्र संख्या[२]	पार्श्वमानीमानम्
1	85 अं[३].
2	73 अं.
3	97 अं.
4	81 अं.
5	85 अं.
6	73 अं.
7	73 अं.

1. का.शु.सू. "ख", पृ.४०, श्लो. 19-20 व्याख्यायाम् ।
2. इमानि चित्राणि 1/27 सूत्रस्य विचारप्रसंगे प्रदिष्टानि सन्ति ।
3. अस्मिन् पक्षे

अंसार्ध	36	अं.
पार्श्वमानी	85	अं.
श्रोण्यर्ध	48	अं.
समेषां योगः	169	अं.

नवपद्युत्तरशतांगुलासम्पूर्णा रज्जुः तां समं विभजेत्। तेन 84.5 आयाति । ततः पुनश्चतुर्भिः विभक्तायां सत्यां तस्या एकैकोभागः किञ्चिदधिक 21.1 अंगुलात्मको भवति । तेनैव मानेन संग्रहौ कर्तव्याविति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एतेनेदं निर्श्चीयते यन्-महीधरेण षष्ठसप्तम विहरणप्रकारमङ्गीकृत्याभिहितं "पूर्वार्धे पूर्वतिर्यङ्मान्यर्द्धं" इत्यादि ।

कात्यायनशुल्बपरिशिष्टे तु "[१] आहवनीय प्राचीशङ्कुसकाशात् सार्द्धारत्निव्यवहिते देशे दक्षिणत उत्तरश्च शङ्कुर्देयः । चतुर्षु कोणस्थ शङ्कुषुसूत्रार्पणाद् विषमचतुरस्रं भवतीति परिशिष्टकारेणास्माभिरंगीकृतस्य विहरणस्य प्रथमप्रकारस्यानुरूपमेवाभिहितम् । यद्यनयारीत्या विहरणं क्रियते तदा महीधरेण प्रतिपादित "पूर्वार्द्ध इत्युपक्रम्य सात्वानीता रज्जुः सप्तपंचाशदधिकशतांगुला भवति तां रज्जुं ....। तौ च शङ्कू अधस्तात्सार्द्धद्वाचत्वारिंशदङ्गुलान्ते श्रोण्योरूपरि सार्द्ध त्रिंशदंगुलान्ते पततः तये" त्यादिगणितजातं सर्वं नैव घटते । प्रक्रियामात्रमेवावशिष्यते । तस्या अपि दुर्बोधत्वादत्र मयैवं प्रतिपाद्यते-

अथातः सम्प्रवक्ष्यामि विधिं संग्रहकारकम् ।
आनीयरज्जुंपूर्वार्द्धात् प्रादक्षिण्येन शुल्बवित् ।। 1 ।।
पश्चादर्द्ध समानीय तद्गुणं विभजेत् समम् ।
रज्ज्वर्द्धेलक्षणं कृत्वा पूर्वार्द्धे निक्षिपेत्ततः ।। 2 ।।
दक्षिणांसं स्पृशन्तीं तां पार्श्वमान्यां प्रसारयेत् ।
लक्षणं निपतेत् यत्र तत्रशंकुं खनेद् बुधः ।।3 ।।
स एव संग्रहेमध्यः विलिखेच्छङ्कुतः पुनः ।
रज्ज्वर्द्ध विभजेद् वेदैः तन्मानेन लिखेद् ग्रहौ ।। 4 ।।

कस्मिन्नपिक्षे विहरणमस्तु परन्तु तत्र संग्रहावानयनार्थ मयमेव विधिः लगिष्यति ।

अष्टप्रक्रमपक्षे विहरण प्रकारः

गार्हपत्यकेन्द्रादष्टसु प्रक्रमेष्वाहवनीयक्रेन्द्रं कृत्वा वेद्यंसयोः विहरणे कृते सति वेदिरेव न सम्भवतीति चतुर्थ चित्रादवगन्तुं शक्यते । अष्ट प्रक्रमपक्षमाश्रित्य यथा विहरणे वेदिः सम्भवित तदुपपत्तिरत्र प्रदर्श्यते । तदर्थं पंचम चित्रं द्रष्टव्यम् ।

आदावभिमतक्षेत्रे "घ" शंकुं निखाय ततःसार्द्ध त्रयोदशाङ्गुलकर्कोट भ्रामणेन वृत्तमेकं सम्पादयेत् । तद्गार्हपत्यम् । अथ गार्हपत्यस्य पूर्वपरिधौ "क" "शंङ्कुं" निखाय ततोऽष्टप्रक्रमं प्रांचमतिक्रम्य तत्र "ख" "शंकुं" निहन्यात् तदाहवनीयस्य प्रतीची शङ्कुः । तस्मात् "न-ध-प-फ" समचतुरस्रं विरहेत् स आहवनीयः ।

---

1. का.शु.प. 1, 26-30 । अयमेव पक्षः विद्याधरगौडैरङ्गीकृतः । निर्दिदष्टश्च तैः स्व सरल व्याख्योपेते कात्यायनश्रौतसूत्रभाष्ये 2/6/1, तदुपपत्तिपरिज्ञानार्थ-अष्टमचित्रंद्रष्टव्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

9/26 सूत्रदिशाषङ्धापक्षंस्वीकृत्य अष्टप्रक्रमे विहरणोपपरीक्षा

चित्र-4



अत्रमानमं-9 एम.एम.= एकाङ्गुलमिति बोध्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

"क-ख" पृष्ठ्यारज्जुंषोढाविभज्य[1] भागेनैकेन पुनः सम्बद्धर्य तां त्रेधा विभजेत्। "क ग" वर्द्धित सप्तमोभागः। "ग-ङ", "ङ-च" "च-ख", इति त्रयोभागाः पृष्ठ्यारज्ज्वां भवन्ति। "ग" पाशं "क" शंङ्कौ "ख" पाशं च "ख" शंङ्कौ नियम्य "ङ्" चिन्हेन वितृतीयलक्षणेन दक्षिणस्यामाकृषेत्। यत्र पतति तत्र, "छ' ' शङ्कुं निहन्यात्। तस्मादुत्तरतो नवाङ्गुलदूरे "द" शंकुं निखाय यवाधिकैकोनविंशत्यंगुल कर्कटकभ्रामणेन वृत्तमेकं सम्पाद्य वृत्तस्य पूर्वपरिधितः पश्चिमपरिधिं यावत् मध्यस्थं "द" बिन्दुं स्पृशन्ती "म-य" रेखामंकयेत्। तस्योत्तरभागस्त्याज्यः। ततो विपर्यासनियमेन विपर्यासं कृत्वा वितृतीयेनोत्तरत आकर्षेत्। यत्र निपतति तत्र "ज" शंङ्कुं निहत्य त्र्यंगुल कर्काटकभ्रामणेन वृत्तमेका मेकांगुलर्त्तवञ्च कुर्यात्तिदुत्करः।

अथा हवनीयस्य प्राच्यां "ञ" शंङ्कोः सार्द्धारत्निमानेनोभयतश्चिन्हं कुर्यात्। तत्र चिन्हस्थाने "ट", "थ" शंङ्कू निहन्यात्। "ञ" शंकुतस्त्र्यरत्निं पश्चान्मित्वा "ढ" शंङ्कुं निहन्यात् श्रोण्यंकनार्थम्। ततो द्व्यरत्निमानेनोभयत आकृष्य "ङ", "ण" शङ्कू निहन्यात्। ततः संग्रहौ कुर्यात्।

तद्यथा -ञ" शंकुतः प्रादक्षिण्येन "ढ" शंकुपर्यन्तं रज्जुमानीय तां त्रेधा विभज्य मध्ये लक्षणं कुर्यात्। ततः "ञ" शंकौ पाशमेकं नियम्य "ट" शंकुं-स्पृशन्तीं रज्जुं मध्य लक्षणेन धृत्वा "ट-ड" पार्श्वमान्यां प्रसारयेत्। मध्य लक्षणं यत्र पतति तत्र "ठ" शंङ्कुं निहन्यात्। तस्मात्पंचयवाधिकैकोनविंशत्यंगुल कर्काटकभ्रामणेन पार्श्वमानीपर्यवसानमर्धवृत्तं सम्पादयेत्। एव मुत्तरतः कृते सति "त "ठ" द्वौ संग्रहौ स्याताम्।

अत्रविशेषः-

"बहिरन्तश्चभागत[2] इति सम्प्रदायसिद्धविहरणपरिज्ञानार्थं षष्ठं चित्रं द्रष्टव्यम्। अत्र द्वादशप्रक्रमेषड्धा पक्षं स्वीकृत्य विहरणं विनिर्दिष्टम्।

एकादशप्रक्रमे षडभागपक्षे स्वरूपोपपत्तिपरिज्ञानार्थं सप्तमं चित्रं द्रष्टव्यम् ॥ 28 ॥

दक्षिणाग्न्युत्करविहरणे पक्षान्तरम्।

अग्नित्रयस्योत्करस्य च स्थानं निरूप्येदानीं दक्षिणाग्न्युत्करयोर्विहरणार्थं पक्षान्तरमाह-

---

1. पक्षद्वये षद्ढाविभागपक्ष उत्तमो यतस्तत्र पार्श्वमानी तिर्यङ्मान्यौ समे स्याताम्। तदा कल्पसूत्रेणापि सममविरोधः। सप्तधाविभागपक्षे तु तयोरल्पमन्तरं स्यात्। इतिमाहीधरभाष्ये।
   का.शु.सू. "ख", पृ. 9.
2. अ.ष्टां.प., पृ. 5, श्लो. 41.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपिवाऽन्तर त्रिभागोनया रज्ज्वा पूर्वार्द्धे सम चतुरस्रं कृत्वा श्रोण्यामग्निः ।।1/29 ।।

अपिवेति पक्षान्तरे । अपि वा अन्तरे- गार्हपत्याहवनीययोर्मध्ये या



वेद्यांसर्वः
अष्टप्रक्रंमेषड्धापक्षे वेदिरचना ।
चित्र-5

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अत्रामानं - 1 एम.एम. = एकाङ्गुलम् ।

Digitized by Madhuban Trust

अन्तरालमितारज्जुः सा त्रिभागेन स्वतृतीय भागेन ऊना न्यूनाकार्या । तया द्विभागात्मिकया करण्या रज्ज्वा आहवनीय मध्यात् पश्चात् समचतुरस्रं कर्तव्यम् । तस्य समचतुरस्रस्य दक्षिण श्रोण्यां दक्षिणाग्निः दक्षिणाग्नेर्मध्यं कार्यमित्यर्थः । अयमाशयः गार्हपत्याहवनीययो र्या अन्तरलामिता रज्जु सा स्वतृतीयभागेन ऊना कार्या, अर्थात् द्विभागपरिमितया रज्ज्वा आहवनीय मध्यात् पश्चात् समचतुरस्रमेकं कर्तव्यम् . तस्य चतुरस्रस्य दक्षिणश्रोण्यां दक्षिणाग्निः कार्यः ।।29।।

विपर्यस्योत्तरांस उत्करः ।। 1/30 ।।

विपर्यस्य वैपरीत्येन चतुरस्रंकृत्वा तद्यथा गार्हपत्यमध्यात् त्रिभागोनया करण्या समचतुरस्रं कृत्वा तस्य उत्तरांसे उत्करः कार्यः ।

अस्योपपत्तिः[1]

अथ पक्षान्तरेण दक्षिणाग्न्युत्करयोरूपपत्तिः प्रतिपाद्यते । तत्र द्वादशप्रक्रमेषड्धापक्षं स्वीकृत्य विहरणं क्रियते।

अभीष्टक्षेत्रे "क", "ख" शंकुं निखाय "क" शंङ्कुं केन्द्रीकृत्य गार्हपत्य खरं विरचय्य ततः "ख" शंङ्कुं केन्द्रीकृत्य आहवनीयं विरचयेत् । गार्हपत्य शंङ्को राहवनीय शङ् कुपर्यन्तं तयोरन्तालमिता रज्जुं त्रेधाविभजेत्, तेन "क-ग", "ग-घ" "घ-ख " इति त्रयोभागाः भवन्ति । दक्षिणाग्निस्थान निरूपणार्थ "क- ग" भागं जह्यात् । अथ "ख-ग" मितया रज्ज्वा "झ-ञ-ट-ठ" इति समचतुरस्रं कुर्यात् । तस्य दक्षिण श्रोण्यां "ट" शंङ्कुं निहन्यात् स दक्षिणाग्ने र्मध्यः। ततो गार्हपत्यस्य "क" शङ्कोः "च -छ-ज-ङ " समचतुरस्रं कुर्यात् । तस्योत्तरांसे "ज" चिन्हे शङ्कुमेकं निहन्यात् स उत्करमध्यः ।

अथ समचतुरस्रमाहवनीयं विरचय्य तस्य "थ" शङ्कोरुभयतः सार्द्धे करत्निव्यवहिते देशे "त" तथा "ण" शङ्कुं दद्यात् , तौ वेद्या अंसौ । "ख" शङ् कुतः प्रतीत्यां त्र्यरत्निपरिमिते देशे शङ्कुं दद्यात् । तस्योभयतो द्व्यरत्निदेशे "ड", "ढ" शङ्कू दद्यात् । तौ श्रोणी पदवाच्यौ । ततः संग्रहौ कुर्यात् ।

तद्यथा--"थ" शङ्कोरारभ्य "द" शङ्कुपर्यन्तं "त", "ढ " शङ्कू क्रोडीकुर्वन् रज्जुमेकामनयते् । तदर्द्धेलक्षणं कृत्वा तस्या एकं पाशं "थ " शङ्कौ नियम्य मध्यलक्षणेन पुर्ववत् "त " शङ्कुमूलेनानीय "त-ढ" पार्श्वमान्यां प्रसारेत् । यत्र पतित तत्र "प" शङ्कुं निहन्यात् । एवमुत्तरस्यां "ण-ड" पार्श्व मान्यां प्रसार्य लक्षणे "न" शङ्कुं निहन्यात् । "न" "प" शङ्कू केन्द्रीकृत्य अर्द्धरज्ज्वाश्चतुर्थांशभूतं यवाधिकैकोनविंशत्यङ्गुलात्मकं भागं गृहीत्वा कर्कटकभ्रामणेन पार्श्वमानीपर्यवसानमर्धवृत्तमेकैकमुभयतः सम्पादयेत् । तौ संग्रहौ ।

1. प्रथमचित्रं द्रष्टव्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



सूत्रोक्तद्वितीयपक्षमनुसृत्य द्वादशप्रक्रमपक्षे वेदिमानम् । चित्र-1

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्र विशेषः

सूत्रोक्त द्वितीयप्रकारेण द्वादशप्रक्रम पक्षे स्वरूपोपपत्तिः प्रथमचित्रे प्रदर्शिता । एवमेकादश प्रक्रमे स्वरूपोपपत्तिः द्वितीयचित्रे, अष्टप्रक्रमपक्षे स्वरूपोपपत्तिः तृतीयचित्रे च प्रतिपादिता । अत्रतावदिदमवगन्तव्यंयत् सूत्रोक्त द्वितीय प्रकारेण द्वादशप्रक्रमपक्षमाश्रित्य वेदिनिर्माणे कृते सति, उत्करो वेद्याश्चतुरङ्गुलं बहिरेव पतति । एकादशप्रक्रमपक्षे तु वेदिसंलग्न एव भवति । अष्टप्रक्रमपक्षे तु वेदिरेव न सम्भवति । दक्षिणाग्निनावरूद्धत्वात् । गार्हपत्य प्राची शङ्कुतोऽष्टसुप्रक्रमेषु आहवनीयस्य प्रतीची शङ्कुःकुर्यादिति यत् पूर्वस्मिन् पक्षे साधितं तन्मानेन विहृते सत्यपि दक्षिणाग्निखरस्य यदाधिकस्त्र्यङ्गुलः पूर्वभागो वेद्यां पतति । अत्र परीक्षणार्थं तृतीयं चित्रं द्रष्टष्यम् । अस्मिन् पक्षे उत्करोऽपि वेद्यन्तराल एव पतति।

दर्शवेदिनिर्माणेमतान्तराणि

अथ विभिन्नग्रन्थोक्त दर्शवेदिनिर्माणं संगृह्यते ।

अस्तिमण्डपकुण्डसिद्धिनामकः ग्रन्थः । यस्मिन् मण्डपकुण्ड विषयप्रतिपादकाः विंशतिग्रन्थाः बहुभिराचार्यैः विरचिता एकत्रसंकलिताश्च सन्ति । तत्र "'कुण्डशुल्बकारिकाख्यो ग्रन्थोऽस्ति । यस्य प्रणेतुस्तत्र नामाङ्कनं नास्ति । ग्रन्थेऽस्मिन्नाचार्येण श्रौतवितानस्य विहरणमुपवर्णितं तदत्र प्रस्तूयते ।

ब्राह्मीमविभ्रंशवतीं परीक्ष्य संशोध्य भूमिं सुसमां समुद्याम् ।
प्रागृह्य तस्या मनुलिप्यशालां कृत्वा निहन्याद् दृढ़माद्यशङ्कुम् ।
प्राचीं ततः पूर्ववदुक्तरीत्या संसाध्यदेशे परितः प्रशस्ते ।
नर्यस्य विश्वाब्धि गुणाङ्गुलादि व्यासार्द्धमित्या विलिखेत्सुवृत्ताम् ।।2।।
तन्मध्यचिन्हाद्वसुविक्रमेषु वैकादशद्वादशसु स्वमत्या ।
वांशस्य मध्यं परिकल्प्यकुर्यात् कुण्डंचतुष्कोणमरत्निमात्रम् ।। 3 ।।
मध्यं च नर्याहवनीययोस्तु विभज्य षोढाप्यथ सप्तधा वा ।
लब्धांशकागंतुसमंत्रिधा भूस्त्र्यंशं च हित्वापरदक्षिणेऽग्निः ।। 4 ।।
अग्नेरुदक्सार्द्धनवाङ्गुलेऽस्मिन् यूकेषुभिर्वर्धितभूस्थ शङ्कौ
एकोनविंशाङ्गुलिभिर्यवैक यूकाद्वयव्यासदलेषु वृत्तम् ।। 5 ।।
विलिख्यपूर्वापरसंस्थजीवांकृत्वा च हित्वोत्तरकार्मुकं हि ।
याम्यां भवेत् कुण्डमथर्य संज्ञं सभ्यं सभायां चतुरस्रमुक्तम् ।। 6 ।।
औपासनं चैवमथोगृहान्तः कुण्डद्वयं नर्यमिवोक्त वद्वा ।
उपर्यपर्यापितमेखला भिस्त्रिस्त्रिभिः सर्वखरेषु भित्तीः ।। 7 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सूत्रोक्तद्वितीयपक्षमनुसृत्य एकादशप्रक्रमपक्षेवेदिः। **1/29**



चित्र-2

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

1/29 सूत्रोक्तदिशा अष्टप्रक्रमपक्षेवेदिः



चित्र-3

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



चित्र-6

वहिरन्तश्चभागतस्तत्र षड्धापक्षे विहरणम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

अत्र मानम् -1 एम.एम. = एकाङ्गुलम् ।

Digitized by Madhuban Trust

वेद्यांसर्वः

1/27 सूत्रोक्तदिशा एकादशाप्रक्र मेषड्धापक्षः ।।



11 प्र = **132** अं = **5-1/2** हस्तः

अत्रमानम् - **1** एम.एम. = एकाङ्गुलम् **चित्र-7**

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वेदाङ् गुलोच्चारमितो विदध्याद्ध्रुवश्च तास्त्र्यंगुलिविस्तृताभिः ।
प्राचीभवादाहवनीयशङ्कोः पश्चात्त्यरत्न्या प्रतिमुंच शङ् कुम् ।। 8 ।।
रज्जुंद्विपाशं षडरत्निदीर्घां विचिन्हिता पंचसुमध्यभागे ।
हस्तद्वयं चागुलष्ट्कचिन्हें ह्यष्टादशेषु त्रिषुलक्षिता च ।। 9 ।।
पाशद्धयं सम्प्रतिमुच्यशङ् कोर्विकर्षयेदङ् गुलषट्क चिन्हम् ।
पाश्चात्यहस्तद्वयरंजुचिह्ले शंकूच याम्योत्तरगौ निखेयौ ।। 10 ।।
तच्छ्रोणियुग्मं त्वथपूर्वपाशंदष्टादशांकेन विकृष्य रज्जुम् ।
अग्नीशयोरंसयुगं तथा स्याच्छङ् कुद्वयं सार्द्धकरस्य चिन्हे ।। 11 ।।
सूत्रार्पणात्कोण चतुष्टयेतु क्षेत्रं भवेत्तद्विषमं हि वेद्याः ।
पूर्वार्धशंकोरथचापरार्द्धं यावञ्च कोणोपरिवेष्ट्य रज्ज्वा ।। 12 ।।
अर्द्धीकृता तामनुवेष्ट्यशकूं याम्योत्तरौ मध्यगमौ निखेयौ ।
तुरीयभागेन दलीकृताया रज्ञोः पृषत्कादथवापि शंकोः ।। 13 ।।
वृत्तार्द्धमानेन विलिख्य संग्रहौ कृत्वा खनेत्त्र्यङ् गुलवेदिमध्यम् ।
वितानपूर्वापरसौम्य दिक्षु द्वारैर्युतं शस्यगृहं पुरस्तात् ।। 14 ।।
याम्येन्द्रदिग्द्वारगृहं द्वयोश्चश्वभ्रं च भस्मोद्धरणाय कुर्यात् ।
एवं हविर्यज्ञविधौ वितानकुण्डानिसाध्यानि समानि सद्भिः ।। 15 ।।
वृत्ते पूर्वविनिर्मिते त्रियवयुक्षड्भिः शराश्चागुलैः
मित्वायष्टिभिरंगुलैश्च तिसृभिर्ज्याभिर्भजेन्मण्डलम् ।
द्वाभ्यां मध्यशरद्वयं यवयुतं द्वाभ्यां च वाणद्वयं
कृत्वापूर्ववदष्टपत्र विधिना पद्मं चतुर्भिर्दलैः ।। 16 ।।

कातीयानां दर्शपूर्मास विहार निर्माणप्रकारः

गार्हपत्यस्य (प्रत्यक्स्थस्य) मध्यादाहवनीयस्य (प्राक्स्थस्य) मध्यपर्यन्तमन्तरमेकादश द्वादश वा प्रक्रमाः । प्रक्रमो द्वादशाङ्गल इति परिशिष्टे । प्रक्रमः पदमित्यनर्थान्तरम् । गार्हपत्य कुण्डं सार्द्धत्रयोदशाङ् गुलमितकर्काटकभ्रामणेन वृत्तं कार्यम् । आहवनीयस्यतु समचतुरस्त्रं तस्य व्यासवि-स्तृती चतुर्विंशाङ् गुलमिते । गार्हपत्याहवनीयमोर्मध्ये यावती रज्जुस्तावत्या रज्ज्वाः षड् भागान्कृत्वा स्वषष्ठ भागं तस्यांसंयोजयेत् । एवं सप्तभागाः सञ्जाताः । ततः सप्तमभाग सहितां रज्जुंत्रेधाविभज्य तृतीयांश द्वयेऽपि चिन्हं कृत्वा प्रान्तयोः पाशौ कृत्वा गार्हपत्यमध्यस्थित शङ् कौ आहवनीय मध्यस्थित मध्यशङ्कौ च पाशौ दत्वा, गार्हपत्यात्प्रथमचिन्हे दक्षिणास्यां कर्षिते तत्र चिन्हं कार्यम् (अयं दक्षिणाग्नि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कुण्डमध्यः) तच्चिन्हादुत्तर भागे सार्द्धनवाङ् गुल प्रदेशे शङ् कुर्देयः । तत्र पूर्वापरा रज्जुर्देया । शङ्कुसकाशाद्यवाधिकैकोनविंशां गुलैर्भ्रमणं कार्य मुत्तरार्द्धस्य त्यागस्तेन अर्द्धचन्द्राकारो दक्षिणाग्निखरः सम्पद्यते । आहवनीय मध्यङ्कोः सकाशात्पश्चिमस्यां त्र्ययरत्निपरिमिते देशे शङ् कुर्देयः । तत्स काशाद्दक्षिणस्यामुत्तरस्यां द्वयरत्निपरिमितेदेशे शङ् कुर्देयः । आहवनीयमध्यशङ्कु सकाशात्सार्द्धरत्निपरिमितेदेशे दक्षिणत उत्तरश्च शङ् कुर्देयः । चतुर्षुकोणस्थ शङ् कुषु सूत्रार्पणाद्विषम चतुरस्रावेदिः सिद्धयति । ततः प्राचीशङ् कुमारभ्यपश्चिमशङ् कुपर्यन्तं कोणद्वयवेष्टनेन सूत्रं प्रदाय तस्याद्धं कर्त्तव्यम् । अर्द्धपरिमितेन सूत्रेण प्राचीशङ् कुमारभ्याग्नेयस्थशङ् कुवेष्टनेन दक्षिणतः, एवमीशान कोणस्थशङ् कुवेष्टनेनोत्तरतश्च शङ् कुः पृथक् पृथक् देयः । (इदमेवसङ् ग्रहमध्यम् ताभ्यां शङ् कुभ्यां दलीभूतरज्जुचतुर्थांशेन वेदिमध्ये सङ्ग्रहौ (अर्द्धचन्द्रकारौ) कार्यौ । तत्पश्चाद्द्वादशाङ् गुलमवशिष्टाभूमिः श्रोणिरित्यभिधीयते । पुरस्तादाहवनीयं यावदंस इत्यभिधीयते । तत आहवनीयमध्यात्प्रथमचिन्हे उत्तरस्यां कर्षिते तत्र चिन्हं कार्यम् (अयमुत्कर मध्यः)। तच्चिन्हात् त्र्यङ् गुलकर्कटक भ्रामणेन वृत्तमुत्करः कार्यः । अयं च द्व्यङ् गुलखातो भवति । तत अग्निकोणादारभ्य ईशान कोणपर्यन्तं वेद्यां संयोज्य (मिश्रयित्वा सार्द्धत्रिहस्ता वेदिः सम्पादनीया । सङ्ग्रहौ वर्जयित्वा वेद्यां सर्वत्र त्र्यङ् गुलः खातो विधेयः । कुण्डेषु मेखलाद्वादशाङ् दशाङ् गुलोच्चा चतुरङ् गुलविस्तारा एकैव भवतीति

इति श्रौतपदार्थ निर्वचने, पृष्ट 2 टिप्पण्याम्

कात्यायनीय शुल्बपरिशिष्टोक्त दर्शवेदिविहरणम् ।

गार्हपत्यमध्यादहवनीयस्य मध्यपर्यन्तं मध्येऽन्तरमष्टौ एकादश, द्वादश वा पदानि । गार्हपत्यस्यमध्यत्वेन कल्पितं स्थानं केन्द्रं परिकल्प्य सार्द्ध त्रयोदशाङ् गुलिमितरज्ज्वा वृत्तं कार्यम् । इदं गार्हपत्याग्नेः स्थानम् । आहवनीयस्थानमायामतो विस्तारतश्च हस्तमितम् । गार्हपत्याहवनीयान्तरस्य द्वादशपदपरिमितत्वपक्षे तदन्तरस्य षड्ढस्तात्मक त्वात् षड्ढस्तां रज्जुंतदीय षष्टभागेन हस्तात्मकेन संयोज्य, अर्थात् सप्तहस्तां रज्जुं गृहीत्वा, तस्या अन्तयोः पाशौ कृत्वा, मध्ये च तृतीये भागे चिन्हं कृत्वा एकं पाशं गार्हपत्यमध्यशङ् कौ आसन्ज्य द्वितीयपाशमाहवनीयं मध्यशङ्कौ आसन्जयेत् । रज्जुमध्यवर्तिनोर्द्वयोश्चिन्हयोः पश्चिमचिन्हस्थाने रज्जुंगृहीत्वा दक्षिणत आकर्षयेत्, यत्र तच्चिन्हं पतति तत्र चिन्हं कृत्वा तस्मात्स्थानात् उत्तरतः सार्द्धनवाङ् गुलव्यवहित देशे शङ् कुर्देयः । शङ् कुस्थानं केन्द्रत्वेन परिकल्प्य यवाधिकानत्रिंशत्यङ् गुलमितरज्ज्वा वृत्तं कार्यम् । वृत्तमध्ये केन्द्रसंलग्ना परिधिगर्तभागमादाय परिधिपश्चिमं यावत् सरलरेखा कार्या । रेखात उत्तर भागस्य त्यागः कार्यः । वृत्तस्य दक्षिणार्ध दक्षिणाग्निस्थानम् । पूर्वोक्त योश्चिन्हयोः पूर्वचि-

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्हस्थाने रज्जुंगृहीत्वा उत्तरत आकर्षणे यत्र चिन्हं पतति तदुत्करस्थानम् । आहवनीयमध्यशङ्कुसकाशात् पश्चिमतस्त्रत्निव्यवहिते देशे शङ्कुर्देयः । आहवनीयप्राचीङ्कुसकाशात् सार्द्धरत्निव्यहिते देशे दक्षिणत उत्तरतश्च शङ्कुर्देयः। चतुर्षु कोणस्थशङ्कुषु सूत्रार्पणाद् विषमचतुरस्त्रं भवति । प्राचीशङ्कुमारभ्य पश्चिमशङ्कुपर्यन्तं कोणद्वयवेष्टनेन सूत्रं देयम् तत्सूत्रार्धपरिमितेन सूत्रेण प्राचीशङ्कुमारभ्य दक्षिणकोणस्थ शङ्कुवेष्टनेन दक्षितः, उत्तर कोणस्थ शङ्कुवेष्टनेन उत्तरश्च शङ्कुर्देयः । ताभ्यां शङ्कुभ्यां पूर्वोक्तसूत्रार्धचतुर्थांशेन वेदिमध्ये सङ्ग्रहौ कार्यौ । द्वादशाङ्गुलं पदम् । अष्टयवमङ्गुलम् । चतुर्विंश-त्यङ्गुलो हस्तः । इति वेद्यादिसाधन प्रकारः

(का.श्रौ.सू. २।६।१) टिप्पण्याम्

इति प्रथमा कण्डिका

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्वितीया कण्डिका

रथ प्रमाणम् -

यतो हि रथमात्र्युत्तरावेदिरिति कल्पसूत्रे पठ्यते । अस्यार्थः-चातुर्मास्य यागान्तर्गत वरुणप्रघासाख्ये द्वितीय पर्वणि द्वे वेदी भवत । तत्र दक्षिणा प्रतिप्रस्थातुः, उत्तरा अध्वर्योः । तस्या एव उत्तरवेद्याः प्रमाणं रथमात्रमित्युक्तम् । रथमानं कियदिति तन्मानं तत्रनोक्तमत आह--

अङ्गुलै रथसम्मितायाः प्रमाणम्[1] ।। 2/1 ।।

रथसम्मिताया रथप्रमाणाया रथस्वरूपाया वा, उत्तरवेद्याःप्रमाणंमानं. अंगुलैः = हस्तस्यचतुर्विंशोभागोऽङ्गुलः तैः वक्ष्याम इति सूत्रार्थः । अयमाशयः-यथा रथे ईषाक्षयुगशम्यादय उपकरणाः सन्निपात्योपकारकाः तथैव तत्प्रमाणाया उत्तरवेद्याः श्रोण्यंसपृष्ठ्यादयः सन्निपात्योपकारकाः । तेषां मानानि अंगुलप्रमाणैः वक्ष्याम इति प्रतिज्ञा ।। 1।।

अथ प्रतिज्ञात ईषाक्षयुगादीनां मान मुच्यते ।

ईषाप्रमाणम् -

तत्राष्टाशीति शतमीषा ।। 2/2 ।।

अत्रेषाशब्देन उत्तरवेद्याः पृष्ठ्यारज्जुर्गृह्यते । ईषानाम रथे प्रागपराऽऽयतः काष्ठविशेषः । एतेनायमर्थः सम्पद्यते वरुणप्रघास पर्वणि उत्तरवेदेः प्रागपराऽऽयामोऽष्टाशीत्यधिकशतांगुलो भवतीति । हस्तमानेन तु- चतुरंगुलन्यूनाष्ट हस्तमिति ज्ञेयः ।। 2 ।।

अक्षप्राणम् -

चतुःशतमक्षः ।। 2/3 ।।

चतुः शत चतुरङ्गुलाधिकशताङ्गुलः, तत् किं भवति[1] अक्षो भवती त्यर्थः । प्रथमसूत्रात् प्रारभ्य पंचसूत्रपर्यन्तं सर्वत्राङ्गुलमित्यनुवर्तते अक्ष शब्देन रथस्य पश्चाद्भागे तिर्यग्गतं काष्ठमत्रोच्यते । तेन वरुणघासीयोत्तरवेदेः पश्चाद्गता

---

1. का.श्रौ.सू. 5/3/11.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दक्षिणोत्तरातिर्यग्रेखा चतुरङ्गुलाधिक शताङ्गुलमिता भवतीति । तेनाष्टाङ्गुलाधिकं हस्तचतुष्टयं भवति ।। 3 ।।

युगप्रमाणम् -

षडशीतिर्युगम् ।। 2/4 ।।

युगं वृषस्कन्धोपरिदीयमानं काष्ठं तत्षडशीत्यङ्गुलो भवति । दशाङ्गुलोना चत्वारोहस्ता इति। वेद्याः पुरस्ताद् दक्षिणोत्तरगामी तिर्यग्रेखा युगशब्देनोच्यते । तन्मानन्तु षडशीत्यङ्गुलं भवतीति भावः । एवमुक्त प्रकारेण रथमात्रा वेदी साधनीया ।। 4 ।।

शम्याप्रमाणाम् -

"शम्यामात्रीं[1] वितृतीयाऽऽमपरिमितां युगमात्रीं यजमान दशपद्यां " वेत्यनेन सूत्रेण वरुणप्रघासे आहवनीय स्थानापन्ना उत्तरावेदी शम्यामात्रीं कुर्यादिति विधीयते । परन्तु तत्र शम्यामानं कियदिति तन्नोक्त मतस्तदत्रा ऽऽ...ह-

चत्वारोष्टकाः शम्या[2] ।। 2/5 ।।

चत्वारोष्टकाः संयोगेन द्वात्रिंशद्भवति अथवा चतुर्गुणिताष्टसंख्या द्वात्रिंशद् । तेनायमर्थः सम्पद्यते - द्वात्रिंशदङ्गुला अष्टांगुलाधिक हस्तमिता शम्या भवति । शम्याशब्देन युगच्छिद्र प्रवेश्यं काष्ठं रथाङ्गं गृह्यते । इह तु द्वात्रिंशदगुलं परिमाणा सगर्ता वारणी वेदिमानकृत् काष्ठं लक्ष्यते ।

रथमात्र्युत्तरावेदिति कात्यायनेन यदुक्तं तदत्र प्रतिपाद्यते । रथमात्रीं वेदिं चिकीर्षन् देवयजनयोग्य भूमावष्टाशीत्युत्तरशताङ्गूले दूरे शङ्कुद्वयं निहन्यात् ततो विहरणाय तत्परिमितां रज्जुं प्रमाणरज्जुंमत्वा तदर्द्धेन वर्धयेत् । तेन सार्धाभ्यासरज्जुः द्व्यशीत्युत्तरद्विशताङ्गुला भवति । चतुर्ण्णवतिपरिमितायामभ्यासरज्ज्वां षड्भागकृतायां सत्यां प्रत्येकोभागः 15-2/3 अंगुलत्रयद्विभाग द्व्याधिक पंचदशांगुलात्मको भवति । ततोऽभ्यास रज्जोः षष्ठभागस्यान्ते लक्षणं कर्तव्यं निरञ्छनार्थम् । तेनाङ्गुल त्रिभागद्व्याधिक त्र्युत्तर द्विशतांगुलात्मिकाऽक्षणयारज्जुः सम्पन्ना । अवशिष्टांगुलत्रिभागतो भागाधिका ऊनशीत्यगुंला तिर्यङ्मानी रज्जुः । ततो विमीयमाने क्षेत्रे निखातयोः शङ्क्वोरुपरि साभ्यसप्रमाणरज्जोः एकैकं पाशं नियम्येत् । ततः पाशविपर्यासादि नियमेन विहरेत् । ततोऽभ्यासरज्जोरन्तात्

1. का.श्रौ.सू 5/3/29,
2. श्रौतपदार्थनिर्वचने तु खादिरकाष्ठनिर्मिता षट्त्रिंशदंगुलपरिमितायामा अग्रभागे अष्टास्वंगुलिषु कुम्ब्राष्टकयुता तण्डुलादिपेषणकाले दृषदोऽधस्तात्स्थापनोपयुज्यमाना आग्नीध्रकर्तृक दृषदुपलादि समाहननादौ करणभूता शम्यापदवाच्या
(पृ. 7, 41पं.)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रयश्चत्वारिंशत्तमे (43) अंगुलेंऽसांकनार्थं द्वापंचाशत्तमेऽङ्गुले (52) च श्रोण्यं कनार्थं लक्षणं कुर्यात् एतदेक मुत्तरवेदेः प्रमाणमुक्त म् ।

अथ **2/2-4** सूत्राणामपुपपत्तिः प्रतिपाद्यते ।



चित्र-2

चित्र-1

2/2-4 सूत्राणामुपपत्तिः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्रादौ-अष्टाशीत्यधिक शताङ्गुले दूरे "ट-ठ" शङ्कुद्वयं निहन्यात्। द्वितीय चित्रस्थ "ट-ठ" प्रमाणेन सह प्रथम चित्रस्थ ""क-ख" रज्जुर्विद्यते । "ख-ग" अभ्यासरज्ज्वाः षड्भागकृतायां सत्यां "ग-घ", "घ-ङ." ङ-च"."च-छ", ' 'छ ज," "ज- "ख " इति षड्भागाः सम्पद्यन्ते । तस्या, "ज" निरञ्छनम् । "ज- ग" तिर्यङ् मानी । ततो "ग" पाशं "ट" शंकौ, "क" पाशं "ठ" शंकौ च नियम्य निरञ्छनेनोभयतो विहृते सति "ड-ढ" शंकू निहितौ भवतः । ततो विपर्यास नियमेन विहरेत् दक्षिणतः "ण" उत्तरतश्च "त" शंकुः, निहितः । अथांसाङ्कनार्थ सार्द्धारत्निमितां रज्जुं गृहीत्वा "ठ" शंको रुभयतश्चिन्हिते सति "ध न" शंकू क्रमेण निहितौ । द्व्यरत्निपरिमितया रज्ज्वा "ट" शंकोरुभयतस्तावद्दूर एव चिन्हिते क्रमेण "थ" "द" शंकू निहितौ भवतः । ततः शम्यया द्वात्रिंशदङ् गुलपरिमितः उत्तरावेदिः आवहनीय स्थाने कुर्यात् । तेन "प-फ-ब-भ" इति समचतुरस्रा उत्तरावेदिः सम्पद्यते ।

अथ द्वितीय प्रमाणेन विहरणमुच्यते--

"षडरत्निः[१] प्राची" ति पक्षेऽयं साधनोपायः । षडरत्निमितायां रज्ज्वां त्र्यरत्निपरिमितां संयोज्य आगन्तुं षड्धाविभज्य निरञ्छनार्थ मभ्यासषष्ठे लक्षणं कुर्यात् । ततः पाशविपर्यास नियमेन कृत्वा तेषांमध्येशङ् कुरिति वचनात् सार्द्धात्निषु चिन्हं प्राच्यङ्कनार्थम् । द्व्यरत्निषु शङ्कुः श्रोण्यङ्कनार्थमिति ।

अपरिमित पक्षेऽपि यावती दीर्घाक्रियते तत्प्रमाणां रज्जुं मित्वा तत्र, लक्षणं कृत्वा दैर्घ्यप्रमाणार्द्धमभ्यस्य तस्याद्ये षष्ठभागे लक्षणं निरञ्छनार्थं कृत्वा पश्चात्तिर्यग्प्रमाणार्द्धे श्रोण्यङ्कनार्थं प्राक् तिर्यग् प्रमाणार्द्धेऽसाङ्कनार्थं च लक्षणं कुर्यादिति दिक् ।

द्वितीयप्रमाणेन विहरणो पपत्तिर्यथा --

तृतीयचित्रस्थ "क-ख" प्रमाणरज्जुः, तस्याः "ग-ख" प्रमाणार्द्धम् । "ख-घ" प्रमाणार्द्धाभ्यासः । तत्र षड्भागाः कृताः । "च" तस्याः निरञ्छनम् । "क-च" अक्ष्णया रज्जुः । "च -घ" तिर्यङ्मानीरज्जुः । ततः पूर्वोक्तप्रकारेण विहरणं कुर्यात् । शास्त्रवदर्द्धे[२] दीर्घचतुरस्रेति नियमात्, "चतुररत्निर्वा पश्चात्[३] सप्तप्राची षड्वा, त्रयः पुरस्तादि" ति वचनाच्च द्व्यरत्निषु द्व्यरत्निषु पश्चात् सार्द्धारत्निषु, सार्द्धारत्निषु पुरस्तात् चिन्हं कर्तव्यम् । तेन "ड-ढ-ण-त" विषमचतुरस्रा वेदीनिष्पन्ना ।[४]

अत्र वरुणप्रघासे वेदिद्वयं भवति । दक्षिणा उत्तरा च । ऋत्विजश्च यथादर्शपूणमासम् । एकः प्रतिप्रस्थाता अधिकः । स एव दक्षिणवेद्यामनुष्ठीयमाणकर्म्मणां कर्त्ताभवति । एवं च आग्नेयादीन्यष्टौ हवींषि

1. का.श्रौ.सू. 5/3/12,
2. का.शु.सू. 1/17,
3. का.श्रौ.सू. 5/3/12,
4. चतुर्थ चित्रं द्रष्टव्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



चित्र-3

वरुणप्रघासान्तर्गत उत्तरावेदिः



चित्र-4

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



वरुणप्रघासान्तर्गतदक्षिणावेदिः ।

चित्र-5

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्तरस्यां वेद्यां साङ्गान्यध्वर्युणा प्रचर्यन्ते । यानियान्यङ्गानि अध्वर्युणोत्तरस्यां वेद्यामनुष्ठीयन्ते तानि सर्वाणि प्रतिप्रस्थाता दक्षिणस्यामनुतिष्ठति । अतोऽत्र पंचम चित्रे दक्षिणावेदेः स्वरूपं प्रदर्शितम् ।। 5 ।।

पितृमेधवेदि निरूपणम्

अस्मिन् ग्रन्थे विदिक् स्रक्तेः समचतुरस्रस्य प्रकार उक्तः । परन्तु पितृमेधे "दिक्स्रक्तिं पुरुषमात्रं मिमीत"[1] इत्युक्तम् । तद् विहरणं च कथंस्यादित्याकाङ्क्षायामाह--

पैतृक्यां द्विपुरुषं चतुरस्रं कृत्वा करणीमध्येषु शंकवः स समाधिः ।।2/6 ।।

पैतृक्यां पितृमेध वेद्यां द्विपुरुषं =पुरुषद्वयसम्मितं चतुरस्रं कृत्वा तस्य चतुरस्रस्य करणीमध्येषु = क्रियतेऽनया सा करणी तासांमध्यः तासु सम चतुरस्रस्यपरिधिभूतासु रेखासु शंकवो निरखेयाः । स समाधिःसोऽयं साधनोपायो दिक्स्रक्तेः समचतुरस्रस्य । अत्रेदं वक्तव्यं भवति--

पुरुषमेधः श्मशाने विधीयते - तच्च दिक्स्रक्तिं कर्तव्यम् । तत् साधनोपायश्चात्रोच्यते ।

समचतुरस्रस्याक्ष्णयारज्जुर्द्विकरणीर्भवतीति[2] वक्ष्यमाणसिद्धान्तानुसारेण पूर्वं तावत् पुरुषपरिमितं समचतुरस्रं कर्तव्यम् । विंशतिशतांगुलो हि पुरुषः। तावत् परिमितया रज्ज्वा समचतुरस्रं कृत्वा तस्याक्ष्णयारज्ज्वा द्वितीयं चतुरस्रं कृतेसति द्विपुरुष क्षेत्रफलकं समचतुरस्रं भवति । तस्य दक्षिणोत्तरगे रेखे तिर्यङ् मान्यौ, प्रागपरगे द्वे रेखे पार्श्वमान्यभिधेये । मध्ये कोणात् कोण पर्यन्तं दत्तैका रज्जु-रक्ष्णये-त्युच्यते । तत्र पार्श्वमानी तिर्यङ्मानी रेखासु मध्ये मध्ये शंकवो निखाय ततश्चतुर्भ्यः शंकुमूलेभ्यः सूत्र प्रसारणात् पुरुष परिमितं दिक्स्रक्तिं चतुरस्रं सिद्ध्यति ।

अस्योपपत्तिर्यथा-

देवयजनभूमौ - विशंतिशतांगुलव्यवहिते, "ओ" "औ" शंकुद्वयं निहन्यात् । अत्रप्रथम चित्रस्थ "अ-आ" प्रमाणरज्ज्वा समं "ओ-औ" प्रमाणरज्जुः । समचतुरस्र-विहरणार्थं पूर्वोक्त प्रकारेण निरञ्छन चिन्हं कुर्यात् । तदर्थं प्रथमं चित्रं द्रष्टव्यम् । अत्र "अ-आ" प्रमाणरज्जुः "आ-इ" तस्याभ्यासः । "ऐ" निरंछनम् । "अ- इ" पाशौ क्रमेण, "औ-ओ" शंक्वोर्नियम्य पूर्ववद् विहरेत् । तेन "क-ख-ग-घ" -पुरुषमितं समचतुरस्रं भवति । तस्य क-ग- अक्ष्णया रज्जुः । द्विपुरुषसमचतुरस्र विहरणार्थ "क-ग" प्रमाणरज्जुं स्व प्रमाणेन "ग ङ" पर्यन्तमभ्यसेत् । तस्याश्चत्वारोभागाः कार्याः । तेषु 'ज' निरंछनस्थानम् । ततः "क" पाशं "क" शंकौ, "ङ" पाशं च "ग" शङ्कौ धारयित्वा विहरेत् । प्रमाणार्द्धे शंकुञ्च दद्यात् । तेन "झ-ञ-ट-ठ"

---

1. का. श्रौ. सू. 21.3.27.
2. का. शु. सू. 2.12

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



चित्र-1

2/6 सूत्रस्योपपत्तिः



चित्र-2

चित्र-3





चित्र-4

अत्रमानम् -1 एम.एम.= 3 अं.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इति द्विपुरुष परिमितं समचतरस्त्रं सम्पद्यते । तस्य "झ-ञ" करण्यां "ढ शंकुं "ञ-ट" करण्यां "क" शंकुं । "ट-ठ" करण्यां "ड" शंकुं । "ठ-झ" करण्यां "ग" शंकुं च निहन्यात् । तेन "ग-ढ-क-ड" इति पुरुषसम्मितं दिक्कोण गतं समचतुरस्त्रं सिद्धयति ।। 6 ।।

रज्जुसंज्ञाः

अत्र प्रसंगाच्छास्त्रेऽस्मिन् विहरणाय रज्जूनां संज्ञामाह

करणी तत्करणी तिर्यङ्मानी पार्श्वमान्यक्षणया चेति रज्जवः[१] ।। 2/7 ।।

करणी, तत्करणी तिर्यङ् मानी, पार्श्वमानी, अक्षणया, इत्येताः पंच रज्जूनां संज्ञा । तत्र क्रियतेऽनया साक्करणी प्रमाणरज्जुः, समचतुरस्त्रस्य मध्यगता रेखा । यथा-अस्याः कण्डिकायाः षष्ठसूत्रान्तर्गत तृतीय चित्रस्य "क-ग" रेखा । सैव "ट-ठ-झ-ञ" समचतुरस्त्रस्य करणी रज्जुः । यतो हि तामेव पृष्ठ्यारज्जुमाधारीकृत्य विहरणे कृतेसति अभीष्टसमचतुरस्त्रं सेत्स्यति । तत्करणी = तदिति क्षेत्रद्वैगुण्यादिकरण्याः रज्ज्वाः परामर्शकः । तत् = तदेवक्षेत्रं द्विगुणं त्रिगुणं चतुर्गुणं पंचगुणं वा क्रियतेऽनया सा तत्करणी । यथास्याः कण्डिकायाः षष्ठसूत्रस्य प्रथमचित्रस्थ "क-ग" अक्षणयारज्जुः । इयं हि "क-ख-ग-घ" पुरुषात्मक समचतुरस्त्र स्याक्षणयारज्जुः । तया "क-ग" प्रमाणरज्ज्वा चतुरस्त्रं विहृते सति "क-ख-ग-घ" इत्यस्य चतुरस्त्रस्य क्षेत्रफलतो द्विगुणं भवति । यथास्याः कण्डिकायाः षष्ठसूत्रस्य तृतीय चित्रस्थ "झ-ञ-ट-ठ" समचतुरस्त्रमं । इदं हि "क-ख-ग-घ" समचतुरस्त्राद् द्विगुण क्षेत्रफलकं विद्यते । अक्षणया रज्ज्वा विहृतत्वात् । तिर्यङ्मीयतेऽनया सा तिर्यङ्मानी । श्रोण्यंसमापिका रज्जुः। यथा "ख-ग", "क-घ" चतुरस्त्रस्य रज्जू । पार्श्वोमीयतेऽनया सा पार्श्वमानी । प्राच्यन्तयोः प्रसारिता रज्जुः । यथा "क- ख", "ग-घ", रज्जू । अक्षिवत् क्षेत्रं नियति या साक्षणया, चतुरस्त्रे तिर्यग्दत्ता मध्य रज्जुः । यथा "क-ग" रज्जुः ।। 7 ।।

दशपद्यायाः वेदेः करणी

"वितृतीयामपरिमिता युगमात्रीं यजमानदशपद्यां " वेत्यनेन सूत्रेण[२] यजमान दशपद्यामुत्तरवेदिं विकल्पेन विधीयते । तदर्थं सूत्रमिदमाह-

पदंतिर्यङ्मानी त्रिपदापार्श्वमानी तस्याक्षणया रज्जुर्दशकरणी ।।2/8 ।।

यस्य क्षेत्रस्य तिर्यङ्मानी दक्षिणोत्तरगामी रज्जुः पदं = पदमात्रं विद्यते पार्श्वमानी प्रागपरा च' त्रिपदा = पादत्रयात्मिका विद्यते तस्य

---

1. दीर्घस्यचतुरस्त्रस्य विस्तारो दीर्घता क्रमात् ।
तिर्यङ् मानी पार्श्वमानी न्यगादिगणकैः क्वचित् ।।
-पू.पत्रि., पृ. 65.)
2. का.श्रौ.सू. 5/3/29,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्षेत्रस्याक्ष्णयारज्जुर्दशकरणी भवतीति ।.

तयाऽक्ष्णया चतुरस्रं विहृते सति तस्य चतुरस्रस्य क्षेत्रफलं दशपदं भवति । अत्राचार्यः दशपदक्षेत्रफलकं चतुरस्रंविहरणार्थं युक्तिरिमां व्याजहार । अत्रेदमुच्यते- पदात्मिकां तिर्यङ्मानीं प्रसार्य तस्या एकप्रान्तसंलग्नां त्रिपदात्मिकां पार्श्वमानीरज्ज्वां प्रसारितायां सत्यां तयोरक्ष्णयारज्जुः दशपद क्षेत्रफलात्मकस्य चतुरस्रस्य निष्पादिका भवति ।। 8 ।।

चत्वारिंशत्पद्यायाः वेदेः करणी

"उत्तरवेदि"[1] निवपति चत्वारिशंत् पदां युगमात्रीं वा सर्वतः कुशस्तम्ब इत्यनेन सूत्रेण चितावुत्तरा वेदिर्विहिता । अतस्तन्निर्माणार्थमाह--

द्विपदातिर्यङ्मानी, षट्पदा पार्श्वमानी, तस्याक्ष्णयारज्जुश्चत्वारिंशत् करणी ।। 2/9 ।।

"येन विना यदनुपपन्नं तत्तेनाक्षिप्यते" -इति न्यायानुसारमत्र तस्यपदश्रवणाद् "यस्येति" पदमध्याहर्तव्यम् । यस्य क्षेत्रस्य दक्षिणोत्तराऽऽयता रज्जुः द्विपदा- द्विपदात्मिका पार्श्वमानी प्राचीप्रतीचीविस्तृतारज्जुः षट्पदा तस्याक्ष्णयारज्जुः कर्णशुल्बं चत्वारिंशत्करणी भवति । तयाकरण्या रचनाकृतायां सत्यां चत्वारिंशत् क्षेत्रफलकं चतुरस्रं निष्पन्नं भवति ।। 9 ।।

उपदिष्टं युगप्रमाणं शम्याप्रमाणं च दर्शनात् ।। 2/10 ।।

षडशीतिर्युगमित्यनेन वरुणप्रघासे विकल्पेन श्रुतस्य रथमात्र्यारूत्तरवेदेः पूर्वभागस्य प्रमाणमुपदिष्टम् । शम्या प्रमाणंचापि तत्रैव श्रुतत्वात् तन्मानमपि चत्वारोऽष्टकाः शम्येति सूत्रेणाभिहितम् ।। 10 ।।

क्षेत्रफलज्ञानप्रकारः

गणितशास्त्रन्तरेषूपदिष्टानां क्षेत्रज्ञानोपायानां दुर्बोध्यत्वादत्रतावत् परमकारुणिक आचार्यो भगवान् कात्यायनः गणितानभिज्ञानामपि सारल्येन ज्ञानार्थं तत्त्वविवक्षुराह--

दीर्घचतुरस्रस्याक्ष्णयारज्जुस्तिर्यङ्मानी पार्श्वमानी च यत् पृथक् भूते कुरुतस्तदुभयं करोतीति क्षेत्रज्ञानम् ।। 2 /11 ।।

दीर्घचतुरस्रस्य[2] तिर्यङ्मान्या पृथगन्यत्र चतुरस्रेकृतेसति यत् प्रमाणकं क्षेत्रं भवति, पार्श्वमान्याऽन्यत्र पृथक् चतुरस्रंकृते सति यत्प्रमाणकं भवति दीर्घचतुरस्रस्याक्ष्णया रज्जुरेव तदुभयं मिलितं चतुरस्रं सम्पादयति । एतेनायमर्थः सम्पद्यते-पार्श्वमान्या तिर्यङ्मान्या च पृथक् सम्पादितयोश्चतुरस्रयोः क्षेत्रफलं

1. का.श्रौ.सू., 17/3/14
2. तुल्यबाह्वोरेको दोरन्या कोटिरुदीर्यते ।
   आयतं पूर्ववदेवं चतुरस्रं प्रजायते ।। (पू.गणि., पृ.65)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

संकलिते यद्भवति, तावत्परिमाणक्षेत्रफलकं चतुरस्रं दीर्घचतुरस्रस्याक्ष्णायारज्जुरेव सम्पादयतीति ।

अस्योपपत्तिः--

अत्र "क-ग-ठ-ख" दीर्घचतुरस्रं विद्यते । तस्य "ख-ग" अक्ष्णया रज्जुर्विद्यते "क-ख" तिर्यङ् मान्या चतुरस्रं कृतेसति "क-ख-छ-च" चतुरस्रं भवति । "क-ग" पार्श्वमान्या चतुरस्रं कृते सति "क-घ-ङ-ग" चतुरस्रं भवति । अनयोश्चतुरस्रयोर्यत् क्षेत्रफलं भवति तत् "ग-ख" अक्ष्णयारज्ज्वा सम्पादितस्य "ख-ग-झ-ज" चतुरस्रस्य क्षेत्रफले न तुल्यं भवतीति बोध्यम् ।। 11 ।।

क्षेत्रद्वैगुण्यादिकरणप्रकारः

समचतुरस्रस्याक्ष्णया रज्जुर्द्विकरणी । 2/12 ।।

समचतुरस्रस्याक्ष्णया रज्जुः = कोणात् कोणपर्यन्तं तिर्यग्दत्तारज्जुः अक्ष्णयारज्जुः। सा समचतुरस्रस्य द्विकरणी र्भवति । तया करण्या विहरणे कृते सति यत्क्षेत्रफलकं समचतुरस्रंस्यात्तद् द्विगुणं क्षेत्रफलकं समचतुरस्रं समचतुरस्रस्याक्ष्णया रज्जुः सम्पादयति । यथा-यस्य समचतुरस्य पार्श्वमानी तिर्यङ्मानी च चतुर्हस्तः तस्य क्षेत्रफलं षोडशहस्तात्मकं स्यात् । अतस्तस्याक्ष्णया रज्ज्वा यत्क्षेत्रफलं क्रियते तद् द्वाविंशति हस्तक्षेत्रफलकं समचतुरस्रं स्यात् । अस्योपपत्तिज्ञानार्थं अस्याः कण्डिकायाः षष्ठसूत्रान्तर्गत द्वितीयतृतीयचित्रयोरूपपत्ति र्द्रष्टव्या ।। 12 ।।

2/11



अथ द्विकरणी साधनार्थं प्रकारान्तरमाह-

करणीं तृतीयेन वर्द्धयेत्तच्च स्वचतुर्थेनात्मचतुस्त्रिंशोनेन सविशेष इति विशेषः

।। 2/13-0।। Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

करणीं क्षेत्राऽऽयामरज्जुं त्रिभागंकृत्वा तस्यास्ततृयभागप्रमाणेन प्रमाणरज्जुंवर्द्धयेत् । तं च तृतीयभागं चतुर्धाविभज्य लब्धभागेषु भाग मेकं पुनः चतुस्त्रिशंद्धा सम्भुज्यभागेनैकेनन्यूनं कृत्वा अवशिष्टं त्रयस्त्रिंशद्भागं प्रमाणरज्ज्वां संयोजयेत् , क्रमशः वर्द्धितारज्जुर्द्विगुणक्षेत्रफलकस्य समचतुरस्रस्य करणीर्भवति ।

यथाहस्तमितं समचतुरस्रंद्विगुणीकर्तुमीष्यते । हस्तस्य चतुर्विंशत्यंगुल रूपत्वाच्चतुर्विंशत्यंगुलरूपां करणीं त्रिधाविभक्तायां सत्यां एकैकोभागोऽष्टांगुलात्मको भवति । अष्टांगुलैर्वर्द्धिता प्रमाणरज्जुर्द्वात्रिंशदङ् गुला भवति । ततोऽष्टांगुलात्मिका रज्जुंचतुर्धा विभजेत् । तेनांगुल द्वयात्मकः प्रत्येको भागो भवति । अंगुलद्वयं चतुस्त्रिंशद्धा विभक्तायां सत्या मेकैको भागो यत् प्रमाणकं स्यात् तत् प्रमाणंक भागमेकं न्यूनं कृत्वाऽवशिष्टं भागं प्रमाणरज्ज्वां संयोजयेत् तद् द्विकरणीर्भवति । अङ् गुलद्वयस्य चतुस्त्रिंशोभागो यूकात्रयं लिक्षाषट्कं किञ्चिदूनं बालाग्रञ्च तावताहीनेनांगुलद्वयेन तृतीयो भागोवर्द्धितः । एतेन त्रयस्त्रिंशदगुंलानि सप्तयवाश्चतस्रोयूकाः द्वे लिक्षेकिञ्चिन्न्यूनं बालाग्रं सम्पद्यते । तिलद्वयोनानि चतुस्त्रिंशदङ् गुलानि द्विहस्तकरणीत्यर्थः ।। 2/13 ।।

त्रिकरणीसाधनम्

द्विकरणीसाधनमुक्त्वेदानीं त्रिकरणीसाधनं विवक्षुराह--

प्रमाणंतिर्यग् द्विकरण्यायामस्तस्याक्षणयारज्जुस्त्रिकरणी ।। 2/14 ।।

अभीष्ट क्षेत्राऽऽयामपरिमितारज्जुः प्रमाणम् । क्षेत्र त्रिगुणीकरणार्थ प्रमाणरज्जुंतिर्यग् दक्षिणोत्तर दिशंप्रति प्रसारयेत् । द्विकरण्यायामः = द्विक्रियतेऽनया सा द्विकरणी, द्विगुणं वा क्रियतेऽनयाक्षेत्रमिति द्विकरणी । द्विकरणीनाम प्रमाणरज्ज्वा यत् क्षेत्रफलकं चतुरस्रं सम्पद्यते, तद् द्विगुणक्षेत्रफलकं चतुरस्रं यया करण्या सम्पद्यते सा द्विकरणी, तथा भूतां करणीं प्रमाणैकप्रान्तसंलग्नां पार्श्वमानीत्वेन प्रसार्य तयोरग्रभाग स्पृशन्तीं रज्जुमेकां कर्णरूपेण प्रसारयेत् सा त्रिकरणी र्भवति ।

अयमर्थः- प्रमाणं तिर्यक् प्रसार्य तस्यैकप्रान्ते द्विकरणीं रज्जुंपार्श्वमानीत्वेन प्राक्प्रत्यक् प्रसारयेत् । तयोर्या कर्णरज्जुः सा त्रिकरणी र्भवति । प्रमाणपार्श्वमानीभ्यां रज्जुभ्यां पृथक् सम्पादितयोः समचतुरस्रयोः क्षेत्रफलयोः संयोगे यत् क्षेत्रफलं स्यात् तावत् क्षेत्रफलकं समचतुरस्रं तयोः कर्णरज्जुःसम्पादयिष्यतीति दीर्घचतुरस्रस्याक्षणयारज्जुस्तिर्यङ्मानी पार्श्वमानी च यत् पृथक्भूते कुरुतस्तदुभयं करोतीतिक्षेत्रज्ञानमिति सूत्रार्थ एवोक्तो भवति ।

अथवा एवमवगन्तव्यम्-हस्तमात्रप्रमाणरज्ज्वा पृथक्-पृथक् सम्पादितयोः समचतुरस्रयोः संकलितक्षेत्रफलं यत् स्यात्तदेव कर्णरज्ज्वाकृतं समचतुरस्रं सम्पादयति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मन्ये हस्तमात्रं प्रमाणशुल्बम् । द्विहस्तमात्रं द्विकरणीत्यपरनामधेयं पार्श्वमानीशुल्बं, ताभ्यांपृथक्-पृथक् सम्पादितयोः समचतुरस्त्रयोः संकलित क्षेत्रफलं पंचहस्तं विद्यते । यतो हि समद्विगुणनं वर्गः सदृशांक गुणनं वर्गौ वेति । अतः पंचहस्तक्षेत्रफलकं समचतुरस्रमेकैवाक्ष्णया रज्जुः सम्पादयति ।।

अस्योपपत्तिः-

2/14



"क-ख", प्रमाणरज्जुः । "क-ग" द्विकरणी पार्श्वमानी रज्जुः। "ग-ख" कर्णरज्जुः । "क-ख" प्रमाणेन "क-च-छ-ख" समचतुरस्त्रं भवति । क- ग द्विकरण्या क-ङ-घ-ग चतुरस्त्रं सम्पद्यते । अनयोश्चचतुरस्त्रयोर्यत् क्षेत्रफलं तत् "ग-ख" कर्णरज्ज्वा कृतस्य "ख-ग-ज-झ" चतुरस्त्रस्य क्षेत्रफलेन तुल्यं भविष्यति। अथ "क-च-छ-ख" चतुरस्त्रेण समं चतुरस्त्रत्रयस्य यत् क्षेत्रफलं तदेव "ख-ग-ज-झ" चतुरस्त्रस्यास्ति ।। 14 ।।

तृतीयकरणी कथनस्य प्रयोजनम्

प्रयोजनमनुदिद्श्य मन्दोऽपि न प्रवर्तत इत्यतोऽत्रोपरिष्टात् प्रतिपादित सूत्रप्रयोजनमाह--

तृतीयकरण्येतेन व्याख्याता ।। 2/15 ।।

एतेन पूर्वसूत्रेण त्रिकरणी कथनेन तृतीयकरणी स्त्रौत्रामण्यां प्रयुज्यमाना तृतीयकरणी अपि व्याख्याता विशेषेणोक्ता । यतो हि - "प्रक्रमतृतीयेनावृत्तेनोत्तरां सोमव"[1] दिति सौत्रामण्यामुक्तम् । अस्यार्थः- प्रक्रमस्यतृतीयेन प्रक्रमतृतीयेन तेन प्रमाणेनोत्तरां = सौत्रामणीयागस्योत्तरां वेदिं सोमवत् = सोमयागे

1. का.श्री.सू. 19/2/2,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यथोत्तरावदिनिर्माणमभिहितं तद्वत् कर्तव्या । तत्रेयाँश्च विशेषो यत् द्वादशाङ्गुलपदमिति प्रमाणेन त्रिपदात्मकः[1] प्रक्रमोऽभिप्रेतः । एतेन साग्निके सोमे षट्त्रिंशदगुंलात्मकः प्रक्रम इति सिद्धयति । अत्र तु प्रक्रम शब्देन प्रक्रमस्य विभागकरणमेव प्राप्नुयात् । स च विभागो दैर्घ्य विस्तारे चोभयत्र कर्तव्यो भवतीति नवमांशे पर्यवसति । तत्र च यागानुष्ठानं प्राप्नुयात्तन्नेष्टम् । अतोऽत्रायमर्थः त्रिपदात्मकप्रक्रममितं यत् क्षेत्रं तस्य यस्तृतीयोंऽशस्तन्मापिका या रज्जुस्तयामानं कृत्वोत्तर वेदिर्निष्पादयितव्येति । श्रूयते हि- "वितृतीये यजेत वितृतीयं वै सौत्रामणीति" तत्र तया तृतीय करण्या प्रक्रमत्वेन कल्पितया या वेदिर्मीयते सा सोमवेदे स्तृतीयांशरूपास्यात् । एतावान्सन्दर्भस्यायमाशयः-सोमयागे यः प्रक्रमः स्वीकृतो विद्यते तस्य तृतीयांश मापिका या रज्जुः तया रज्ज्वा सौत्रामणीयागस्योत्तरावेदिर्निष्पादनीया सौमिकवेदिमानवत् ।[2] सोमेत्रिपादात्मकः प्रक्रमः। अत्र तस्य तृतीयां शरूपः प्रक्रमः तेन सौत्रामणीवेदिर्मातव्येति ।। 15 ।।

नवधाविभागप्रकारः

कथंतृतीयांशः सम्पादनीय इत्याकाङ्क्षायां तत् स्पष्टयितुं सूत्रत्रयेणाह--

प्रमाण विभागस्तु नवधा ।। 2/16 ।।

प्रमाणस्य प्रक्रमरूपस्य, तस्य किं ? विभागः करणीयः, कतिभिः? नवधाकरणीयः । तया त्रिपदमितया प्रक्रमरज्ज्वा समचतुरस्रनिर्माणाय तस्य पार्श्वमानी तिर्यङ् मान्यौ च त्रेधाविभज्य पूर्वापराऽऽयतं दक्षिणोत्तराऽऽयतं च सूत्रद्वयं दद्यात् । एवं नवधा विभागो भवति । तस्यैको भागः पद पद क्षेत्रफलकःस्यात् ।।16।।

करणीतृतीयं नवभागः ।। 2/17 ।।

करण्याः = त्रिपदमितायाः प्रक्रमरुपायाः रज्ज्वाः तृतीयो भागः पदरूपः करणीभूय चतुरस्रं कुर्वन् नवभागो भवति । नवभागः कस्य ? प्रक्रमरज्ज्वा कृतस्य चतुरस्रस्य । तेनायमर्थः सम्पद्यते - करण्याः त्रिभागकृतायाः त्रिपदमितायाः प्रक्रमरुपायाः प्रमाणरज्ज्वाः तृतीयं = तृतीयोभागः पदरूपः । तया करण्या चतुरस्रंकृते सति त्रिपदमितया प्रक्रमरज्ज्वा कृतस्य चतुरस्रस्य नवमं भागं संक्षिपतीत्यर्थः । वक्ष्यति हि तृतीयेननवमोंऽश इति ।। 17 ।।

---

1. आधानेपादिकं कुर्यात् सोमेतु द्विपदो भवेत् ।
   अग्नौ तु त्रिपदं कुर्यात् प्रक्रमं याज्ञिको वुधः।।
2. "सौमिक्या वैदेर्वितृतीयदेशे यजेतेति सौत्रामण्या वेदेर्विज्ञायते" ।
   "आ.शु. 2/5.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तृतीयकरणीस्वरूपम्

नवभागास्त्रयस्तृतीयकरणी ।। 2/18 ।।

नव च ते भागाः नवभागाः । तेषु त्रयः नवभागास्त्रयः । तान् या संक्षिपति एकीकरोति एकस्मिन्नेव क्षेत्रे समीकरोति सा तृतीयकरणी । कथं त्रयोभागान् संक्षिपतीति चेदत्रोच्यते पदमात्रात्मिकां रज्जुंतिर्यङ् मानीत्वेनप्रसार्य द्विपदपरिमितां रज्जुंपार्श्वमानी त्वेन प्रसार्य तयोरग्रभागस्पृशन्तीं रज्जुमेकां कर्णरज्जुत्वेन प्रसारयेत् सैव कर्णरज्जु:-पदात्मकनवभागेषु त्रयोभागान् समस्यतीति । इयमेव सौत्रामण्यां प्रक्रमार्था । एतावती प्रमाणारज्जुरेव सौत्रामण्यां प्रक्रमत्वेन विनियुज्यते । एतेनैव प्रमाणेन सोमवद्वेदिर्मीयते ।। 18 ।।

त्रिकरण्यादीनां प्रयोजनम्

नन्वेतावान्सन्दर्भस्य किं प्रयोजनमितिचेदत्रोच्यते-

सौत्रामण्यां प्रक्रमार्था ।। 2/19 ।।

पूर्वसूत्र प्रतिपादित कर्णरूपारज्जुः या पदात्मक नवभागेषु त्रयोभागान् संक्षिपति सैव सौत्रामण्यां = सौत्रामणीयागे प्रक्रमार्था = प्रक्रमरूपेणोपयुज्यमाना । यतो हि- "वितृतीये यजेत वितृतीयं वै सोमस्य सौत्रामणीति श्रूयते"। अतस्तया करण्या सौत्रामणीवेदिः सम्पादनीया । तन्मानेन निर्मिता सौत्रामणीवेदिः सोमयागवेदेः तृतीयांशरूपास्यात् । सौमिकवेदेः प्रक्रमरूपायाः रज्ज्वाः तृतीयांशमानयनं सौत्रामणीवेदेः विमानार्थमिति ।। 19 ।।

त्रिकरणी समासार्था ।। 2/20 ।।

भागत्रयं या संक्षिपति सा त्रिकरणी । क्रियतेऽनया सा करणी । त्रीन् क्षेत्रान् या एकीकरोति सा त्रिकरणी । सा समासार्था = समसनमेकीकरणं समासः तदर्थ प्रयुक्ता समासार्था ।

अयंभावः - समासार्था एकीकरणार्था, का ? त्रिकरणी । या रज्जुः करणीरूपा भगत्रयानेकीकरोति सा त्रिकरणी । त्रिकरण्याः प्रयोजनं क्षेत्रस्यैकीकरणार्थम् ।। 20 ।। एतावता -

तुल्यप्रमाणानां समचतुरस्राणामुक्तः समासः ।। 2/21 ।।

तुल्यप्रमाणानां = तुल्यानिसदृशानि प्रमाणानि मानानि येषां तानि तुल्यप्रमाणानि, तेषां समचतुरस्राणां = समास्तुल्याः अस्रयः कोणाः यस्य तत्समचतुरस्रम् । तेषां समचतुरस्राणां समासः एकीकरणप्रकार उक्तः कथितः ।।21।।

अथातुल्यप्रमाणानां समचतुरस्राणां समासमाह-

नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयसोऽपच्छिद्यात्तस्याक्ष्णयारज्जुरुभेसमस्यतीति समासः ।। 2/22 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नानाप्रमाणानां = विभिन्नमानानां समचतुरस्राणां समासे संक्षेपे एकीकरणे समुपस्थिते सति तत्र ह्रसीयसः = कनीयसः समचतुरस्रस्य करण्या = करणी रज्ज्वा वर्षीयसो = बृहत्तमस्य समचतुरस्रस्य करणी = पार्श्वमानी तिर्यङ्मानी वा अपच्छिन्द्यात् = तत्रापच्छेदः कर्तव्यः । तस्य ह्रस्वकरणीमानेन चिह्नितेन जायमानस्य दीर्घक्षेत्रस्य अक्ष्णयारज्जुः करणीभूय अन्यत् चतुरस्रं कुर्वती उभे ह्रस्वतरे क्षेत्रे समस्यति संक्षिपतीति-समासः = तुल्यातुल्य समचतुरस्राणामेकीकरण प्रकारः। यथा-द्वादशांगुले चतुरस्रेऽष्टागुलं समचतुरस्रं समसितव्यं विद्यते । तत्र द्वादशांगुलकरण्यां कोणादारभ्याष्टांगुलेषु पार्श्वमान्यां तिर्यङ्मान्यां वा चिन्हं कुर्यात् । तस्माचिन्हादभिमुखकोणान्तं यावत् कर्णसूत्रं दद्यात् तया कर्णरज्ज्वा यच्चतुरस्रं क्रियते तस्मिन् ह्रस्वमहतोः द्वादशाष्टांगुलयोः क्षेत्रयोः संक्षेपः स्यात् । एवमन्यत्रापि बोध्यम् ।

अस्योपपत्तिः

अत्र प्रथमचित्रस्थ "क-ख-ग-घ" समचतुरस्रे द्वितीयचित्रस्थ "च- छ-ज-झ" समचतुरसं समसितव्यं वर्तते । अतः "च-छ" करणीं प्रथमचित्रस्थ "क" कोणात् "क-घ" तिर्यङ्मान्यां प्रसारयेत् । यत्र स्पर्शः स्यात्तत्र "ट" शंकु निहन्यात् । इदानीं "ख- ट" करण्या यच्चतुरस्रं स्यात्तस्मिन् "क-ख-ग-घ" तथा "च- छ-ज- झ" क्षेत्रे संक्षिप्तौ स्याताम्, "ख-ट" करण्या तृतीये चित्रस्थ -"ख-ट-ठ-ड" समचतुरस्रं निर्मितं वर्तते । ख-ट-ठ-ड क्षेत्रफलेन तुल्यं प्रथमद्वितीयक्षेत्रयोः संकिलत क्षेत्रफलं विद्यते । एतवाता महतिक्षेत्रे ह्रस्वक्षेत्रस्य समसनं साधितम् ।। 22 ।।

चित्र-1

2/22



चित्र-2





चित्र-3

इति द्वितीयकण्डिका

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तृतीया कण्डिका

महत्क्षेत्राद्ह्रस्वस्य पृथक्करणम्

ह्रस्वमहतोः क्षेत्रयोः समासं निरूप्येदानीं महत्क्षेत्रात् ह्रस्वक्षेत्रस्य पृथक्करण प्रकारमाहः-

चतुरस्राच्चतुरस्रं निर्जिहीर्षन् यावन्निर्जिहीर्षे त्तावदुभयतोऽपच्छिद्य शङ्कू निखाय पार्श्वमानीं कृत्वा पार्श्वमानी सम्मितामक्ष्णयां तत्रोपसंहरति समासेंऽपच्छेदः सा करण्येष निर्ह्रासः ।। 3/1 ।।

चतुरस्रात् = बृहत्प्रमाणकात्समचतुरस्रात् चतुरस्रं = ह्रस्वप्रमाणकं समचतुरस्रं निर्जिहीर्षन् = निर्हर्तुमिच्छन् पृथक्कर्तुमिच्छन् यावत् = यत्प्रमाणकं समचतुरस्रं निर्जिहीर्षेत् = पृथक्कर्तुमिच्छेत्, तावत् = तावन्तीं प्रमाणां करणीं उभयतः महतः समचतुरस्रस्य श्रोणित आरभ्य अपच्छिद्य = अंकयित्वा चिन्हद्वये शंकूनिखाय शंकूद्वयाभ्यन्तरप्रसारितां महच्चतुरस्रस्य करणीभूतां तिर्यङ्मानीं रज्जुंपार्श्वमानीत्वेन परिकल्प्य पार्श्वमानीसम्मितां तामेव रज्जुं अक्ष्णयां = कर्णसूत्रं तत्राधस्तात्तिर्यङ् मान्यां उपसंहरति = प्रसारयति, समासे = क्षेत्रद्वयस्यैक्ये कृते सति योऽपच्छेदः = त्रिकोणाद् बहिर्भूतः तिर्यङ्मानीत्वेनावस्थितः, सा रज्जुः करणी ह्रस्वसमचतुरस्रक्षेत्रस्य । एवमेष उक्तः प्रकारः महतः क्षेत्रात् ह्रस्व-क्षेत्रस्य निर्ह्रासः = पृथक्करोणापायः ।

अयमाशयः- महतः समचतुरस्रात् ह्रस्वचतुरस्रं पृथक्कर्तुमिच्छन् यत् प्रमाणंक समचतुरस्रं पृथक्कर्तुमिष्टं स्यात् तत् प्रमाणांरज्जुंगृहीत्वाऽ भीष्टमहच्चतुरस्रस्य श्रोणित आरभ्य पार्श्वमान्योंरंकयेत् पार्श्वमान्यो र्यत्र चिन्हं निपतेत् तत्र शङ्कु निहन्यात् ।

शङ्कुमूलात् शङ्कुमूलपर्यन्तं रज्जुंप्रसारयेत् । सा रज्जुः अभीष्ट बृहत्समचतुरस्रस्य करणीरूपैवस्यात् । ततस्तस्याः रज्जोः पाशमेकमेकतरशंकौ निक्षिप्य तां रज्जुं तिर्यङ् मान्यामधः कर्णसूत्रत्वेन प्रसारयेत् । यत्र निपतति तत्र चिन्हं कुर्यात् । एतेन त्र्यस्रिक्षेत्रं स्यात् । तिर्यङ्मान्याः त्रिकोणाद् वहिर्भूतो यो भागः स त्याज्यः, शेषभागमितया रज्ज्वा कृतं चतुरस्रमुत्सृष्ट लधुचतुरस्र क्षेत्रफलकं स्यात् । अयमर्थः- ह्रस्वचतुरस्रस्य यत् क्षेत्रफलं तेन रहितं क्षेत्रफलकं स्यादिति ।

यथा--पंचविंशतिक्षेत्रफलकात् पंचहस्तान्नवहस्तक्षेत्रफलकं त्रिहस्तचतुरस्रं पृथक्कर्तुं विद्यते । तदा पंचहस्तकरण्या समचतुरस्रं निर्माय तस्य दक्षिणोत्तर श्रोण्योः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रिहस्तं मित्वा पार्श्वमान्योः चिन्हस्थानयोः शंकुद्वयं निहन्यात् । एकतरशंकुमूलाच्छकुंमूलपर्यन्तं रज्जुमेकां प्रसारयेत् । तामेव रज्जुंशंङ्कुमूलतोऽधस्तात्तिर्यङ्मान्यां कर्णरूपेणप्रसारयेत्। यत्रस्पृशेत्तत्र लक्ष्मकुर्यात्। एतेन त्रिहस्त तिर्यङ्मानीकं चतुर्हस्तपार्श्वमानीकं पंचहस्ताक्ष्णयाकं च त्र्यस्रिक्षेत्रमुत्पद्यते । तस्य त्र्यस्रिक्षेत्रस्य पार्श्वमानीतो योऽधिकोभागस्त्र्यस्रिक्षेत्राद् वहिर्भूतो विद्यते स त्याज्यः । चतुर्हस्तमितया करण्या समचतुरस्रं कृते सति नवहस्तक्षेत्रफलकं चतुरस्रं पृथग् भवति । यतो हि पंचविशंतितो नवानामपहृते सति षोडशैवावशिष्यते । अतश्चतुर्हस्तमितयाकरण्या चतुरस्रं कृते हस्तत्रयत्मकं समचतुरस्रं पृथग्भवति ।

अस्योपपत्तिः

"क-ख-ग-घ" बृहच्चतुरस्रात्[1] "प-फ-ब-भ" हृस्व [2]चतुरस्रं पृथक्कर्तुमिष्टं

3/1



चित्र-1



चित्र-2



चित्र-3

---

1. प्रथमचित्रं द्रष्टव्यम् ।
2. द्वितीयचित्रं द्रष्टव्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विद्यते । तदर्थं ह्रस्व चतुरस्रस्य "भ-प' ' तथा "ब-फ" पार्श्वमान्योः मानानु "क-ख-ग-घ" वृहच्चतुरस्रस्य क्रमेण "क-ख" तथा -"घ-ग" पार्श्वमान्योः "क" तथा "ख " कोणात् मित्वा यत्रचिन्हं स्यात्तत्र "च" तथा "छ "शंकुं" निहन्यात् । ततः "च- छ" शक्वन्तोररालपरिमितायाः रज्ज्वाः पाशमेकं "च" शङ् कौ निक्षिप्य अधस्तिर्यङ् मान्यां "क-घ" रज्ज्वां प्रसारयेत् । यत्र स्पर्शःस्यात्तत्र "ज" शंकुं निहन्यात् । इदानीं "च-क ज" त्र्यस्त्रिक्षेत्रं जातम् । तस्य "च-क" भुजस्तिङ् मानीत्वेन कल्पनीयः, "क-ज" भुजः पार्श्वमानीत्वेन कल्पनीयः । "च-ज' ' कर्णरज्जुः एतस्मात् त्र्यसिक्षेत्राद् वहिर्भूतो यः "ज-घ " भागः स त्याज्यः । "क-ज" करण्या समचतुरस्त्रं कृते सति "क- ख- "ग-घ" वृहत्समचतुरस्रात्, "प-फ-ब-भ" ह्रस्व चतुरस्त्रं भृथग्भवतीति । अत्र "क-य-र-ज" चतुरस्त्रं[1] ह्रस्वचतुरस्रक्षेत्रफलेन रहितमस्ति अर्थात् "क-ख-ग-घ" क्षेत्रफलात् "प-फ-ब-भ" क्षेत्रफलमपहृते सति "क-य-र-ज"- क्षेत्रफलमवशिष्यते । इदं निष्पन्नं-क ख ग घ-प फ व भ = क य र ज इति ।। 1 ।।

दीर्घचतुरस्रस्य समचुरस्त्रीकरणोपायमाह-

दीर्घचतुरस्त्रं समचतुरस्त्रं चिकीर्षन्मध्ये तिर्यगपच्छिद्यान्यतरद्विभज्ये तरत्पुरंस्ताद्दक्षिणतश्चोपदध्याच्छेषमागन्तुना पूरयेत्तस्योक्तो निर्ह्रासः ।। 3/2 ।।

दीर्घचतुरस्त्रं = आयामार्द्धविस्तारं समचतुरस्त्रं, तुल्याऽऽयामविस्तार चतुरस्त्रं चिकीर्षन् कर्तुमिच्छन् मध्ये विस्तारद्विगुणाऽऽयामचतुरस्रस्य सदृशांसे तिर्यग् तिर्यङ् मान्यौ विभज्य, अन्यतरत् = विभक्त योर्भागयोः कमप्येकं भागं विहायापरं भागं विभज्य = तुल्यांशेनभागं कृत्वा इतरत् अन्यं भागं पुरस्तात् प्राच्यांदिशि उपदध्यात् स्थापयेत् । च कारेणान्यं भागं दक्षिणं दक्षिणस्यां[2] दिशि स्थापयेत् समचतुरस्रसाधनार्थं शेषं शोषभूतं यत्स्वल्पचतुरस्त्रं स्थानं शिष्यते तत् आगन्तुना = अध्याहृतेन भागेन पूरयेत् न्यूनांशं सम्भरेत् । ननु एवं सति समचतुरस्रमधिकं जातम् । आगन्तुभागस्याध्याहृतत्वात् । अत आह-तस्योक्तनिह्रास इति । तस्य आगन्तुभागस्य निर्ह्रासः निःसारणोपायः उक्तः कथितः पूर्वसूत्रे चतुरस्राच्चतुरस्त्रं[3] निर्जिहीर्षन्नित्यादि ।

अयमर्थः- दीर्घचतुरस्त्रं समचतुरस्त्रं करिष्यन् - दीर्घचतुरस्रस्य

---

1. तृतीयं चित्रं द्रष्टव्यम् ।
2. ननु दक्षिणस्यां प्राच्यामिति दिशांग्रहणं किमर्थमितिचेच्छृणु - विपरीत दिक्षुस्थापननिग्रहाय दिग्ग्रहणमिति । अन्यथा हि--कश्चित् प्राच्यां खण्डमेकंसंस्थाप्य प्रतीच्यां खण्डमेकं स्थापयिष्यति । तेन " एकमनुसन्धित्सतोऽ परं प्रच्यवत" इति न्याय एवात्र चरितार्थो भविष्यति । अतो यत्र खलु प्रथम शकलं स्थापयेत् तद्दक्षिणस्यामुत्तरस्यां वां द्वितीयं शकलं स्थापयेन्न तु विपरीत दिशीति दिक् ।
3. का.शु.सू 3/1

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दक्षिणोत्तरगामिन्योः तिर्यङ् मान्योर्मध्ये चिन्हं कृत्वा तच्चिन्हयोरन्तराले रज्जुमेकां प्राग् प्रत्यगायतां प्रसारेत् तेन समचतुरस्रद्वयं जातम्। ततस्तयोरेकस्य पूर्ववत् सदृशच्छेदं कृत्वा भागमेकं पुस्तात् समचतुरस्रेण सह संलग्नं कृत्वा स्थापयेत्। अपरोभागः समचतुरस्रेण सहैव संलग्नमस्ति। ततः समचतुरस्रकरणार्थं रज्ज्वां प्रसारितायां सत्यां समचतुरस्रस्याष्टमांशरूपोभागः तस्मिन् अध्याहृतोभवति। तस्य च लघुचतुरस्रस्य निर्ह्रासोपायः पूर्वसूत्रेणनिगदितः। यथा-द्वादशाङ्गुलं दक्षिणोत्तरायतं षड्ङ गुलं च प्राग् प्रत्याग् विस्तृतं दीर्घचतुरस्रं विद्यते तस्य सदृशांशे च्छेदे कृतेसति षडांगुलात्मकं समचतुरस्रद्वयं स्यात्। ततस्ततयो रेकस्य सदृशांशे छेदकृतेसति त्रिहस्तं तिर्यगायतं षड्ढस्तं प्राग् प्रत्यगायतं दीर्घचतुरस्रद्वयं स्यात्। तयोरेकं दीर्घचतुरस्रं पुरस्तात् स्थापयेत्, अपरं तु संलग्नमेवास्ति। ततोन्यूनभाग मागन्तुना प्रपूर्य समचतुरस्रं सम्पादयेत् पूर्वसूत्रोक्त प्रकारेण तस्य निर्ह्रासः कुर्यादिति।

अस्योपपत्तिः-

"क-ख-ग-घ" दीर्घचतुरस्रं समचतुरस्रं कर्तुं विद्यते। तदर्थं "क-ख" तथा "घ-ग" तिर्यङ् मान्योः मध्ये "ङ-च" रेखां लिखेत्। तेन "क-ङ-च-घ" तथा "ङ-ख-ग-च" इति समचतुरस्रद्वयमुत्पद्यते। तत्र "ङ- ख-" "ग-च" समचतुरस्रस्य "ङ-ख" तथा "ग-च" तिर्यङ् मान्योर्मध्ये -"छ-ज" रेखां लिखेत् तेन तस्मिन् "ङ-ख-ग-च" समचतुरसे "छ- ख-ग-ज" तथा "ङ-छ-ज-च" इति दीर्घ चतुरस्रद्वयं स्यात्। "छ- ख- ग-ज" दीर्घचतुरस्रं "क-ङ-च-घ" समचतुरस्रस्य प्राच्यां स्थापयेत् तेन झ-ञ-ङ-क रूपेण छ-ख-ग-ज दीर्घ चतुरस्रं "क-ङ-च-घ" चमचतुरस्रस्य प्राच्यां व्यवस्थितं भवति। इदानीं "छ-ख-ग- ज" दीर्घचतुरस्रेणसमं -"झ-ञ-ङ-क" दीर्घचतुरस्रंजातम्। "क-ङ- च- घ" समचतुरस्रस्य दक्षिणस्यां "ङ-छ-ज-च" दीर्घचतुरस्रमस्त्येव। ततः समचतुरस्रनिर्माणार्थं रिक्त स्थानं-"ञ-ट" तथा "छ-ट" रेखाभ्यां पूरयेत्। तयोः संयोगः "ट विन्दौ भवति। तेन-"ञ-ट-छ-ङ" लघु समचतुरस्रंजातम्। यत् "क-ख-ग-घ" दीर्घचतुरस्रक्षेत्रफलेनसमं सम्पत्स्यामानस्य समचतुरस्रस्यक्षेत्रफलादधिकं विद्यते। अतस्तस्य निर्ह्रासः कर्तव्यः।

तदित्थम् --इदानीं "झ-ट-ज-घ" वृहच्चतुरस्रं विद्यते। तस्मात् "ञ-ट-छ-ङ" लघुसमचतुरस्रं पृथक्कर्तुमिष्टं विद्यते। "झ-ट" परिमितां रज्जुं "झ" कोणात् "क-छ" तिर्यङ् मान्यामधः प्रसारयेत्। यत्र स्पर्शःस्यात्तत्र "ड" शंकु निहन्यात्। अत्र इदानीं "क-ड-रज्जुः अभीष्ट समचतुरस्रस्य क्षेत्रफलेन तुल्यं नूनं स्यात्। अत्र "क-ख-ग-घ" दीर्घ चतुरस्रस्य क्षेत्रफलेन समं "क-ड" करण्या निर्मितं "ड-ढ-ण-त" समचतुरस्रस्य क्षेत्रफलं विद्यते। एतदेवाभीष्ट समचतुरस्रमिति ॥ 2॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



3/2



चित्र-2

अतिदीर्घस्य समचतुरस्रीकरणम्

विस्तारद्विगुणाऽऽयामदीर्घचतुरस्रस्य समचतुरस्रीकरणमुक्त्वेदानीं विस्तारद्विगुणाधिकाऽऽयामदीर्घचतुरस्रस्य समचतुरस्रसाधनोपायमाह--

अतिदीर्घञ्चे त्तिर्यङ् मान्याऽपच्छिद्याऽपच्छिद्यैक समासेन समस्य शेषं यथा योगमुपसंहरे दित्येक समासः ।। 3/3 ।।

अतिदीर्घं = विस्तारद्विगुणतोऽधिकाऽऽयामं दीर्घचतुरस्रं चेत्तदा तिर्यङ् मान्या दक्षिणोत्तरगामिन्या रज्ज्वा पार्श्वमानीसूत्रमपच्छिद्य = विभज्य, अपछिद्य-भूयोविभज्य एक समासेन = नानाप्रमाणसमास इति सूत्रोक्तिविधिना समस्य एकीकृत्य शेषं = अवशिष्टभागं, यथा योगं= यथा येन प्रकारेण युज्यते स्वाभिमतक्षेत्रे घटते तेन प्रकारेण योगं कुर्यात् उपसंहरेदेकी कुर्यादिति । एक समासः= विभिन्न प्रमाणानां चमचतुरस्राणामेकीकरणोपायः ।

अयमाशयः-विस्तारद्विगुणाऽऽयामादपि अतिदीर्घचतुरस्रं चेत्तर्हि यावत् प्रमाणा तिर्यङ्मानी तावत् परिमितयारज्ज्वा पार्श्वमानीमपच्छिन्द्यात्/ यदा तिर्यङ् मानी प्रमाणतो न्यूनं भागमवशिष्येत्तदा पूर्वसूत्रप्रकारेण समचतुरस्रं/ कुर्यात्, ततो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नाना प्रमाणेति सूत्रदिशा उपसंहरे दिति बहूनां समचतुरस्त्राणां मेकीकरणोपायः ।

यथा--सप्तहस्तपूर्वापराऽऽयतं, हस्तद्वयं दक्षिणोत्तर विस्तृतं अतिदीर्घचतुरस्त्रं समचतुरस्त्रं कर्तुं विद्यते । अतस्तस्य तिर्यङ्मानी भूतया द्विकरण्या सप्तहस्तदीर्घां पार्श्वमानी -द्वंयं च्छिन्द्यात्, तेनोभयत्र पार्श्वमान्यां त्रीणिचिन्हानि भवन्ति । हस्तमेकं चा वशिष्यते । ततः सम्मुखस्य चिन्हयोरन्तराल रज्जुप्रसारेणन संयोजयेत् । एतेन सर्वतो हस्तद्वयविस्तृतं समचतुरस्त्रस्य द्विहस्ताऽऽयाम हस्तमेकं विस्तृतं दीर्घचतुरस्त्रं च निष्पद्यते । अवशिष्टस्य दीर्घचतुरस्त्रस्य पूर्वोक्त प्रकरेण समचतुरस्त्रं कृत्वा ततो नानाप्रमाण युक्त्या समस्येदित्यर्थः ।

अस्योपपत्तिः-

अत्र प्रथमचित्रे "क-ख-ग-घ" दीर्घचतुरस्त्रं विद्यते । तस्य "क- ख" तथा

3/3 चित्र-2

चित्र-1





चित्र-3



CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

"ग-घ" पार्श्वमान्यौ "क-घ" तियङ्मान्या संच्छिन्ने "क- ख" पार्श्वमान्यां "च-ज-उ" इति त्रीणि चिन्हानि, "ग-घ" पार्श्वमान्यां च -"छ-झ-ट" इति त्रीणि चिन्हानि सम्पद्यन्ते । अथ तत्तच्छकुंमूलेभ्यः सम्मुखस्थ शंकुमूलपर्यन्तं रज्ज्वा प्रसारितायां सत्यां "क-च-छ-घ" "च-ज-आ-छ", "ज-उ-ट-आ" इति त्रीणिसमचतुरस्राणि, "उ-ख-ग-ट" इति दीर्घचतुरस्रमेकं सम्पद्यते । इमान्येकत्र सम्पादयितुं द्वितीयचित्रे "क-घ" तिर्यङ्मानीं कोटित्वेन प्रसारयेत्, "क-छ" अक्षणया च भुजत्वेन प्रसारयेत् । समचतुरस्रस्याक्षणयारज्जुर्द्विकरणी, पदं तिर्यङ्मानी त्रिपदापार्श्वमानीति च न्यायमङ्गीकृतत्वात् अनयोः "छ-घ " अक्षणयारज्ज्वा यच्चतुरस्रं स्यात्त त्रीणीसमचतुरस्राणि संक्षेप्स्यन्ति । ततः "उ-ख-ग-ट" दीर्घचतुरस्रं समंविभजेत्तेन "उ-ख-ड-ठ", "ठ-ड-ग-ट" इति समचतुरस्रद्वयं जायते । तयोरेकस्य "ठ- ग" अक्षणयारज्जुं"घ-छ" अक्षणयारज्ज्वाकृतस्य "घ- छ- त- थ" समचतुरस्रस्य "घ-थ" तिर्यङ्मान्याः "घ" कोणात् प्रसारयेत् यत्र पतेत्तत्र "द" चिह्नं कुर्यात् । "छ" कोणात् "द " शङ्कु पर्यन्तं प्रसारयेत् । "छ-द" अक्षणया रज्ज्वा तृतीयचित्रे "प-फ-ब-भ" समचतुरस्रं कुर्यात् । अस्य -"प-फ-ब-भ" समचतुरस्रस्यक्षेत्रफलं "क- ख- ग- घ" दीर्घ चतुरस्रस्यक्षेत्रफलेन तुल्यं स्यात् । अस्यसूत्रस्योपपत्तिविषये विस्तृतज्ञानार्थं षष्ठकण्डिकायाः द्वितीयतृतीय सूत्रान्तर्गता उपपत्तयो द्रष्टव्याः । तदर्थं[1] प्रवृत्तं सूत्रमिदम् ।। 3 ।।

इदानीं समविषमचतुरस्रयोः दीर्घचतुरस्रीकरणविधिमाह

समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन्मध्येऽक्षणयाऽपच्छिद्य विभज्येतरत् पुरस्तादुत्तरतश्चोपदध्याद्, विषमं चेद् यथा-योगमुपसंहरेदिति व्यासः ।।3/4।।

समचतुरस्रं = समाः अस्रयः कोणाः यस्यतत् समचतुरस्रं तद्दीर्घचतुरस्रं विस्तारद्विगुणं चिकीर्षन् कर्तुमिच्छन् मध्ये कोणादारभ्यकोणपर्यन्तं अक्षणयारज्ज्वाऽपच्छिद्य विभज्य = विभक्तयोर्द्वयोर्भागयोर्मध्ये कमप्येकं भागं पुनः समं सम्भुज्य इतरत= इतरस्यभागस्य पुरस्तात् = प्राच्यां दिशि भागमेकं निदध्यायात् उत्तरस्यां च दिशि भागमेकं निदध्यादिति समचतुरस्रस्य दीर्घचतुरस्रकरणोपायः ।

अयमाशयः- समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन् प्रथमन्तावत् समचतुरस्रमक्षणया रज्ज्वा विभजेत् तेन समद्विवाहुकं त्र्यसिक्षेत्रद्वयमुत्पद्यते । ततस्तयोरेकं पुनः तथा विभजेत् यथा कर्णरज्ज्वाश्च सदृशच्छेदः स्यात् । तेन ह्रस्वप्रमाणकं त्र्यसिक्षेत्रद्वयं भूय उत्पद्यते । अथ तयोरेकं ह्रस्वप्रमाणकं त्र्यस्रिक्षेत्रं वृहत् प्रमाणकस्य त्र्यसिक्षेत्रस्यपुरस्तात् निदध्यादपरं च उत्तरस्यां निदध्यात् । तेन समचतुरस्रक्षेत्रफलकं दीर्घचतुरस्रमेकं जायते । अयं समचतुरस्रस्य दीर्घचतुरस्रीकरणोपायः।[2]

---

1. तदर्थनांम-अतिदीर्घचतुरस्रस्य समचतुरस्रसम्पादनार्थम् ।
2. चतुरश्रं समं द्वैधं कृत्वा भागान्तरोपरि ।
क्षिप्ते भागान्तरे दीर्घचतुरस्रं तु तद्भवेत् ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

समचतुरस्त्रं दीर्घचितुरस्त्रं चिकीर्षन् प्रथमन्तावत् समचतुरस्त्रमक्ष्णया रज्ज्वा विभजेत्, तेन समद्विवाहुकं त्र्यस्त्रिक्षेत्रद्वय मुत्पद्यते । ततस्तयोरेकं पुनस्तथा विभजेद् यथा कोणस्य कर्णरज्ज्वाश्च सदृशच्छेदः स्यात् । तेन ह्रस्व प्रमाणकं त्र्यस्त्रिक्षेत्रद्वयं भूय उत्पद्यते । अथ तयोरेकं ह्रस्वप्रमाणकं त्र्यस्त्रिक्षेत्रं बृहत् प्रमाणकस्य त्र्यस्त्रिक्षेत्रस्य पुरस्तान् निदध्या दपरञ्च उत्तरस्यां निदध्यात् । तेन समचतुरस्त्र क्षेत्रफलकं दीर्घचतुरस्त्रमेकं जायते । अयं समचतुरस्त्रस्य दीर्घचतुरस्त्रकरणोपायः ।

अस्योपपत्तिः-

"क-ख-ग-घ" समचतुरस्त्रं दीर्घचतुरस्त्रकर्तु विद्यते । अतः "ख- घ"- कर्णरज्ज्वा तस्यापच्छेदः कार्यः । तेन "क -ख-घ", "घ- ख- ग"



3/4

त्र्यस्त्रिक्षेत्रेद्वयमुत्पद्यते । तयोः "क- ख- ग"- त्र्यसिक्षेत्रं "ग-ङ" रज्ज्वा सदृशं च्छिन्द्यात् । एतेन "घ-ङ -ग, ग-ङ-ख" इति लघुत्र्यस्त्रिक्षेत्रद्वयमुत्पद्यते । तयोः "घ- ङ- ग" त्र्यसिक्षेत्रं उत्तरस्यां "घ-छ-क" रूपेण न्यसेत् । ग-ङ-ख त्र्यसि क्षेत्रं च पूर्यस्यां क-च-ख रूपेण स्थापयेत् । एतेन "घ- छ -च-ख" दीर्घचतुरस्त्रंजायते । अस्यक्षेत्रफलं "क-ख- ग-घ" समचतुरस्त्रस्यक्षेत्रफलेन समं विद्यते ।

ननु विषमचतुरस्त्रस्य दीर्घचतुरस्त्रं कथंस्यादित्याकाङ् क्षायामाह--

---

करिष्यमाणदीर्घस्य विस्तारसमपार्श्वकम् ।।
विभज्य शेषमधिकं यथायोगं हि तत्क्रिया ।।
तावती पार्श्वमान्याश्च शेषस्याञ्जस्यभागतः ।
करिष्यमाणदीर्घस्य तिर्यग्यावच्चिकीर्षितम् ।।
(आपस्तु. शु. कपर्दिस्वामि व्याख्या) पृ. 49.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विषमंचेद्यथायोगामुपसंहरे दिति'

विषमं विगतसमं चतुरस्रं चेत्स्यात्तर्हि-यथा योगमुपसंहरेत् । युज्यत इति योगः। यथा येनप्रकारेण युज्यते विषमचतुरस्रस्य योगाविभगादिकरणेन दीर्घचतुरस्रत्वेन घटते तेनैवप्रकारेणोपसंहरेत् एकीकुर्यादिति । व्यासः व्यसनं व्यासः व्यासो नाम विभागकरणम् ।

अयमाशयः--विषमचतुरस्रस्य दीर्घचतुरस्रकरणार्थ यया कयापि रीत्या तस्य विभागः कार्यः । ततस्तान् एकीकृत्यदीर्घचतुरस्रं सम्पादयेदिति क्षेत्राणां समासो नाम एकीकरणमुक्त्वेदानीं व्यासः विभागकरणमाचार्येणोक्तम् ।

अस्योपपत्तिः-

अत्र- "क-ख-ग-घ" विषमचतुरस्रं दीर्घचतुरस्रं कर्तुं विद्यते । अत्र "ख-ग" तिर्यङ्मान्याः द्विगुणविस्तारं "क-घ" तिर्यङ्मानी विद्यते । एवम्भूतस्य विषमचतुरस्रस्य दीर्घचतुरस्रीकरणार्थं "ख-ग" तिर्यङ्मान्याः प्रान्तयोःअधस्थात् "क-घ" तिर्यङ्मान्यां "ख-ङ" तथा "ग-च" लम्बः पातनीयः । तेन "ख-ग-च-ङ"



चित्र-1

समचतुरस्रस्योभयतः "क-ङ-ख", तथा "घ-च-ग" त्रिकोणद्वयमुत्पद्यते । अथ "क-ङ-ख" त्रिकोणं गृहीत्वा "घ-च-ग" त्रिकोणस्य पुरस्तात्त थास्थापयेद् यथाऽसौ "ग-छ-घ" रूपेण तिष्ठेत् । इत्येनेन प्रकारेण ख-छ-घ-ङ दीर्घ चतुरस्रं क-ख-ग-घ विषंमचतुरस्रस्य क्षेत्रफलेन तुल्यं भविष्यति ।

अथ प्रकारान्तरमपि प्रर्दशते -

"क - ख - ग - घ" विषमचतुरस्रं दीर्घचतुरस्रसम्पादयितुं "ख" कोणादधस्तात् क-घ" तिर्यङ्मान्यां "ख-ङ" लम्बः पातनीयः । एतेन "ङ- ख-ग-घ" समचतुरस्रं क ङ-ख त्र्यस्रिक्षेत्रमेकं चोत्पद्यते ।



चित्र-2

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्य कर्णं समं विभजेत् । तथैव "क-ङ" तिर्यङ् मानीमपि सदृशं छिन्द्यात् । तत्र चिन्हयोः क्रमेण "ज-च" शंकूनिखाय रज्जुप्रसारेण तदन्तरालं योजयेत् । ततः "च-ज-ख-उ." विषमचतुरस्यपुरस्तात् "च-क-ज" त्र्यसिक्षेत्रं तथा स्थापयेत् तथाऽसौ "ज-छ-ख" रूपेण निष्पद्यते । एतेन "च-छ-ग-घ" दीर्घचतुरस्रं मेकं निष्पन्नं भवति, यस्मिन् "च-छ-ख-ङ," "ङ-ख-ग-घ" इति समचतुर स्रद्वयमनन्तर्भूतं विद्यते । विस्तार द्विगुणऽऽ यामं दीर्घचतुरस्रमिति लक्षणमभीष्टं विद्यते । तदनु "च-छ- ग- घ" दीर्घ चतुरस्रंनिष्पन्नमेव । अस्यक्षेत्रफलं "क-ख- ग- घ" विषमचतुरस्रस्यक्षेत्रफलेन तुल्यं विद्यते ।

अत्रैके[1] एवं व्याकुर्वन्ति यत् विषमचतुरस्रस्य दीर्घचतुरस्रसम्पादनार्थं समचतुरस्रं निर्माय ततो दीर्घचतुरस्रं कर्तव्यमिति । परन्तु सर्वत्र नैषा प्राणाली युक्ता गौरवातिशयात् । पूर्वं प्रदर्शित उपपत्तिद्वये समचतुरस्रसम्पादनात्पूर्व-मेवाभीष्टदीर्घचतुरस्रं सम्पद्यते । यदि तदेवदीर्घचतुरस्रं निर्ह्रासाध्याहाराभ्यां समचतुरस्रं क्रियते ततो भूयो विभज्य दीर्घचतुरस्रं क्रियते तदा गौरवं सम्पद्यते । न ही कश्चिन् मध्वर्थं पर्वतं व्रजेत्तस्यलाभश्चेद् गृहेस्यात् । अतः पूर्वोपपत्तिद्वये समचतुरस्रं कृत्वा ततो दीर्घचतुरस्र सम्पादनमावश्यकम् । अभीष्टदीर्घचतुरस्रस्य पूर्वमेव निष्पन्नत्वात् । एवमन्यत्राप्यूह्यम् ।

यत्र खलु विषमचतुरस्रस्य समचतुरस्रसाधनमन्तरा स्वरूपसिद्धि र्न जायते तत्रैव विषमस्य समत्वं ततो दीर्घचतुरस्रं कर्तव्यमिति ।

यथा- "अ -आ उ-ए", विषमचतुरस्रस्य दीर्घचतुरस्रीकरणं विद्यते । अतः पूर्वन्तावत् "आ" कोणात् "अ-ए" तिर्यङ् मान्यां "आ- ह" लम्बः पातनीय :। "ए-उ" पार्श्वमानी यावत्प्रमाणा विद्यते तावत्परिमितया रज्ज्वा 'ह' शंकोः



चित्र-3

---

1. विषमचतुर्भुजस्य दीर्घचतुरस्रं कर्तुमिच्छन् यथा योगं यथा सम्भवमुपसंहरेत् कुर्यादित्यर्थः । अर्थात्- विषमचतुरस्रस्य समचतुरस्रत्वं विधाय ततः पूर्वोक्ति विधिना दीर्घचतुरस्रत्वं कुर्यादित्येवमुपसंहारः (व्यासः समासः) (का.शु.सू.पृ. 26)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सकाशात् "ह-आ" लम्बोपरिप्रसारयेत्, यत्र स्पृशेत्तत्र चिन्हं "च" कुर्यात्। "च" शंकोः "उ" शंकुपर्यन्तं रज्जुप्रसारणेन तदन्तरालं योजयेत्। एतेन "ह-च- उ-ए" अतिदीर्घचतुरस्रमेकं जायते। अतस्तस्य "उ- ए" पार्श्वमान्या "ह-ए", "च-उ" चेति तिर्यङ् मानीद्वयं छिन्द्यात् तेन "च-उ" तिर्यङ् मान्यां "ट-ड", "ह-ए", तिर्यङ्मान्यां "ठ-ढ"- चिन्हं क्रमेण भवति। "ड- ढ- ट- ठ" चिन्हयोर न्तरालं रज्जुप्रसारणेन योजयेत्। ततः "ह-च-ट-ठ","ढ-ट-ड-ढ", "ढ-ड-उ-ए" चेति समचतुरस्र त्रयं जायते। अतः परं "च-आ-उ, ह-अ-आ" चेति त्र्यास्रक्षेत्रद्वयमवशिष्यते। अनयोरपि योगो नाम युक्तिस्तया समचतुरस्रं साधनीयम्।

अतः "च-उ" तिर्यङ् मान्याः "आ-उ" कर्णस्य च सदृशच्छेदः कार्यः। तत्र क्रमेण "क-ख" शंकू निखाय रज्जु प्रसारणेन योजयेत्। एतेन "च-आ-उ" त्र्यस्रिक्षेत्रे एकं "च-आ-ख-क" विषमचतुरस्रं, "क-ख-उ" त्र्यस्रिक्षेत्र ञ्चेति क्षेत्रद्वयं निष्पन्नम्। ततः "क-ख-उ" त्र्यस्रिक्षेत्रं, "च-आ-ख-क" विषमचतुरस्रस्य पुरस्तात् तथा स्थापयेत् येन तत् "ख-आ-ग" रूपेण निष्पद्येत। इदानीं "च-आ-ग-क" एकं दीर्घचतुरस्रं जातम्। अथ "ह-अ-आ" त्र्यस्रिक्षेत्रस्य "अ-आ" कर्णरज्जुंसमं विभज्य तत्र लक्षणे "ऐ" शंकुं निहन्यात्। "ऐ" शंकोः "च" शंकुपर्यन्तं रज्जुं प्रसारयेत्। "ऐ" कोणात् "अ-ह" तिर्यङ् मान्यां "ऐ-ओ" लम्बं प्रसारयेत्। एवं "ऐ" शंकोः "ह" शंकुपर्यन्तं रज्जुंप्रसारयेत्। इयं "ह-ओ-ऐ- च" दीर्घचतुरस्रस्याक्षणया रूपेणांकिता भवति। ततः "ओ-अ- ऐ" त्र्यस्रिक्षेत्रं "च-ऐ-आ" त्र्यस्रिक्षेत्रस्य उत्तरस्यां तथा स्शापयेत् येन तत् "ऐ-घ-आ" रूपेण निष्पन्नं स्यात्। इदानीं "ह-ओ-घ-आ" अतिदीर्घचतुरस्रं विद्यते। यस्य सदृशांशच्छेदिका "ऐ-च" रज्जु र्विद्यते "ऐ-च-ह-ओ" दीर्घचतुरस्रंसमं च्छिन्द्यात्तेन "ह-ओ-ज-छ", "ज-ऐ-च-छ", इति समचतुरस्रद्वयं जायते। "ऐ-घ-ग-क," दीर्घचतुरस्रस्य "क-ग"- पार्श्वमान्या तस्य तिर्यङ्मान्यौ च्छिन्द्यात्तत्र चिन्हयोः "झ-ञ" शंकू निहन्यात् रज्ज्वायोजयेच्च। अधुना "ऐ-घ-झ-ञ", "ञ-झ-ग-क", "ह- च-ट-ठ, "ठ-ट-ड-ढ", "ढ-ड-उ-ए" चेति पंचबृहदाकाराणि समचतुरस्राणि "ह-ओ-ज-छ, "ज-ऐ-च-छ" चेति लघु समचतुरस्रद्वयं उभयं मिलित्वा सप्तसमचतुरस्राणि "अ-आ-उ-ए" विषम चतुरस्रे सम्पद्यन्ते। ततः सर्वाण्येकस्मिन् समचतुरस्रे सम्पादनीयानि।

तद्यथा-

समचतुरस्रस्याक्षणयारज्जुर्द्विकरणीति न्यायमंगीकृत्य "ढ- ड-उ-ए" समचतुरस्रस्य "ड" कोणात् "ए" कोणपर्यन्तं कर्णरज्जुं प्रसारयेत्। तामेव चतुर्थचित्रे "ए-ड" तिर्यङ्मानीत्वेन प्रसार्य तदुपरि तस्य एकप्रान्ते तत् परिमितां रज्जुं "ए- ण" पार्श्वमानीत्वेन प्रसारयेत् तयोः "ड-ण" अक्षणया निर्मिते "ड-ण-त-थ" समचतुरस्रे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



चित्र-4



चित्र-5



चित्र-6

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चत्वारि समचतुरस्राणि संक्षेप्स्यन्ति । ततोऽवशिष्टस्यैकस्य संक्षेपार्थं तृतीय चित्रस्य "ड-ट" करणीं चतुर्थ चित्रस्थ "ड" शंकोः सकाशात् "ड-थ" तिर्यङ्मान्यां प्रसारयेत् । यत्र स्पर्शः स्यात्तत्र "द" शंकुं निखाय ' 'ण" कोणात् "द" शंकु पर्यन्त कर्णरज्जुंप्रसारयेत् सैव पंच समचतुरस्राण्येकत्रसंक्षेप्स्यति ।

अवशिष्टलघुसमचतुरस्रद्वयस्य संक्षेपो यथा-पंचमं चित्रं द्रष्टव्यम् "ओ-ज-छ-ह" समचतुरस्रस्य[1] ज" कोणात् "ह' ' कोणपर्यन्तं "ज-ह" कर्णरज्जुंप्रसार्य तां पंचमचित्रे -"ज-ह" तिर्यङ्मानीत्वेन प्रसारयेत् । तस्याः "ज" शंकोः सकाशात् चतुर्थचित्रस्थ "ण-द" अक्ष्णया रज्जुं"ज-घ" पार्श्वमानीत्वेन प्रसारयेत् । तयोः "ह-घ" अक्ष्णया रज्ज्वा यत् "ह-घ-न-प " समचतुरस्रं सम्पद्यते तत् "अ-आ-उ-ए" विषमचतुरस्रस्य क्षेत्रफलेन तुल्यं विद्यते । "ह-घ-न-"प" समचतुरस्रस्य दीर्घचतुरस्रीकरणार्थं तत्परिमितमेव चतुरस्रं षष्ठ चित्रे ' 'ह -प-फ-ब" रूपेण कुर्यात् । पूर्वोक्त विधिना विहरणे कृते सति "ह-फ-य-र" दीर्घचतुरस्रं निष्पद्यते। यस्य क्षेत्रफलं "अ-आ- उ-ए" विषमचतुरस्रस्य क्षेत्रफलेन तुल्यं विद्यते । अथोदाहरणान्तरं प्रस्तूयते-



चित्र-7



चित्र-8

1. तृतीय चित्रस्थ ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अत्र -"क-ख-ग-घ" विषमदीर्घचतुरस्रं तस्य "ग-घ" पार्श्वमान्या "क-घ" तियङ् मान्याः "घ" कोणान् मित्वा परिच्छिन्नस्थले "च" शंकु निहन्यात् । अत्र-"ग-घ" पार्श्वमान्यासमं "ख-ग" तिर्यङ्मानी विद्यतेऽतः, "ख" शंकोः सकाशात् "च" शंकुपर्यन्तं रज्जु प्रसारणेन योजयेत् । एतेन "च-ख-ग-घ" समचतुरस्रमेकं "च-क- ख" त्र्यस्रिक्षेत्रमेकञ्चोत्पद्यते । ततः "क-ख" अक्ष्णया रज्जुं च कोणात् "च-झ" रज्जुप्रसारणेन संमविभजेत् । इदानीं "क-झ-च, "झ-ख-च" चेति त्र्यस्त्रिक्षेत्रद्वयं निष्पन्नम् । "च- झ- ख" त्र्यस्त्रिक्षेत्रस्य "झ" कोणात् "झ-ज" रज्जुंतथा प्रसारयेत् ययथा "झ" कोणस्य "च-ख" पार्श्वमान्याश्च सदृशच्छेदः स्यात् । एवमेव "क-झ-च" त्र्यस्त्रिक्षेत्रमपि "झ-छ" रज्ज्वा विभजेत् । "क-झ-छ" त्र्यस्त्रिक्षेत्र "झ-ट-ख" रूपेण "क-ख-च" त्र्यस्त्रिक्षेत्रस्य पुरस्तात् स्थापयेत् । तेन "छ-ट-ख-च" दीर्घचतुरस्रमेकं जायते, यस्यमध्यभागः "झ-ज" रेखया विभज्यते । अतः "झ-ट-ख-ज," "छ-झ-ज-च" समचतुरस्रद्वयं निष्पद्यते । अनयोः संक्षेपार्थं "छ-झ-ज-च" समचतुरस्रस्य "झ-च" अक्ष्णया रज्जुं"च-घ" तिर्यङ्मान्याः "च" शंकोः प्रसारयेत् । यत्र स्पृशेत्तत्र "ठ" शंकु मिहन्यात् । "ख" कोणात् "ठ" शंकुपर्यन्त "ख-ठ" शंकुं प्रसार्य तयैव पृथक् (अष्टम चित्रे) "ख-ड-ढ-ठ" समचतुरस्रं कृत्वा, तस्मिन्, ' 'ख-ढ" अक्ष्णया रज्जुंप्रसारयेत् । "ड" कोणं "ख-ढ" तिर्यङ्मानीं "च ड-ण" रज्जवा विभज्य "ड-ण-ढ" खण्डं दक्षिणस्या "ढ-त- ठ" रूपेणस्थापयेत् । "ड-ण-ख" खण्ड "च" पश्चिमायां "ख-थ-ठ" रूपेण स्थापयेत् . एतेन "ख-ढ-त-थ" दीर्घचतुरस्रं जायते । यस्य क्षेत्रफलंक "क-ख-ग-घ" विषम चतुरस्रस्य क्षेत्रफलेन तुल्यं विद्यते ।। 4 ।।

अनादेशे चतुरस्रस्य ग्राह्ययता

प्रमाणं चतुरस्रमादेशादन्यत् ।। 3/5 ।।

आदेशाद् विहितस्थलादन्यत्र यत्र किमपि नोक्तं केवलं चुतरस्रमित्येवमुक्तं तत्र समचतुरस्रमेव प्रमाणं = प्रमाणत्वेन ग्राह्यम् । यथा - "धिष्ण्यान्निर्धपत्युद्धता वोक्षित"[1] इत्युक्तम् । अतोऽत्र तत्स्वरूपं समचतुरस्रमेव कार्यम् । मृदा निर्मित अग्न्याधारभूतः स्थण्डिलविशेषो धिष्ण्या पदवाच्यः[2] यत्राग्नि संस्थाप्य होत्रादयः स्वानिशस्त्राणि शंसन्ति । यत्र तु नाम निर्देशपूर्वक मभिहितं तत्र तदेव कार्यम् । यथा-चतुरस्रमाहवनीयं मण्डलंगार्हपत्यमित्यादि ।। 5 ।।

---

1. का.श्रौ.सू., 8/6/12.
2. एते मध्या धिष्ण्यानां विस्तारोऽष्टादशांगुलः ।
वेदांगुलोच्चा वेदास्राः षड्धिष्ण्याः सदसि स्मृताः ।। -अ. छो.प., पृ. । श्लो. 18.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

करणीनां क्षेत्रफलविवक्षयेदमाह--

द्वि प्रमाणा चतुःकरणी, त्रिप्रामाणा नवकरणी, चतुःप्रमाणा षोडशकरणी ।। 3/6 ।।

द्वे प्रमाणे यस्याः सा द्विप्रमाणा, क्रियतेऽनया सा करणी द्वि प्रमाणा च सा करणी द्विकरणी तया द्विहस्तकरण्या यत् समचतुरस्त्रं क्रियते तत् चतुष्करणी चतुर्हस्तक्षेत्रफलकं स्यात् । एवं त्रिहस्त प्रमाणा या करणी तया सम्पादितस्य क्षेत्रस्य क्षेत्रफलं नवकरणी नाम नवहस्तक्षेत्रफलकं स्यात् । तथैव यया प्रमाणरज्ज्वा चतुर्हस्तक्षेत्रं समस्यते सा चतुःकरणी चतुर्हस्तप्रमाणरज्ज्वा कृतस्य चतुरस्त्रस्य क्षेत्रफलंषोडशहस्तात्मकं स्यात् । एवं क्षेत्रफल परिज्ञानार्थं संक्षिप्तदिग्दर्शनम् ।। 6 ।।

अथ क्षेत्रफल निर्णयसम्बन्धे सिद्धान्तमाह-

यावत् प्रमाणा रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तान्समस्येत् ।। 3/7 ।।

यावत् प्रमाणा रज्जुर्भवति = विमीयमान क्षेत्रमापिका रज्जुः यावद्दीर्घाभवति तावन्तस्तावन्तो वर्गाः भवन्ति । तया रज्ज्वा विहरणं कृते सति तावन्तिवर्ग फलकानि क्षेत्राणि भवन्ति । वर्गो नाम किं ? समद्विगुणनं वर्गः (2 X 2 =4) । एवं पंचहस्तात्मिकया रज्ज्वा विहरणं कृतेसति 5 X 5 = 25 पंचविंशतिहस्तं क्षेत्रफलं भवति । एवमन्यत्राप्यूह्यम् । तान् समस्येत् =तान् समचतुस्त्रान् नाना प्रमाणसमासविधिना एकीकुर्यादित्यर्थ ।। 7 ।।

क्षेत्रफलप्रर्शने नियमिविशेषाः

ननु यावत् प्रमाणारज्जुस्तावत्प्रमाणो वर्गो भवतीति तु सत्यम् । परन्तुप्रमाणार्द्धमितया रज्ज्वा कृतस्य क्षेत्रस्य वर्गः कियत् स्यादिति जिज्ञासायां जायमानायां सत्यां तत्समाधित्सयाऽऽ ह -

अर्धप्रमाणेन पादप्रमाणं विधीयते ।। 3/8 ।।

प्रमाणस्यार्द्ध प्रमाणार्द्ध तेन प्रमाणार्द्धेन सूत्रेण कृतस्य क्षेत्रस्य यत् क्षेत्रफलं तदेव प्रमाणरज्वा कृतस्य क्षेत्रफलस्य तुरीयोभागो भवति । अयमर्थः- अर्द्धप्रमाणमितयारज्ज्वा समचतुरस्त्रंकृतेसति यत्क्षेत्रफलमायाति तदेव प्रमाणरज्ज्वा कृतस्य समचतुरस्त्रस्य क्षेत्रफलंस्य चतुर्थांशरूपो भवति । यथा- चतुर्विंशत्यंगुलात्मिका 24 प्रमाणरज्जुः । तस्यार्द्ध 12 द्वादशाङ्गुलम्, चतुर्विंशत्यंगुल प्रमाणरज्ज्वा कृतस्य समचतुरस्त्रस्य क्षेत्रफलं 576 पंचशतोत्तरषट्सप्तत्यंगुलम् । द्वादशांगुलमितया रज्ज्वा समचतुरस्त्रं कृते सति तत् क्षेत्रफलं 144 शतोत्तरचतुश्चत्वारिंशद्-भवति । एतदेव 144 शतोत्तरचतुश्चत्वारिंशदंगुलं, क्षेत्रफलं प्रमाण रज्ज्वा कृतस्य क्षेत्रस्य 576 पञ्चशतोत्तर षट्सप्तत्यधिकांगुलात्मकस्य क्षेत्रफलस्य चतुर्थांशरूपं भवति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्योपपत्तिः-

अत्र "क-ख-ग-घ" समचतुरस्रं चतुर्विंशति हस्तमितया प्रमाणरज्ज्वा

3/8



चित्र-1



चित्र-2

निर्मितं विद्यते। यस्यक्षेत्रफलं 576 विद्यते। "द-ध-न-प" लघुचतुरस्रं च द्वादशांगुलमितया रज्ज्वा निर्मितमस्ति। अस्य क्षेत्रफलं 144 विद्यते। "द- ध-न-प" इदनेव चतुरस्रं "क-ख-ग-घ" बृहत् समचतुरस्रस्य चतुर्थांशभूतस्य "ड-ट-ण-घ" समचतुरस्त्रस्य क्षेत्रफलेन तुल्यं स्यादिति ।। 8 ।।

तृतीयेन नवमोऽशः ।। 3/9 ।।

एवमेव प्रमाणरज्ज्वाः तृतीयांशेन कृतं समचतुरस्रं प्रमाणरज्ज्वाकृतस्य समचतुरस्रस्य नवमांशरूपस्य क्षेत्रफलेन तुल्यं स्यादिति।

यथा-"ग-घ-च-छ" प्रमाणारज्ज्वा चतुरस्रं कृतं विद्यते। अस्य तृतीयांशेन "ड-ण-त-प" समचतुरस्रं विद्यते। अतः "ग-घ-च-छ" सम चतुररस्रस्य नवमांशभूतस्य "ज-ट-ठ-छ" चतुरस्रस्य क्षेत्रफलेन तुल्यं "ड-ण-त-प" चतुरस्रस्य

3/9



चित्र-1



चित्र-2

क्षेत्रफलं समानं भविष्यति ।। 9 ।।

चतुर्थेन षोडशी कला ।। 3/10 ।।

प्रमाण चतुर्थांशेन कृतस्य चतुरस्रस्य क्षेत्र फलं तस्य क्षेत्रफलस्य षोडशांशेन तुल्यं भविष्यति ।। 10 ।।

अत्र प्रसंगात् प्रमाणरज्ज्वा द्वितीयतृतीयांशेन सम्पत्स्यमानस्य लघुक्षेत्रस्य ततो

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

निर्ह्रासः कथं स्यादित्याकांक्षायामाह -

एष निर्ह्रासस्तस्य पुरस्तादुक्तं शास्त्रम् ।। 3/11 ।।

तस्य तृतीयेन नवमोंऽशः चतुर्थेन षोडशीकलेत्यादिभिरभिहितस्य लघुक्षेत्रस्य बृहत् समचतुरस्रात् निर्ह्रासः = पृथक्करणोपायः एष = अयमेव । तस्य पृथक्करणोपायस्य शास्त्रं = चतुरस्राच्चतुरस्रं निर्जिहीर्षन्निति सूत्रम् । तत् पुरस्तादुक्तम्[1]

अयंभावः- बृहत्समचतुरस्राल्लघुसमचतुरस्रस्य पृथक्करणं पूर्वमेव चतुरस्राच्चतुरस्रमितिसूत्रेणाभिहितम् । अत्रापि प्रकारान्तरेणोक्तमिति ।। 11 ।।

ननु अर्धप्रमाणेनपादप्रमाणमित्यनेन यदुक्तं क्षेत्र निर्ह्रासः स कस्य इतिचेत् आह-

यावत्प्रमाणा रज्जुर्भवतीति विवृद्धे ह्रासोभवति ।। 3/12 ।।

यावत्प्रमाणारज्जुर्भवतीत्यस्मिन् सूत्रे या क्षेत्रवृद्धिरुक्ता, तस्याः वृद्धेरयं ह्रासोभवति । तृतीयेन नवमोंऽशः चतुर्थेनषोडशी कलेत्यादि ।। 12 ।.

चतुरस्रस्यमण्डलीकरणमाह--

चतुरस्रं मण्डलं चिकीर्षन्मध्यादंसे निपात्य पार्श्वतः परिलिख्य तत्र यदतिरिक्तं भवति तस्य तृतीयेन सह मण्डलं परिलिखेत्स समाधिः ।।3/13।।

चतुरस्रं = समानाऽऽयत विस्तारक्षेत्रं मण्डलं वृत्तं चिकीर्षन् = कर्तुमिच्छन्, मध्यात् = चतुरस्रमध्यात् अंसे- चतुर्भुजकोणे निपात्य दत्वा अर्थात् चतुरस्रे कर्णसूत्रे दते सूत्रयोः संयोगस्थलं मध्यं स्यात् । ततो मध्यादारभ्य पार्श्वतः = पार्श्वमानेन करण्यर्द्धेन परिलिख्य अकंयित्वा तत्र कर्णसूत्रे यदतिरिक्तं भवति प्रमाणार्द्धेनांकनान्तरं यदवशिष्टं भवति तस्य अवशिष्टभागस्य त्रिभागंकृत्वा तेषु भागत्रयेषु तृतीयेन भागेन सहमण्डलं वृत्तं परिलिखेत् । स समाधिः सोऽयं समचतुरस्रस्य वृत्तसाधनोपायः ।

अत्रेदं वक्तव्यं भवति--अभीष्टसमचतुरस्रस्यमण्डली कर्तुमिच्छन् तस्मिन् चतुरस्रे कर्णसूत्रद्वयं कोणात् कोणपर्यन्तं प्रसारयेत्तेन चतुरस्रस्यमध्यस्थलमायाति । अभीष्टचतुरस्रस्य यावत्प्रमाणाकरणी तत्परिमितया रज्ज्वा चतुरस्रस्यमध्यादारभ्य कामप्येकां रज्जुं छिंद्यात् । यदवशिष्टं भवति तं त्रेधाविभज्य चतुरस्रस्य कोणादारभ्य संख्यानं कृतेसति यस्तृतीयोभागो भवति तं गृहीत्वा चतुस्रस्य मध्यपर्यन्तं यत्प्रमाणं तत्प्रमाणारज्जुंगृहीत्वा वृत्तं कृते सति चतुरस्रतुल्यक्षेत्रफलं स्यादिति ।

यथा--षोडशांगुलस्य चतुरस्रस्य मण्डलीकरणं विद्यते । तस्य कोणात् कोणपर्यन्तं प्रसारिता कर्ण रज्जुः द्वाविंशत्यंगुला विद्यते । समचतुरस्रस्य मध्यात् कोणपर्यन्तमेकादशांगुला कर्णरज्जुः । तत्र षोडशांगुलस्य प्रमाणस्यार्धप्रमाणेनाष्टांगुलेन सूत्रेण मध्यादारभ्यकर्णसूत्रे प्रसारयेत् । यत्रस्पृशेत्तत्र लक्ष्मकृते सति

---

1. का.शु.सू 3/1.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कर्णसूत्रस्यांगुलत्रयमेवावशिष्यते । शिष्टं भागं त्रिधाविभक्तायां सत्यां प्रत्येको भागोऽगुलात्मकः सम्पद्यते । तेषु भागमेकं केन्द्राद् विगृह्य नवांगुलमितया रज्ज्वा मध्याद् वृत्तं कुर्यात् तेन षोडशांगुलचतुरस्रस्य क्षेत्रफलेन तुल्यं नवांगुलसूत्रेण कृतस्य वृत्तस्य क्षेत्रफलं स्यादिति ।

अस्योपपत्तिः-

अत्र -"क-ख-ग-घ" अभीष्ट चतुरस्रस्य वृत्तकरणं विद्यते । तत्र "क" कोणात् "ग" पर्यन्तं "ख" कोणात् "घ" पर्यन्तं "क- ग," "ख- घ" अक्षणया रज्जुंप्रसारयेत् तयोः संयोगः "च" विन्दौ भवति । "क-ख " प्रमाणस्य "छ-ख" प्रमाणार्धम् ।

3/13



तत् परिमितया रज्ज्वा "च-ख" कर्ण रज्जुं "च" केन्द्र चिन्हाच् छिन्द्यात्, तेन "च-ज" परिछिन्ना भवति । "ज-ख" भागं चावशिष्यते । "ज-ख" त्रिधा विभक्तायां सत्यां "ज-झ", "झ- ट", "ट- ख" इति त्रयोभागाः जायन्ते वर्धितेनैकेन भागेन "च-झ" सूत्रेण वृत्तं कुर्यात् । वृत्तमिदं क-ख-ग-घ चतुरस्रस्य क्षेत्रफलेन तुल्यं स्यादिति ।।13।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

 Digitized by Madhuban Trust



3/14

मण्डलस्य चतुरस्रीकरणमाह--

मण्डलं चतुरस्रं चिकीर्षन् विष्कम्भं पंचदशभागान्
कृत्वा द्वावुद्धरेच्छेषः करणी ।। 3/14 ।।

मण्डलं = वृत्तं चतुरस्रं चतुर्भुजं चिकीर्षन् कर्तुमिच्छन् विष्कम्भं वृत्त-व्यासं पंचदशभागान् कृत्वा पंचदशधा विभज्य तेषु विभक्तेषु भागेषु द्वौ भागौ उद्धरेत् त्यजेत् शेषः = त्रयोदशभागपरिमितया करण्या कृतं चतुरस्रं वृत्ततुल्यक्षेत्रफलकं स्यादिति ।

यथा--पंचदशहस्तव्यासात्मकं वृत्तं चतुरस्रं करिष्यन् वृत्तव्यासं 15 पंचदशधा विभजेत् । तेन प्रत्येको भागः अंगुलत्रयात्मकः स्यात् । तेषु भागद्वयं जह्यात् । शेषत्रयोदशभागपरिमितया रज्ज्वा चतुरस्रं विलिखेत् । तेनाभीष्ट वृत्तस्य क्षेत्रफलेन तुल्यं स्यादिति । अस्योपपत्तिः अधस्तात्प्रदत्त चित्रादवगन्तष्या ।

इति तृतीयकण्डिका

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चतुर्थी कण्डिका

चितिनामानि

कात्यानश्रौतसूत्रे "एतया विकृत्याऽभिमन्त्र्यैकेऽन्यचितिं चिन्वन्ति द्रोणचिद्रथचक्रचित्कंकचित्प्रउगचिदुभयतः प्रउग समूह्य पुरीष"[१] इत्येताः चितयः सुपर्णाचितेः वैकल्पेनोक्ताः । सुपर्णचितेस्तु निमाणं तत्रैव सूत्रकारेणाभिहितम् ।[२] यास्तत्रानूक्तास्ता एवात्राभिधीयन्ते । तदेवाह--

द्रोणचिद्रथचक्र चित्कंकचित्प्रउगचिदुभयतः प्रउगः
समूह्य पुरीष इत्यग्नयः ।। 4/1 ।।

द्रोणश्चतुरस्रः तदाकाराचितिः द्रोणचित् । रथचक्रं वृत्तं तदाकाराचिती रथचक्रचित् । कंकोवंको गगन उड्डीयमानः तदाकाराचितिः कङ्कचित् । प्रउगःशकटांगं शकटस्याग्रभागस्त्र्यस्रिः तदाकाराचितिः प्रउगचित् । समूह्यः समूहीकृतः अन्यत आनीय पुंजीकृतः पुरीषो मृत्तिका तदिवचितिः समूह्यपुरीष चिदित्युच्यते । अत्राग्नि शब्दः अग्न्याधारभूत क्षेत्रवाचकः ।

सुपर्णचितेः स्वरूपोपपत्तिः-

यतो ह्यग्रे वक्ष्यति "द्रोणे यावानग्निः सपक्षःपुच्छविशेषः"[३] "उत्तरेषु पुरुषोच्चयेनैकशतविधा"[४] दित्यादिसपक्षपुच्छ विशेषस्याग्नेः स्वरूपज्ञानमन्तरा तस्यैकस्मिन् समचतुरस्रे कथं समासः स्यादिति कृत्वा तज्ज्ञानस्य पूर्वोपात्तत्वादत्रोच्यते ।

चितिं चिन्वन् कृतोर्ध्वबाहोः[५] प्रपदोच्छ्रितस्य यजमानस्य समस्थितस्य आपादाङ्गुष्ठात् हस्तस्य मध्यमांगुलाग्रपर्यन्तं केनचिद्वंशेन मित्वा, तत्परिमितां

---

1. का.श्रौ.सू. 16/5/9.
2. का.श्रौ.सू. 16/8/1-15 इत्येतैः सूत्रैः।
3. का.शु.सू. 4/2.
4. का.शु.सू. 5/1
5. यजमानेनोर्ध्ववाहु प्रपदोच्छ्रितेन समस्थिते न वा (का. श्रौ.सू. 16/8/16) इत्युक्तत्वाद् विंशतिशतांगुलः पुरुषपदेनोच्यते।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रज्जुंगृहीत्वा तामभ्यस्योभयतः[1] पाशौ कृत्वा मध्येलक्षणं च कुर्यात् । तेन पुरुष परिमितं भागद्वयं जायते, तत्र पुरषार्द्धेऽपि लक्षणं[2] कृत्वा, मध्य लक्षणात्[3] पुरुष पंचम भागे लक्षणं कुर्यात् ततः पुरुषपंचमभागस्यार्द्धे[4]ऽपि च लक्षणं कुर्यात् । अथ तां रज्जुं विह्रियमाणभूमौ[5] प्राग् प्रत्यग् दिशिप्रसार्य पाशयोः द्वौ शंकू, मध्ये अर्द्धपुरुषयोः एवं पृष्ठ्यायां पंचशंकवो निखाता भवन्ति ।

पृष्ठ्यन्तयोः पाशावुन्मुच्य[6] अर्द्धपुरुषीययोः शङ्क्वोः निक्षिप्य मध्यलक्षणेन दक्षिणस्यामुत्तस्यां चाकृष्य यत्रस्पृशेत्तत्रशंकू निहन्यात्तदन्तरालं रज्जु प्रसारणेन योजयेच्च। ततः पाशावुन्मुच्य, एकं पाशं मध्यशंकौ नियम्य दक्षिणस्यां निखात शंकुपर्यन्तमपरपाशं प्रसारेयत् । (पुरुषपरिमितं) मध्यचिन्हं यत्रस्पृशेत्तत्र शंकुमेकं निहन्यादेवमुत्तरतोऽपि विहरेत् । ततो मध्यशंकोः पाशं निष्काश्य, एकं पाशं पूर्वस्यां प्राचीशंकौ, अपरं च दक्षिणंस्यां निखातस्य शंकोरूपरि विन्यसेत् । मध्य लक्षणेन च आग्नेय्यां दिश्याकृष्य मध्यलक्ष्मयत्रस्पृशेत्तत्र शंकुमेकं निहन्यात्, स आत्मनो दक्षिणोंऽसः । तदैव दक्षिणस्यां पुरुषार्द्धे शंकुमेकं निहन्यात् दक्षिणपक्ष निर्माणार्थम् । अथ दक्षिणशंकोः पाशं निष्काश्य उत्तर शंकौ निक्षिप्य पूर्ववत् ऐशान्यां दिश्या कृष्य तत्र चिन्हे शंकुमेकं निहन्यात् स आत्मन उत्तरोंऽसः, पुरुषार्द्धचिन्हे शंकुमेकं दद्यात् उत्तर पक्षविहरणार्थम् ।

ततः पाशविपर्यासः, पूर्वपाशं पश्चिमशंकौ निक्षिप्य मध्य चिन्हेन वायव्यकोणं प्रत्याकृषेत् तत्रैकः शंकुः, स आत्मन उत्तराश्रोणिः । अर्द्धपुरुषे चैकः शंकुः उत्तरपक्षविहरणार्थम् । पश्चिमायामर्धपुरुषचिन्ह एकः शंकुः पुच्छविहरणार्थम् । उत्तरशंकोः पाशमुन्मुच्य दक्षिण शंकौ नियम्य मध्य लक्षणेन नैऋत्यामाकृष्य तत्रैक शंकुः । स आत्मानो दक्षिणश्रोणिः । तदैव दक्षिणस्यां पुरुषार्द्ध- चिह्न एकः शंकुः दक्षिण पक्ष विहरणार्थम्, पश्चिमायां पुरुषार्द्धे शंकुः पुच्छ विहरणार्थञ्च दद्यात् । एवमात्मनो विहरणं सम्पन्नम् ।

अथ पक्षयोः विहरणमुच्यते--

पाशुवुन्मुच्य-दक्षिणस्यां यौ शंकू निहितौ पक्ष विहरणार्थ तयोरूपरि निक्षिप्य मध्यलक्षणेनविहृत्य तच्चिन्हे शंकुः । पाशावुन्मुच्य दक्षिणस्यामात्मनः स्थित मध्य शंकौ पाशमेकं प्रतिमुच्य दक्षिणस्यां निखात शंकुपर्यन्तं प्रसारयेत्, यत्र सारत्निपुरुषप्रमाणस्य चिन्हस्य स्पर्शः स्यात्तत्रैकः शंकुः निखातव्यः । स दक्षिण

1. द्विपुरुषां रज्जुंमित्वोभयतः पाशां मध्ये लक्षणम् । (का. श्रौ.सू. 16/8/1)
2. अभितोऽर्द्धपुरुषयोश्च ।। (का.श्रौ.सू. 16/8/2).
3. मध्यमात् पुरुषपंचमे ।। (का.श्रौ.सू. 16/8/3).
4. अर्द्धे च ।। (का.श्रौ.सू 16/8/4).
5. अनुपृष्ठ्यामायम्य पाशयोः शंकू मध्येऽर्धपुरुषयोश्च ।। (का.श्रौ.सू. 16/8/5).
6. पाशावुन्मुच्यार्द्धपुरुषीययोः प्रतिमुच्य दक्षिणाऽऽयम्य मध्यमे नितोदं करोति ।। (का.श्रौ.सू.16/8/6).

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पक्षस्य परोऽन्तः । ततोऽग्नि यमयोर्मध्यस्थ अर्द्धपुरुषीय शंकौ पाशमेकं निक्षिप्यापरं दक्षिणपक्षस्यान्तरस्थ शंकौ नियम्य पंचमभागीयार्द्ध पुरुषीय लक्षणे एकत्रगृहीत्वारज्जुमाग्नेयीं दिशं प्रत्याकृष्य तत्रैकं शंकुं निखनेत्। ततः पूर्वदर्द्धपुरुषात् पाशं निष्काश्य पश्चादर्द्धपुरुषीय शंकौ पाशं प्रतिमुच्य तथैव निर्ऋतिं प्रत्याकृष्य पक्षस्य नैर्ऋत्य कोणे शंकुं निखने देवं दक्षिण पक्षः साधितः । एवमोवोत्तरः पक्षः साधनीयः ।

अथ पुछसाधनोपायः-

तत्रात्मनः पश्चिमभागे यौ अर्द्धपुरुषीयौ शंकूनिहितौ तयोरुपरि पाशौ प्रतिमुच्य मध्यमेन लक्षणेन रज्जुं पश्चिमायामाकृष्य यत्रस्पर्शः स्यात्तत्र लक्ष्मकुर्यात् यस्मिन् भागे पुरुषपंचमभागीयार्द्ध पुरषीय लक्षणे पततस्तद्भागस्य पाशमात्मनः पश्चिमशंकौ प्रतिमुच्य तां रज्जुंपश्चिमायां पूर्वकृत चिन्हपर्यन्तं प्रसार्य पंचभागीयार्द्ध लक्षणे शंकुमेकं निखनेत् । ततस्तस्मिन् शंकौ पाशमेकं प्रतिमुच्य. आत्मनः पश्चिमशंकुप्रोतं पाशं निष्काश्य दक्षिणोऽर्द्ध पुरुषीये शंकौ प्रतिमुच्य पंचमभागीयार्द्धपुरुषीयलक्षणे एकत्र गृहीत्वा रज्जुं नैऋर्तीं प्रत्याकृष्य पुच्छस्य नैर्ऋतकोणे शंकुं निखनेत् । ततो दक्षिणादर्द्धपुरुषीयात् पाशं निष्काश्योत्तर पुरुषीये नियम्य तथैव वायव्यां प्रत्याकृष्य पुच्छस्य वायव्य कोणे शंकुं निखनेत् । एवं सपक्ष पुछविशेषोऽग्निः साधितः ।

अस्योपपत्तिः-

अत्र "अ-आ" द्विपुरुष प्रमाणारज्जुर्विद्यते । तस्याः ' 'इ' मध्यलक्षणं, "उ" तथा "ऋ" पुरुषार्द्धलक्षणं, "ए" पुरुष पंचमांशलक्षणं, '"ओ" तस्यार्द्धलक्षणमिति प्रमाणरज्ज्वां चिन्हानि निर्दिष्टानि । ततो विहरणं करिष्यन् यूपावटयस्य शंकोः पश्चात्पादमात्रे चित्यस्य पूर्वार्द्धे अ शंकुं निखाय तस्मिन् पाशमेकं प्रक्षिप्य पृष्ठ्याया उपरि तां रज्जुंप्रतीचीमाकृष्यापरपाशप्रान्ते "आ" शंकुं निखाय तस्मिन् पाशं प्रतिमुंचेत् । ततोऽस्याः रज्ज्वा मध्ये "इ" शंकुं निहन्यात् । तमभितोऽर्द्धपुरुषयोरेकैकं "उ" तथा "ऋ" शंकुं निखनेत् एवं द्विपुरुषप्रमाणायां रज्ज्वां "अ", "उ" "इ ", "ऋ", "आ" चेति पंचशंकवो निहिताः । ततः "अ-आ" शंक्वोः पाशावुन्मुच्य ' "अ" पाशं "उ" शंकौ, "आ" पाशं "ऋ" शंकौ नियम्य "इ' ' चिन्हेन दक्षिणस्यामाकृष्य यत्र चिन्हं स्यात्तत्र "क" शंकु निहन्यादेवमुत्तरतोऽपि कृत्वा तत्रलक्षणे "त" शंकुं निहन्यात् । "त-क" शंकोरन्तरालं रज्ज्वा योजयेत् । ततः पाशौ निष्काश्य "अ" पाशं "इ" शंकौ निक्षिप्य "क" शंकुपर्यन्तं रज्जुं प्रसारयेत् । "इ" चिन्हं यत्र पतेत् तत्र "ख" शंकुं निखनेत् । अथ "अ" पाशं "अ" शंकौ निक्षिप्य "आ" पाशं "ख" शंकौ निक्षिप्य "इ" चिन्हं धृत्वाऽऽग्नेयीं दिशं प्रत्याकृषेत् । तत्र लक्षण संस्पृष्टस्थले "ग" शंकुं निहन्यात् । दक्षिणस्यां च यत्र "ऋ" चिन्हं स्पृशेत्तत्राप्येकं "घ" शंकुं निहन्यात् । "ख" शङ्कोः पाशं निष्काश्य उत्तरस्यां "ठ" शंकौ निक्षिप्य पूर्ववत् "इ" चिन्हेन

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

4/1



चित्र-1

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऐशान्यामाकृष्य तत्र "ड" शंकुं निखाय "ऋ" लक्षणस्पृष्टस्थले "ढ" शंकुं निहन्यात्। ततः "अ" पाशं "आ" शंकौ आसंज्य "इ" चिन्हेन वायव्यामाकृष्य "प" शंकौ निहत्य "उ" तथा "ऋ" लक्षणस्पृष्टस्थले "ण" तथा "व" शंकुं निहन्यात्। अथ "अ" पाशं "ख" शंकौ निक्षिप्य नैर्ऋतीं दिशं प्रत्याकृष्य तत्र "ङ" शंकुं निहन्यात्। "इ", "ऋ" चिन्हं स्पृष्टस्थलयोः क्रमेण "च", "फ" शंकू निहन्यात्। एतेन "प-ड-ग-ङ" सर्वतः द्विपुरुष विस्तृतं समचतुरस्त्रं आत्मापदवाच्यं सेत्स्यति। पक्षयोः विहरणम्।

"अ" पाशं "घ" शंकौ विन्यस्य "आ" पाशं "च" शंकौ विन्यसेत् "इ" चिन्हं धृत्वा दक्षिणत आयम्य तत्र लक्षणे "छ" शंकुं निहन्यात्। ततो "अ" पाशं "ख" शंकौ निक्षिप्य "छ" शंकु पर्यन्तं रज्जुं प्रसारयेत्। यत्र खलु "ए" चिन्हं स्पृशेत्तत्र "ज" शंकुं निहन्यात्। ततो "अ" पाशं घ शंकौ "आ" पाशं "ज" शंकौ "च" नियम्य "ऋ" "ए" चिन्हे एकत्र गृहीत्वाऽऽग्नेयीं दिशं प्रत्याकृषे त्तत्रलक्षणे "ट" शंकुं निहन्यात्। एवं "अ" पाशं "च" शंकौ कृत्वाऽऽ कृष्य तत्रलक्षणे "झ" शङ्कुं निहन्यात्। इदानीं। "च-घ-ट-झ" दक्षिणपक्षः निष्पन्नः। एवमेवोत्तरपक्षः साधनीयः। "ध-न-ढ-ण" उत्तरः पक्षः।

पुच्छसाधनम्।

"अ" पाशं व शंकौ, "आ" पाशं "फ" शंकौ च धृत्वा "इ" लक्षणेनाऽऽकृष्य तच्चिन्हे "र" शंकुं निहन्यात्। ततो "अ" पाशं "आ" शंकौ नियम्य "र" पर्यन्तं रज्जुंप्रसारयेत्। भूमौयत्र "ओ" लक्षणंस्पृशेत्तत्र "भ" शंकुं निहन्यात्। अथ "अ" पाशं "फ" शंकौ "आ" पाशं च "भ" शंकौ निक्षिप्य "ऋ", "ओ" चिन्हे एकत्र गृहीत्वा नैर्ऋतिं कोणं प्रत्याकृष्य तत्र "म" शंकुं निहन्यात्। तथैव "फ" शंक्वोः "अ" पाशं निष्काश्य "व" शंकौ प्रक्षिप्य वायव्यं प्रत्याकृष्य लक्षणे "य" शंकुं निहन्यात् एवं "व-फ-म-य" पुच्छः निष्पन्नः।

एवं पूर्वोक्त प्रकारेण विहरणं कृतेसति "प-ड-ग-ङ" आत्मरूपेण निष्पन्नः। "च-घ-ट-झ" दक्षिणपक्षः। "ण-ध-न-ढ" उत्तरपक्षः "व- फ -म-य" पुच्छत्वेन, सर्वं सुव्यवस्थितं भवति।

अतः परं सपक्षपुच्छविशेषस्याग्नेः समचतुरस्त्रीकरणं वक्ष्यतेऽग्रे साकाङ्क्षत्वात्।

एवं पूर्वोक्त विधिना सुपर्णचितिं सार्द्धसप्तपुरुषक्षेत्रफलंक विरच्य तां समचतुरस्त्री कुर्यात्। तद्यथा- पक्षयोः पुच्छस्य न नानाप्रमाणसमासविधिना समचतुरस्त्रं विधाय, तत्करणीं, चितेरात्मनि नानाप्रमाण विधिना प्रक्षिप्य तत्कर्णरज्ज्वा पृथक् समचतुरस्त्रं सम्पादयेत्। तदेव सार्द्धसप्तपुरुषक्षेत्रफलकस्याग्नेः सपक्षपुच्छविशेषस्य समाहृतस्वरुपम्। सपक्षपुरुषक्षेत्रफकस्याद्योऽग्नेः सप्तविधस्य स्वरूपोपपत्तिः पूर्वं प्रतिपादिता। अथ तस्य नाना प्रमाण समासविधिना समचतुरस्त्रीकरणं प्रस्तूयते।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

4/1

सपक्षपुच्छविशेषस्याचोऽग्नेः सार्द्धसप्तपुरुषक्षेत्रफलकस्य चतुरस्त्रीकरणम् ।



चित्र-2

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्वरूपोपपत्तिर्यथा -[1]

सुपर्णचितेः आद्योऽग्नेः सप्तविधस्य दक्षिणपक्षस्य "अ-ऋ" पार्श्वमान्या "ऋ-इ" तिर्यङ्मानीं च्छिन्द्यात्। यत्र स्पर्शः स्यात्तत्र "ओ" शंकुं निहन्यात्। तथैव "अ-आ" पार्श्वमानीं छित्वा "ए" -शङ्कुं निहन्यात् "ए-ओ" शंक्वोरन्तरालं रज्जुप्रसारणेन योजयेत्। तेन "अ-ऋ-ओ-ए" समचतुरस्रं "ए-ओ-इ-आ" अतिदीर्घंचतुरस्रं च जायते'। ततोऽतिदीर्घञ्चे दित्युक्त प्रकारेण "ए-ओ -इ-आ" अतिदीर्घचतुरस्रं समचतुरस्री कर्तव्यम्। तद्यथा- -

"ए-आ" तिर्यङ्मान्या "ए-ओ-इ-आ" दीर्घचतुरस्रस्य "ओ-ए" तथा "इ-आ" पार्श्वमान्यौ छिन्दायात्। ततः सम्मुखस्थेभ्यस्तत्तच्छंकुमूलेभ्यः रज्जुप्रसारणेन योजयेच्च। तेन लघुरूपाणि षट्समचतुरस्राणि जायन्ते। तेषु प्रथमलघुचतुरस्रे "अ-आ": अक्ष्णयां रज्जुं प्रसारयेत्। "समचतुरस्रस्याक्ष्णयारज्जुर्द्विकरणीति" न्यायमंगीकृंतत्वात् प्रथम चतुरस्रस्याक्ष्णयां "अ-आ" रज्जुंपृथक्[2] तिर्यक् प्रसार्य-तदुपरि तत् परिमिता मेव रज्जुं"अ" विन्दोः पार्श्वमानीत्वेन "अ-उ" रज्जुं प्रसारेयत् तयो, "उ-आ" अक्षणयारज्जुः चत्वारिसमचतुरस्राणि संक्षेप्स्यति। "पदं[3] तिर्यङ् मानी त्रिपदापार्श्वमानीति न्यायमंगीकृतत्वात्' "अ-आ" अक्षणयां कोटित्वेन प्रसार्य तृतीय चित्रस्थ "आ- उ" अक्षणया भुजत्वेन चतुर्थचित्रे प्रसारयेत्तयोः "अ-उ" अक्षणयारज्ज्वा यच्चतुरस्रंस्यात्तस्मिन् लघुरूपाणि षट्समचुरस्राणि संक्षिप्स्यन्ते। ततः "अ-उ" अक्षणयारज्जुं चितेः दक्षिणपक्षस्य "अ" शंकोः सकाशात् प्रसारयेत्। यत्रस्पृशेत्तत्र "उ" शंकुं निखाय "ऋ" कोणात् "उ" शंकुपर्यन्तं अक्षणयारज्जुं प्रसारयेत्। "उ-ऋ" अक्षणया रज्जुः दक्षिणपक्षस्य क्षेत्रफलसम्पादिका स्यात्। एवमुत्तर पक्षस्यापि समचतुरस्रीकरणं बोध्यम्।

अथ पञ्चमचित्रे "उ-ऋ" परिमितांरज्जुंभुजत्वेन प्रसार्य तत्परिमितामेव कोटित्वेन प्रसारितायां तयोर्या "ए-ऋ" अक्षणयारज्जुः सा उभयोः पक्षयोः क्षेत्रफलस्य साधिका भविष्यति।

ततः पुच्छस्य संक्षेपार्थं "ज-ख" तिर्यङ्मानी रज्ज्वा' "ज- च, ख- ङ" पार्श्वमान्यौ छिन्द्यात्। रज्जुप्रसारणेन तयोन्तरालं योजयेच्च। (एतत् प्रथमचित्रादवगन्तव्यम्) ततः "च-ग-घ-ङ" अतिदीर्घचतुरस्रं सम्पद्यते। तस्य पार्श्वमान्या "ग-घ" तथा "च-ङ" तिर्यङ् मान्यौ अपच्छिन्द्यात्, तेन लघुरूपाणि द्वादशसमचतुरस्राणि जायन्ते। तेषां संक्षेपार्थ षष्ठं चित्रं द्रष्टव्यम्।

---

1. अस्यस्वरूपोपपत्तिज्ञानार्थं चतुर्थीकण्डिकायाः प्रथम सूत्रान्तर्गत द्वितीयचित्रादारभ्य दशमचित्रपर्यन्तं चित्राणि द्रष्टव्यानि।
2. अस्योपपत्तिः तृतीयचित्रादवगन्तव्या।
3. का.शु.सू 2/8

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



चित्र-3



चित्र-4

चित्र-7



चित्र-5



चित्र-6

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पूर्वं प्रथम लघुसमचतुरस्रस्य "च-छ" अक्ष्णयां भुजत्वेन प्रसार्य तत्परिमिता मेव "च-झ" रज्जुं कोटित्वेन परिकल्प्य तयो र्या "झ-छ" अक्ष्णयारज्जुस्तां तिर्यङ्मानीत्वेन परिकल्प्य तदुपरि "झ-ज" पार्श्वमानीत्वेन प्रसारयेत्, तयोः "ज-छ" अक्ष्णयारज्जुर्भवति । ततः तस्याधस्तात् "छ-झ" रज्जुं "छ-ट" तिर्यङ्मानीत्वेन प्रसारयेत् तयोः "ज-ट" अक्ष्णयारज्ज्वा "ट- ज-ण-त" समचतुरस्रं सम्पद्यते, तस्मिन्, लघुरूपाणिद्वादश समचतुरस्राणि संक्षिप्यन्ते । ततः षष्ठचित्रस्थ "ज-ट" अक्ष्णया द्वितीय चित्रस्थ पुच्छस्य "ज" शंकोः सकाशात् "ज-च" पार्श्वमान्यां प्रसारयेत् । लक्षणे "ट'- शंकुं निहन्यात् । "ख" कोणात् "ट"- पर्यन्तं अक्ष्णयारज्जुं प्रसारयेत्, "ख-ट" पुच्छस्य क्षेत्रफलसम्पादिका रज्जुः ।

ततः सप्तमचित्रे--पुच्छस्यक्षेत्रफल सम्पादिकां "ख-ट" रज्जुं क़ोटित्वेन प्रसार्य तदुपरि पक्षयोः क्षेत्रफलसम्पादिकां "ए- ऋ" अक्ष्णया रज्जुंभुजत्वेन प्रसारयेत् । तयोः "क-ट" अक्ष्णयारज्जुः पक्षयोः पुच्छस्य च क्षेत्रफलं सम्पादयिष्यति । तां "क-ट" प्रमाणरज्जुं आत्मनः पश्चिमायां तिर्यङ्मान्यां वायव्यकोणादारभ्य प्रसारयेत् । यत्र स्पर्शः स्यात्तत्र "ट" शंकुं निहन्यात् । आत्मन ऐशान्यकोणा दारभ्य "ट" शंकु पर्यन्तं "ट-ठ" कर्णरज्जुंप्रसारयेत् । सैव "ट-ठ" कर्णरज्जुः सार्द्ध सप्तपुरुषक्षेत्रफलकस्य सम्पादिका विद्यते । एतेनाद्योऽग्नेः सप्तविधस्य समचतुरस्री करणमुक्तम् ।। 1 ।।

द्रोणचितिनिर्माण प्रकारः

एवमग्निमुद्दिश्य क्रमेण तेषां क्षेत्रसमासं विवक्षुर्द्रोणचिदाकारसाधनमाह-

द्राणेयावानग्निः समक्षपुच्छविशेषस्तावत् समचतुरस्रं कृत्वा द्रोणदशमो विभागो वृन्तमित्येके ।। 2 ।।

पक्षौ च पुच्छ ञ्च विशेषश्च पक्षपुच्छविशेषाः तैः सहितः सपक्षपुच्छविशेषः द्रोणे द्रोणाकारे चतुरस्रेऽग्नि क्षेत्रे कर्तव्ये तत्र यावानग्निः पक्षपुच्छविशेषसहितः तावत्क्षेत्रं समचतुरस्रं= समानाऽऽयतविस्तारं कृत्वाद्रोणदशमो विभागः द्रोणस्य दशमो द्रोमदशमः । द्रोणस्य समचतुरस्रस्य यः दशमो विभागः दशमांशः तं वृन्तं कुर्यादित्येक आचार्याः कथयन्ति ।

अयमर्थ-पक्षपुच्छविशेषः सुपर्णचितिः कात्यायनेन प्रत्यपादी । चितिरियं सार्द्धसप्तपुरुषक्षेत्रफलकं विद्यते । सपक्षपुच्छविशेषं सुपर्णचितिं नानाप्रमाणसमासविधिना, समचतुरस्रं विधाय तस्य समचतुरस्रस्य तिर्यङ्मानीं पार्श्वमानीञ्च दशधा विभजेत् । एवमुभयतो दश-दशधा विभक्ते सति, समचतुरस्रं शतांशेन विभक्तं भवति । ततो वृहच्चतुरस्रभुजप्रमाणं पार्श्वमानीकं, तद्दशमांश तिर्यङ् मानीकं यदतिदीर्घचतुरस्रं, तत्समचतुरस्रं सम्पाद्य वृत्ताकारं स्वल्पसमचतुरस्रं वृहच्च तुरस्रे योजनीयमिति ।। 2 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वृन्तनिर्माण प्रकारः

ननु वृन्ताकरं स्वल्पचतुरस्त्रं कथं कुर्यात् ? कुत्र वा योजयेदित्याकाङ्क्षायामाह -

तद्दशमोनोपच्छिद्यापच्छिद्यैकसमासेन समस्य निर्हृत्य, सर्वमग्निं तथाकृतिं कृत्वा पुरस्तात्पश्चाद्वोपदध्यात् ।। 4/3 ।।

तदिति पूर्वोक्त सार्द्धसप्तपुरुषात्मकक्षेत्रफलकस्य बृहत्समचतुरस्रस्य परामर्शकः दशमेन- दशमांशने तिर्यङ्मानीं पार्श्वमानीं च दशधा अपच्छिद्य= विभज्य शतांशीकृत्य बृहच्चतुरस्रप्रमाणकं पार्श्वमानीकं ह्रस्वक्षेत्रप्रमाणकं तिर्यङ् मानीकं, अतिदीर्घचतुरस्त्रं समासेनसमस्य ' "अतिदीर्घ" ञ्चेदित्येक समासविधिना समस्य एकीकृत्य तावत् क्षेत्रफलं समचतुरस्त्रं विधाय, निर्हृत्य ह्रस्व चतुरस्रक्षेत्रफलकं क्षेत्रं बृहच्चतुरस्रात्पृथक्कृत्य सर्वमग्निं= अवशिष्टं सर्व क्षेत्रं तथा कृतिं = द्रोणाकारं समचतुरस्त्रंकृत्वा पुरस्तातः वृहच्चतुरस्रस्य प्राच्यां, पश्चाद्वा= प्रतीच्यां वा, निर्हृतं दशमांशं लघुचतुरस्त्रं वृन्ताकारं उपदध्यात् = स्थापयेदित्यर्थः ।

अयमाशयः- सार्द्धसप्तहस्तक्षेत्रफलकं वृहच्चतुरस्त्रं दशधाविभज्य वृहच्चतुरस्रप्रमाकंपार्श्वामानीकं, क्षेत्रदशांशभूतं तिर्यङ्मानीकं यदतिदीर्घ चतुरस्त्रं तत् "अतिदीर्घञ्चेति" विधिना समचतुरस्त्रं सम्पाद्य बृहच्चतुरस्रात् तावत् प्रमाणकं क्षेत्रं निर्ह्रसेत् । अवशिष्टं क्षेत्रं चतुरस्त्रीकृत्य वृहच्चतुरस्रस्य पुरस्तात् प्रतीच्यां वा ह्रस्वचतुरस्त्रं योजयेत् । इयमेव द्रोणचितिरित्यभिधीयते ।

अस्योपपत्तिः

सपक्षपुच्छविशेषास्याग्नेः समचतुरस्त्रीकरणं पूर्वमेव प्रतिपादितम् । अत्र च वृन्ताधानं प्राप्तमतोऽत्र प्रकरणात्समचतुरस्त्रीकरणं भूयः संक्षेपेणोच्यते ।

"इ-उ-ए-अ" उत्तरपक्षस्य "ए-अ" पार्श्वमान्या तस्य तिर्यङ्मान्योरपच्छेदितयोः सत्योः "अ-आ-ऋ-ए" इत्येकं समचतुरस्त्रं "आ- इ-उ-ऋ" इत्येकं दीर्घचतुरस्त्रं च जायते । दीर्घस्यसमीकरणं चित्रतोऽवगन्तव्यम् । अध्याहृतस्य लघु" चतुरस्रस्य निर्ह्रासः द्वितीय चित्र उच्यते । द्वितीयचित्रस्थ "ण-ड" करण्या तृतीयचित्रं निर्मितम् । तत् उत्तरपक्षस्य "इ-उं-ऋ-आ" दीर्घचतुरस्रस्य क्षेत्रफलेन तुल्यम् । उभयोः संक्षेपार्थं पक्षस्थ "आ-ऋ-ए-अ" समचतुरस्त्रे प्रक्षिप्तम् । उत्तरपक्षस्य "ञ-ए" करणी उत्तरपक्षस्य क्षेत्रफलेन तुल्यं क्षेत्रं सम्पादयिष्यति । एवमेव दक्षिणपक्षस्यापिस्यादतः चतुर्थचित्रे "न-ए" एक करण्या समचतुरस्त्रं कृतं, तस्य "थ-त" अक्ष्णयारज्जुः उभयोः पक्षयोः क्षेत्रफलं सम्पादयिष्यति, समचतुरस्रस्याक्ष्णयारज्जु द्विकरणीत्युक्तत्वात्, "त-थ" करण्या पंचमचित्रे समचतुरस्त्रं साधितम् । तस्मिन् पुच्छस्य क्षेत्रफलसम्पादिका "फ-न" अक्ष्णया विद्यते । पुच्छस्य समचतुरस्त्रीकरणं पुच्छात् षष्ठसप्तमचित्राभ्यां चावगन्तव्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

4/3





चित्र-4



चित्र-5





चित्र-7



CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पंचमचित्रस्य "फ-न" करण्या अष्टमचित्रस्थ "व-भ-म-य" सम चतुरस्रं निर्मितम्। चतुरस्रमिदं पक्षयोः पुच्छस्य च क्षेत्रफलेन तुल्यं विद्यते। तस्मिन् आत्मनः "ट-ठ" करणी "व-म" त्वेन प्रक्षिप्तम् । अतः तस्य "व-म" करण्या यच्चतुरस्रंस्यात्तस्मिन्। आत्मनः पक्षयोः पुच्छस्य च समासः स्यात्। अष्टम चित्रस्थ "व-म" करण्या नवम चित्रस्थ "र-ल-स-ज्ञ" समचतुरस्रं निर्मितं विद्यते । तद्दशधा विभज्य तस्य "औ-स-झ-ओ" अतिदीर्घचतुरस्रं "र-ल-स- झ" दीर्घचतुरस्रस्य दशमांशभूतम्। तत्समचतुरस्री कर्तव्यम्। तद् दशमचित्रादवगन्तव्यम् । "ह-क्ष" प्रथमलघुचतुरस्रस्याक्ष्णया रज्जुः "ह-त्र" अपि तत्परिमितैव । "त्र-क्ष" कर्णरज्जुः चतुर्ण्णां लघुसमचतुरस्राणां क्षेत्रफल सम्पादिका । "त्र-ज्ञ" अपि तत् परिमितत्वात्तयोः "ज्ञ-क्ष" अक्ष्णया अष्टसमचतुरस्राणां क्षेत्रफलसम्पादिका । एकादश चित्रे "क्ष-वा-बूं-ज्ञ" समचतुरस्रं "क्ष-ज्ञ" करण्या निर्मितम्। तस्मिन् दशम चित्रस्थ "ह-क्ष" प्रमाणपरिमिता रज्जुः प्रक्षिप्ताऽतः "हं-बू" करणी दशलघुसमचतुरस्राणां क्षेत्रफलं सम्पादयिष्यति। "हं-बूं" करण्या "हं-खं-क-बूं" समचतुरस्रं द्वादशचित्रे साधितम् । अस्य निर्ह्रासः "र-ल-स-झ" बृहच्चतुरस्राद पेक्षतेऽतस्तत् त्रयोदश चित्रे प्रदर्शितम् । त्रयोदशचित्रस्थ "गं-चं" करण्या चतुर्दशचित्रे "गं-फं-टं-ठं" समचतुरस्रं कर्तव्यम् । अस्यपुरस्तात् द्वादशचित्रे यत्साधितं दशांशभूतं "हं-खं-कं- बूं" चतुरस्रं तत् स्थापनीयम्। एतावता द्रोणचितौ वृन्ताधानप्रकारः साधितः ।। 3।।

मण्डलाकारचितेर्निमाणम्

मण्डलेऽप्येवम् ।। 4/4 ।।

मण्डलाकारायां रथचक्रचितौ कंकचितावपि वृन्ताधानपक्षे, एवं= पूर्ववत् सपक्षुपुच्छविशेषमग्निक्षेत्रमेकसमासेन चतुरस्त्री कृत्य तद्दशमांशं अपहृत्य पुनः चतुरस्रं विधाय बृहच्चतुरस्रं लघुचतुरस्रं च मण्डलं कृत्वा बृहच्चतुरस्रस्य पुरस्तात् पश्चाद् वा लघुचतुरस्रं योजयेत् ।

अस्योपपत्तिर्यथा--पूर्वसूत्रे तु सपक्षपुच्छविशेषस्याग्ने समचतुरस्त्रीकरणमभिहितम्, अथापि वृन्ताधानम्। अत्रेदं वैशिष्टयं यत् पूर्वसूत्रस्य[1] चतुर्दशचित्रे यत् "हं-खं-कं-बूं" वृन्तं (लघुचतुरस्रं) विद्यते। "गं-घं- टं-ठं" यच्चबृहच्चतुरस्रं विद्यते तयोर्मण्डलं विधाय तथैव स्थापनीयमिति । समचतुरस्रस्य मण्डलीकरणं तु पूर्वमभिहितमत्र[2] चित्रमात्रं प्रदर्श्यते । ततो विहरणप्रकारमवगन्तव्यम् ।। 4 ।।

---

1. 3/13 सूत्रोपपत्तिर्द्रष्टव्या ।
2. का.शु.सू. 4/3 सूत्रान्तर्गतचतुर्दश चित्रं द्रष्टव्यम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चित्र-9



चित्र-10





चित्र-11



चित्र-12



चित्र-13



चित्र-14

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

4/4







CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रउगचितिसाधनम्

प्रउगे यावानग्निः सपक्षपुच्छविशेषस्तावद् द्विगुणं समचतुरस्रं कृत्वा यः पुरस्तात्करणीमध्ये शंकुर्यौ च श्रोण्योः सोऽग्निः ।। 4/5 ।।

सपक्षपुच्छविशेषः यावनग्निक्षेत्रं तावत् = तत्परिमितां भूमिं समचतुरस्रं विधाय तस्यकरणीमभ्यस्य तयाकरण्या द्विगुणं सपपुच्छविशेषस्याग्नेः क्षेत्रफलेन तुल्यं यत्समचतुरस्रं भवति तद् द्विगुणक्षेत्रफलकं समचतुरस्रं साभ्यासप्रामाणकरण्या कृत्वा = विधाय तस्य चतुरस्रस्य पुरस्तात् प्राच्यां करणीमध्ये = तिर्यङ्मान्या अर्द्धे शंकुमेकं निहन्यात् । श्रोण्योश्चै कैकं शंकुं निहन्यात् । श्रोण्योः यौ शंकू निखातौ तयोर्मूलात् प्राच्यां तिर्यङ् मान्याः मध्यस्थ शंकुपर्यन्तं रज्जुंप्रसारेयत् । सोऽयमग्निः प्रउग संज्ञकः सम्पन्नः ।

अस्योपपत्तिः--

मन्यतामत्र "ब-भ" सार्द्धसप्तपुरुषक्षेत्रफल सम्पादिका रज्जुः "भ-म" तस्याभ्यासः । "व-म" करण्या चतुरस्रं निर्माणं कृतेसति तत्सार्द्धसप्तपुरुषक्षेत्रफलकस्य समचतुरसस्य द्विगुणक्षेत्रफलं सम्पादयिष्यति । अत्र "व-म" करण्या ' 'क- ख- ग-" घ" समचतुरस्रंनिर्मितम् । तस्य "ग-ख" तिर्यङ् मान्याः मध्ये "च" शंकुं निहन्यात् । "च" शंकोः सकाशात् "घ" तथा "क" शंकुपर्यन्तं रज्जुंप्रसारयेत् । एतेन "क-च-घ" अभीष्ट त्र्यस्रिक्षेत्रं जायते ।। 5 ।।

4/5



उभयतः प्रउगचितिकरणमाह--

उभयतः प्रउगे तावदेव दीर्घचतुरस्रं कृत्वा करणीमध्यग. शंकवः स समाधिः ।। 4/6 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उभयतः प्रउगे त्रिकोणे अग्नौकर्तव्ये तावदेवचतुरस्त्रं कृत्वा, "येन बिना यदनुपपन्नं तत्तेनऽऽक्षिप्यते" इति न्यायेन तावदेव इति शब्दं श्रुत्वा यावच्छ-ब्दमध्याह्रियते। अत्रायमर्थः- यावत्प्रमाणचतुरस्त्रे सपक्षपुच्छविशेषोऽग्निः संक्षिप्यते तावत् प्रमाणं समचतुस्त्रंकृत्वा तस्य पुरस्तात् तत्संलग्नं पुनः समचतुरस्त्रमेकं कुर्यात्। तेन विस्तारद्विगुणं दीर्घचतुरस्त्रं जायते एवभूतं दीर्घचतुरस्त्रं कृत्वा करणी मध्येषु शंकवो निखेयाः । स समाधिः =सोऽयं समाधनोपायः उभयतः प्रउगक्षेत्रस्य ।

अस्योपपत्तिः-

4/6



"ट-ठ-ड-ढ" समचतुरस्त्रं सपक्षपुच्छ विशेषस्याग्नेः क्षेत्रफलेन तुल्यं क्षेत्रं विद्यते । तत्पुरस्तात् "ठ-ण- त-ड" समचतुरस्त्रं तत्सदृशं स्थापनीयम् । एतेन "ट-ख-ण-ढ" विस्तारद्विगुणं दीर्घचतुरस्त्रं जातम् । "ण-त" तिर्यङ् मान्यर्धे "थ" शंकुं निखाय "ट-ढ" तिर्यङ् मान्या अर्धे "द" शंकुं निहन्यात् । ततः "थ" शंकौः "ठ", "ड" शंकुपर्यन्तं रज्जुंप्रसारयेत् । एवं "ठ-ड" शंकोः "द" शंकुपर्यन्तं रज्जुं प्रसारयेत् । ऐतन "द-ठ-थ-ड" उभयतः .उगक्षेत्रं सेत्स्यति ।। 6 ।।

प्रउगस्य चतुरस्रीकरणोपायमाह

प्रउगं चतुरस्त्रं चिकीर्षन्मध्ये प्रांचमपच्छिद्य विपर्यस्येतरत उपाधाय दीर्घचतुरस्त्र समासेन समस्येत्स समाधिः ।। 4/7 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रउगं त्रिकोणं चतुरस्रं चिकीर्षन्, मध्ये त्रिकोणस्य मध्ये समानभागे, प्रांचं-पूर्वभागं तत्रस्थ कोणमित्यर्थः, अपच्छिद्यः = विभज्य, विपर्यस्य = परिवर्तनं कृत्वा, कस्य? त्रिकोणस्यैकस्य ततः किं ? इतरत् = अन्यस्य त्रिकोणस्य, विपरीतदिशि, उपधाय= स्थापित्वा, दीर्घचतुरस्रसमासेन = यथादीर्घचतुरस्रस्य समचतुरस्रं क्रियते तथैव समस्येत = एकीकुर्यात् सः = सोऽयं प्रउगस्य समचतुरस्रीकरणोपायः । अयमाशयः --त्रिकोणं समचतुरस्रंचिकीर्षन् त्रिकोणस्य प्राचःकोणात् अधस्तात्तिर्यङ् मान्यां लम्बमेकं पातयेत् , यथासौ कोणस्यतिर्यङ् मान्याश्च विभाजकः स्यात् । तेन त्रिकोणद्वयं जायते । तयोरेकं विपर्यस्य तथा स्थापयेद् यथा तस्य पश्चिमप्रान्तः पूर्वप्रान्तेन सह मिलेत् । पूर्वप्रान्तश्च पश्चिमप्रान्तेनसह, अपि चोभयोः कर्णः एक एव स्यात् । एतेन दीर्घचतुरस्रमेकं जायते, तस्य दीर्घचतुरस्रस्य पूर्वोप्रकारेण समचतुरस्रं कुर्यात् ।

अस्योपपत्तिः -

अत्र "अ-आ-उ" त्रिकोणं समचतुरस्रं कर्तव्यं विद्यते । अतः "आ" कोणात्

4/7

चित्र-1





चित्र-2



चित्र-3

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

"अ-उ" तिर्यङ्मान्यां "आ-क" लम्बं पातयेत्तेन "अ- आ- क", "क-अ-उ" इति त्र्यस्रिक्षेत्रद्वयं जायते । "अ-आ-क" त्र्यस्रिक्षेत्रं "क- आ-उ" त्र्यस्रिक्षेत्रस्य पुरस्तात्तथास्थापेयत् । येन तत् "उ- आ-घ" रूप्रेण सम्पद्येत । इदानीं "क-आ-घ-उ" दीर्घचतुरस्रमेकं जातम् । अस्यसमचतुरस्रीकरणमपक्ष्यतेऽतः "क-उ" तिर्यङ्मान्यां "क-आ", "उ-घ" पाश्र्वमान्यौ च्छिन्द्यात्, तल्लक्षणे क्रमेण "ख-ग"-शंकू निहन्यात् । तयोः रज्जु प्रासारणेन योजयेच्च । अवशिष्टं "ख-आ-घ-ग" चतुरस्रं "ट-र" रज्ज्वा समं विभज्य "ट-आ-घ-र" चतुरस्रं "क-आ-ग उ" समचतुरस्य दक्षिणस्यां "उ-ग-च-छ" रूपेण स्थापयेत् । "क-ख-ग-उ" ससमचतुरस्रेणसाकं "ख-ट-र-ग" चतुरस्रं संलग्नमेव "ट-र" रज्जुं"छ-च" रज्जुं च, अग्रेसम्बर्ध्य यत्र तयोः स्पर्शः स्यात् तत्र "ज" शंकुं निहन्यात् । इदानीं "क-ट- ज-छ" समचतुरस्रमेकं जातम् । परन्तु तत्र "ग-र-ज-च " लघुसमचतुरस्रमधिकं प्रक्षिप्तं विद्यते । तस्य निर्ह्रासः कर्तव्यः तदर्थं द्वितीयचित्रं द्रष्टव्यम् । द्वितीयचित्रस्य "क-घ" करण्या तृतीयचित्रस्य "घ-न-प-क" समचतुरस्रं निर्मितं विद्यते । इदमेव "अं-आ-उ" प्रउगक्षेत्रस्य क्षेत्रफलेन तुल्यक्षेत्रं विद्यते । अयमेव त्रिभुजस्य , संमचतुरस्रीकरणोपायः ॥ 7 ॥

उभयतः प्रउगस्य चतुरस्रीकरणोपायः

उभयतः प्रउगं चेन्मध्ये तिर्यगपच्छिद्य पूर्ववत् समस्येत् । ॥ 4/8 ॥

4/8

चित्र-1





चित्र-2

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चेत् यदि उभयतः प्रउगं = उभयतः संलग्नत्रिकोणं क्षेत्रं समचतुरस्त्री कर्तुं चिकीर्षेत् तर्हि मध्ये-सदृशांशे तिर्यगपच्छिद्य = कर्णसूत्रेण समं विभज्य पूर्ववत् = पूर्वोक्त[1] प्रकारेण समस्येत् = एकीकुर्यादित्यर्थः। अयंभावः-उभयतः त्र्यस्त्रिक्षेत्रं यदि समचतुरस्त्रं सम्पादयितुमीष्यते तर्हि तयोः उभयपार्श्वे समाने दूरे स्थितयोः कोणयोःछेदः तथा कार्यः यथा तयोः तिर्यङ्मानी रज्ज्वाः अपि समानच्छेदः स्यात्। तेन चत्वारि त्र्यस्त्रिक्षेत्राणि जायन्ते। पूर्वसूत्रवदत्रदीर्घचतुरस्त्रसम्पादनार्थ मेकैकं विपर्यस्य स्थापयेत्। तेनातिदीर्घचतुरस्त्रं जायते। तस्य तिर्यङ्मान्या पार्श्वमान्यौछिन्द्यात्। तेन चत्वारिसमचतुरस्त्राणि जायन्ते। तत्रैकस्य समचतुरस्त्रस्याक्ष्णयारज्जुंपृथक् कोटित्वेन प्रसार्य तदुपरिभुजत्वेन तत्परिमितामेव प्रसारयेत् तयोः या अक्ष्णयारज्जुः सा उभयतः प्रउगक्षेत्रस्य क्षेत्रफलेनतुल्यं स्यादिति ।। 8 ।।

अस्योपपत्तिः-- प्रथमद्वितीय चित्राभ्यामवगन्तव्यम् ।। 8 ।।

एक द्वित्रिपंचकर्णानां समासः

एतेनैव त्रिकर्ण[2] समासो व्याख्यातः पंचकर्णानां च प्रउगेऽपच्छिद्य ।। 4/9।।

एतैनैवोभयतः प्रउगक्षेत्रस्य समचतुरस्त्रीकरण प्रकार कथनेनैव त्रिकर्णसमासः =त्रयाणां कर्णानां समासः एकीकरणं व्याख्यानं कथितम्। पंचकर्णानां = पंचानां कर्णानां प्रउगे त्र्यस्त्रिक्षेत्रे अपच्छिद्य दीर्घचतुरस्त्रं कृत्वा तत्रापच्छिद्यापच्छिद्यैकसमासेन समस्य समचतुरस्त्रं कार्यमितिशेषः।

अत्रेदं तात्पर्यम् -उभयतः प्रउगक्षेत्रस्य समचतुरस्त्रीकरणोपायकथनेन त्रयाणां त्रिकोणानां समासोऽपि व्याख्यातः। त्रिकोणत्रयस्य समासो यथा एकस्याः तिर्यङ् मान्याः उभयतः त्रिकोणं संस्थाप्य पूर्ववत् दीर्घचतुरस्त्रं सम्पाद्य ततः समच-तुरस्त्रं सम्पादयेत्। अवशिष्टैकस्योक्त प्रकारेण दीर्घचतुरस्त्रं विधाय नानाप्रमाणयुक्त्या समचतुरस्त्रं सम्पादयेत्। एवमेव पंचानां, त्र्यस्त्रिक्षेत्राणां समासः कर्तव्यः। तद्यथा-उभयतः प्रउग द्वयं सम्पाद्य ततो दीर्घचतुरस्त्रं कृत्वा समचतुरस्त्रं सम्पादयेत्। अवशिष्टमेकं त्रिकोणं दीर्घचतुरस्त्रं कृत्वा तदपि समचतुरस्त्रं कुर्यात्। ततो नाना-प्रमाणसमास विधिना समचतुरस्त्राण्येकत्र कुर्यादिति दिक्।

---

1. का.शु.सू. 3/3.
2. अत्र कर्णशब्दः त्र्यस्त्रिक्षेत्रवाचकः यतो हि एकस्मिन् त्र्यस्त्रिक्षेत्रे एक एव कर्णः स्यात्। एतावतात्रिकर्णसमास इति कथनेन त्रयाणां त्र्यस्त्रिक्षेत्राणां त्रिभुजानां वा समासः एकीकरणमिति बोधोजायते। एवं पंचकर्णानामित्युक्ते पंचानां त्र्यस्त्रिक्षेत्राणां समास इत्यर्थो निश्चीयते। न च समत्रिभुजे समेषां पंचानां त्र्यस्त्रिक्षेत्राणां समास इत्यर्थो निश्चीयते न च समत्रिभुजे समेषां भुजानां समत्वात् कर्णोनास्तीति वाच्यम्। एकस्य भुजत्वेऽपरस्यकोटित्वे तृतीयस्य कर्णत्वं वलादायाति। अतोऽत्र कर्ण शब्दः त्र्यस्त्रिक्षेत्र परामर्शकः।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्योपपत्तिः-

अत्र पृथक्-पृथक् त्र्यस्रिक्षेत्रत्रयं विद्यते प्रथमचित्रस्याधस्ताद् द्वितीयं



समकर्णानां चतुरस्त्रीकरणम् 4/9

चित्र-1



चित्र-2



चित्र-3

त्र्यस्रिक्षेत्रं संयोज्य पूर्वोक्ताभिः युक्तिभिः समचतुरस्रं सम्पादनीयम् । अत्र चित्रमात्रं प्रदर्श्यते ततोऽवगन्तव्यमिति ।

ननु समत्रिभुजानां त्र्यस्रिक्षेत्राणां मेकीकरणोपायोपदिष्टः समद्विबाहु क्षेत्राणां विषमत्रिकोणांनां च क्षेत्राणां समासः कथंस्यादित्याकाङ्क्षायामाह-

एकर्णानां द्विकर्णानां च समचतुरस्रेऽपच्छेदः ।। 4/10 ।।

एकर्णानां समत्रिभुजानां त्र्यस्रिक्षेत्राणां द्विकर्णानां= समद्विबाहुक्षेत्राणां च कारेण विषमत्रिभुजानां च क्षेत्राणां समचतुरस्रे समचतुरस्रकर्तव्यतामापन्ने सति तान् पूर्वोक्त रीत्या अपच्छिद्य विभज्य यथायोगमुपसंहरेत् । अयमर्थः- यस्य त्रिकोणस्य त्रयोऽपि भुजाः समाः भवेयुः तत् त्रिभुजम् । तदेवात्रैककर्णशब्देन व्यवह्रिते । यस्य त्रिकोणस्य भुजद्वये समेस्यातामन्यश्च भिन्न प्रमाणकश्चेत् तत्सम द्विबाहुकं त्रिकोणं द्विकर्णशब्नोच्यते यस्मिन् त्रिकोणे सर्वे भुजाः भिन्न प्रमाणकाः भवेयुः तद् विषम त्रिकोणं च कारेणांगीकृतम् । एवं भूतानां त्र्यस्रि- क्षेत्राणां समसनं पूर्वोक्त प्रकारेण अपच्छिद्यापच्छिद्य कर्तव्यम् ।

यथा--समत्रिबाहुक्षेत्रस्य चतुरस्त्रीकरणोपायस्तु "प्रउगं चतुरस्रं चिकीर्षन्", "उभयतः प्रउग" चेदित्येताभ्यां सूत्राभ्यामुक्तः । एवमेव समद्विबाहुकस्य क्षेत्रस्य साधनमिति बोध्यम् ।

विषमबाहु त्रिभुजे तु विशेषः-

विषमबाहुत्रिभुजस्य तिर्यङ्मानी बाहुं समं च्छिन्द्यात् । तदुपरि चोपरिष्टात् कोणात् लम्बं पातयेत् तेन विषम त्र्यस्रिक्षेत्रद्वयं जायते । तयोरेकं पूर्ववत् विपर्यस्य स्थापेयत् । तेन नूनं विषमचतुरस्रमेव स्यात् । ततस्तस्य ह्रस्वतरस्य करण्या तस्य पार्श्वमान्यौ तिर्यङ्मान्यौ वा यथासम्भवं छित्वा ... त् । ततस्तेषां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रउगस्य समचतुरस्त्रीकरणोक्त दिशा समचतुरस्त्रं सम्पाद्य नानाप्रमाण समासेन एकीकुर्यादिति विषमत्रिभुजस्य समतुरस्त्रीकरणोपायः ।

अस्योपपत्तिः-

नवमसूत्रस्योपपत्तौ त्रयाणां समत्रिबाहुत्र्यस्त्रिक्षेत्राणां समचतुरस्त्रीसाधनोपायो

समद्विकर्णानांचतुरस्त्रीकरणं पंचकर्णानां च । 4/10



चित्र-1



चित्र-2



चित्र-3

चित्र-5





चित्र-4



चित्र-6

दर्शितः । अत्र दशमसूत्रस्योपपत्तौ विभिन्न प्रमाणानां समद्विबाहुत्र्यस्त्रिक्षेत्राणां समचतुरस्त्रीकरणोपायः प्रदर्श्यते । तत्सर्वं चित्रं दृष्ट्वा स्वमनसैवावगन्तव्यम् । प्रउगस्य समचतुरस्त्रीकरणोपायोऽत्रोह्यम् । पिष्टपेषणभियानात्रोच्यते ।

विशेषश्चात्रोच्यते--अत्र "अ-आ-उ" विषमबाहुकं त्र्यस्रिक्षेत्रं विद्यते । तस्य "आ" कोणात् अधस्तिर्यङ्मान्यां "आ-ए" लम्बं पातयेत् । तत "ए-अ-आ"

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust





त्र्यस्रिक्षेत्रं विपर्यस्य तथा स्थापयेत् येन तत् "उ-आ-ए" रूपेण निष्पन्नं स्यात्। इदानीं "ए-आ-ए-उ" एकं विषमचतुरस्रं जातम्। तस्य "आ-ए" तिर्यङ्मान्या तस्य पार्श्वमान्यौ च्छिन्द्यत्। ततस्तच्चिन्हेषुं रज्जु प्रसारणेन त्र्यसिक्षेत्राण्युत्पादयेत्। तेन तत्र षट्त्र्यस्रिक्षेत्राणि विभिन्न प्रकाराण्युत् पद्यन्ते। तेषां समचतुरस्रीकरणं पूर्वोक्त रीत्या कर्तव्यमिति दिक्॥ 10॥

इति चतुर्थी कण्डिका

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पञ्चमी कण्डिका

पुरुषवृद्धिकथन प्रतिज्ञा

कात्यायनश्रौतसूत्रे हि द्विपुरुषां[1] रज्जुमित्युपक्रम्य तथा पुच्छ [2] मित्यादिभिः सूत्रैः सप्तविधस्य चयनयागस्य विहरणप्रकारणभिहितम् । अतोऽत्र द्वितीयाद्विषु अष्टविधाद्यग्निषु पुरुषाभ्युच्चयं वक्तुमुपक्रमते-

उत्तरेषु पुरुषोच्चयेनैक शंतविधादित्येतद् वक्ष्यामः ।।5/1।।

उत्तरेषु = सार्द्धसप्तपुरुषक्षेत्रफलकस्याद्योऽग्नेरतिरिक्तेषु क्षेत्रेषु पुरुषोच्चयेन = पुरुषस्योच्चयेन वृद्धया, एककैपुरुष वृद्धयाग्निमानं वर्धते । कियत् पर्यन्तमितिचेदाह-आ एकशतविधात् = एकशतपुरुषपर्यन्तम् । यतो हि आद्योऽग्निः सार्द्धसप्तपुरुषक्षोत्रफलकः सप्तविधः। द्वितीयोऽग्निः अष्टविधः, तृतीयो नवविधः, चतुर्थो दशविधः इत्याद्येकशतविधपुरुषपर्यन्तं पंचनवतिः । अश्वमेधे च द्वावन्यौ द्विगुणत्रिगुण संज्ञकौ वक्ष्यमाणौ[3] । एवं सप्तनवतिरग्निचयनभेदाः पुरुषोच्चयेनाभिहिताः । अतस्तस्मिन् विषयेऽत्र वक्ष्यामः कथयिष्यामः ।

अत्र प्रसंगात् आद्योऽग्निः कीदृशः । कथमस्यविहरणप्रकारः किञ्च मानमिति सर्वं जिज्ञास्यपदवीमारोहति । यतो हि चीयमानोऽग्निरभिवर्धते तत्स्वरुपज्ञानमावश्यकमिति कृत्वाऽऽद्योग्नेः सप्तविधस्यात्रस्वरूपोपपत्तिः प्रस्तूयते ।

षट्त्रिंशत्प्राचीं, पश्चात्त्रिंशत् त्रयस्त्रिंशद्वा, पुरस्ताच्चतुर्विंशतीति यत्सौमिकवेदेः प्रमाणमुक्तं तत्रैवसप्तविधस्याग्नेः इष्टकोपधानं[4] भवति । तत्रादौ तन्निर्माणप्रकारो लिख्यते ।

पुरुषद्वयपरिमितां रज्जुमुभयत[5] पाशां गृहीत्वा विहरणार्थं तत्र चिन्हानि कुर्यात् । अयमाशयः-विंशतिशतांगुलः पुरुषः पुरुषद्वयपरिमितामितिकथनेन चत्वारिंशदुत्तरद्विशतांगुलपरिमितां रज्जुंगृहीत्वा चयनक्षेत्रनिर्माणार्थं तत्र चिन्हानि

---

1. का.शु.सू 16/8/1.
2. का.शु.सू 16/8/17.
3. का.शु.सू 5/2,3.
4. श.ब्रा. 10/1/8/8.
5. का.शु.सू 16/8/1.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कुर्यात् । तद्यथा पुरुषद्वयोर्मध्ये चिन्हमेकम् । तत उभयतः अर्द्धपुरुषयोः[1] द्वे चिन्हे । पुरुषद्वयोर्मध्यचिन्हादितरपुरषस्य पंचमांशे पूर्वस्मादारभ्य षड्ढस्ते चतुर्थ चिन्हं कुर्यात् । ततः पुरुष[2] पंचमांशे यल्लक्षणं कृतं तस्यार्धेपंचम[3] चिन्हं कुर्यात् । एवं द्विपुरुषपरिमितायां रज्ज्वां पंचचिन्हानि भवन्ति । अथ तस्याः प्रान्तयोः पाशौ कृत्त्वा यूपावट्यात् पश्चात् चित्यस्य पूर्वार्धे पादमात्रं स्थानं विहाय शंकुमेकं निहन्यात् तस्मिन्[4] पाशमेकं विमुच्यप्रतीचीमाकृष्य यत्र चिन्हं स्पृशेत्तत्र शंकुमेकं निहन्यादित्यादि पूर्वोक्तप्रकारेण सर्वं विहरणजातं सम्पादनीयमिति ।। 11 ।।

अश्वमेधचयने विशेषः

यदुक्तमश्वमेधे द्वावन्यौ द्विगुण[5]-त्रिगुणसंज्ञकाविति तदत्राचार्यो ब्रवीति–

आद्योऽग्निर्द्विगुणस्त्रिगुणो भवतीति सर्वसमासः ।।5/2।।

आद्यः = प्रथमः अग्निः = चीयमानं क्षेत्रं सार्द्धसप्तपुरुषक्षेत्रफलकं भवति । द्विगुणः = द्विगुणक्षेत्रफलकमपि भवति । तच्च "समचतुरस्रस्याक्षणयारज्जुर्द्विकरणी[6] भवतीति" सिद्धान्तमंगीकृतत्वात् सार्द्धसप्तपुरुषक्षेत्रफलकस्य समचतुरस्रस्याक्षणयारज्ज्वा सम्भवति । त्रिगुणः = त्रिगुणक्षेत्रपलकं भवति । तच्च पदं तिर्यङ्मानी[7] त्रिपदापार्श्वमानीति रीत्या सम्पादनीया । सपक्षपुच्छविशेषस्याग्नेः समचतुरस्रीकरणे यत्समचतुरस्रं सम्पद्यते तस्य या क्षणयारज्जुः सैवद्वितीयाग्नेः करणी । ततः सार्द्धसप्तपुरुषक्षेत्रफलकस्य समचतुरस्रस्य करणी तिर्यग् प्रसार्य तदुपरितस्यैकप्रान्ते तस्याक्षणयारज्जुं प्रसारयेत् । तयोर्या कर्णरज्जुः सैव त्रिगुणिताग्नेः करणीति ।

तत्राद्योऽग्निः सार्द्धसप्तपुरुषक्षेफलकः द्विगुणीकृतोऽसौ पंचदशपुरुषात्मकः सम्पद्यते । त्रिगुणीकृतः सार्द्धद्वाविशंति पुरुषात्मको भवतीत्याश्वमेधिक विकल्पाः । तत्र यथा पूर्वाग्नौ द्विपुरुषरज्ज्वा विहरणं कृते सति पुरुषचतुष्टयात्मक आत्मा सेस्त्यति, तथात्रापि द्विपुरुषरज्ज्वा निर्मितचतुरस्रस्य क्षेत्रस्याक्षणयारुपया

1. का.श्रौ.सू 16/8/2.
2. का.श्रौ.सू. 16/8/3.
3. का.श्रौ.सू. 16/8/4.
4. का.श्रौ.सू. 16/8/5,
5. "अद्योऽग्निद्विगुणस्त्रिगुण एकविंशतिविधो वा" अस्यार्थः –आद्योऽग्नौ सार्द्धसप्तपुरुषाः क्षेत्रफलम् । द्विगुणपक्षे स पंचदशपुरुषो भवति । त्रिगुणपक्षे सार्द्ध द्वाविशंतिपुरुषः । एकविशंतिविधपक्षे सार्द्धद्वाविशंतिपुरुषापेक्षया किंचिदधिकं प्रमाणः (का. श्रौ.सू. (20/4/15 इत्यस्यभाष्यम्,)
6. का.शु.सू. 2/12.
7. का.शु.सू. 2/8.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

द्विकरण्यानिर्मितं समचतुरस्त्रं क्षेत्रमष्ट पुरुषात्मकं द्विगुणक्षेत्रस्यात्माभवितुमर्हति । एवं त्रिकरण्या रज्ज्वा निर्मितं समचतुरस्त्रं द्वादशपुरुषात्मकं त्रिगुणक्षेत्रस्यात्मा भवितुमर्हति ।

अतः परं द्विगुणस्त्रिगुणसंज्ञकयोरग्नयोः विहरणजिज्ञासा जायते । अतस्तयोरत्र विरणं प्रकारं यथाशास्त्रं लिखामि ।

सपक्षपुच्छविशेषस्योद्योऽग्नेः नानाप्रमाणसमासविधिना समचतुरस्त्रं सम्पाद्य, तस्य समचतुरस्त्रस्य याऽक्ष्णयारज्जुस्तां करणीं द्विपुरुषात्मिकेति मत्वा तस्यां विहरणार्थ चिन्हानि कुर्यात् । तद्यथा- तत्रादौ रज्ज्वन्तयोः पाशौ कृत्वा मध्येलक्षणं कुर्यात् । तेन प्रमाणरज्जुर्द्विधाऽपच्छिद्यते । तत्राप्येकं भागं सदृशं च्छिन्द्यात्, तेन प्रमाणरज्जुश्चतुभिर्भागैर्विभक्ता भवति । ततो मध्यलक्षणात् प्रतीची भागं पंचधाविभज्य पंचमे लक्षणं कुर्यात् ।

अयंभावः- सपक्षपुच्छविशेषमाद्योऽग्नि र्नानाप्रमाणेन समचतुरस्त्री कृत्य तस्याक्ष्णयारज्जुः द्विपुरुषादधिकत्वेऽपि द्विपुरुषात्मिकेति परिकल्प्य मध्य लक्षणप्रदानेन विभजेत् । तेन तस्या एकैकोभागः पुरुषात्मको जात इति कल्प्यम् । तत्र प्राची प्रतीच्यां प्रसारितायाः रज्ज्वा, पूर्वप्रान्तात् मध्यलक्षणं यावत् एक पुरुषात्मिकां रज्जुं पुनः समानं विभजेदेवं प्रतीची भागमपि । तेनार्द्धपुरुषे चिन्हं भवति । ततः प्रमाणरज्ज्वाः पश्चिमभागे पुरुषप्रमाणे चत्वारि चिन्हानि कुर्यात्, तेन सा रज्जुः पंचधाविभज्यते । पश्चिमप्रान्तादारभ्य पंचमभागस्यारम्भेपक्षयोः निरञ्छनार्थं चिन्हं कुर्यात् यतो ह्यात्मनः स पंचमपुरुषभागेन पक्षयोर्विस्तार उक्तः[1] । प्राग् प्रत्यग्गायामस्तु पुरुष प्रमाणकः, तच्चार्द्धपुरुष लक्षणप्रदानेन साधितः । ततः पंचमभागस्यापि सदृश छेदः कार्यः पुच्छविहरणार्थम् । यतो हि- वितस्त्यधिकपुरुषमाणकं पुच्छमित्युक्तम् ।[2] अथ यूपावटचात् पदमात्रं विहाय शंकुं निखाया तस्मिन्पाशमेकं प्रक्षिप्य प्रतीच्यां रज्जोः पश्चिमप्रान्ते शंकुमेकं निहन्यात् । ततो मध्येऽर्ध पुरुषयोश्चिन्हे चैकैकं शंकुं निहन्यादेवं पृष्ठचायां पंचशंकवो निहिताः भवन्ति । अतः परं आद्योऽग्नेर्विहरणं यथाकृतं तथैवात्रापि कर्तव्यम् ।

अथत्रिगुणक्षेत्रफलक स्याग्नेः विहरणप्रकारमुच्यते ।

अद्योऽग्नेः सार्द्धसप्तपुरुषक्षेत्रफलकस्य करणीं कोटित्वेनप्रसार्य तदुपरि द्विगुणिताग्नेः करणीं भुजत्वेन प्रसारयेत्तयोर्या अक्ष्णयारज्जुः सैवत्रिगुणिताग्नेःकरणी, तत्र पूर्ववद् विहरणार्थं चिन्हानि कुर्यादिति दिक् ।

अस्योपपत्तिः-

मन्यतामत्र "क-ख-ग-घ" समचतुरस्त्रं सपक्षपुच्छविशेषस्याग्नेः

---

1. दक्षिणपार्श्वे पूर्ववदायम्य पंचमभागीये शंकु ।।
(का. श्रौ.सू. 16.8.13).
2. तथा पुच्छं वितस्त्या । (का.श्रौ.सू. 16/8/17.)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सार्द्धसप्तपुरुषक्षेत्रफलकं विद्यते । यतो हि सपक्षपुच्छविशेषमाद्योऽग्निः समचतुरस्त्री कृते सार्द्धसप्तपुरुषक्षेत्रफलको भवति । तत्सर्वं पूर्वमेव विधिवत् प्रतिपादितत्वादत्र प्रसंगात् स्वष्टयितुं प्रकारान्तरेण प्रस्तूयते ।

"क-ख-ग-घ" सार्द्धसप्तपुरुष क्षेत्रफलं विद्येते । तस्य या "घ-ख" अक्षणया रज्जुः सैव द्विगुणिताग्नेः करणी । तया विरहणं कृते सति "घ-ख-ज-झ" समचतुरस्रं सेत्स्यति । तदेव द्विगुणिताग्नेः आत्मा द्विगुणिताग्नेः विहरणार्थं घ-ख रज्जुं द्विपुरुषात्मिकेतिमत्वा तत्र पूर्ववत् चिन्हानि कुर्यात् ।

त्रिगुणिताग्ने र्विहरणम् - सार्द्धसप्तपुरुषक्षेत्रफलकस्य "क-ख-ग-घ" समचतुरस्रस्य "क-ख" करणी द्वितीय चित्रे कोटित्वेन प्रसार्य तदुपरि तस्य "घ-ख" कर्णरज्जुं"क-च" भुजत्वेन प्रसारयेत् । तयो र्या "च-ख" अक्षणयारज्जुः सैव त्रिगुणिताग्नेःप्रमाण रज्जुः । पक्षादीनां विहरणार्थं तत्र पूर्ववत् चिन्हानि कुर्यादिति दिक् ।। 2 ।।

5/2



चित्र-1



चित्र-2

श्रौतसूत्रेह्युक्तम् । आद्योऽग्निर्द्विगुणस्त्रिगुण एक विंशतिविधो वेति । आद्योऽग्निः सार्द्धसप्तपुरुषक्षेत्रफलकः । द्वितीय पंचदशपुरुषक्षेत्रफलकः । त्रिगुणितः सार्द्धद्वाविंशतिपुरुषक्षेत्रफलकः इति । द्वितीयस्तृतीयाग्न्योः क्षेत्रफलन्तु आद्योऽग्निं द्विगुणीं कृते च सेत्स्यति । तुरीयस्य एकविंशतिविधस्याग्नेर्विषये जिज्ञासाजायमानायां सत्यामाह--

एक विंशतिविधस्याग्नेः कथनम्

एकविंशतिविधो भवतीति पुरषाभ्यासः ।। 5/3 ।।

एक विंशतिविधोभवतीति = अश्वमेधे आद्योऽग्नेः एकविंशति क्षेत्रफलको ... । पुरुषाभ्यासः = स पुरुषाभ्यासेन वर्धते इति

CC-0. Public Domain. Vipin Kumar Collection, Deoband.

Digitized by Madhuban Trust

शेषः । प्रत्यग्नावेकैपुरुषं प्रक्षिप्य वर्धनीयः । तद्यथा- सार्द्धसप्तपुरुषक्षेत्रफलकेऽग्नौ पुरुषमेकं प्रक्षिप्ते सति सार्द्धाष्टपुरुषक्षेत्रफलकं भवति । ततो वक्ष्यमाण पुरुषविवृद्धिर्नियमानुसारेण प्राकृतसार्द्धसप्तपुरुषात्मकेऽग्नौ एकैकपुरुषाभ्यासेनाष्ट विधादिषु जायमानेषु चतुर्दशपुरुषाभ्यासेनैकविंशति विधः सम्पादनीयः ।

यथा--सार्द्धसप्तपुरुषात्मकेऽग्नौ एकपुरुषप्रक्षेपेणाष्टविधः, द्विपुरुषाभ्यासेन नवविधः त्रिपुरुषाभ्यासेन दशविधः एवं क्रमेणैकैक पुरुषवृद्धया चतुर्दश पुरुषाभ्यासेन एकविंशशतिविधोऽग्निः सम्पादनीयः ॥ 3 ॥

पुरुषवर्धन प्रकारः

यतो हि पूर्वस्मिन् सूत्रे पुरुषाभ्यासः कथितः । अतोऽत्रपुरुषाभ्यासः कथं करणीय इति जिज्ञासायामाह --

पुरुषाभ्यासे यावानग्निः सपक्षपुच्छविशेषस्तावत्समचतुरस्रं कृत्वा तस्मिन् पुरुषप्रामाणमवदद्ध्यात् ॥ 5/4 ॥

पुरुषाभ्यासे = पुरुषाभ्यासकर्तव्ये, सपक्षपुच्छविशेषः = पक्षश्च पुच्छश्च पक्षपुच्छौ ताभ्यां सहितः सपक्षपुच्छः विशेषशब्देनात्मा गृह्यते । सात्मपक्षपुच्छविशेषो यावनग्निः = यावत् प्रमाणं क्षेत्रं समचतुरस्रं कृत्वा = विधाय तस्मिन् समचतुरस्रे पुरुषप्रमाणाग्निक्षेत्रं अवदध्यात् = स्थापयेत् ।

अयमाशयः-पुरुषाभ्यासमिच्छन् सपक्षपुच्छविशेषाग्निं नानाप्रमाणसमासविधिना समचतुरस्रीकृत्य तयैवदिशा पुरुष प्रमाणं तत्र क्षिपेत् तेन सार्द्धाष्टपुरुषक्षेत्रफलकं समचतुरस्रं भविष्यति । एवमेकः पुरुषाभ्यासः सम्पन्नः । एवमेव द्वित्र्यदि पुरुषाभ्यासप्रकारो बोध्यः ।

अस्योपपत्तिः-

मन्यतामत्र "क-ख-ग-घ" समचतुरस्रं सपक्षपुच्छविशेषस्याद्योऽग्नेः क्षेत्रफलेन तुल्यं विद्यते । अत्र द्वितीयचित्रस्थ "ल-श-ह-व" पुरुषप्रमाणं

5/4





CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रक्षिप्तव्यमतः "ग" कोणात् "ल-व" तिर्यङ्मानीं प्रथमचित्रस्थ "ग-घ" तियङ्मान्यां प्रसार्य "क-ङ" कर्णमुत्पादयेत् । एवं पुरुषाभ्यासः कर्त्तव्यः ।। 4 ।।

प्रक्षिप्त पुरुषमान परीक्षा

द्वितीयेचयने कियान् पुरुषभागः प्रक्षिप्त इत्याशङ्कायां तत्र प्रक्षिप्तं पुरुषमानं पृथग्दर्शयति--

समस्तं पंचदशभागान्कृत्वा द्वावेकसमासेन समस्येत्स पुरुषः ।। 5/5 ।।

समस्तं पुरुषाभ्यासविशिष्टं सार्द्धाष्ट पुरुषक्षेत्रफलकं समचतुरस्रं, पंचदशभागान् कृत्वा= प्राग् प्रत्यग् दक्षिणोदग्वा प्रसारिताभिः रेखाभिः समान पंचदशभागैर्विभज्य तेषु पंचदशभागेषु द्वौ भागौ पृथगुद्धृत्य एकसमासेन = नानाप्रमाण समासेनैकीकृत्य समस्येदेकी कुर्यात् । सपुरुषः = सोऽयं पुरुषसाधनोपायः अयमेव पुरुषः उत्तरत्र चयनेषु वर्धते ।

अयंभावः- सार्द्धाष्टपुरुषक्षेत्रफलकं समचतुरस्रं विहृत्य तस्य पार्श्वमान्यौ तिर्यङ्मान्यौ वा पञ्चदशभागैर्विभजेत् । तेनातिदीर्घ पंचदशचतुरस्राणि जायन्ते । तेषु द्वौभागौ पृथक् नानाप्रमाणसमासेन एकीकृत्य समचतुरस्रं कुर्यात् तदेव पुरुषाप्रमाणकं समचतुरस्रम् । तस्य करण्या सार्द्धसप्तपुरुषक्षेत्रफलकेऽग्नौ नानाप्रमाण समासविधिना पुरुषमेकं प्रक्षिप्य द्वितीय चयनं सम्पादनीयम् ।

अस्योपपत्तिः-

मन्यतां पूर्वसूत्रान्तर्गत प्रथमचित्रस्थ "क-ङ" करण्या अत्र "छ-ङ-प-न" सार्द्धाष्टपुरुषक्षेत्रफलकं समचतुरस्रं कृत्वा तत् प्रागप्रत्यग्गाभिः रेखाभिः पंचदशधा विभजेत् । तस्य प्रथमद्वितीय भागद्वंय समचतुरस्री कर्तव्यम् । ततो भागद्वयं "घ-ङ-च-ज" दीर्घचतुरस्रमेकमितिमत्वा तस्य "छ-ज " तिर्यङ्मान्या "छ-ङ-ज-च" पार्श्वमान्यौ छिन्द्यात् ।. तेन पार्श्वमान्यौ सप्तधापरिछिन्ने भवतः । ततस्तत्तच्चिन्हेभ्यः रज्जु प्रसारणेन सप्तसमचतुरस्रान् सम्पाददयेत् । "ट-ङ-च-ढ" ह्रस्वदीर्घचतुरस्रं चावशिष्यते । ततः समेषामेकत्रसमचतुरस्रीकरणमपेक्ष्यते । तदित्थम् । प्रथमचित्रे प्रथमलघुसमचतुरस्रस्य "छ-झ" कर्णरज्जुं त्रिर्यक् प्रसार्य तस्या उत्तरप्रान्ते तत्परिमितां "छ-ढ" रज्जुं पार्श्वमानीत्वेन प्रसायेत्तयोर्याक्ष्णया रज्जुस्तया यच्चतुरस्रं स्यात्तस्मिन् चत्वारि समचतुस्राणि संक्षेप्स्यन्ति ।

ततोऽवशिष्टं समचतुरस्रत्रयं समसितव्यं तदर्थ "छ-झ" करणीं तिर्यक् प्रसार्य तस्या एकप्रान्ते "झ-ढ" करणीं "झ-ण" रूपेण प्रसारयेत् । "छ-ण" अक्षणया रज्ज्वा यच्चतुरस्रं स्यात्तस्मिन् षट्समचतुरस्राणि संक्षेप्स्यन्ति ।

ततः "छ-ज" करणीं तिर्यक् प्रसार्य तदुपरि "छ-ण" कर्ण रज्जुं"छ- त" पार्श्वमानीत्वेन प्रसारयेत् । तस्य "ज-त" अक्षणयारज्जुः सप्तसमचतुरस्राणि संक्षिप्यन्ते । ततः "ट-ङ-च-ढ" लघुदीर्घचतुरस्रं संक्षेपार्थं तयोरेकस्य "च-ड"

CC-0. Public Domain. Vipin Kumar Collection, Deoband.

Digitized by Madhuban Trust

5/5



चित्र-1



चित्र-2



चित्र-3



चित्र-4



CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



चित्र-5



चित्र-6

कर्ण रज्जुं चतुर्थचित्रे तिर्यङ् मानीत्वेन प्रसार्य तदुपरि तृतीय चित्रस्थ –"ज-त" कर्ण रज्जुं"ड-थ" पार्श्वमानीत्वेन प्रसार्य तयोर्या "च-थ" कर्ण रज्जुस्तया "थ-द-ध-च" समचतुरस्रं कुर्यात् तस्मिन् "ज-छ-ङ-च" दीर्घचतुरस्रं संक्षिपति । "घ-द-घ-च" चतुरस्रं पुरुषप्रमाणं विद्यते । इत्यनेनप्रकारेण द्वितीयादिषु चयनेषु पुरुषप्रमाणं बर्धनीयम् ।

मान्यतां षष्ठचित्रस्थ "भ-म-य-ब" सार्द्धसप्तपुरषक्षेत्रफलकं समचतुरस्रं विद्यते । तस्मिन् "थ-द-ध-च" पुरुषपरिमितं चतुरस्रं प्रक्षेपार्थ पंचमचित्रस्थ "थ-च" तिर्यङ्मानीं षष्ठचित्रस्थ "व-य" तिर्यङ्मान्यां प्रसारयेत्, यत्र स्पृशेत्तत्र "र" शंकुं निहन्यात् । ततः "भ" कोणात् ' 'र" शंकु पर्यन्तं "भ-र" रज्जुं प्रसारयेत् । इयमेव रज्जुः द्वितीयाग्नेरष्टविधस्यकरणी । एषा द्विपुरुषात्मिकाप्रमाणरज्जुरितिमत्वा तत्र विहरणार्थं चिन्हानि कुर्यात् । ततः पूर्वोक्त प्रकारेण द्वितीयाग्नेरष्ट विधस्य विहरणं कृत्वा तृतीयाग्निं करिष्यन् सपक्षेपुच्छविशेषं द्वितीयाग्निं नानाप्रमाणसमासविधिना समचतुरस्त्री कृत्य तत् समचतुरस्रं पंचदशधाविभज्य तेषु भागद्वयं समचतुरस्रं कुर्यात् । तस्य दशमेन पादमात्री, पंचमेनच बृहती भवति ।

अथ तृतीयाग्निमष्ट विधं करिष्यन् –सपक्षपुच्छविशेषं समचतुरस्रं विधाय तस्मिन् पुरुषप्रमाणं चतुरस्रं प्रक्षिप्य तत्करण्या तृतीयाग्निं विरहेत् । एवमन्य त्राप्यूह्यम् ।।5 ।।

इष्टकामानम्

ननु चतुर्थसूत्रे पुरुषप्रक्षेपप्रकार मुक्त्वा पंचमसूत्रे कियान् पुरुषः प्रक्षिप्त इति जिज्ञासां गृहीत्वा पुरुष पृथक्करणोपायो दर्शितः तत्कथमिति चेदाह--

तस्यदशमेन पादमात्री भवति, पञ्चमेन बृहती ।। 5/6 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तस्य = पूर्वसूत्रोक्त युक्त्या पृथक् कृतस्य समचतुरस्रस्य पुरुषाख्यस्य दशमेन दशमांशेन पादमात्री तन्नामेष्टका भवति । तस्य पंचमेन पुरुषपंचमांशेन बृहती तन्नामेष्टका निर्मीयते । अत्रेदं तात्पर्यम् । पुरुषप्रमाण दशांशेन पद्यानिर्मीयते, अर्थात् पुरुषकरण्या कृतस्य समचतुरस्रस्य यः शतांशो भागः तत् परिमिता पादमात्र्येष्टका भवतीत्यर्थः । पुरुषपंचमांशेन अर्थात् पुरुषकरण्या सम्पादितस्य क्षेत्रस्य यः पंचविंशतितमोभागः तत्प्रमाणा बृहतीष्टका भवतीत्यर्थः । अत्र पद्याबृहत्योर्नामग्रहणमन्यासामिष्टकानामपि परामर्शकम् ।

अस्योपपत्तिः-

अत्र "क-ख" पुरुषप्रमाणरज्जुरिति मन्यताम् । तत्र पद्येष्टकानिर्माणार्थं दशचिन्हानि कुर्यात् । अनया "क-ख-ग- घ" समचतुरस्रं कृत्वा तस्य पार्श्वमानी तिर्यङ्मानी च दशधा विभजेत् । तत्तत् चिन्हेभ्यश्च रज्जुप्रसारणेन योजयेच्च तेन "क-ख-ग-घ" समचतुरस्रं शतधाविभक्तं भवति । तस्य "क-ङ- च-छ" प्रमाणेन पद्येष्टकायाः निर्माणं कर्तव्यम् । एवं द्वितीय चित्रे "ज-झ" पुरुषप्रमाणां प्रमाणरज्जुंपंचधा विभज्य तया करण्या "ज-झ-ट-ठ" कृत्वा तस्य पार्श्वमानी तिर्यङ्मान्यौ पंचधा विभजेत् । तेन "ज-झ-ट-ठ" समचतुरस्रं पंचविशंतिभागैः विभज्यते । तस्य "ठ-ड-ढ-ण" प्रमाणेन ब्रहतीष्टका निर्मातव्येति ।। 6 ।।

5/6

चित्र-1



CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चित्र-2



पुरुषवर्धने द्वितीय प्रकारः

पुरुषं वा पंञ्चमेनोभयतोऽपच्छिद्य पञ्चभागान् समस्य तृतीयं निर्हृत्य पुरुषप्रमाणेऽवदध्यादित्यपरम् । ।। 5/7 ।।

पुरुषं = सार्द्धाष्टपुरुषक्षेत्रफलकमग्निक्षेत्रं पुरुषप्रमाणकंमत्वा तस्य पंचमेन= पुरुष पंचमांशेन अपच्छिद्य = विभज्य , तेषु पंचभागान् समस्य= एकीकृत्य, एकीकृत्य सम्पादितं समचतुरस्रं त्रिधाविभज्य तस्य तृतीयं भागं निर्हृत्य पृथक् कृत्य पुरुषप्रमाणे= पुरुषप्रमाणक्षेत्रे अवदध्यात् स्थापयेदितिपुरुषसाधनस्य द्वितीयः प्रकारः ।

अयंभावः- सार्द्धसप्तपुरुषक्षेत्रफलकेऽग्नौ त्रिपुरुषप्रमाणं प्रक्षिप्ते सार्द्धाष्टपुरुषप्रमाणक्षेत्रफलकं समचतुरस्रं भवति । तदेव पुरुषप्रमाणकं मत्वा तस्य पार्श्वमानीं तिर्यङ्मानीं च पंचधा संविभजेत् । तेन समग्रं समचतुरस्रं पञ्चविंशतिधा विभज्यते । तेषु कांश्चित् पंचभागान् एकसमासेन समस्य समचतुरस्रं कुर्यात् , तदपि प्राग्प्रत्यगाभ्यां रेखाभ्यां समंत्रिधाविभजेत् तेषु भागमेकं हित्वाऽवशिष्टं भागद्वयमेकसमासेन समस्य समचतुरस्रं सम्पादयेत् । एतदेवपुरुषप्रमाणं द्वितीय चयने वर्द्धनीयम् । अस्मिन् पक्षेऽपि पुरुषक्षेत्रस्य पंचमेभागे चतुर्विंशत्यंगुलविस्तारं विंशतिशतांगुलदीर्घं चतुरस्रं भवति । तस्मात्ततृतीयभागे निष्कासिते षोडशांगुल विस्तारं विंशति शतांगुलदीर्घक्षेत्रं भवतीति । तावदेवायाति । तस्यदशमेन पादमात्री पंचमेन वृहतीत्याद्युभयत्रापि समानम् ।

अस्योपपत्तिः-

अत्रमन्यतां "क-ख-ग-घ" पुरुषप्रमाणकं समचतुरस्रंम् । तस्य पार्श्वमानी तिर्यङ्मानी च पंचधाविभाजितः। ततस्तस्य "क-ख-ज- ङ" दीर्घचतुरस्रं पंचमांश रुपेण सम्पन्नम् । अस्य समचतुरस्त्रीकरण मपेक्षते । तदर्थं समचतुरस्रस्याक्षणया

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रज्जुर्द्विकरणीति । न्यायमंगीकृतत्वात् "क-च-छ-ङ" समचतुरस्रस्य "च-ङ" अक्ष्णयारज्जुंतिर्यक्[1] प्रसार्य तत् परिमितां "च-झ" रज्जुंपार्श्वमानीत्वेन प्रसार्य तयोः "झ- ङ" कर्णरज्ज्वा यच्चतुरस्रं स्यात्तस्मिन् चत्वारि संक्षिप्यन्ते । ततः "क-ङ" तिर्यङ्मानीं तिर्यक्प्रसार्य[2] "ङ-झ" कर्ण रज्ज्जुं तृतीयचित्रे "क-ट" पार्श्वमानीत्वेन प्रसारयेत् । तयोः "ङ-ट" अक्ष्णया रज्जुः पञ्चलघुसमचतुरस्राणि संक्षेप्स्यति । तया[3] "ङ-ट-ठ-ड" समचतुरस्रं सम्पाद्य (चतुर्थचित्रे) त्रिधाविभजेत् । तेषु भागत्रयेषु "ट-ठ-त-ढ" भागं जह्यात् । अवशिष्टं "ढ-त-थ- ण" तथा "ण-थ-ड-ङ" भागद्वयं नानाप्रमाण समासविधिना समचतुरस्रं कुर्यादित् । तद्यथा --अवशिष्टं भागद्वयं "ढ-त-ड-ङ" इत्येकं दीर्घचतुरस्रं मत्वा तस्य "ढ़-ङ" तिर्यङ्मान्या पार्श्वमान्यावपछिद्य तच्चिन्हे "द", "ध" शंकू निहन्यात् । ततः"ढ-ध-द-ङ" समचतुरस्रमेकं सम्पद्यते । "द-ध-त-ड" दीर्घचतुरस्रमेकं च सम्पद्यते । "ध-त-थ-ह" लघुसमचतुरस्य "ध-थ" कर्णरज्जुंपृथक् पंचमचित्रे तिर्यक्प्रसार्य तदुपरि "ढ-ध- द- ङ" समचतुरस्रस्य "द-ध" करणीं "ध-प" पार्श्वमानीत्वेन प्रसार्य "थ-प" चिन्हयोरन्तरालं "थ-प" रज्जुप्रसारेणन जोयजेत् । "थ-प" करण्यां



चित्र-1



चित्र-2

चित्र-3



चित्र-5



चित्र-4

1. द्वतीयचित्रे ।
2. तृतीयचित्रे ।
3. चतुर्थचित्रे ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कृतं "थ-प-फ-व" समरचतुरस्रं पुरुष प्रमाणकमेवस्यात् । अस्य दशांशेन पद्या, च बृहतीष्टकाभवतीति दिक् ।

ननु यदुक्तं पंचदशभागानित्यत्र, पुरुषप्रमाणकं क्षेत्रं पंचदशधा विभक्ते सति तत्स्यैकैको भागः कियानंगुलात्मकः स्यादित्याकाङ्क्षायामाह--

पंचदशविभागोऽष्टांगुलम् ।। 5/8 ।।

पुरुषकरण्यां पंचदशभागाः कृतायां तस्याः प्रत्येकों भागोऽष्टांगुलात्मको भवति । तद् भाग द्वयं षोडशांगुलविपुलं विंशति शतागुंलदीर्घ क्षेत्रं, तदावापे कृते पुरुषोवर्द्धितो भवति । तस्य दशमो भागः पद्येष्टका, पंचमो भागश्च बृहतीष्टका भवति ।। 8 ।।

अत्र विहरणसौविध्यर्थमगुल्यादीनां लोकप्रसिद्धानां प्रमाणमाह-

पंचारत्निर्दशवितस्तिर्विंशति शतांगुलः पुरुष इत्येतस्माद् द्वादशांगुलपदमिति च ।।5/9 ।।

पंचारत्निः = पंच अरत्नयो मानं यस्य स पंचारत्निः । दशवितस्तयो यस्य स दशवितस्तिः, विशंतिशतागुलं = विंशतिशतमंगुलानि मानं यस्य स विंशतिशतांगुलः एवंभूतः कः पुरुषः । पूर्वोक्तै मनैः पुरुष एवाभिधीयते । अत्रेदं तात्पर्यम् पंचारत्निभिः पुरुषो भवति । द्विवितस्तिको ह्यरत्निः । तस्मात् दशविस्तप्रमाणकोऽपि पुरुषपदवाच्य एव । अथ द्वादशांगुलैः वितस्तिः सम्पद्यते । तर्हि दशविस्तिभिः विंशतिशताङ्गुलयः सम्पद्यन्ते, तस्मादाह विंशतिशंतागुलः पुरुष इति । द्वादशांगुलपदमिति च व्यवहारार्थमुक्तम् । अथवा एवं वक्यव्यं भवति । पूर्वं यो वर्द्धितः पुरुषः उक्तस्तस्य पंचदशांशद्वयरूपं पुरुषप्रमाणचतुरस्रस्य करण्याः पंचमोभागोऽरत्निः, पुरुषकरण्याः दशमांशो वितस्तिः । विंशतिशततमोभागोऽङ गुलम् । पदञ्च द्वादशांगुलमिति विहरणार्थमुक्तम् ।। 9 ।।

अथ पुरुषवर्द्धने तृतीयः प्रकारः

पुरुषं वा सप्तमेनोभयतोऽपच्छिद्य सप्त भागान्त्समस्य सप्तमभागमङ्गुलं निर्हृत्य पुरुषप्रमाणेऽवदध्यादित्यपरम् ।। 5/10 ।।

पुरुषं = कल्पितपुरुषप्रमाणंक्षेत्रं[1] सप्तमेन = स्वसप्तमांशेन उभयतोऽपछिद्य

---

1. सार्द्धाष्टपुरुषक्षेत्रफलमित्यर्थः । वस्तुतस्तु सार्द्धसप्तपुरुषक्षेत्रफलकेऽग्नौ पुरुषमेकं प्रक्षिप्तेसति सार्द्धाष्टपुरुषक्षेत्रफलकं भवति । तदेव पुरुषप्रमाणमिति स्वीकृत्य, तत्र पंचदशभागान् कृत्वा तेषुभागद्वय नाना प्रमाणेन समचतुरस्री कृत्य तद द्वितीयचयने पुरुषप्रमाणमिति । कुण्डं विहरिष्यन्, प्रपदोच्छ्रितस्य वा यजमानस्यमानं समं पंचधाविभज्य, तदपि पुनः चतुर्विंशतिधा सम्भुज्याङ्गुलमानयेत् । हस्तपरिमितं प्रकृतिकुण्डं चतुर्विंत्यंगुलैः क्रियते । द्विहस्तपरिमितं कुण्डं करिष्यन् वचनात् पूर्वोक्तांगुल्या चतुस्त्रिंशागुलपरिमितं दण्डं हस्तपरिमितं मत्वा तं चतुर्विंशतिधा विभजेत् । मेखलादीनां निर्माणार्थम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

= पार्श्वमानीतिर्यङ्मान्योरपछिद्य एकोनपंचाशत् कोष्ठानुत्पाद्य तेषु सप्तभागान् सप्तकोष्ठात्मिकां, अंगुलसप्तमांशसहितसप्तदशांगुल विस्तारां विंशति शतांगुलदीर्घां पुरुषसप्तमांशभूतां दीर्घचतुरस्रस्वरूपां भूमिं समस्य = पुरुषसप्तमांश-रूपान् सप्तभागान् सप्तकरण्यासमचतुरस्रीकृत्य, ससप्तममंगुलं निर्हृत्य = ससप्तम भागेनांगुलसप्तमांशेन सहितमंगुलमेकं सप्तभागं समचतुरस्रादपनीय अवशिष्टं क्षेत्रं पुरुषमाणे अवदध्यान्निक्षिपेत्, अपरं = इदमपरं पुरुषोच्चयविधानमित्यर्थः ।

अयमर्थः- सार्द्धाष्टपुरुक्षेत्रफलकं समचतुरस्रं पुरुषप्रमाणं मत्वा तस्यतिर्यङ् मानीपार्श्वमान्योः सप्तधाऽपछिद्य एकोन पंचाशत्कोष्ठान् सम्पाद्य तेषु सप्तभागान् नाना प्रमाणविधिना समस्य समचतुरस्रीकृत्य तस्मात् ससप्तमांशमगुलमेकं निष्काश्य शेषं समचतुरस्री कृत्य सार्द्धसप्तविधेऽग्नौ निक्षिपेत्, तस्य दशमांशेन पादमात्री, पंचमाशंने च बृहतीति । पुरुषसाधनम् ।

अस्मिन् पक्षेऽपि पूर्ववदेवायाति । यतो हि पुरुषक्षेत्रस्य सप्तमोभागोऽगुलसप्तभागयुक्त सप्तदशांगुलविस्तारं विंशतिशांगुलदीर्घक्षेत्रं , अतः सप्तमे भागेऽगुलेऽपनीते षोडशांगुल विस्तारं शतांगुलदीर्घक्षेत्रमेव शिष्यते । एवं नवविधादिषुचयनेषु सपक्षपुच्छविशेषमग्निं नानाप्रमाणेन समस्य चतुरस्री कृत्य पूर्वोक्त पुरुष पृथक्करण प्रकारत्रयेषु कमपि प्रकारमंगी कृत्य तेन प्रकारेण पुरुषं वर्द्धयेदिति दिक् ।

अस्योपपत्तिः-

मन्यताभ् "क-ख-ग-घ" समचतुरस्रमत्रपुरुषप्रमाणत्वेनोपात्तम् । अस्य सप्तधा विभागः कार्यः। ततस्तस्य सप्तभागान् समसितुं "क-छ- च-ज" ह्रस्वचतुरस्रस्य "क-च" अक्ष्णारज्जु "ठ-ड" रूपेणपृथक्[1] प्रसार्य तदुपरि तत्परिमितां "ठ-ट" रज्जुं पार्श्वमानीत्वेन प्रसारयेत् । तयोर्या "ड-ट" अक्ष्णयारज्जुः सा चत्वारिसमचतुरस्राणि संक्षेप्स्यति । ततस्ततृतीये चित्रे "क- च" कर्णरज्जुपरिमितामेव रज्जु "ण-त" रूपेण तिर्यक्प्रसार्य तदुपरि द्वितीयचित्रस्थ "ड-ट" रज्जुं पार्श्वमानीत्वेन प्रसारयेत्तेन तयोः "त-थ " अक्ष्णया रज्जुः सम्पद्यते । ततोऽवशिष्टमेकं ह्रस्वक्षेत्रं समसितुं ह्रस्वक्षेत्रस्य "क-ज" करणीं तिर्यक्प्रसार्य[2] तदुपरि[3] "त-थ" अक्ष्णया रज्जुं "द-न" पार्श्वमानीत्वेन प्रसार्य , ताभ्यां निष्पन्न "ध-न" अक्ष्णयारज्जुः सप्तभागान् संक्षेप्स्यति । अथ "ध-न" करण्या "प-फ-ब-भ" [4] विहृत्य तस्मात्ससप्तभागमंगुलं निःसारयेत् । तद्यथा-- अंगुलप्रमाणेन सहांगुलसप्तमांशयुक्तां प्रमाणरज्जुं"प-फ" पार्श्वमान्यां प्रसार्य लक्षणे शंकुं "य" निहन्यात् । "व-भ" पार्श्वमान्यां प्रसार्य चिन्हे "म" शंकुं निहन्यात् ।

1. द्वितीयचित्रे ।
2. चतुर्थचित्रे ।
3. तृतीयचित्रस्थ ।
4. पंचमचित्रे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

5/10



चित्र-1



चित्र-2

चित्र-3



चित्र-4





चित्र-5



चित्र-6

तयोरन्तरालं "म-य" रज्जु प्रसारणेन योजयेत्। "प-फ" करणी "य" कोणात् "प-भ" तिर्यङ्मान्यां प्रसारयेत्, यत्रस्पृशेत्तत्र "र" चिन्हं कुर्यात् । ततः "प-र" रज्ज्वा यच्चतुरस्रंस्यात्तत् "प-फ"- व-भ "वृहच्चतुरस्रक्षेत्रफलात् ससप्तमांशोपेतांगुलक्षेत्रफलप्रमाणेन न्यूनं स्यात् । ततः" "प-र" करण्या "स-ल-व-ह" समचतुरस्रं[1] कुर्यात् । इदं "स-ल- व-ह" समचतुरस्रं पुरुष प्रमाणकम् । अस्य दशमांशेन पद्या, पंचमांशेन च बृहती भवति । अस्यमानं पूर्वप्रतिपादितयोः पुरुषयोः प्रमाणेन समं स्यात् ।। 10 ।।

अधिमानस्यपुरुषे प्रक्षेपः

अधिमानभूतानामरत्निवितस्तीनां पुरुषे प्रक्षेपो न कार्य इत्यत्रसहैतुकमाह-

नारत्नि वितस्तीनां समासो विद्यते सङ्ख्यायोगात् ।। 5/11 ।।

नारत्निवितस्तीनां समासो विद्यते = अरत्नि वितस्तीनां च समासः एकीकरणंकृत्वा पुरुषमध्ये प्रक्षेपो न कार्यः । तत्र हेतुमाह-- संख्यायोगादिति चतुर्दशारत्नी दक्षिण पक्ष [2] उपदधाति, चतुर्दशोत्तरे चतुर्दशोत्तरे, चतुर्दश वितस्तीः पुछ उपदधाति " इति श्रुत्या अरत्न्यादिषु वर्द्धनार्थं संख्यायोगः पृथगुच्यते ।

1. षष्ठचित्रे ।
2. श. ब्रा. 10/2/3/12.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अतोऽष्टविधादिष्वग्निक्षेत्रेषु पुरुषोच्चयेनाभ्युच्चयः ।

अयमाशयः --अष्टविधादिषु चयनेषु अरत्निप्रमाणेन पुरुषो न वर्द्धनीयः। यथा ह्युक्तं पंचारत्निर्दशवितस्तिपुरुष इति । अतोऽष्टविधादिषु चयनेषु पंचारत्निभिः दशवितस्तिभिर्वा पुरुष प्रमाणं साधयित्वा,[1] ततो द्विपुरुषां रज्जुमित्यादिपूर्वोक्त नियमेन सपक्षपुच्छविशेषमग्निं निर्माय द्वितीयाग्निं चिकीर्षन् समचतुरस्त्रीकृत्य तस्मिन्नरत्न्यादिना प्रक्षेपेण पुरुषो नैव वर्धनीयः । कुतः सङ्ख्यायोगात् । श्रुतावरत्न्यादिषु प्रमाणेषु वर्द्धनार्थं सङ्ख्या योगः पृथगुक्त त्वात् । पक्षपुच्छादीनां निर्माणावसरे हि तेषां प्रयोजनं न तु पुरुषवर्द्धनेति तात्पर्यम् । अतः सप्तविधोऽष्ट विध इत्यारभ्य आ एकाशत विधपर्यन्तं पुंसामेवोच्चयः नारत्न्यादि समासेनेति निश्चीयते ।

इति पञ्चमी कण्डिका

---

1. का.शु.सू. 5/9.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

षष्ठी कण्डिका

वेदीष्टका वृद्धिकथन प्रतिज्ञा

तत्रेष्टकानां संख्यातावत् एकादशसहस्राणि एकशतं च सप्तत्यधिकं समग्रा इष्टकाः 11170 सन्ति । एतावन्त्येष्टका एवाद्योऽग्नेः सप्तविधादारभ्य आ एकशतविधाग्निपर्यन्तं चीयन्ते । सप्तविधाग्नेरारभ्य आएकशतविधाग्नि पर्यन्तं प्रत्यग्निमिष्टकावर्धनं भवति । परन्तु तासामग्निमानानु प्रमाणेषुवृद्धिर्न तु संख्यया । संख्या तु तासां तावन्त्येव तिष्ठतीति ।

ननु वेदिमानमिष्टकामानं च कथं वर्धत इति जिज्ञासायां यथाग्निवेदीष्टका[1] प्रमाणमिति सूत्रोत्थितामाकाङ्क्षां समाधातुमुपक्रमते–

यथाग्नि वेदीष्टकाप्रमाणं वर्द्धत इत्येतद्वक्ष्यामः ।। 6/1 ।।

यथा येन प्रकारेण वेदीष्टकाप्रमाणं = वेदिश्चेष्टाकाश्चेति वेदीष्टकाःतासां प्रमाणं मानं वर्द्धते । = वृद्धिमेति इत्येतद्वक्ष्यामः इत्येद् वेदीष्टकावृद्धिविषयं वक्ष्यामः कथयिष्यामः ।

अयंभावः–वेदिवृद्धिं विना वर्द्धितस्याग्ने स्तत्रावस्थानस्यासम्भवात् । अवर्द्धिताश्चेष्टकाः वर्द्धिताग्निं पूरयितुं न प्रभवेयुरितिकृत्वा यथावेदेरिष्टकानां च वृद्धिर्भवति, तदत्रब्रूमः इत्याशयः ।। 1 ।।

वेदिवर्द्धनकारः

प्रकृतिभूते सोमे हि षट्त्रिंशत्प्रक्रमां प्राचीमित्यादि प्रमाणनिदर्शन पुरः सरं प्रक्रमैः वेदिमानमभिहितम् । अतोऽत्रापि प्रक्रमेणैव वेदिमानमभिहितम् । अतोऽ त्रापि प्रक्रमेणैव वेदिवर्धनं भवतीति चरमे चयने प्रक्रममानमाह––

या करणी चतुर्दशप्रक्रमान्त्सक्षिपति त्रींश्च प्रक्रमसप्तभागान्त्स एक शतविधे प्रक्रमः ।। 6/2 ।।

या करणी रज्जुः चतुर्दशप्रक्रमान् संक्षिपति = चतुर्दशप्रक्रमपरिमितं क्षेत्रं संक्षिपति = एकीकरोति चकारेण अपि च त्रीन् प्रक्रमसप्तभागान्, प्रक्रमस्य सप्तभागाः प्रक्रमसप्तभागाः तेषु त्रीन् भागान् संक्षिपति सैव करणी एकशतविधे = अन्तिमे

---

1. का.शू.सू. 6/1

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

चयने प्रक्रमः प्रक्रमरूपेणावगन्तव्या । अत्रेदमुच्यते -- प्रकमद्वयतिर्यङ् मानीकं सप्तप्रक्रमपार्श्वमानीकं दीर्घचतुरस्रं चतुर्दशप्रकमक्षेत्रफलकं विधाय समचतुरस्री कुर्यात् । तत्समचतुरस्रमपि चतुर्दशप्रक्रमक्षेत्रफलकं विधाय समचतुरस्री कुर्यात् । तत्समचतुरस्रमपि चतुर्दशक्षेत्रफलकं स्यात् । एवं प्रक्रमपरिमितं क्षेत्रं सप्तधाविभज्य तेषुसप्तमभागेषु त्रीन् सप्तभागन् नानाप्रमाणसमासविधिना समस्य चतुरस्रीकृत्य तस्य समचतुरस्रस्य या करणी तां चतुर्दशप्रक्रमक्षेफलके समचतुरस्रे नानाप्रमाणसमाविधाना क्षिपेत् । ततोऽनयोः समचतुरस्रयोः समासे या करणी सा चतुर्दशप्रक्रमान्त्रीश्चं प्रक्रमसप्तभागान् संक्षिपति । अतः सैव करणी एक शतविधेऽग्नौ प्रक्रमत्वेन प्रयुक्ता भविष्यति ।

"पदंतिर्यङ्मानी त्रिपदापार्श्वमानी तस्याक्षणयारज्जुर्जर्दशकरणी"[1] ति न्यायवदत्रापि द्विप्रक्रमा तिर्यङ्मानी सप्तप्रक्रमा च पार्श्वमानी तस्याक्षणयारज्जुश्चचतुर्दशकरणी नूनं भविष्यति । अतस्तथा कृत्वा - चतुर्दश प्रक्रममितया करण्या चतुर्दश क्षेत्रफलकमेव समचतुरस्रं सम्पादयेत् । ततो "अग्नौतु त्रिपदं कुर्यात्य[2] नुशासनात् त्रिपदपरिमितं समचतुरस्रं निर्माय तस्य पार्श्व मान्यौतिर्यङ्मान्यौ वा सप्तधाविभज्य चिन्हयोरन्तरालं रज्जुप्रसारणेन योजयेच्च । ततस्तेषु सप्तभागेषु भागत्रयं त्रिकरण्या समचतुरस्रं कुर्यात् या करणी त्रीन् भागान् संक्षिपति तां चतुर्दशप्रक्रमक्षेत्रफलके समचतुरस्रे क्षिपेत्, तयो र्या अक्ष्णयारज्जुः सा चतुर्दश प्रक्रमान् त्रीश्चं प्रक्रमसप्तभागान् संक्षेप्स्यति । अथ सैव रज्जुः शतविधेऽग्नौ प्रक्रमो भविष्यति । तेन प्रक्रमेण प्रकृतिवेवद्दिः साध्या, पूर्ववत् षट्त्रिंशत्प्रक्रमां प्राचीमित्याद्युक्त रीत्या।

यथा - त्रिपदकरण्या सम्पादितस्य समचतुरस्रस्य यः सप्तमोऽशःषट्त्रिंशदगुंलाऽऽ यामोंऽगुलसप्तमाशं सहितपंचागुलिवस्तारो भूभागः तावत् प्रमाणकं भागद्वंय तेन संयोजिते सति तत्क्षेत्रं विस्तारेऽगुलत्रिसप्तभागोपेतं पंचदशांगुलात्मकं, आयामे- षट्त्रिंशदंगुलात्मक ञ्च दीर्घचतुरस्रं भवति । तच्छास्त्रोक्त दिशा समचतुरस्रं कुर्यात् । तेन या करणी सप्तभागत्रयान् सक्षिपति तां सचतुर्दशप्रक्रमत्रिपदान् संक्षिपति समचतुरस्रे नानाप्रमाणाणसमास विधिना संक्षिपेत् । तयो र्या करणी सैकशतविधे चयने प्रक्रमपदवाच्या । तेन प्रकृतवद्वेदिः कर्तव्येत्यनेन एकशतविधे चयने वेदिवृद्धिरुक्ता ।

अथाग्निवृद्धिरुच्यते-

पूर्वमग्निक्षेत्रं सार्द्धसप्तपुरुषात्मकं समचतुरस्रीकृतं स्वसप्तमांशेन द्वितीयचयने वर्द्धयेत् एवं तृतीयादिष्वपि एकैकोच्चयेन ससप्तमभागवृद्धिः । तृतीये द्वौ सप्तमभागावधिकौ चतुर्थे त्रयः, पंचमे चत्वारः, षष्ठे- पंच, सप्तमे षट्, अष्टमे

---

1. का.शु.सू. 2/8
2. का.श्लो.शु. 34

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रथमक्षेत्रस्य द्विकरणी । एवं क्रमेण पञ्चनवतितमे चयने चतुर्नवतिः सप्तभागाः वर्द्धन्ते ।

तत्साधनोपायस्त्वत्र प्रदर्श्यते--

प्रथमचयने पद्येष्टकाप्रमाणेन चतुर्दश समचतुरस्राण्येकत्रविलिख्य तान् नानाप्रमाणसमासविधिना समचतुरस्री कुर्यात् । ततस्तत् समचतुरस्रं सप्तधा विभज्य तेषुभागत्रयं त्रिकरण्या एकत्र समस्येत् । तत्करणी च चतुर्दशकरणीके समचतुरस्रे नानाप्रमाणसमासविधिना क्षिपेत् । तयोर्याकरणी सा एकशतविधेऽग्नौ पद्ये ष्टकायाः करणी । तादृग्भिः करणीभिः यत्प्रमाणकंक्षेत्रं संक्षिप्यते तदेव शतविधेऽग्नौ पुरुषप्रमाणम् । तद्द्विगुणं कृत्वा द्विपुरुषांरज्जुमि[1] इत्यादि कल्पोक्त विधिनाऽऽत्मपुच्छादिकं साध्यम् ।

अस्योपपत्तिः-

अ-आ-इ-उ प्रक्रमप्रमाणकं क्षेत्रम् । तत्र सप्तभागान् कृत्वाभागत्रयमेकत्र कृते सति अ-आ-क-घ दीर्घचतुरस्रं भवति । अ-आ-क-घ दीर्घ चतुरस्रस्य भागत्रयमेकस्मिन् समचतुरस्रे संक्षिप्तव्यम् । तदर्थं तस्य अ-घ तिर्यङ्मान्या घ-क तथा अ- आ पार्श्वमान्यौ छिन्द्यात् । तत्र लक्षणेषु शंकवो निखेयाः । एतेन अ-ऐ-ए-घ तथा ए-ऐ-ओ-औ समचतुरस्रद्वयमथ ओ-आ-क-औ दीर्घचतुरस्रमेकं चोत्पद्यते। ततः सर्वानेकस्मिन् समचतुरस्रे सम्पादयितुं आदौ ओ-आ-क-औ दीर्घचतुरस्रं तस्य औ- क पार्श्वमान्या तिर्यङ्मान्यौ छिन्द्यात्, तेन त्रीणि समचतुरस्राणि जायन्ते । तेषु ख-ग-क-औ समचतुरस्रस्य क-औ पार्श्वमानीं द्वितीय चित्रे क-औ रूपेण तिर्यक् प्रसारयेत् । ततः क-ख अक्ष्णया रज्जुं तदुपरि क-च पार्श्वमानीत्वेन प्रसारयेत्, तेन निष्पन्ना औ-च अक्ष्णया रज्जुः त्रीणि ह्रस्वसमचतुरस्राणि संक्षिपति । ततः तृतीयचित्रे औ-च अक्ष्णया तिर्यक्प्रसार्य तदुपरि अ-ऐ-ए-घ समचतुरस्रस्य अ- ए कर्णरज्जुं औ-छ रूपेण प्रसारेयेत्तयोर्या च-छ अक्ष्णया रज्जुस्तया च-छ-ज-झ समचतुरस्रं चतुर्थचित्रे सम्पादयेत् । इदमेव समचतुरस्रं प्रक्रमसप्तभागेषु भागत्रयान् संक्षिपति ।

ततः पंचमचित्रे चतुर्दशकरणी साधनार्थं ञ-ट करणीं तिर्यक् प्रसार्य तदुपरि ञ-ठ सप्तकरणीं पार्श्वमानीत्वेन प्रसारयेत् । तस्य ट-ठ अक्ष्णया रज्जुश्चतुर्दशकरणी तया ट -ठ-ड-ढ समचतुरस्रं निष्पाद्य तस्मिन् चतुर्थचित्रस्थ च-छ -ज-झ समचतुरस्रं आवपेत् । तद्यथा-लघुसमचतुरस्रस्य च-छ करणीं गृहीत्वा ट-ठ-ड-ढ वृहत्समचतुरस्रस्य ठ कोणात् आरभ्यप्रसारयेत् । यत्र स्पृशेत्तत्र "त्र" शंकुं निखाय ड कोणात् "त्र" शंकुपर्यन्त ड-त्र कर्णरज्जुंप्रसारयेत् । इयमेवैकशतविधे चयने प्रक्रमपदवाच्या । अनया प्रकृति वद्वेदी निर्मातव्या ।

---

1. का.श्रौ.सू. 16/8/1.

CC-0.In Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

6/2



चित्र-1

चित्र-2





चित्र-3



चित्र-5



चित्र-4



चित्र-7



चित्र-6

CC-0. Public Domain. Vipin Kumar Collection, Deoband

 Digitized by Madhuban Trust

अथैकशतविधचयने पुरुषवृद्धिरुच्यते -

मन्यतां सप्तमचित्रस्थ "त-थ-द-ण" अतिदीर्घचतुरस्रं विद्यते । यस्मिन् चतुर्दशसमचतुरस्राणि प्रथमचयन पद्येष्टका मानोपेतानि मिथः संश्लिष्टानि विद्यन्ते । एषां समचतुरस्रीकरणमावश्यकम् । "अतः" त-ध-न-ण" लघुसमचुतरस्रस्य याक्ष्णया रज्जुस्तां अष्टमचित्रे "ण-ध" रूपेण तिर्यक्प्रसार्य तत्परिमितामेवरज्जुंतदुपरि "ण-प" पार्श्वमानीत्वेन प्रसारयेत् । ततः "प-ध" कर्णरज्जुंनवमचित्रेतिर्यक् प्रसार्य तदुपरि तत्परिमितामेवरज्जुं"ध-फ" रूपेण प्रसारयेत् तयो र्या "प-फ" अक्ष्णयारज्जुः सा अष्टौ लघुमचतुरस्राणि संक्षेप्स्यति । ततः "ध-प" तिर्यङ् मानीरज्जुं दशमचित्रे "प- व" रूपेण प्रसार्य तदुपरि अष्टमचित्रस्थ "प-फ" कर्णरज्जुं "प- फ" पार्श्वमानीत्वेन प्रसारयेत् आभ्यां निष्पन्ना - "फ-व"

6/2



CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अक्ष्णयारज्ज्वा यच्चतुरस्रं स्यात्तत् द्वादशसमचतुरस्राणि संक्षेप्स्यति । इदानीं द्वे क्षेत्रेऽवशिष्यते । अतः एकादशचित्रे "ण-घ" अक्ष्णया रज्जुं "फ-भ" तिर्यङ्मानी त्वेन प्रसार्य दतुपरि दशमचित्रस्थ "व- फ" अक्ष्णयारज्जुं "फ-व" पार्श्वमानी त्वेन प्रसार्य ताभ्यां निष्पन्ना "व-भ"- अक्ष्णयारज्ज्वा यत् "व-भ-म-य"- समचतुरस्रं भवति तस्मिन् लघुरुपाणि चतुर्दशसमचतुरस्राणि संक्षिप्यन्ते । ततः "व-भ-म-य" समचतुरस्रं सप्तधा विभज्य तेषु भागत्रयमेकत्रस्थापिते सति "भ-म-ह-र" दीर्घचतुरस्रं जायते। अस्यसमचतुरस्रीकरणमावश्यकम् । "भ-र" तिर्यङ्मान्या "भ-म", "र- ह" पार्श्वमान्योरपछिद्य "र-ह" पार्श्वमान्या "ल-ष" शंकुद्वयं निहन्यात् । "भ-म" पार्श्वमान्यां च "श-वं" शंकुद्वयं निहन्यात् । तेन "र-भ-श-ल, ल-श-व-ष" चेतिसमचतुरस्रद्वयं "व-म-ह-ष" दीर्घचतुरस्रमेकं च जायते । ततः समचतुरस्रीकरणार्थ "स क्ष-ह-ष" लघुसमचतुरस्रस्य "ह-ष" लघुसमचतुरस्रस्य "ह-ष" करणीं त्रयोदशतमे चित्रे "का-खा" रूपेण तिर्यक् प्रसार्य तदुपरि तस्य "स-ह" अक्ष्णायारज्जु" "का-गा" पार्श्वमानीत्वेन प्रसारयेत् । तयोः "खा-गा" कर्णरज्जुंचतुर्दशचित्रे "घा-चा" तिर्यङ्मानीत्वेन प्रसार्य तदुपरि "भ-श-ल-र" समचतुरस्रस्य "भ- ल" अक्ष्णया रज्जुं"घा-छा" पार्श्वमानीत्वेन प्रसारयेत् तेन तयोः "चा-छा" अक्ष्णयारज्जुः सम्पद्यते । अथ -"व-भ-म-य" समचतुरस्रे "चा-छा" कर्णरज्जुः प्रक्षिप्तव्यम् । तदर्थं मयात्र पंचदशचित्रे "व-म-भ-य"- समचतुरस्रेणतुल्यं "डा-ढा-णा-ता" समचतुरस्रंकृतम् । तस्य "डा" कोणात् "चा- छा" प्रमाणरज्जुंतिर्यक् प्रसारयेत् । यत्र स्पर्शः स्यात्तत्र "था" शंकुं निहन्यात् "ढां" कोणात् था शंकुंपर्यन्त "ढा-था" रज्जुंप्रसारयेत् । "ढा-था" करणी प्रमाणेन पृथक् षोडशचित्रे "चा-छा-जा-झा" समचतुरस्रं कुर्यात् "चा-छा- जा-झा" चतुरस्रप्रमाणके मिथः संश्लिष्टाभिः दशाभिः समचतुरस्रैः एकः पुरुषः सम्पद्यते । तद्द्विगुणप्रमाणां रज्जुमित्वा एक शतविधस्याग्नेः पक्षपुच्छादीन् विहर्तव्यमित्येकशविधेऽग्नौ प्रक्रममानं, पुरुषप्रमाणं पद्येष्टकाप्रमाणं च सर्वं सुस्पष्टमभिहितम् ।। 2 ।।

द्वितीयचयने प्रक्रममानम्

अथ द्वितीयचयने प्रक्रममानं कियत्स्यादित्याकाङ्क्षायमाह-

द्वितीये वा सप्तसुप्रक्रमेषु प्रक्रममवधाय तस्य सप्तमभागेनप्रक्रमार्थः ।।6/3।।

द्वितीये = द्वितीयेचयने, सप्तसुप्रक्रमेषु = प्रक्रमप्रमाणेषु सप्तसु समचतुरस्रेषु शास्त्रोक्त दिशा अवधाय = निक्षिप्य, तस्य = वर्द्धितक्षेत्रस्य सप्तमभागेन वर्द्धितक्षेत्रं सप्तधाविभज्य तेषु भागमेकं समचतुरस्रीकृते सति तस्य_या करणीरज्जुः तया विहरणं कुर्यात् । सा प्रक्रमार्था = द्वितीयेचयने प्रक्रमत्वेनप्रयोज्यः। अयमर्थः- प्रक्रमपरिमितानि सप्तसमचतुरस्राण्येकत्र समचतुरस्रीकृत्य तस्मिन् प्रक्रममेकं नाना प्रमाणसमासविधिना प्रक्षिप्य वर्द्धितकरण्यासमचतुरस्रं कृत्वा तस्य सप्तधा विभागः कार्यः । तेषु भागमेकं समचतुरस्रीं कुर्यात् । तथा वर्द्धितसमचतुरस्रस्य

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust



CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सप्तमांशभूत करण्याद्वितीयचयने वेदिः निर्मातव्या सा प्रक्रमपदवाच्येत्यर्थः ।

अस्योपपत्तिः-

अत्र "अ-आ-इ-उ" अतिदीर्घचतुरस्रं विद्यते । यत्र सप्तप्रक्रमपरिमितानि समचतुरस्राणि मिथः संश्लिष्टानिसन्ति, एतेषां समचतुरस्रीकरणमावश्यकम् । अतः "अ- आ-इ-ए" समचतुरस्रस्य "आ-ए" अक्ष्णया रज्जुं द्वितीयचित्रे "आ- ए" रूपेण तिर्यक् प्रसार्य तत् परिमितामेवरज्जुंतदुपरि "आ-ऐ" पार्श्वमानी त्वेन प्रसारयेत् । तयोः "ए-ऐ" अक्ष्णयारज्जुः तदुपरि "आ-रे" पार्श्वमानीत्वेन प्रसारयेत् । तयोः "ए-ऐ" अक्ष्णयारज्जुः चतुर्णां समचतुरस्राणां सम्पादिका भविष्यति । ततः तृतीयचित्रे "आ-ए" अक्ष्णयारज्जुं तिर्यक् प्रसार्य तदुपरिद्वितीय चित्रस्थ "ए-ऐ" कर्णरज्जुं"आ-औ" पार्श्वमानीत्वेन प्रसार्य तदधस्तात् "अ-आ-ऋ-ए" समचतुरस्रस्य "अ-आ" तिर्यङ् मानीं प्रसारयेत् । तयोः "अ-औ" अक्ष्णया रज्जुः प्रक्रमपरिमितान् सप्तसमचतुरस्रान् संक्षेप्स्यति । अतस्तया "अ-औ-क-ख" समचतुरस्रं विलिख्य तस्मिन् प्रक्रमपरिमितं समचतुरस्रं तस्य करणीभूतां "अ-आ" रज्जुं "औ" कोणात् प्रसारयेत् । यत्र स्पृशेत्तत्र "ग"-शंकुं निहन्यात् । ततः "क" कोणात् "ग" शंकुपर्यन्तं "क-ग" रज्जुं प्रसारयेत् । एतेन सप्तप्रकम समचतुरस्रेषु प्रक्रमेकं क्षिप्तम् । ततः "क-ग" करण्या षष्ठचित्रे "क-ग-घ-ङ" समचतुरस्रं कृत्वा तं सप्तधा विभजेत् "च-ग-घ-छ" भागं "अतिदीर्घ ञ्चे" तिप्रकारेण समचतुरस्रं कर्तव्यम् । तद्यथा- "च-ग-घ-छ" दीर्घचतुरस्रस्य "च-ग" तिर्यङ्मान्या तस्य पार्श्वमान्यौपछिन्द्यात् तेन तस्मिन् सप्तभागाः । ततः "च-ग-ज-झ" समचतुरस्रस्य "ग-झ" अक्ष्णयारज्जुं सप्तमचित्रे "झ-ग" तिर्यङ् मानीत्वेन प्रसार्य तदुपरि तत्परिमितामेव "ग-ञ" पार्श्वमानीत्वेन स्थापयेत् । तयोरक्ष्णया रज्जुः अष्टमचित्रे "ग-ट-झ" त्रिभुजे "ग-ट" पार्श्वमानीत्वेन प्रसारिता "ग-झ" तिर्यङ्मानीत्वेन प्रसारिता च । एतेन अष्टमचित्रे "झ-ट" अक्ष्णयारज्जुर्जाता । षष्ठ चित्रस्थ तिर्यङ्मानीं नवमचित्रे तथैव प्रसार्य तदुपरि "झ-ट" कर्णरज्जुं "ग-ठ" पार्श्वमानीत्वेन प्रसारयेत् "च-ठ" अक्ष्णयारज्जुः "च-ग- घ-छ" दीर्घचतुरस्रान्तर्गत लघुरूपाणि सप्तसमचतुरस्राणि संक्षेप्स्यति । इयमेव द्वितीयचयने प्रक्रमरुपेणव्यवहार्या ।। 3 ।।

एवं द्वितीयचयने प्रकारान्तरेण प्रक्रममानं विवक्षुराह--

प्रक्रमेण वा ससप्तमभागेन प्रक्रमार्थः ।। 6/4 ।।

वेति पक्षान्तरे अथवा प्रक्रमेण = प्रक्रमप्रमाणक्षेत्रमानेन सप्तमभागेन = प्रक्रमस्य सप्तमोभागः प्रक्रमसप्तभागः तेन युक्तेन यत्प्रमाणं तत् प्रक्रमार्थः = द्वितीयचयने प्रक्रमरूपेण व्यवहार्यः ।

अयंभावः-- त्रिपदप्रमाणेन समचतुरस्रमेकं कृत्वा तत् सप्तधाविभज्य, तेषुभागमेकं नानाप्रमाणमासविधिना समचतुरस्रीकृत्य प्रक्रमप्रमाण क्षेत्रेऽवदध्यादिति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अस्योपपत्तिः--

"ण-त-थ-द" प्रक्रमप्रमाणं समचतुरस्रं विद्यते । तस्य "ध-ण- त-न"



चित्र-1 चित्र-2 चित्र-3 चित्र-4

सप्तमांभागः । तस्य समचतुरस्रीकरणार्थं "ण-ध" तिर्यङ्मान्यां तस्य पार्श्वमान्यौ छिन्द्यात् । तेन सप्तधा विभक्तं भवित । "ध-ण-फ-प" लघुचतुरस्रस्य "ण-प" अक्ष्णयारज्जुं प्रथमचित्रे तिर्यक् प्रसार्य तदुपरितत्परिमितामेवरज्जुं "ण-क" पार्श्वमानीत्वेन प्रसारयेत् । तयोः "क-प" अक्ष्णया रज्जुंद्वितीयचित्रे "ण-न" पार्श्वमानीत्वेन प्रसार्य तस्याः अधस्तात् "ण-प" तिर्यङ्मानीं प्रसारयेत् । तयोः "न-प" अक्ष्णारज्जुत्वेन निष्पद्यते । तृतीयचित्रे "ण- ध" तिर्यङ्मानीं प्रसार्य तदुपरि द्वितीय चित्रस्थ "प-न" अक्ष्णया रज्जुं "ण-भ" पार्श्वमनीत्वेन प्रसारयेत् तयोः "भ-ध" अक्ष्णयारज्जुः लघुरूपाणि सप्त चतुरस्राणि संक्षेप्स्यति । ततः "ध-भ" करणीं "स-भ-म-य" प्रक्रमप्रमाणेक्षेत्रेऽवदध्यात् । तद्यथा- "ध-भ" "रज्जुं "भ" कोणादारभ्य "भ-स" तिर्यङ्मान्यां प्रसारयेत्, यत्रस्पृशेत्तत्र "र" शंकुं निहन्यात् । "म" कोणात् "र" शंकुपर्यन्तं "म-र" रज्जुंप्रसारयेत् । सैव द्वितीय चयने प्रक्रमरूपा । तया प्रकृति वद्वेदिः निर्मातव्या ।। 4 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एक शतविधेऽग्नौ प्रक्रमः

एवमेवैक शतविधात् ।। 6/5 ।।

एवमेव = यथोक्तमष्टविधे द्वितीये चयने सप्तमांशवृद्धेः प्रकारः तथैव, आ एकशतविधात् = नवविधादेकशतविधचयनपर्यन्तं, एवमेवाभ्यस्तसप्तमांश वृद्धिः प्रक्रमेद्रष्टव्या । चतुर्नवतिसप्तमांशेषु प्रक्रमक्षिप्तेषु एकशतविधे प्रक्रमोभवति ।। 5 ।।

अन्तः पात्यगार्हपत्योर्वृद्धिर्न

अन्तः पात्यगार्हपत्ययोर्वृद्धि र्न कर्तव्येत्यत्राह--

नान्तः पात्यगार्हपत्ययोर्वृद्धिर्भवति, तावदेवयोनिर्भवति न वै जातं गर्भं योनिरनुवर्द्धत इतिश्रुतेर्वृद्धेरत्यन्तप्रतिषेधः ।। 6/6 ।।

द्वितीयादिचयनेषु प्रक्रमवृद्धिवद् अन्तः पात्यगार्हपत्ययोः वृद्धिर्नभवति । कुतः ? श्रुतौ प्रतिषेधात् । तर्हि का हिसा सा श्रुतिः । उच्यते- "न वै जातमिति" श्रुतिवचनात्, वृद्धेः अन्तः पात्यगार्हपत्ययोः वृद्धेः अत्यन्त-प्रतिषेधः इति१।

---

1. तद्धैके उत्तरा विधा विधास्यन्त एतांश्चप्रक्रमान् एवं च व्याममनुवर्द्धयन्ति । योनिमनुवर्धयाम इति । न तथा कुर्यात् । "न वैजातं गर्भं योनिरनुवर्धते यावद्वा योनावन्तर्गर्भो भवति तावदेव योनिर्वर्धत एतावत्तु वा अत्र गर्भस्यवृद्धिः ।" (श.ब्रा. 10/2/3/6.)
अथ सायणः- अथ यथा सप्तविधस्य प्राकृताग्नेर्व्यामैकादशः प्रक्रमाः एवमष्टविध नवविधादिपुरुषप्रमाणानामेकशतविधपुरुषपर्यन्तामग्नीनां व्यामैकादशप्रक्रमा प्राकृती वेदिः किं पुरुष संख्यया वर्धयितव्या उताहोस्विन्न वेति संशयं व्युदसितुं पूर्वपक्षयति-तद्धैक इति । उत्तराविधाः अष्टविधाद्येकशतपर्यन्तानग्निप्रकारान् विधास्यन्तः एतान् प्रक्रमान् गार्हपत्यात् प्राचः सप्त, आहवनीयपूर्वार्द्धात् प्राचः त्रीन् आहवनीय वक्लृप्तमेकं, व्यामं च अनुवर्धयन्ति ।
तत्र हेतुः -योनिमनुवर्धयाम इति । अष्टविधाद्यग्निमहावेदीनां योनिभूतवेदिवृद्धिं विना वृद्धिः कर्तुं न युक्तेत्यतो हेतोः योनिं वर्धयाम इति वदन्तएकेआचार्याः योनिभूतवेदिं पुरुषसंख्यया वर्धयन्तीति पूर्वः पक्षः।
तं पक्षं दूषयति न तथा कुर्यादिति । हेतुमाह-"न वै जातं गर्भमिति । लोके उत्पन्नगर्भमनुलक्ष्य योनि र्नवर्द्धते किन्तु गर्भो वर्धमानो यावान् भवति तावती, योनिर्वर्द्धते गर्भ स्वतोऽपसारयितुम् । तर्हि तदा गर्भो योनौ वर्धमानो बहुधावर्धतामित्याशंक्याह- एतावत्तु वा । अनेनैतदुक्तं भवति । अग्निः गर्भः स हि सप्तपुरुष प्रमाण एव प्राकृतेऽष्टविधादीनामपि भवति । जातस्यैव तस्याष्ट विधादिरूपेण वृद्धिः । अतस्तस्य योनिभूतावेदिर्व्यामैकादशप्रक्रम मात्रैव । अत उत्तरा सु विधास्वापि गर्भस्यैकरुपेण तद् वृद्ध्यभावाद् योनिर्नवर्धते । अत उत्तरेष्वग्निषु योनिभूता वेदि र्न वर्धयितव्येतितात्पर्यम् ।।
श.ब्रा. 10/2/3/6 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयमर्थः- उख्याग्निस्थाने कृता व्याममात्रविस्तारा मण्डलाकारागार्हपत्यचितिर्गार्हपत्यशब्देनोच्यते[1] तस्मात् पूर्वात् वेद्यन्तपर्यन्तं प्रक्रम त्रय परिमितो भूभागोऽन्तःपात्यशब्देनोच्यते[2] । अग्नौ तु त्रिपदं कुर्यादि[3] त्यनुशासनादत्र[4] चयने प्रक्रमस्त्रिपदः । द्वितीयादिष्वग्निषु प्रक्रमप्रमाणवृद्ध्या वेदीष्टकावृद्धिवत् तयोरपि वृद्धिः प्राप्ता, परन्तु सा निषिद्धयते । कुतः? श्रुतौ अन्तः पात्यगार्हपत्यौ अग्नेर्योनित्वेनोक्त त्वात् तावत् प्रमाणं क्षेत्रं योनिर्भवति । अस्तु नाम योनिभूतं तत्क्षेत्रं वृद्धिः कथं वार्यते ? आह-न वै जातमिति । वै इति निश्चयार्थे । जातंगर्भमनु=गर्भोत्पत्तेः पश्चात् योनिः न वर्द्धते । यावद्योनौ गर्भ स्थितः तावद् गर्भवृद्ध्यनुसारेण योनिवर्धते । गर्भोत्पत्यन्तरं गर्भ एव वर्धते न योनिः । इति श्रुत्या उक्त त्वात् अन्तः पात्यगार्हपत्यचित्योरत्यन्तं वृद्धि प्रतिषेधः ।। 6 ।।

एकाधिकानां समचतुरस्राणां समास प्रकारः

तुल्यप्रमाणानां द्वित्रादिपरार्द्धान्तानां समचतुरस्राणां द्विकरण्याद्युपायेन समासविधिरुक्त स्तस्य दुष्करत्वात् सुगमोपायेन करणीमाह-

यावत्प्रमाणानि समचतुररस्राण्येकीकर्तुं चिकीषेदेकोनानि तानि भवन्ति तिर्यग्द्विगुणान्येकत एकाधिक ानियस्त्रिर्भवति तस्येषुस्तत्क रोति ।। 6/7 ।।

यावत् प्रमाणानि= यावत् संख्याकानि समचतुरस्राणि= समप्रमाणानिचतुरस्राणि एकीकर्तुं= एकस्मिन्मसमचतुरस्रे संक्षेप्तुं चिकीर्षेत् = कर्तुमिच्छेत्, एकोनानि = एकसंख्यया ऊनानि तानि समचतुरस्राणि मिथः संश्लिष्टानि स्थापितानि एकस्यां रेखायां स्थितानि भवन्ति । तां रेखां तिर्यक्= तिर्यङ्मानीत्वेन, द्विगुणानि =द्विगुणीकृत्य प्रसार्य, एकाधिकानि = अभीष्टचतुरस्रेभ्यः एकमधिकं समचतुरस्रं संयोज्य सर्वाण्येकस्यां पंक्तौस्थापयेत् । तेषां या आधार रेखा तां द्विगुणिततिर्यङ्मान्याः पार्श्वयोः- तथा प्रसारयेत् यथा तयोरग्रभागौ एकस्मिन् केन्द्र विन्दौ पर्यवस्येताम् । तेन त्र्यस्त्रिर्भवति= तथा कृते सति एकं त्र्यस्त्रिक्षेत्रमुत्पद्यते । तस्येषुः = इषुवत् स्थिता मध्यरेखा तस्यार्द्ध प्रमाणं तत्करोति= तानभीष्टसमचतुरस्रान् एकस्मिन् समचतुरस्रे सम्पादयति ।

---

1. उख्यस्थानेऽर्द्धयामेन गार्हपत्यस्य परिलिखति ।। (का. श्रौ.सू. 16/7/29.)
2. सौमिकविहारे अन्तर्मध्ये पात्यते संचरणार्थमुत्सृज्यते । सोऽन्तः पात्यशब्देनोच्यते ।
3. का.श्लो.शु. 34
4. सैषावेदेर्योनिः । एतस्यै वै योनेर्देवा वेदिं प्राजनयन्नथ य एष व्यामः सा योनेरेतस्यै वै योनेर्देवा गार्हपत्यं प्राजनयन् गार्हपत्या दाहवनीयम् । श.ब्रा.10/2/3/3/) ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अयमर्थः- यावत् संख्यकानि समचतुरस्राण्येकत्रसम्पादयितुमिच्छेत् तेषु चतुरस्रमेकं विहाय अवशिष्टान् समचतुरस्रान् एकस्यां पंक्तौ ऋजु स्थापयेत्। तषां या आधारभूतारेखा तां द्विगुणीकृत्य तिर्यङ्मानीत्वेन पृथक्प्रसारयेत्। ततोऽभीष्टसमचतुरस्रैः सह एकमधिकं समचतुरस्रं संयोज्य तथैवैकस्यां पंक्तौ ऋजुस्थापयेत्। तेषामाधारभूता या रेखा पूर्व प्रसारितायाः तिर्यङ्मानी रेखायाः प्रान्तयोः तथा प्रसारयेत् येनैकं त्र्यस्रिक्षेत्रं स्यात्। ततस्तस्य केन्द्रविन्दोः सकाशादधस्तिर्यङ्मान्याः मध्यविदुपर्यन्तं लम्बं प्रसारयेत्। तस्यापि सदृश्छेदः कार्यः। तेनास्यलम्बस्य मध्यचिन्हान्मूलपर्यन्तं यावत् प्रमाणारज्जुस्तया यत्क्षेत्रं स्यात्तस्मिन्नभीष्ट समचतुरस्राणि संक्षिप्यन्ते।

यथा -सर्वतो द्विहस्तप्रमाणेन विस्तृतानि षट्समचतुरस्राण्येकस्मिन् समचतुरस्रे समसितव्यानि विद्यन्ते। असस्तेषु पंचसमचतुरस्राण्येकस्यां पक्तौ स्थापयेत्। तेनैषामाधार भूतारेखा दशहस्तात्मिका जाता। तां द्विगुणीकृत्य विंशतिहस्तपरिमितां रज्जुंपृथक् तिर्यङ्मानी त्वेन प्रसारयेत्। तत् एकाधिकानी त्युक्त त्वात्, चतुर्दशहस्तपरिमितां द्विगुणीकृत्य मध्यलक्षण लक्षितां उभयतः सपाशां, पूर्वप्रसारितायाः विंशतिहस्तपरिमितायाः रज्ज्वाः उभयप्रान्तस्थ शंक्वोः एकैकं पाशं नियम्य मध्यलक्षणं धृत्वा प्राच्यांप्रत्याकृषेत्। यत्रमध्यलक्षणंस्पृशेत्तत्र शंकुमेकं निहन्यात्। एतेन त्र्यसिक्षेत्रमेकं जायते। तस्यशीर्षविन्दोः अधस्तात्तिर्यङ्मान्युपरि लम्बमेकं पातयेत् येनोभयोः सदृशच्छेदः स्यात्। ततस्तस्य लम्बस्यापि समानभागः कार्यः। तस्यैकभागपरिमितयारज्ज्वा यच्चतुरस्रं स्यात्तस्मिन् षट्समचतुरस्राणि संक्षिप्यन्ते।

अस्योपपत्तिः-

अत्र षढ्ढस्तपरिमितानि समचतुरस्राणेयकस्मिन् समचतुरस्रे समसितव्यानि सन्ति। तेषामाधार रेखा "क-ख" विद्यते एतेषु एकं समचतुरस्रं विहायावशिष्टानां समचतुररस्राणामाधाररेखा "क- ग" विद्यते। तद् द्विगुणं कृत्वान्यत्र "क-च" तियङ्मानीत्वेन प्रसारिता, तस्याः मध्यविन्दुः "ग" अस्ति। ततोऽभीष्टैः षट्समचतुरस्रैः सह समचतुरस्रकरणीपरिमितां रज्जुंयोजयेत्। तेन "क-ख" आधाररज्जुः "ख-घ" भागेन वर्धते। तस्याः "ख-घ" वर्द्धितो भागः। अथ "क-घ" रज्जुंद्विगुणी कृत्य तन्मध्येलक्षणं कुर्यात्। ततोऽन्तयोः पाशौकृत्वा पाशमेकं "क" शंकावासंज्यापरं पाशं "च" शंकावासंजयेत्। मध्यलक्षणेन प्राचीं प्रत्याकृष्य तल्लक्षणे शंकुं निहन्यात्। ततः ' "छ" कोणात् अधस्तात्तिर्यङ्मान्याः विन्दुपर्यन्तं "ग-छ" लम्बं प्रसारयेत्। तन्मध्ये "ज" चिन्हं कुर्यात्। इदानीं ' "ग ज" प्रमाणरज्ज्वा "ग-ज-झ-ट" समचतुरस्रं सम्पादयेत्। तत्र षद् समचरतुस्राणि प्रक्षिप्तानि भविष्यन्तीति ॥ 7 ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

6/7



चित्र-1



चित्र-2

यूपैकादशिन्यां वेदिवर्धनप्रकारः

ज्योतिष्टोमे क्रतुपशुरेकः सवनीयाख्यः स्तोमायनसंज्ञकोविहितः[१] तेन सह-एकादशपशवोऽपि[२] विकल्पेन विहिताः। तत्र यदि पश्वेकादशिनी पक्षः स्वीक्रियते चेत् तर्हिं यूपा अपि एकादशसंख्यकाः कर्तव्याः। एवं च पश्वेका दशिनीपक्षेऽपि एकस्मिन्नेव यूपे एकादशोऽपिपशवो योजनीया उत प्रतिपशु मेकैको यूपः कर्तव्यः? तत्र यदि यूपैकदशिनी क्रियते तदा यूपानामन्तरालदेशः कियान् इत्याकाङ्क्षायामाह– "यूपैकादशिनी चेद्रथाक्षमात्राण्यन्तराणि"[३] इति। यदि यूपैकादशिनीपक्षः स्वीक्रियते तर्हियूपानामन्तरालानि रथाक्षमात्राणि कर्तव्यानि। "तच्च-चतुःशतमक्ष"[४] इत्यनेनाभिहितम्। चतुरधिकशतमंगुलयो रथाक्षशब्देनोच्यते। तावन्मात्रयूपानामन्तरालो भवतीत्यर्थः। यूपावटस्यद्वादशांगुलपरिमितत्वात् एवं चैकैकस्यापि यूपान्तरालस्य चतुरधिकशतांगुलपरिमितं सर्वं मिलित्वा विंशत्यंगुलैरधिका अष्टचत्वारिंशदरत्नयो भवन्ति। परन्तु पूर्वविमितायाः वेद्या प्राच्यंशः चतुर्विंशति प्रक्रमात्मिकैवेति एतावत् परिमाणे तावतां सन्निवेशो न

1. का.श्रौ.सू. 9.8.6.
2. का.श्रौ.सू. 9.8.4
3. का.श्रौ.सू. 8/8/6
4. का.शु.सू. 2/3

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

स्यादिति वेदिर्वधनीयैव । एतदेव तत्र सूत्रकारः स्वयंवक्ष्यति "यथा यूपं वेदिर्वर्द्धनमिति"[1]।

अथवा "पूर्वार्द्धं वा संमंविभज्य"[2] इत्येनेन वेदिर्नवर्धनीयेत्यभिधीयते । अस्मिन् पक्षे वेदेः पूर्वभागं चतुर्विंशत्यरत्निपरिमितमेकादशधा समं विभज्य तत्रैकादशयूपानां निखननमित्यर्थो व्यवतिष्ठते ।

तत्र वेदिवर्धनपक्षे प्रक्रमः कियान् स्यादिति तत्रनोक्त मतस्तत्सर्वमत्र प्रतिपिपादयिषया प्रतिजानीते-

यथायूपं वेदिवर्धनमित्येतद्वक्ष्यामः ।। 6/8 ।।

कल्पकारेण यदुक्तं यथा यूपं वेदिवर्धनमिति तदत्रब्रूमः । यथा यूपशब्देन वेदेः पूर्वभागेद्वादशांगुलवृत्तमेकादशयूपानां रथौर्यमुच्यते । चतुरधिकशतांगुलप्रमितानि रथाक्षमात्राणिदशयूपान्तरालानि च यथा भवन्ति तथा वेदिः सम्पादनीया । वेदिवर्धनं विना "अन्तर्वेदिंमिनोति"[3] इत्ययमर्थोऽन्यथा कृतः स्थात् । कतिपययूपानां वेद्यसंस्पर्शात् ।। 8 ।।

यूपैकादशिन्यां प्रक्रममानम्

प्रतिज्ञातं वेदिप्रमाणम् । तच्च प्रक्रमसाध्यम् । अतो युपैकादशिनीपक्षे यूपानां रथाक्षमात्रान्तरालेन वेदिसाधनार्थं प्रक्रमप्रमाणमाह -

या रज्जुरेकादशोपरवान्त्संक्षिपति दश च रथाक्षांस्तस्याः यश्चुर्विंशो भागः स प्रक्रमः ।। 6/9 ।।

या रज्जुरेकादशोपखान् = या प्रमाणरज्जुः एकादशसंख्यकान् उपरवान्[4] यूपगर्तान् द्वादशांगुलप्रमाणान् संक्षिपति= एकीकरोति । च= अथापि च दशरथाक्षान् = दशसंख्यकान् रथाक्षान् = चतुरधिकशतांगुलप्रमाणान् संक्षिपति तस्याः = प्रमाणरज्ज्वाः यः चतुर्विंशोभागः = चतुर्विंशतितमो भागः सः यूपैकादशिनीपक्षे प्रक्रमपदवाच्यः ।

एतेनेदं फलितम्-एकादशोपखान् दशरथाक्षान् च विंशत्यंगुलाधिकाष्टचत्वारिंशदरत्निमिता (48 ह. 20 अं.) प्रमाणरज्जुः संक्षिपति । तस्याश्चतुर्विंशोभागः तृतीयभागसहितमेकमर्द्धाङ्गुलं द्वावरत्नी च स प्रक्रमः । अंगुल- तृतीयांशोपेतार्द्धांगुलं द्वौ अरत्नी प्रमाणो भागः यूपैकादशिनी पेक्षे प्रक्रमपद वाच्यः । तेन वेदिमानं कुर्यादिति ।। 9 ।।

तेन वेदिं निर्मायं द्वाद्वशांगुलं पुरस्तादपच्छिद्य तद्यूपावटयाच्छंकोः पुरस्तात्प्रांचमवधाय तस्मिन्यूपान्मिनोति ।। 6/10 ।।

1. का.श्रौ.सू. 8/8/21.
2. का.श्रौ.सू. 8/8/7.
3. का.शु.सू. पृ. 47
4. अत्रोपरवशब्देन यूपार्थ खनितो गर्त्त उच्यते ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तेन प्रक्रमप्रमाणेन "षट्त्रिंशत् प्रक्रमांप्राचीमि" त्याद्युक्त रीत्या वेदिं निर्माय सौमिकं वेदिं विरचय्य द्वादशांगुलं पुरस्तादपछिद्य= वेद्याः पुरस्तात् असंसमीपे द्वादशांगुल प्रमाणेनापच्छिद्य द्वादशांगुलविस्तारं द्वासप्तत्यधिकैकादशशतांगुलमित मतिदीर्घचतुरस्त्ररूपं दक्षिणोत्तराऽऽयतं वेदिक्षेत्रं छित्वा तछिन्नं भागं यूपावट्यात् = यूपावटे यूपगर्तेभवः यूपावट्यः, तस्मात् शंकोः कीलात् पुरस्तात् = प्राच्यां प्राचं = पूर्वापराऽऽयतं अवधाय= संयोज्य तस्मिन् = छिन्ने पूर्वपरतया संयोजिते वेदिभागे रथाक्ष = रथाक्षमात्रान्तरालान् गर्तान् खात्वा तेषु प्राक्संस्थान्यूपान् मिनोति । एवं कृते एकादशायूपा वेद्यन्तरे निवेशिताः स्युः । प्राची च यूपपंक्तिः, कृताभवति । इति पूर्वः पक्षः ।। 10 ।।

अथ सिद्धान्तमाह-

पार्श्वयोर्वार्द्धमन्तर्वेदीति श्रुतेरर्धकान् ।। 6/11 ।।

अत्र वा शब्दः पक्षव्यावृत्यै पार्श्वयोः = यूपावट्याच्छंको दक्षिणोत्तरभागयोः उत्तरदक्षिणभागयोर्वा, अर्धकान्-अर्धानर्धान्, पंचपंचसंख्यकान् एकैक क्रमेण यूपान् मिनुयात् न पूर्वभागे । पार्श्वयोरर्धकानित्युक्ते मध्यमे यूपावटे प्रथमोऽर्थात् सिद्धः । एवमेकादशसंख्यकान् यूपान् रथाक्षप्रमाणेन व्यवधानेन निखनेत् । न च पूर्वोक्त प्रकारेण । वेद्यपच्छेदं कृत्वा पूर्वाऽपराऽऽयतं स्थापयेत् । कुत ? "अर्द्धमन्तर्वेदीति"[1] श्रुतेः वचनात् यूपस्यार्द्धमन्तर्वेद्यां तिष्ठति, अर्द्धञ्च वहिरिति शाखान्तरश्रुतेः ।

अत्रेदंतात्पर्यम् -पार्श्वयोर्वार्धमन्तर्वेदीति श्रुतिवचनात् पूर्वोक्त सूत्रप्रकारेण यूपानां स्थापनं न कर्तव्यम् । ननु सूत्र वैयर्थ्यमिति चेन्न । अस्ति तीव्रसुत्संज्ञको यागः तत्र यूपस्थापनं तथा भवति नात्र ।

अत्र तु यूपैकादशिनीपक्षे "यारज्जुरिति"[2] पूर्वसूत्रोक्त प्रक्रममानेन वेदिं निर्माय तस्य पूर्वस्यां मध्ये प्रथम यूपं निखाय तस्य तक्षिणादुत्तराच्च पंच-पंचयूपाः चतुः शतमंगुलात्मकमवकाशं विहाय, यूपस्यार्द्ध वेद्यामर्द्धञ्च वहिः यथास्यात्तथा क्रमेण निखेयाः । तत्क्रमश्चैवम्-वेदेः पूर्वार्द्धर्यशंकुस्थाने प्रथमं मध्यमंयूपावटं विलिख्य, ततस्तस्योत्तरं यूपावटं लिखेत् । अथवा मध्यमं परिलिख्य तस्माद्दक्षिणं यूपावटं परिलिखेत् इतरान् नवयूपावटान् व्यत्यस्य व्यत्यस्य परिलिखेदिति सूत्रार्थो भवति ।

अत्रोत्तरं वेति पक्षे प्रथमं मध्यमं परिलिख्य तस्मादुत्तरं द्वितीयम् । मध्यमाद्दक्षिणं तृतीयम् . द्वितीयादुत्तरं चतुर्थम् । तृतीयाद्दक्षिणं पंचमम् । चतुर्थादुत्तरं

---

1. का.श्रौ.सू. 22/9/15, अस्तितीव्रसुदभिधानः कश्चिद्यागः । तत्रयूपैका दशिनीपक्षं यागान्तरवद्दक्षिणोत्तरा यूपपंक्तिर्नभवति, किन्तु पूर्वाऽपराऽऽयताभवति । तथानिष्ठ एवान्तर्वेद्यर्द्धगतो भवति । अन्ये तु वहिर्वेदिगता वचनाद् भवन्ति । अतश्च तद........वेद्यपच्छेदो न कार्य इति राम चन्द्रवाजपेयिप्रभृतयः ।
2. का.शु.सू. 6/9.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

षष्ठम् । पञ्चमाद्दक्षिणं सप्तमम् । षष्ठादुत्तरं अष्टमम् । सप्तमाद्दक्षिणं नवमम् । अष्टमादुत्तरं दशमम् । नवमाद् दक्षिणमेकादशम् ।

दक्षिणं वेतिपक्षे तु मध्यमं परिलिख्य तद्दक्षिणं द्वितीयम् मध्यमादुत्तरं तृतीयम् । द्वितीयाद्दक्षिणं चतुर्थं, तृतीययादुत्तरं पंचमम् । चतुर्थाद्दक्षिणं षष्ठम् । पंचमादुत्तरं सप्तम् । षष्ठाद्दक्षिणमष्टमम् । सप्तमादुत्तरं नवमम् । अष्टमाद्दक्षिणं दशमम् । नवमादुत्तरेमेकादशमिति ।

तत्रापि "वर्षिष्ठो दक्षिणोऽनुपूर्वा इतर"[1]... इत्यनुशासनात् यूपानां मध्ये दक्षिणोयूपः दीर्घतमः स्यात् । ततः क्रमशोन्यूनाभवेयुः । सर्वदक्षिणोयूपः वर्शिष्ठः तदपेक्ष्यया तदुत्तरो हीनः । तदपेक्ष्यया तदुत्तरो हीनः एवमेकादशोयूपः सर्वनिकृष्टः कार्यः एवं च मध्यमं परिलिख्योत्तरं परिलिखेदित्यस्मिन् पक्षे एकविंशत्यरत्निः, तदुत्तरो विंशत्यरत्निः । मध्यमाद्दक्षिणो द्वाविशंत्यरत्निः । चतुर्थः 19 अरत्निः पंचमः 23 अरत्निः षष्ठः 18 अरत्निः । सप्तमः 24 अरत्निः । अष्टमः 17 अरत्निः । नवमः 25 अरत्निः दशमः । 16 अरत्निः एकादशः षड्विशारत्निरिति ।

दक्षिणं वेत्यस्मिन् पक्षे-मध्यमः21 अरत्निः। मध्यमाद्दक्षिणो द्वाविंशारत्निः । मध्यमादुत्तरः 20 अरत्निः । चतुर्थः 23 अरत्निः । पंचमः 19 अरत्निः षष्ठः 24 अरत्निः । सप्तमः 18 अरत्निः । अष्टमः 25 अरत्निः । नवमः 17 अरत्निः । दशमः 26 अरत्निः । एकादशः षोढशारत्निरिति एवं च यूपैकादशिन्यां पंचारत्निः पंचदशपर्यन्तः सोमे इत्यस्य अपरिमितपक्षस्यैव प्राप्तया ह्रासस्य च अरत्निवशेनैव कर्तव्यतया सर्वदक्षिणो यूपः षड्विंशात्निपरिमाणकः, तत उत्तरः पंचविशंत्यरत्निप्रमाणकः एवं रीत्या एकैकेनारत्निना न्यूना यूपा इति कृत्वा अन्तिम एकादशोयूपः षोडशारत्निपरिमितो भवतीति दक्षिणोत्तर यूप साधन पक्ष उक्तः ।

अथ तीव्रसुति प्रागपरा यूपसाधनपक्षे क्रम उच्यते । अस्तिकश्चित्तीव्रसुन्नमाको यागः तत्रापि यूपैकाशिनी भवति । "तीव्रसुत्यग्निष्ठःप्राचीचे" ति वचनात् तत्राऽग्निष्ठो यूपो वर्षिष्ठो भवति । आहवनीय स्यपुरस्तादवस्थितो यूपोऽग्निष्ठ इत्युच्यते । इतरे च क्रमशोन्यूनाः । तत्र तेषां यूपानां प्राक्संस्था कर्तव्या । एवं सति अग्निष्ठो यूप एव प्रथमो भवति । ततः प्राच्यां दशयूपाः निखेयाः। ते च क्रमेणाग्निष्ठ यूपापेक्षया एकैकेनारत्निनान्यूना भवेयुरिति ।। 11 ।।

यूपनिखननेमतम्

यूपार्द्धः वेद्यांवहिश्च यथास्यात्तथा निखातव्य इति शाखान्तरीयाश्रुत्या समाम्नायते । अतोऽत्राह -

एके प्रथमौ प्रकृतिवत् ।। 6/12 ।।

एके आचार्याः प्रथमौ = प्रथमोत्तमौ आद्यन्तावितियावत् । यूपौ =

1. का.श्रौ.सू. 8.8.19.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पशुवन्धयोग्य स्थूणाविशेषौ प्रकृतिवत् = वेदिगतार्द्धौ कार्यौं । अथान्ये वहिर्वेदि कार्या इतीच्छन्ति । अतः कर्तव्याकर्तव्यत्वाद् विकल्पः ।।12 ।।

यूपैकादशिन्याः नामधेयम्

वद्धितावर्द्धितयूपैकादशिन्याः वेदेर्नामधेयमाह--

सैषा शिखण्डिनी वेदिर्भवति ।। 6/13 ।।

सा एषा एकादशयूपैरूपेता सौमिकीवेदिः वर्द्धिता अवर्द्धितापि शिखण्डिनीत्युच्यते[1] शिखण्डा इव मयूरकलापाकारा इव यूपाः यस्याः सा शिखण्डिनी । एषामेकादशयूपानां नतोन्नताभ्यां पूर्वावस्थितानां शिखण्डाकार सदृशेनावभासमानत्वादेषा वेदिः पश्चिमाभिमुखोर्द्ध कलापनृत्यन् मयूर सदृशत्वात् शिखण्डिनीति नाम्ना व्यपदिश्यते ।। 13 ।।

इति षष्ठी कण्डिका

1. का.श्रौ.सू. 8.8.20.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सप्तमी कण्डिका

सूत्रोक्तमवशिष्टं वस्तुजातं प्रतिपिपादिषया ब्रूते--

भवन्तिचात्रश्लोकाः ।। 1।। इति ।।

अत्रास्मिन् शुल्बशास्त्रविषये केचनश्लोका अपि भवन्ति, त इमे श्लोकाः कात्यायनेन विरचिताः ।। 1 ।।

अत्र दर्शवेदीनिर्माणार्थं प्रमाणरज्ज्वां चिन्हान्याह--

द्विहस्ते लक्षणं कुर्यात्त्रिहस्तो मध्यमः शिरः ।।
शिरः पश्चाद्वितस्तिः स्यात्पूर्वार्धे हस्त एव च ।।
सार्धहस्ते च पाशः स्याद्वेदिः स्यात्पौर्णमासिकी ।। 2 ।।

द्विहस्ते लक्षणं कुर्यात् = श्रोण्यंकनार्थम् । त्रिहस्तो मध्यमःशिरः = हस्तत्रये चिन्हं वेद्यङ्कनार्थम् ।: तत्पश्चात् वितस्त्यां चिन्हमेकमाहवनीयविहरणार्थम् । सार्द्धहस्ते चिन्हं अंसावंकनार्थम् ।।

अयम्भावः-

सर्वैः सार्द्ध हस्ते हस्तद्वये हस्तत्रये च चिन्हं कार्यम् । तत्र हस्ते यच्चिन्हं तस्योपयोगः आहवनीयस्य चतुर्दिक्षु मापकरणाय । आवहवनीयस्यखरात् दक्षिणस्यामुत्तरस्यां च वेदेः इयत्ताकरणायोपयोगः । सार्द्धहस्ते यच्चिन्हं तस्योपयोगः आहवनीय खरस्य पूर्वरेखायाः यो मध्य विन्दुः तस्माद्दक्षिण्यास्यामुत्तरस्यां च वेदेः इयत्ता करणाय । (अयमुपयोगस्तु सन्देह निराकरणय युज्यते) अन्यथा हस्त परिमितेन चिन्हेन वेदेः सीमायाः निर्धारितत्वात् । हस्तद्वये यच्चिन्हं तस्योपयोगः वेदेः दक्षिणश्रोणेरारभ्य उत्तरश्रोणि पर्यन्तं मानकरणाय । एवं वेदेः पश्चिम् रेखायाः मध्यविंन्दोः हस्तद्वायान्ते दक्षिण श्रोणिः, हस्तत्रयान्ते चोत्तराश्रोणिर्भविष्यति । एवमेव वेदेः पूर्वरेखायाः मध्यविन्दोः सार्द्धहस्तान्तरे दक्षिणांस उत्तरांसश्च भविष्यति । अथ यद्याहवनीयो वेदेः सर्वथा वहिर्भूतः स्यात्तदा तु वेदेः पूर्वरेखायाः मध्यविन्दोः दक्षिणस्यामुत्तरस्यां च वित्तस्ति परिमितं गृहीत्वा रेखागणितस्य वर्गीकरणरीत्या वर्गः कार्यः स आहवनीयः । पक्षत्रयेऽपि यथा यथं वर्गीकरण साधनेनैव आहवनीय साधनं कर्तव्यम् । एवं वितस्ति परिमित चिन्हस्योपयोगः ।। 3 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सङ्ख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः ।
समभूमौ भवेद् विद्वान् शुल्बवित्परिपृच्छकः ।। 3 ।।

संख्यांजानातीति संख्याज्ञः गणितशास्त्रज्ञः । परिमाणं = परितः मानविधिंजानातीति परिमाणज्ञः शुल्बविद् विद्वानित्यर्थः । यद्वा रज्ज्वाक्षेत्ररचनाकुशलसुधीः समभूमौ = समायामुच्चावच्चरहितायां भूमौ क्षितौ, परिपृच्छकः = शिल्पादीनां भवेत् तिष्ठेत् एतेन समायां भूमौ करिष्यमाण यागाङ्गविहरणं सूच्यते ।। 3 ।।

समत्वसम्पादनं कथं स्यादित्याकाङ्क्षायामाह दृष्टान्तमुखेन-

न जलात्सममन्यत् स्यान्नान्यद् वृत्तत्प्रमा भवेत् ।
नान्यद् दूरं भ्रमादूर्ध्वं नान्यत्सूत्रादृजुर्भवेत् ।। 4 ।।

यथा जलात् अपः नान्यत् अन्यत्कि मपि प्रमा = न्यूनाधिक्य दोष रहितेन प्रमाणं भवेत् । वृत्तात् = मण्डलात् नान्यत् अन्यत्किमपि प्रमा = न्यूनाधिक्य दोषरहितेन प्रमाणं भवेत् अस्ति । तथैव सूत्रात् शुल्बात् रज्ज्वाः नान्यत् = अन्यत् किञ्चिन्न ऋजुर्भवेत् = न समं स्यात् । एतेनरज्ज्वा एव ऋजुतया समक्षेत्रसम्पादनं स्यान्नान्यथा सूत्रग्रन्थान्तरोक्त वेण्यादि मानेनस्यादित्याशयः । भ्रमादूर्ध्वं = भ्रमादज्ञानादधिकं नान्यदधिकं नान्यद्दूरमस्ति, यथा भ्रमादेवकश्चित् सन्निकटस्थं ग्रामं जिगमिषन् भ्रमात् बहुग्रमेषुप्रविष्टः अन्ततो गत्वा स्वाभीष्टगन्तव्यस्थलं प्रविशतीति तत्तस्याज्ञानजोदोष इति ।। 4 ।।

तिर्यङ् मान्याश्च सर्वार्थैः पार्श्वमान्याश्च योगवित् ।
करणीनां विभागज्ञो नित्योयुक्तश्च कर्मसु ।। 5 ।।

तिर्यङ्मान्याः पार्श्वमान्याश्च सर्वार्थैः सर्वप्रयोजने योगवित्स्यात् । अयमर्थः- एकस्मिन् समचतुरस्रे द्वयोः पार्श्वमानीत्वे द्वयोः तिर्यङ्मानीत्वं सिद्धमेव । तयोः पार्श्वमानी तिर्यङ्मान्योः योगं जानातीति योगवित् । कुशलविहारक इत्यर्थः । करणीनां = क्रियतेऽनया सा करणी तासां प्रमाणरज्जूनां विभागज्ञः = विभजनं विभागः तज्जानातीति विभागज्ञः नित्यः कर्मसु युक्तः स्यादिति । एतेन याज्ञिकै - र्विहरणकर्मकुशलेन भाव्यमिति सूच्यते ।। 5 ।।

शास्त्रवुद्ध्या विभागज्ञः परशास्त्रकूतुहलः ।
शिल्पिभ्यः स्थपतिभ्यश्चाप्याददीत मतीः सदा ।। 6 ।।

शास्त्रबुद्ध्या = शास्त्रोक्त दिशा विभागज्ञः = योगविभागवित् परशास्त्रकूतुहलः = परस्यान्यस्य शास्त्रान्तरस्य वा कतूहलः मर्मज्ञः स्यात् । अपि च शिल्पिभ्य = शिल्पकारेभ्यः स्थपतिभ्यः = तक्षकेभ्यः च मतीः बुद्धिः सदा नित्यं आददीत = गृहणीयादित्यर्थः । एतेन विहरणकर्मकुशलोभवितुं शिल्पिकादिभ्योऽपिजनेभ्यः बुद्धिः शिक्षणीयेति फलितम् ।। 6 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विहरणवेलायां निखननार्थं शङ्कुलक्षणमाह--

षडंगुलपरीणाहं द्वादशागुलमुच्छ्रितम् ।
जठरं चाव्रणं चैव शंकुं कुर्याद् विचक्षणः ।। 7 ।।

शडङ्गुलपरीणाहं-विस्तृतं द्वादशांगुलोच्चं जठरं मध्यभागं अव्रणं व्रणरहितं कीटपतंगादिभिरदुष्टं शंकुं कीलकं विचक्षणः पण्डितः प्रयोगवेलायां कुर्यादित्यर्थ ।। 7।।

शंकोर्निखनानार्थमुद्गरलक्षमाह--

द्विवितस्तिप्रमाणस्तु खादिरोमुद्गरस्तथा ।
शंकुस्तेननिखातव्यस्तस्मात्तस्य परिग्रहः ।। 8 ।।

द्विवितस्ती प्रमाणं = वितस्तिद्वयप्रमाणं हस्तपरिमितमिति यावत् । खादिरः खादिरकाष्ठनिर्मितः मुद्गरः = प्रहरणयोग्यसाधनविशेषः तेन साधनेन शंकुः कीलकं भूमौ निखातव्यः प्रवेशनीयः । तस्मात् = चिन्हस्थलेषु शंकुनिखननात् तस्य विमीयमानस्य क्षेत्रस्य परिग्रहः = ग्रहणं समीकरणंकार्यम् । ।। 8 ।।

ननु केन काष्ठेन शंकोर्निर्माणं कर्तव्यं, तस्य कियानंशश्च भूमौ प्रवेशये च्चेदित्याकाङ्क्षायामाह--

एकातक्ष ऋजुस्तीक्ष्णः खादिरः सम आयतः ।
शंकुकार्यस्तुशल्बज्ञैस्तस्यार्धं गमयेन्महीम् ।। 9 ।।

एकतक्षः = एकत एव तक्षणेन सुक्ष्मीकरणार्थं तनूकृतः = सरलः तीक्ष्णः सूच्यग्रः खादिरः खादिरकाष्ठनिर्मितः सम आयतः शास्त्रीयप्रमाणेन द्वादशांगुलोच्छ्रितः । एवम्भूतः शंकुः - शुल्बज्ञैः शुल्बशास्त्रविद्भिः कार्यः कर्तव्यः । तस्य शंकोरर्द्धं च महींगमयेत् = भूमौ प्रवेशयेत् द्रढिम्न इत्यर्थः ।। 9 ।।

प्रादेशमात्रोहविर्यज्ञे पूर्वलक्षणलक्षितः ।
शंकुरामशिराः कार्यस्तस्याप्यर्धं निखापयेत् ।। 10 ।।

सोऽयं पूर्वलक्षणलक्षितः = पूर्वोक्त लक्षणैरभिहितः शंकुः हविर्यज्ञे = तन्नामके मखे प्रादेशामात्रः कर्तव्यः । प्रादेशश्च "तर्जनी सहितांगुष्ठे विस्तृते प्रादेश" इत्यमरः (पृ. 118)तन्मात्रः शंकुः आमशिराः. आद्रशिराः कार्या तस्यापिशंकोरर्द्धं भूमौ निखापयेत् ।।10।।

चतुरस्त्रं मुद्गरंतत् षोडशांगुलमायतम् ।
अविद्धं क्रमणीयं च दारुमध्याच्चनिर्मितम् ।। 11 ।।

तच्छ्कुं निहननार्थं षोडशांगुलमायतं विस्तृतं चतुरस्त्रं मुद्गरं दारु मध्यात्काष्ठमध्यान्निर्मितमित्यनेनातिशयशक्त मितिसूच्यते, तथा अविद्धं काष्ठान्तरेणाप्रोतं क्रमणीयं शंकुहननरूपंक्रमणार्हं कर्तव्यमिति ।। 11 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रज्जुलक्षमाह--

अजीर्णा ग्रन्थिनीसूक्ष्मा समाश्लक्ष्णात्वरोमशा ।
रज्जुर्मानाधिका कार्या अध्वरे योगमिच्छता ।। 12 ।।

अजीर्ण = जीर्णदोषरहिता, अग्रन्थिनी = मध्येमध्ये ग्रन्थिरहिता समास मानरूपा श्लक्ष्णा = सूक्ष्म अरोमशा रोमरहिता मानाधिका = मानात् प्रमाणाद् विमीयमानक्षेत्रप्रमाणादधिका वृद्धि सहिता अध्वरे यज्ञे योगमिच्छता = योगविभागादि विहरणनिष्पत्तये एवं गुणगणविशिष्टा रज्जुः कार्येत्यर्थः ।। 12 ।।

रज्जुनिर्माणं केन कुर्यादित्यत्राह द्वाभ्यांश्लोंकाभ्याम् -

शाणी वा वाल्वजी चैव वैणवी वा विधीयते ।
रज्जुस्तूभयतः पाशात्रिवृत्ता यज्ञकर्मणि ।। 13 ।।
रज्जुर्मुञ्जमयी कार्या शणैस्तुपरिमिश्रिता ।
कात्यायनो वदत्येवमखोडा कुशबल्वजैः ।। 14 ।।

शाणी शणमयी, वाल्वजी = एतदाख्यतृणनिर्मितारज्जुः वैणवीवंशनिर्मिता त्रिवृत्ताः = वेण्याकारा उभयतः पाशयुता यज्ञकर्मणि प्रशस्ता । रज्जुःशणमयी मुंजमयी वा अखोड़ा = ग्रन्थिरहिता कार्येति कात्यायनो वदति ।। 13 ।।

अथ सदसो निर्माणार्थं प्रमाणरज्ज्वां लक्षणान्युच्यन्ते -

नवके लक्षणं कुर्यात् त्रीणि कार्या त्रिषु त्रिषु ।
उत्तमो नवकः पाशः सदसो मानमुच्यते ।। 15 ।।

प्रमाणरज्ज्वाः प्रान्तयोः पाशौ कृत्वा प्रथमं नवके = नवारत्निषुचिन्हं श्रोणिनिर्माणार्थं, त्रिषु अरत्निषु श्रोणिभागेनिरञ्छनार्थं, पुनस्त्रिषु अरत्नि निरंछनार्थं, ततोऽपि त्रिष्वरत्निषु अंसार्थं, ततः नवके = नवारित्नषु पाशः कुर्यात् एवं सदसः मानरज्ज्वां विहरणार्थं चिन्हानि कुर्यात् ।। 15 ।।

अथ सोमयागे प्रमारज्ज्वां लक्षणान्युच्यन्ते--

पञ्चदशमेकविंश त्रिकमपरञ्च परतस्त्रिकं चापि ।
द्वादशसु पाश उत्तम इति सोमे रज्जुमानमिति ।। 16 ।।

पंचदशसु प्रक्रमेषु श्रोणिनिरंछनार्थं प्रमाणरज्ज्वां प्रथमं चिन्हं कर्यात् । ततस्तस्मात् चिन्हादेकविंशति प्रक्रमेष्वायमनार्थं संख्यासमासभंगं चिन्हम् । तत स्त्रिषु प्रक्रमेषु निरंछनचिन्हम् । ततोऽपि त्रिषुमक्रमेषु अंसविहरणार्थं चिन्हं, ततो द्वादशसु पाश एवेति चतुष्पंचाशत् प्रक्रमा रज्जुः प्रमाणार्द्धं वाभ्यस्येति कथिता ।।16 ।।

सौत्रामणीवेदिमाह -

CC-0. Public Domain. Vipin Kumar Collection, Deoband

पदस्याक्ष्णया, तिरश्ची याऽनयोरक्ष्णया भवेत् ।
सौत्रामण्यां निर्मातव्या वेदिः स्यात्सोमवत्तथा ।। 17 ।।

Digitized by Madhuban Trust

पदस्य = पादमात्रसमचतुरस्रस्य अक्ष्णाया = अक्ष्णयारज्जुस्तां पार्श्वमानीत्वेन प्रसार्य तस्य समचतुरस्रस्य या तिरश्ची = तिर्यङ्मानी रज्जु स्तां तिर्यक् प्रसार्य तयोरक्ष्णया पदत्रय संक्षेपिका या रज्जुः सा सौत्रामण्यां प्रकमरूपतया प्रकमरूपतया करण्या सौत्रामण्यां वेदिः निर्मातव्या । कथं निर्मातव्येति चेदाह --सोमवत् स्यादिति । सा वेदिः षट्त्रिंशत् प्रक्रमाऽऽयामा चतुर्विंशति प्रक्रमा पूर्वभागे, त्रिंशत् प्रक्रमा पश्चात्, एवं सोमवदुत्तरावेदिर्निष्पद्यत इति ।

केचित्तु एवं कथयन्ति "सोमेतु द्विपदो भवेदि" ति यत्सौमिकः प्रक्रमः उक्तः तृतीयभागसंक्षेपिका, तृतीय करणीति तन्न । पदस्याक्ष्णयेत्यादि परिशिष्ट वाक्यान्तर विरोधात् । तेन चयनवेदिरपि सोमवेदिरेव । अग्निः सोमांगमित्युक्त त्वात् । तत्र यः प्रक्रमस्त्रिपदस्तस्य तृतीयभागसंक्षेपिका या करणी सैव सौत्रामण्यां प्रक्रमः । चयनान्तरं स तदंगत्वेनापि श्रुतौ सौत्रामणी पठितेइति सैववेदिः प्रस्तुता द्विपदक्रमस्त्वनग्निक सोमवेदेर्विषयः ।। 17 ।।

नीहारेणधनैर्वापि ज्योतिषामभ्रदर्शने ।।

अप्सुदीपं प्रगृह्णीयाद् यावत्तमसिदर्शनम् ।। 18 ।।

ज्योतिषां चन्द्रसूर्यादीनां ज्योतिष्कराणां प्रकाशः यदि नीहारेण निहारपातेन, घनैःमेघैराछन्नेन अभ्रदर्शनेन जलवर्षणेन च अदृश्यः स्यात्, तर्हि यावत् पर्यन्तम न्धकारः स्यात् तावत् पर्यन्तं प्रदीपं गृहीत्वा विहरणं कुर्यात् शुल्बवित् । 18 ।।

प्रमाणञ्च प्रमेय ञ्च यञ्चान्यद् वस्तुसंज्ञकम् ।

सर्वन्तच्छास्त्रतो ज्ञात्वा यज्ञे सिद्ध्यन्ति याज्ञिकाः ।।19 ।।

प्रमाणं = प्रमीयते इन्द्रियविषयीक्रियते येन तत् प्रमाणं आप्तवाक्यं प्रमेयं= प्रमातुं योग्यम्, अत्र प्रकरणात् यत्किञ्चिद् विचारणीयविषयजातमस्तितत्प्रमाशब्देनोच्यते । अन्यद् यत्किञ्चिद् वस्तुसंज्ञकं वस्तुजातमस्ति तत्सर्वं शास्त्रतः = शास्त्रात्, ज्ञात्वा = अवबुद्ध्य यज्ञे याज्ञिकाः सिद्ध्यन्ति सफला भवन्ति विहितफलमधिगच्छन्तीति ।। 19 ।।

यथा न क्षीयतेमानं यथा च न विवर्धते ।

यथा च रमते दृष्टिस्तथा योगं समाचरेत् ।। 20 ।।

येन प्रकारेण रज्ज्वाः मानं प्रमाणं न क्षीयते न ह्रसते, यथा येन प्रकारेण च मानं न विवर्धते = एधते, यथा येन प्रकारेण च दृष्टिर्दर्शनं रमते शोभते तथा तेन प्रकारेण योगं समाचरेत् = विहरणं कुर्यादित्यर्थः । एतेन विहरणकार्यं शोभनं सुस्पष्टं च कुर्यादित्यर्थः स्फुटो भवति ।।20 ।।

अथाहवनीयाद्यग्नीनां स्वरूपमाह--

अरत्निश्चतुरस्रश्च पूर्वास्याग्नेः खरोभवेत् ।

रथचक्राकृतिः पश्चाच्चन्द्रार्ध इव दक्षिणः ।। 21 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अरत्निः = हस्तप्रमाणकः चतुरस्रः = चतुर्भिरस्रैर्युक्तः पूर्वस्य = पूर्वदिक्स्थस्याग्नेरावहनीयस्य खरः अरन्याधारो भवेत् स्यात् । रथचक्राकृतिः = रथचक्रइवाकृतिः स्वरूपं यस्य सः पश्चात्प्रतीच्यां गार्हपत्य स्यात् । चन्द्रार्ध इव अर्ध चन्द्राकारवत् दक्षिणा दक्षिणाग्निः स्यादित्यर्थः ।। 21 ।।

अग्नीनान्तु खरः कार्यो मेखलात्रयसंयुतः ।
द्वादशांगुल उच्छ्रायो विस्तारे चतुरंगुलः ।। 22 ।।

अग्नीनां गार्हपत्याहवनीयदक्षिणाग्नीनां खरः = अग्न्याधारभूता कुण्डाः क्रमशस्ते मेखलात्रयसंयुक्ता भवेयुः। मेखलामानं तु उच्छ्रायेद्वादशांगुलः, विस्तारे चतुरंगुलश्च कर्तव्यः । अत्र सम्प्रदाये तु गार्हपत्याऽऽहवनीय दक्षिणाग्नीनां कुण्डेषु एकैव मेखला दृश्यते ।। 22 ।।

तन्तुः पुष्करनालस्य षड्गुणः परिवेष्टितः ।
वत्सतर्यास्त्रिहायण्या वालेन सदृशो भवेत् ।। 23 ।।
त्रयस्त्रिहायणीवालाः सर्षपार्धं प्रचक्षते ।
द्विगुणं सर्षपं विद्याद्यवः पंच तु सर्षपाः ।। 24 ।।
अंगुलस्यप्रमाणं तु षड्यवाः पार्श्वसंस्थिताः ।
चतुर्विंशांगुलोरत्निर्विंस्तिर्द्वादशांगुलः ।। 25 ।।
व्यामस्यात्र प्रमाणं तु चतुर्न्यूनं शतांगुलम् ।
पुरुषस्य प्रमाणं तु विशंतिस्तु शताधिका ।। 26 ।।

अत्र पंचश्लोकाः विषयेण परस्परं सम्बद्धाः सन्ति । अत एवमत्र व्याक्रियते- विशंतिशतांगुलः पुरुषः । पुरुषपंचमो भागोऽरत्निः । अरत्न्यर्द्धो वितस्तिः । अरत्नेश्चतुर्विंशो भागोंऽगुलः । अंगुलस्य षष्ठभागो यवः । यवस्य पंचमो भागः सर्षपः । शर्षपार्द्ध अर्द्धसर्षपः । सर्षपार्द्धस्यतृतीयोभागः त्रिहायणीवालः । त्रिहायणीवालस्य षष्ठांशः पुष्करन्तुः इत्येवमवरोह क्रमः ।

पुष्पकरनालस्य तन्तुः षडगुणः सन् त्रिहायण्यावत्सवालेन समं स्यात् । वत्सवालत्रयः संकलिताः सर्षपार्द्धप्रमाणं भवति । सर्षपार्द्धद्वयं सर्षपप्रमाणं भवति । पञ्चसर्षपैः यवः । षड्यवै रंगुलम् । द्वादशांगुलिभिर्वितस्तिः । चतुर्विंशागुलिभिररत्निः, पंचारत्निभिः पुरुष इत्ययमारोहक्रमः । व्यामस्य = प्रसारितबाहुद्वयस्य प्रमाणं अत्र = अस्मिन् शास्त्रे चतुर्न्यून = चतुरंगुलन्यूनं शतांगुलं अर्थात् षण्णवत्यंगुलं स्यादिति। प्रसारितबाहुद्वयस्य यत् प्रमाणं तदेव व्यामशब्देनोच्यते । समभूगतस्य प्रपदोच्छ्रितस्य वा कृतो र्ध्वोवाहोर्यजमानस्य पादांगुष्ठादारम्य हस्तस्यमध्यमांगुल्यग्रान्तं यत् प्रमाणं तदेवपुरुषशब्देनोच्यते । तस्य पुरुषस्य प्रमाणं तु विशंति शतांगुलो भवति ।। 23, 24,25,26 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

हिरण्यशकलार्थे तु हिरण्यं यस्य नोच्यते ।
कृष्णलेनैव तद्व्यारूया यज्ञे सिद्धयति याज्ञिकी ।। 27 ।।
कृष्णलं त्रियवं मानं ताम्रायसमतः परम् ।
सुवर्णार्धंच माषाणां सुर्वर्णाश्च त्रिसप्ततिः ।। 28 ।।
त्रीणि चैव सहस्राणि दद्याद् बहुसुवर्णके ।
भूयः स्थापितो ज्ञात्वा संज्ञास्वन्यासु मानचित् ।
स्वर्णकारो यथाऽभ्यासात्तथा भूयो विवर्धते ।। 29 ।।

त्रयाणां यवानां यः भारस्तावानेव भारः यस्य सुवर्णस्य तस्य कृष्णल संज्ञा । किन्तु सुवर्णन्तु सर्वेभ्यः धातुभ्यः गुरुतमं भवति । अतः ताम्रादीनां तावद् भारकरणाय अधिकमात्रा ग्राह्या, अमुमेवभावमनुरक्ष्य अतः परमित्युक्तिः । माषाणां त्रयस्य यः भारः स सम्पूर्णभारस्यार्द्ध परिमितो भविष्यति) यत्र सुवर्ण मानं किञ्चिन्नोक्तं 'बहु' इति पदेनैव मानमुक्तम् । तत्र रामाश्वपूर्णराम कृष्णलपरिमितं (3073) तन्मानं ग्राह्यम् । अन्यासुसंज्ञासु (इतरेषुसूत्रेषु इतरासु श्रुतिषुऽ स्वकीये वा सूत्रे स्वकीयां वा श्रुतौ) स्थपतितः ये शिल्पकार्यं कुर्वन्ति तेभ्यः एव तासां संज्ञानां मानानि जानीयात् । एवं स्वर्णमानेऽपि स्वर्णकारेभ्य एव मानह्रासे वर्धने वा परामर्शंकुर्वीत । अर्थात् स्वर्णकारस्य शिल्पिनश्च निर्माणे यथा सौकार्यं स्या-तथा कृते सति दोषाभाव एव इति स्पष्टोऽभिप्रायः । अथवर्धते इति पदं ह्रसत इत्यस्यापाप्युपलक्षमणम् । अत एव सूत्रेऽपि मत्या वा (का. श्रौ. सू. 4. 8. 17) इत्युक्तम् ।

चयनेविहिता इष्टका स्वसंख्यातोऽधिकाः कर्तव्याः इत्यत्र हेतुमाह--

ह्रसते शोषपाकाभ्यां द्वात्रिंशद्भागमिष्टका
तस्मादाद्रप्रमाणन्तु कुर्यान्मानाधिकं बुधः ।। 30 ।।

यतो हि शोषपाकाभ्यां = शोषपाकश्च शोषपाकौ ताभ्यां शोषपाकाभ्यां, इष्टका अग्नौचीयमाना इष्टकाः द्वात्रिंशद् भागं = स्व द्वात्रिंशदंशैः ह्रासते क्षीयते । तस्मात् कारणात् आद्रप्रमाणं = आद्रेष्टकानां प्रमाणं मानाधिकं द्वात्रिंशांशैरधिकं कुर्यात् । बुधः याज्ञिकः पण्डितः । अयमर्थः - यतो चयनयागे विहितेष्टकाः शोषपाकाभ्यां शुष्यन्क्षीयन्ते अतः विहितेष्टकामानाद् द्वात्रिंशन्मानेनाधिकं सर्वेषामिष्टकानां कार्यम् ।। 30 ।।

अज्ञात्वाशुल्बसद् भावं यज्ञेसौत्रामणीसुते ।
वेदिं ये कर्तुमिच्छन्ति गिरिं भिन्दन्ति ते नखैः ।। 31 ।।

शुल्बसद्भावं = शुल्बशास्त्रस्यसद्भावं सिद्धान्तमज्ञात्वा = अविदित्वा सौत्रामणीसुते = तन्नामधेये यज्ञे = याज्ञिकाः वेदिं सौत्रामणीयज्ञवेदिं कर्तुमिच्छन्ति चिकीर्षन्ति ते नखैः कररुहैः पर्वतं भिन्दन्ति विदारयन्ति । एतेनेदं फलितं शुल्बशास्त्रानभिज्ञः सौत्रामणीयज्ञीय कुण्डमण्डपविहरण कर्तुं न प्रभवेत् । अतस्तदेव दृष्टान्तमुखेनाह ते गिरिं भिन्दन्तीति ।। 31 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दण्डरज्ज्वर्द्धमभ्यस्य षष्ठे त्वर्धस्यलक्षणम् ।
तथैव चेतरत्रापि तिर्यङ्मानं यदृच्छया ।। 32 ।।

दण्डरज्ज्वर्द्धमभ्यस्य = क्षेत्रायाममितैका रज्जुः तदर्द्धमभ्यस्य प्रमाणरज्ज्वासंयोज्य अर्धस्य = प्रमाणार्द्धस्य कृताभ्यासस्यरज्ज्वाः षष्ठे = षष्ठभागे तस्यारम्भस्थाने लक्षणं चिन्हं कुर्यात् तिर्यङ्मान्यक्ष्णयापरिज्ञानार्थम् । सषष्ठभागाप्रमाणारज्जुः अक्ष्णया । इतरत्र तिर्यङ्मानं अक्ष्णयातिर्यङ् मानी शेषः, इतिसूत्रार्थएव उक्तो भवति । अस्य श्लोकस्यार्थः- "प्रमाणार्द्धमभ्यस्याभ्यासषष्ठे.. .....।"[१] अक्ष्णयातिर्यङ् मानीशेषः"[२] इत्यनयोः सूत्रयोरनुवाद एव भवति ।। 32 ।।

यावत् प्रमाणारज्जुः स्यात्तावानेवागमो भवेत् ।
आगमार्द्धे भवेच्छङ्कुस्तदर्द्धे च निरञ्छनम् ।। 33 ।।

यावत् प्रमाणारज्जुः = यावदायामः प्रमाणरज्जुः स्यात्, तावानेवागमो भवेत् तावत् प्रमाणमेव आगमोऽभ्यासरज्जुः भवेत् स्यात् । आगमार्द्धे = अभ्यासरज्जोरर्द्धे भवेच्छंकुः =शंकुंदद्यात् । कथं ? श्रोण्यंसनिरञ्छनार्थम् । तदर्द्धे तस्याःअर्द्धे तदर्द्धे तस्याः प्रमाणरज्ज्वाः अभ्यासस्य आगरमज्ज्वाः अर्द्धे समानांशे चिन्हमेकं कर्तव्यं समचतुरस्रसाधनार्थम् । तस्यार्द्धेभूयः चिन्हमेकं निरञ्छनार्थमित्युक्तार्थ[३] एव भवति ।।33।।

कर्मभेदेनप्रक्रममानमपि भिद्यत इत्यत्राह --

आधानेपादिकं कुर्यात् सोमेतु द्विपदो भवेत् ।
अग्नौतु त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुधः ।। 34 ।।

आधाने = श्रौताग्न्याधाने क्रियमाणे सति पदिकं = पदात्मकं प्रक्रमं कुर्यात् । सोमयागे तु द्विपदात्मकः प्रक्रमो भवेत् स्यात् । अग्नौ-अग्निचयनविधौ त्रिपदं त्रिपदात्मकं प्रक्रमं कुर्यात् । एवं याज्ञिकः यज्ञानुष्ठानकारयिता बुधः पण्डितः प्रक्रममानं कुर्याद् विहरणविधावित्यर्थ । यस्मिन् विताने अग्न्याधानं भवति तत्रैव दर्शपूर्णमासेष्टिरपि भवति । अतो दर्श पूर्णमासवेदिनिर्माण विधावपि पदं द्वादशांगुलमितिमानेन पदात्मंक प्रक्रमं मत्वा ततो द्वादशैकादशाष्टप्रक्रमेषु वा आहवनीयं संस्थाप्य ततो दक्षिणाग्न्युत्करयोः निर्माणं कुर्यात् । सोमयोगे द्विपदात्मकं प्रक्रमं मत्वा तेनैव क्रमेण षट्त्रिंशत् पुरस्तादित्यादिशास्त्रोक्त प्रकारेण विहरणं कुर्यात् । चयनयागे त्रिपदात्मकं प्रक्रमं कृत्वा तेन विहरणं कुर्यादिति दिक् ।। 34 ।।

---

1. का.शु.सू. 1/14.
2. का.शु.सू. 1/15.
3. प्रमाणमभ्यस्याभ्यासचतुर्थे लक्षणं करोति तन्निरञ्छनम् ।। 12 ।।
   अक्ष्णाया तिर्यङ्मानीशेषः ।। 13 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ नक्षत्रवेधेन प्राचीसाधनमाह--

कृत्तिका श्रवणः पुष्यश्चित्रास्वात्योर्यदन्तरं ।

एतत् प्राच्यादिशोरूपं युगमात्रोदिते पुरः ।। 35 ।।

सप्तविशंतिनक्षत्रेषु श्रवणकृत्तिकापुष्याण्येव शुद्धप्राचीसूत्रमवलम्ब्योदयं यान्तीति तेषां प्राचीसाधने वेधो ग्रन्थकृदभिमतः, तदित्थम् = नक्षत्रगतिवित् साधको गणितादिना कस्मिन् प्रहरे श्रवणपुष्यकृत्तिकान्यतमं चित्रास्वात्यौ वा युगमात्रोदिते भविष्यत इति निर्णीय दिशं साधयेत् । तत्रादौ साधकः आरकूटताम्रादि सुदृढसूक्ष्मनलिकां मूलाग्रयोरुपरि सूत्रस्थितियोग्यगर्तद्वययुतामादाय नलिकास्थिरीकरणाय दृढ़ा त्रिपादिकां निधाय तदुपरि नलिकां दृढ़मवस्थाप्येष्टनक्षत्रवेधं कुर्यादिति, । यथा एकया नलिकया चित्रावेधोऽपरया स्वातीवेधः संपाद्य उभयोरपि मूले एकत्रस्थापयेत् । शलाकाद्वयमिदमुपाग्रे नलिकान्तरनिधानयोग्यगर्तसंयुतमपेक्ष्यते । एतयोरूपाग्रे तृतीयां मध्यचिह्नाङ्किततां नलिकां गर्तयोरवस्थापयेत् । ततस्तिर्यग्वर्तमान तृतीयनलिकामध्यतः प्राङ् निहितशलाकाद्वयमूलं यावच्चतुर्थीमन्तयोः सूत्र स्थितियोग्यां नलिकां निदध्यात् । तत उभयतो लम्बकद्वय प्रोतं सूत्रं चतुर्थनलिकोपर्यग्रभागीयगर्तद्वयस्थितं प्रद् भूमौ स्थापयेत् । भूमौलम्बकद्वयं यत्र निपतेत् तत्र चिह्नद्वयान्तराले सूत्रदानेन प्राचीप्रतीचीसूत्रं निष्पद्यते ।। 35 ।।

अग्न्याधानप्रयोगे कुण्डेप्रक्षेप्तव्यानां[1] शर्कराणां संख्यामाह-

पंचाशच्छर्कराः पश्चात् पूर्वदेयास्त्रिसप्ततिः ।

दक्षिणे तु प्रदातव्या दश पंच च सप्त च ।। 36 ।।

पूर्वे आहवनीय खरे त्रिसप्ततिशर्कराः देयाः । दक्षिणे = दक्षिणाग्नौ दश पंच च सप्त च (10 + 7 + 5 =22) इति द्वाविशंति संख्यकाः निधेयाः ।।36।।

शंस्यश्चतुर्विंशतिपार्श्वभागश्चतुर्दशैराविलिखेत्तु नर्यम् ।

तथैव चाष्टद्विगुणैरथर्यास्त्रिंशद्भिरायम्य हरेत् तृतीयम् ।।37।।

अथ दक्षिणाग्नेर्विहरमुच्यते--

अग्नेरुदक् सार्द्धनवांगुले मध्यं ततो लिखेत् ।

वृत्तमेकोनविंशत्या प्राचीज्यामध्यगाभवेत्

उदगर्द्धाविहायार्वाक् खरोऽग्नेर्दक्षिणस्य तु ।। 38 ।।

अग्नेः दक्षिणाग्नेः स्थानादुदक् उत्तरस्यांदिशि विहरणेन निष्पन्नात् चिन्हस्थलात् सार्द्धनवांगुले = तत्परिमिते देशे शंकुमेकं निहन्यात् । तद्दक्षिणाग्नेःमध्यं= केन्द्रस्थलम् । ततो लिखेत् = तस्मात् केन्द्रस्थलाद् विहरणं कुर्यात् । कथमितिचेदित्यत्राह - एकोनविंशत्या अंगुल्या वृत्तमेकं कुर्यात् । तस्य मध्यगा=

1. स्थानमुल्लिख्य....निवपन्त्येतेर्षुशकराः (का.श्रौ.सू. 4/8/14)

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्राचीप्रतीचीगामी मध्यरेखा ज्या पदेनाभिधीयते । सा एकोनविंशत्युंगलैः प्राची-प्रतीची प्रसारिता भवेत् स्यात् । एतेनेदंफलितं पूर्व मेकोनविंशत्यंगुलमितव्यासार्द्धेन वृत्तमेकं कृत्वा तत्र प्राचीप्रतीची गामी रेखा कर्तव्या । तेन वृत्तं समं द्विधाविभज्यते । तस्योदगर्द्धं = तस्योत्तरार्द्धं विहाय-परित्यज्य अर्वाक् -दक्षिणा दक्षिणाग्नेःअन्वहार्यपचनः खरः अग्न्याधारो भवेत् ।। 38 ।।

अत्र ग्रन्थोक्तवस्तुजातमुपसंहरन्नाह--

सूत्रदोषदरिद्रस्य गूढमन्त्रस्यधीमतः ।

समाप्तेयं क्रिया शौल्वी कात्यायनमहात्मनः ।। 39 ।।

सूत्रदोषदरिद्रस्य = सूत्रस्य शुल्बसूत्रस्य तत्र ये दोषाः विचारणीय विषयाणामविचारं कृत्वाऽविचारार्हाणां विषयाणां विचाररूपाः दोषाः तैर्दरिद्रस्य = रहितस्य, गूढमन्त्रस्य = गूढत्वेन स्वं प्रभावमाख्यापयतः धीमतः = मेधाविनो भगवतः कात्यायनस्य महात्मनः प्रशान्तचित्तस्य इयं = कारिकारूपेण सूत्ररूपेण च निवद्धा शौल्वी शुल्बनंनं शुल्बः तस्य इयं शौल्वीक्रिया क्षेत्रविमान सम्बन्धिक्रिया समाप्ता समाप्तिं गतेत्यर्थः ।। 39 ।।

अथ महीधरेण केचन नवीनाः श्लोकाः पठिताः येषां पाठः कर्काचार्येणसंगृहीते श्लोकशुल्बे नोपलभ्यते । तेषामप्यत्र व्याख्यानमावश्यक मितिमत्वा तत्प्रस्तूयते । इमेश्लोकाः कात्यायनेनोक्ताः न वेति इदमित्थं वक्तुं शक्यते । परन्तु तत्र शुल्बसूत्रविषयोपवर्णनत्वात् तेषामप्यत्रव्याख्यानमभिमतम् । अपि च केचन श्लोकाः कर्काचार्येणाङ्गीकृताः महीधरेणनोट्टङ्किताश्च ।।

कर्काचार्येणाँगीकृतपाठमेवाङ्गीकृत्य विद्याधरोऽपि तथैवापठत् । कर्काचार्यपक्षं व्याकृते सति महीधरेणांगीकृताः बहवः श्लोकाः व्याकृता भवन्ति । अवशिष्टाः ये नवीनास्तेऽत्र व्याक्रियन्ते ।

शंकु समीकरणम्

क्रम संख्या- 1-

शंकुस्त्र्यंशश्चतुर्भागवृत्तार्द्ध पंचभागिकाः ।

शलाकादत्तदिग्भ्योऽग्नेः शंक्वग्रमृजुपाति तु ।। श्लो. सं १३ ।।

प्राकृतवेदिमाह--

क्रम सं.-2-

षडरत्निर्द्विपाशा च मध्ये पंचसुचिन्हिता ।

द्विहस्तेऽङ्गुलषट्के त्रिष्वष्टादशकेषु च ।।

सार्द्धहस्ते पाशः स्याद्वेदिः स्यात्पौर्णमासिकी ।। श्लो. सं 18 ।।

दर्शपूर्णमासवेदिविहरणार्थमुपादीयमानारज्जुः षंडरत्निपरिमिता, उभयप्रान्ते च सपाशा स्यात् । ततो विहरणार्थं चिन्हानि कुर्यात् । तानि च-द्विहस्ते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रोण्यंकनार्थ चिन्हं कुर्यात्, अंगुलषट्के श्रोणिनिरंछनाय, ततोऽष्टादशाङ्गुलेषु आयामाय, ततस्तावत्सु अंस निरंछनाय, ततः सार्द्धहस्ते पाशः कुर्यादिति ।। 18 ।।

क्रम सं. -3

मध्यसंग्रहविधिमाह--

आनीयं रज्जुंपूर्वार्द्धात्पश्चार्द्धं यावदेव तु ।

द्विगुणीकृत्यतां रज्जुंतत्रशंकुं निखातयेत् ।। श्लो. सं. 19 ।।

क्रम सं. -4

वेदि श्रोण्यंसयोर्मध्ये तयारज्ज्वाष्टभागया ।

वा पृथुत्व तुरीयेण मध्येनालिख्य संग्रहौ ।। श्लोक .सं. 20 ।।

अनयोर्व्याख्यामयापूर्वमेवप्रतिपादिता 1/28 सूत्रव्याख्यावसरे ।। 19/20 ।।

क्रम सं.-5

पशुवेदिमाहि--

नवारत्निमितारज्जुर्लक्षिता षट्स्वतः परम् ।

अर्द्धेऽर्द्धे त्रिषुपाशः स्यात् पशुवेदिप्रसाधिनी ।। श्लोक. सं. 21 ।।

पशुवेदिं करिष्यत् उभयतः सपाशां नवारत्निपरिमितां रज्जुं गृहीत्वा तत्र विहरणार्थ चिन्हानि कुर्यात् । षडरत्निष्वायामाय, ततोऽर्द्धारत्नौ निरंछनाय, ततोऽर्द्धे श्रोण्यै, ततोऽंसाय, तत्तस्त्रिष्वर्द्धेषु पाशायेति । चतुरत्निश्रोणिस्त्रयरत्न्यंसा षडरत्निप्राचीरूपा निरूढ़पशुबन्धवेदी ।। 21 ।।

क्रम सं.-6

शालाविमितयोर्मानमाह--

विंशत्यातु करैः शालादशायामेनविस्तृता ।

विमितं चतुरस्रंस्याद् दशारत्निप्रमाणतः ।। श्लोक.सं. 22।।

सोमयागे-विंशतिहस्ताऽऽयता दशहस्तविस्तारा शाला उदगायता प्राग्वंशा, सत्रेषूद्गवंशा । सर्वतो दशारत्निप्रमाणेन विस्तृतं समचतुररस्रं विमितं भवति ।। 22।।

क्रम सं.-7

अनेनविधिना यस्तुवेदिं कुर्यात्तुमानवः

यजमानं तथात्मानमुभौ तारयते ध्रुवम् ।।श्लोक .सं. 25 ।।

शुल्बशास्त्रस्त्रोक्त प्रकारेण यः याज्ञिकः वेदिनिर्माणं करिष्यत्यसावात्मानं यजमानमपि तारयिष्यतीति विधिवदनुष्ठानेफलश्रुतिः ।। 25 ।।

क्रम सं. -8

बहूनांसमचतुरस्राणां संक्षिप्तकरणोपायः-

चतुरस्रन्तु यावद्भिः प्रमाणैः कर्तुमीष्यते ।

एकोनद्विगुणैस्तैस्तु रज्जुरेकाधिकै र्मता ।। श्लोक.सं. 37 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

 Digitized by Madhuban Trust

क्रम सं.-9

त्र्यस्रीकृते तु तस्यां या मत्स्यसंक्षेपिका भवेत् ।
सैवेषुः करणीप्रोक्ता शुल्बकारेण चोदिता ।।श्लोक.सं. 38 ।।

यावद्भिः प्रमाणैः = यत् प्रमाणकैः समचतुरस्त्रैः एकं समचतुरस्त्रं कर्तुमिष्यते= चिकीर्षते एकोनद्विगुणैस्तैः समचतुरस्त्रैः एका पंक्ति कृत्वा तस्या धारभूतां रज्जुं द्विगुणी कृत्य पृथक् प्रसार्य, एकाधिकैस्तैसमचतुरस्त्रैः = अभीष्ट चतुरस्रेभ्य एकाधिकसमचतुरस्त्रंपृथक् एकस्यां पंक्तौ प्रसार्य तदाधारं द्विगुणीकृत्य मध्ये चिन्हं कृत्वा पूर्वप्रसारिततिर्यङ्मान्याः प्रान्तयोर्निक्षिप्यमध्यचिन्हेन प्राचीमाकृष्यलक्षणे शंकुं निहन्यात् । त्र्यस्रिक्षेत्रं जायते । तस्य शीर्षविन्दोः लम्बं पातयित्वा तस्य सदृशछेदः कार्यः । तस्यैकोभागो ऽभीष्टसमचतुरस्रान्संक्षेप्स्यतीति 6/7 सूत्रार्थ एव भवति ।।3738।।

क्रम सं.-10

चयनेतूक्तविधिना कुर्यान्निर्माणमात्मनः ।
तुर्य्यांशनात्मनः पक्षौ पुच्छचं रचयेत्ततः ।।श्लोक.सं. 39।।

क्रम सं.-11

अधिमानं पंचमाशं पक्षयोरुभयोर्न्यसेत् ।
दशमांशेन पुच्छस्य पुच्छमप्यत्रवर्धयेत् ।। श्लो.स. 40।।

क्रम सं.-12

पुच्छस्यपक्षयोश्चापि पश्चादेवं नियोजयेत् ।
दशमांशं पंचमाशं लक्षणं त्वधिमानकम् ।। श्लो.सं. 41 ।।

चयनयागं करिष्यत् द्विपुरुषांरज्जुमिति (कां.श्रौ.सू. 16/8/1-17) कल्पसूत्रोक्तप्रकारेण आत्मनः निर्माणं कृत्वा पुरुषप्रमाणेन सह अधिमानभूतं पुरुषपंचमाशंगृहीत्वा पक्षयोर्विहरणंकुर्यात् । ततः पुरुषप्रमाणेन सह पुरुषदशमांशं गृहीत्वा पुच्छस्यविहरणं कुर्यात् । सर्वतो द्विपुरुषविस्तारं समचतुरस्त्रमात्मापदेनोच्यते । सारत्निकपुरुषप्रमाणविस्तार, पुरुषप्रमाणाऽऽयामं आयतक्षेत्र पक्षयोः स्वरूपम् । सवितस्तिकपुरुषप्रमाणविस्तारं पुरुषप्रमाणाऽऽयाममायतक्षेत्रं पुच्छपदेनोच्यत इति ।। 39- 41 ।।

क्र मसं. सौमिकवेदिनिर्माणमुच्यते--

षट्त्रिशंत् प्रक्रमाः प्राच्यां चतुर्विंशतिरंसयो ।
श्रोण्योस्त्रिशंत् प्रक्रमाः स्युर्वेदी सोमादिके मखे ।। श्लो. 42 ।।

सौमिकवेदिं चिकीर्षन् चतुष्पंचाशत्प्रक्रमपरिमितां प्रमाणरज्जुंगृहीत्वा तत्र लक्षणानि कुर्यात् षट्त्रिंशत् प्रक्रमेषु प्राच्यकंनार्थं, चतुर्विंशतिप्रक्रमेषु अंसयो र्विहरणार्थं, त्रिंशत्प्रक्रमेषु श्रोण्यकंनार्थं चिन्हानि कुर्यादिति ।। 22 ।।

इति सप्तमी कण्डिका

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ प्रथम कण्डिका

इष्टकापूरणम्

अथातः सुपर्णचित्यस्याग्नेः कातीयसूत्रशेषमृजुपक्षस्यानुव्याख्यास्यामः ॥1॥

अथ देवयाज्ञिककृतं पूरणभाष्यम् ।
द्वैमातुरं नमस्कृत्य सर्वाभीप्सितदायकम्
इष्टकापूरणस्याहं कुर्वे विवृतिमुज्वलाम् ॥ 1 ॥

अत्राथशब्दो मङ्गलार्थः । आनन्तर्यार्थो वा । अथवा कात्यायनसूत्रोपनिबन्धानान्तरं । अतः शब्दो हेत्वर्थः। यस्मात्कात्यानसूत्रेऽग्निः कात्स्र्न्येनोक्तो नास्ति । किञ्चिद्वक्तव्यमवशिष्टमस्ति । अतोहेतोरग्नेश्चयनस्य सम्बन्धि कातीयसूत्रेशेषं वयमनुव्याख्यास्यामः "ननु द्रोणचिद्रथचित्कङ्कचित्प्रउग्रचिदुभयतः प्रउगः समूह्यपुरीषः" (का.श्रौ.सू. 16/5/9.) (का.शुल्बे4/1) इत्येतत्संज्ञकाः षडग्नयः सन्ति । तेषांच वक्तव्यमपि बहु विद्येत । श्रुतौ सूत्रे च तेषां नाममात्रेणैवसङ्कीर्तनात् । अतो विशेषो न ज्ञाप्यते । कस्याग्नेरित्याशङ्क्याहसुपर्णचित्यस्येति । सुपर्णचित्यस्यैवाग्नेः न द्रोणचिदादीनां तस्यापि न सर्वं किन्तु कातीयसूत्रशेषम् । कातीयं कात्यायनप्रणीतं यज्ञप्रकाशकं सूत्रम् । तस्य शेषं तत्प्रतिपादितावशिष्टम् ।

यद्यपि कातीयसूत्रे यजमानेनोर्ध्वचित्यादिना सुपर्णचित्यास्याग्नेर्मानमग्नक्षेत्रसाधनप्रकारं चोक्त्वा तत्र "कुशस्तम्बमुपदधाति (का.श्रौ.सू.17/3/1) इत्यादियजुष्मतीनां स्थानप्रकारसंयुक्तं स्फुटमुपधानमुक्तम् । तथा "लोकम्पृणा दक्षिणां सादध्यात् (का.श्रौ.सू. 17/6/5) इत्यादिना सर्वचितिषु लोकम्पृणानामपि कतिपयविशेषमुक्तानामुपधानमुक्तम् । तथा- "द्विसाहस्त्री प्रथमा लोकम्पृणानां पन्चाशदूनोत्तराश्च त्रिसाहस्र्युत्तमा" (का.श्रौ.सू. 17/7/21-23) इत्यादिना सर्वचितिषु लोकम्पृणानां संख्या चोक्ता । तथापि ता यजुष्मत्यो लोकम्पृणाश्चेताबत्य एवम्प्रमाणां एवंसंज्ञा अस्मिन्स्थाने उपधीयन्ते । इयत्य एवम्प्रमाणा एवंसंज्ञा अस्मिन्नित्यादि बहु वक्तव्यमवशिष्टमस्ति । अतएवमादि यत्कातीयसूत्रशेषं तत्प्रतिपादितावशिष्टं तदत्रानु पश्चात् व्याख्यास्यामः अनुशब्दः पश्चादर्थे । पूर्वं हि कात्यायनाचार्येण सुपर्णचित्यस्याग्नेर्व्याख्यानं कृतं, स्वकृते कात्यायनाख्ये सूत्रे वयं त्वनु पश्चात्तत्सूत्रशेषं

CC-0. Public Domain. Vipin Kumar Collection, Deoband.

Digitized by Madhuban Trust

कातीयसूत्रप्रतिपादितशेषं व्याख्यास्यामो विवृत्य कथयिष्याम इत्यर्थः । कीदृशस्य सुपर्णचित्यस्याग्नेः । ऋजुपक्षस्य ऋजु समौ अवक्रौ पक्षा यस्यासौ ऋजुपक्षः। तस्य ऋजुपक्षे सुपर्णचित्येऽग्नौ । एतनैव-"पक्षपुच्छाप्ययेषु चतुरङ्गुल सङ् कर्षति विकर्षत्यन्ते" (का.श्रौ.सू. 16/8/15) इति । तथा अथ वक्रौ पक्षौ करोति (श .ब्रा. 10/2/1/7) इति विकल्पेन वक्रपक्षस्याग्ने र्व्यावृत्तिः क्रियते । अत ऋजुपक्षस्यैव सपुर्णचित्यस्याग्नेः कात्यायनसूत्रापेक्षितमवशिष्टमत्राभिधीयते । न द्रोणचिदादीनां नापि वक्रपक्षस्य सुपर्णचित्यस्येति तात्पर्यम् ।। 1 ।।

तत्रेष्टकानां प्रमाणम् ।। 2 ।।

अभिधींयत इति शेषः । तत्र कातीयसूत्रशेषव्याख्याने इष्टकानां यजुष्मतीलोकम्पृणानां प्रमाणमभिधीयते इत्यर्थः । अथवा तत्रेष्टकानां यजुष्मती लोकम्पृणानां प्रमाणमभिधीयत इत्यर्थः ।। 2 ।।

समचतुरस्राणां यथापुरषमङ् गुलं द्वादशाष्टादश चतुर्विं शतिरिति पृथक् पृथक् पादभागपद्या जङ्घामात्रीबृहतीनाम् ।।3।।

प्रमाणमित्यनुवर्तते । अङ्गुलं द्विः प्रकारकम् । एकं साधारणम् । अङ् गुलस्य प्रमाणं तु--"षड्यवाः पार्श्वसम्मिताः" (श्लो.शुल्बे. 31) इति । अपरं चाग्निप्रकरणोक्तं -6 पञ्चारत्निः पुरषो दशपदो द्वादशाङ् गुलं पदम् " (का.श्रौ. सू. 16/8/8) इति । तस्यार्थः- पुरुषस्य पञ्चमो भागोऽरत्निः, दशमो भागः पदं, पदस्य द्वादशो भागोऽङ् गुलमिति । तत्र पञ्चभिररत्निभिः पुरुषो दशभिः पदैः पुरुषो द्वादशभिरङ् गुलैः पदमित्यर्थः । अरत्न्यादीनामितः प्रागसिद्धत्वात् । पुरुषस्य च यजमानेनोर्ध्वबाहुप्रपदोच्छ्रितेन समस्थितेन वा (का.श्रौ.सू. 16/7/32) इत्यत्र सिद्धत्वात् । तेन पूर्वोक्त एवार्थः । तेनाग्निप्रकरणोक्ताङ्गुलपरिमाणस्योपादानार्थं यथापुरुषमङ् गूलैरित्युक्तम् । तेन यजमानो ह्रस्वो वा दीर्घो वा भवतु । तस्योर्ध्वबाहुप्रदोच्छ्रितस्य समस्थितस्य वा वंशादिना मितस्य समविभक्तस्य यो दशमो भागस्तस्य पदं, तस्य पदस्य द्वादशे भागोऽङ् गुलमिति तथा द्वितीयतृतीयादिषु चयनेषु- उत्तरेषु पुरुषोच्चयेनैकशतविधादिति । पुरुषस्य प्रमाणवृद्धावपि तदीयो दशमोंऽशः पदम् , तस्य वर्धितस्य पदस्य द्वादशो भागोऽङ् गुलमित्यादि सर्वं यथापुरुषपदेन सङ्गृहयते । पुरुषस्यानतिक्रमो यथापुरुषम् । अङ् गुल प्रमाण पुरुषाश्रितं ग्राह्यं, नतु पुरुषातिक्रमेण । अङ् गुलस्य प्रमाणं तु "षड्यवाः पार्श्वसम्मिताः" (श्लो.शु. 31) इत्यादिप्रतिपादितमित्यर्थः ।

सूत्रयोजनातु--यथापुरुषमङ् गुलैर्मानोपायभूतैः षङ्ङगुलं द्वादशाङ् गुलमष्टादशाङ् गुलंचतुर्विशत्यङ् गुलमित्येविधानि पृथक्पृथगसङ्कीर्णानीतरनिरपेक्षाण्यसमस्तानि यथाक्रमं समचतुरस्राणां समचतुः कोणानां पादमागपद्याजङ्घामात्री बृहतीसंज्ञानां चतुसृणामिष्टकानां प्रमाणानि भवन्ति । तत्र षङ्गुलं समचतुरस्राणां पादभागानां प्रमाणम् । द्वादशाङ्गुलं पद्यानां प्रमाणम् । अष्टादशाङ्गुलं जङ्घामात्रीणाम् । चतुर्विंशत्यङ्गुलं बृहतीनामिति । अनेन सूत्रेण

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

षडङ्गुलादिकं समचतुरस्राणामिष्टकानां प्रमाणमुच्यते। षड्ङ गुलादिपरिमितानांच पादभागेत्यादिकाः संज्ञा अभिधीयन्ते। तेन षडङ्गुलपरिमिताया इष्टकायाः पादभाग इति संज्ञा। द्वादशाङ् गुलपरिमिताया पद्येति संज्ञा। अष्टादशाङ् गुलपरिमित्राया जङ्घरमात्रीतिसंज्ञा।। चतुर्विंशत्यङ् गुलपरिमितायाः समचतुरस्राया बृहती संज्ञा। इत्युक्तं भवति। एवं समचतुरस्राणां प्रमाणान्युक्तानि ।।3 ।।

अधुना दीर्घचतुरस्राणां प्रमाणान्युच्यन्ते--

तदर्धेन तिर्यगर्धपूर्वाख्याश्च ।। 4 ।।

प्रमाणमित्यनुवर्तते। तच्छब्देन पूर्वोक्तानि षङ्गुलादिप्रमाणानि परामृश्यन्ते। तेषां षडङ् गुलादीनामर्धेन तिर्यक् प्रमाणं भवति दैर्ध्यं प्रमाणं तु षडङगुलाद्यैव। विस्तारप्रमाणस्यैव तदर्धेन तिर्यगिति विधानात्। एवम्प्रमाणादीर्घचतुरस्राइष्टका भवन्ति। ताश्च - अर्धपूर्वाख्याश्च भवन्ति। अर्धपूर्वशब्दो यासां पादभागद्याख्यानां पादभागादिसंज्ञानां ता अर्धपूर्वाख्याः अर्धशब्दपूर्वास्ता एव पादभागाद्यास्तासां संज्ञा भवतीत्यर्थः। अर्धपादभागा अर्धपद्याःअर्धबृहतीत्येवमिति। एतेनैतदुक्तं भवति। त्र्यङ् गुलविस्तारा षड्ङ्गुलदीर्घा दीर्घचतुरस्रा इष्टका भवन्ति। तस्यार्धपादभागसंज्ञा तथा षड्ङगुल विस्तारा द्वादशाङ्गुलदीर्घा एवंविधा दीर्घचतुरस्रा अपरा इष्टका भवन्ति। तस्या अर्धपद्या इति संज्ञा। तथा द्वादशाङ् गुलविस्तार चतुर्विंशत्यङ् गुला दीर्घा एवंविधा दीर्घा चतुरस्रा अन्या इष्टका भवन्ति। तस्या अर्धबहतीति संज्ञेति एवं त्रीणि चतुरस्राणामिष्टकाप्रमाणान्युक्तानि ।। 4 ।।

अनेनैव न्यायेनाष्टादशाङ्गुलपरिमाणस्याद्वैन तिर्यक्प्रमाणार्धपूर्वाख्या वाऽर्धजङ्घामात्री इति प्राप्नोति तन्निरासार्थमाह--

जङ्घामात्रीतु तिर्यग्द्वादशभिरध्यर्धा ।। 5 ।।

तुशब्दो भेदे। जङ् घामात्रीतु पूर्वोक्तन्यायेन तदर्धेन तिर्यवक्प्रमाणमर्धजङ् घामात्री न भवतीत्यर्थः। किन्तु- तिर्यग् द्वादशभिरङ्गुलैरध्यर्धा भवति। अङ्गुलैरित्यनुवर्तते। द्वादशभिरङ्गुलैस्तिर्यक् प्रमाणं विस्तारप्रमाणं भवन्ति। दैर्ध्यं प्रमाणंत्वष्टादशाङ् गुलमेवविधा दीर्घा चतुरस्रा द्वादशाङ्गुलविस्तारा। अष्टादशाङ् गुलदीर्घा चाध्यर्धासंज्ञा इष्टका भवन्ति। अध्यर्धेत्यन्वर्थसंज्ञा। अर्धेनाधिकाऽध्यार्धा। अध्यर्धमेव पद्यालोकं व्याप्नोतीति कृत्वा ध्यर्धेत्युच्यते। एवमअष्टौ प्रमाणानि निरूपितानि ।। 5 ।।

अधुना नवममिष्टकाप्रमाणमाह--

चतुर्विं शतिभिर्दीर्घाऽष्टादशभिस्तिर्यक् त्रिग्राहिणी ।। 6 ।।

अङ्ङ् गुलैरित्यनुवर्तते। चतुर्विंशतिभिरङ्गुलैर्दीर्घा अष्टादशभिरङ्गुलिस्तिर्यक् प्रमाणा एवंविधा दीर्घचतुरस्रा इष्टका त्रिग्राहिणीसंज्ञा भवति। इयमन्वर्थसंज्ञैव त्रीन्पद्यालोकान्गृण्हाति व्याप्नोति इति त्रिग्राहिणीति। चतुर्विं शतिभिरिति बहुवचनं "छन्दोवत्सूत्राणि भवन्ति" का. प्रा.सू. 1/9) इति न्यायेन ।। 6 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अधुना दशमं वक्रसंज्ञानामिष्टकानां प्रमाणमाह--

अर्धव्यामेन गार्हपत्यस्य मण्डलं परिलिख्य षोडशपदं मध्येऽ पच्छिद्य श्रोण्य सानूकापच्छेद परिलेखान्तरं वक्राः ॥ 7 ॥

पादभागादीनामिव बक्राणामङ्गुलैः परिमाणं वक्तुंन शक्यत इत्युपायान्तरेण प्रमाणं दर्शयति । अर्ध व्यामस्यार्धव्यामः । "समांशवाच्यर्धशब्दो नपुसंकम्" (पा. सू. 2/2/2 वृतौ) इति समासः । तेनार्धव्यामेन गार्हपत्यस्य मण्डलं समभूमौ परिलिख्य मध्ये मण्डलमध्ये षोडशपदं क्षेत्रफलेन परिच्छिद्य पुरुषस्य दशमो भागः पदं षोडश पदानि प्रमाणं यस्य तत्षोडशपदम् । "चतुः प्रमाणा षोडशकरणी" (शू. सु . 3/6) इत्युक्तत्वाच्चतुः पदंप्रमाणयारज्ज्वा यावत्प्रमाणेत्याद्युपायेन मण्डलस्य समचतुरस्रं साधयित्वा तस्य षोडशपदचतुरस्रस्य श्रोण्यंसानूकैर्लक्षणभूतैर्मण्डलस्यापच्छेदो लेखाकरणेन छेदनं कर्तव्यम् । चतुरस्रस्यापरकोणौ श्रोणीपूर्वकोणे चांसौ अनूकशब्देन चतुरस्रस्य मध्ये वर्तमान प्राची उदीची च रेखा रज्जुदण्डापरपर्याया ऽभिधीयते । तत्रायं प्रकारः- पूर्वमर्धव्यामेन मण्डलं परिलिख्य तन्मध्ये चतुः पादप्रमाण्या रज्ज्वा क्षेत्रफलेन षोडशपदं प्रसाध्य तस्य दक्षिणश्रोण्युत्तरांसयोरुपरि लम्बायमानां अक्ष्णयारूप मण्डलं परिलेखं यावद्रज्जुंप्रसार्य चतुरस्रकोणादारभ्य मण्डललेखापर्यन्तो लेखाया अपच्छेदः। एवमेवोत्तरश्रोणौ दक्षिणांसंयोरुपरि लम्बायमानां रज्जुंप्रसार्य पूर्ववदपच्छेदः कार्यः । एवं चतुरस्रस्य प्राग्रज्जुदण्डस्योपरि लम्बायमानां रज्जुंप्रसार्य चतुरस्रस्यापरपार्श्वमध्यादारभ्यापरपरिलेखापर्यन्तो ऽपच्छेदः कार्यः । एवमेव पूर्वपार्श्वमध्यादारभ्य मणडलपूर्वान्तं यावदपच्छेदः कार्यः । एवमेवोदगनूकस्योपरि रज्जुं प्रसार्य चतुरस्रस्य दक्षिणापार्श्वमध्यादारभ्य मण्डलस्य दक्षिणान्तं यावदपच्छेदः कार्यः । एवमेवोत्तरपार्श्वे मध्यान्मण्डलस्योत्तरान्तं यावदपच्छेदः कार्यः । परिलेखान्तरं वक्रा इत्यपच्छेदपरिलेखान्तरमष्टौ वक्रसंज्ञा इष्टका भवन्तीत्यर्थः । "शेषेष्टौ वक्राः" (इ. पू. सू. 2/4) का.श्रौ.सू. 7/1/16) इत्युक्तम् । अनेन प्रकारेण तासां प्रमाणं निष्पादयितव्यमित्यर्थः । वक्रा इत्यन्वर्थसंज्ञा । वक्रत्वाद्वक्रा इति मण्डलस्य सर्वासु दिक्षु विदिक्षुच श्रोण्यं सानूकैश्चिन्हभूतैर्ये ऽपच्छेदास्तेषामपच्छेदानां मण्डलपरिलेखस्य चयनं तदन्तरमध्यं तत्पूर्यन्त्यो एव भवति । परिच्छेदपरिलेखान्तप्रमाणेनैव वक्राणं । प्रमाणं ज्ञायते नान्यथा ।

अथ वक्रासाधनाथोऽन्यः सुगमः प्रकार उच्यते चतुर्विंशत्यङ्गुलं समचतुरस्रं साधयित्वा तस्योत्तरांसे पाशं प्रतिमुच्य दक्षिणांसस्योपरि लम्बायमानां तां रज्जुं दक्षिणायामाकृष्यार्धप्रमाणां रेखांत कृत्वा पाशप्रोतशङ्कुना तावद्वृत्तं लिखेद्यावत्सा रज्जुश्चतुरस्य दक्षिणश्रोणेरुपर्यायाति । ततो दक्षिणश्रोणेरारभ्य रज्जुर्प्रान्तं वक्राप्रणम् । द्वितीयतृतीयादिष्वपि चयनेषु गार्हपत्यचितीष्टकाप्रमाणमाद्यचयनवदेव भवति । "नान्तः पात्यगार्हपत्ययोर्वृद्धिर्भवति" (शु.सू.6/6) इति वृद्धेः प्रतिषेधात् एतदस्मिन्नष्टकाप्रमाणम् । एकादश त्विष्टकाप्रमाणं सूत्रकारो ऽग्रे वक्ष्यति "अन्तरं चतुर्भागौ द्वौद्वौ (इ.पू.सू. 8/7) इति ॥ 7 ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ननु-श्रुतावेषां प्रमाणानामेकमपि न दृश्यते । सूत्रकारेणैव कुतो ज्ञातमेतान्येवंविधानानि प्रमाणानि भवन्तीत्याशङ्क्य श्रुत्यभिप्रायादित्याह--

उष्णिगर्धपद्या विधेः पादभागः ।। 8 ।।

पञ्चम्यां चितावुष्णिसंज्ञास्तिस्रो यजुष्मत्यो विहिताः सन्ति "ग्रीवा उष्णिहस्ता अनन्तर्हिता गायत्रीभ्य उपदधाति" श.ब्रा. 8/6/2/11) इति । तासां चार्धपद्यात्वं विहितमस्ति । "उष्णिभ्यो वा परा अर्धपद्या उपधाय" का.श्रौ.सू. 17/11/ 7) इति । एतावन्मूलभूतश्रुत्या अत "उष्णिगर्धपद्याविधेरुष्णिहामर्धपद्यात्वविधानात्पादभागः श्रुत्यभिमतो ऽस्तीति ज्ञायते । कथं ? तथाहि गायत्रीभ्यो वा परा द्वितीये लोके तिस्र उष्णिहस्तिरश्चालिखिता अर्धपद्या उद्गायता उपधीयन्ते तासु च "अयुग्मगणमध्ययमा ऽनूके" (का.श्रौ.सू.16/7/22) इति वचनान्मध्यमा अनूकस्योपर्युपधीयते । इतरयोर्मध्ये एका तस्या दक्षिणत एका तस्या उत्तरत इति । तस्मिन्नेव च लोके ताभ्य उष्णिग्भ्योपरा दशं विराजइष्टका उपधीयन्ते । ता पि तिरश्चालिखिता उद्गायता अर्धपद्या एव भवन्ति उष्णिभ्यः पूर्वस्मिँलोके असपत्ना गायत्र्युपहिताः सन्ति एवं सति पादभागसंज्ञा षडङ्गुलप्रमाणा समचतुरस्त्रेष्टका यदि न भवति तदा उत्तरस्यां उष्णिह् उत्तरतो सपत्नायाः पश्चाद्विराजः पूर्वतः किमुपधीयन्तेऽ धिकप्रमाणास्तत्रस्थानाभावात् असपत्नोष्णिग्वराड्भिः सर्वतो व्याप्तत्वात् । अध्युपधानस्य च निषिद्धत्वात् । अत उष्णिगर्धपद्याविधिबलादेवं निश्चीयते पादभागोस्तीति ।। 8 ।।

ननु-भवत्यनया युक्त्या पादभागोऽ र्धपादभागः प्रथममिति तत्राह --

तदर्धषड्त्रिं शच्छत्याः ।। 9 ।।

विधेरित्यनुवर्तते । "षट्त्रिंशच्छत्या वा तृतीया द्वादशशत्या उतराः" (का.श्रौ.सू. 17/8/25) इति तृतीयायां लोकम्पृणानां षट्त्रिंशच्छतान्युपधातव्यत्वेन विहितानि । अतो विधानादेवं ज्ञायते यत्पादभागतोऽपि हीनप्रमाणेष्टका ऽस्तीति । कथं ? इत्थं -अग्निक्षेत्रस्य सार्धसप्तशत- पद्यालोकम्पृणत्वात् । तन्मध्ये चतुःषष्टीलोकानां तृतीयायां चितौ यजुष्मतीभिरुद्धत्वात् षडशीत्यधिकानि षट्शतानि पद्या लोकाः परिशिष्यन्ते । तेषुच सप्तविंशतिशतानां चतुश्चत्वारिंशदधिकानाम् पादभागानामुपामानं सम्भवति । विधानं च षट्त्रिंशच्छतानाम् । तच्च तदैव सम्भवति। यदि पादभागादपि न्यूनप्रमाणार्धपादभाग इष्टका भवन्तीति । अत एतस्मात्षट्त्रिंशच्छतानां लोकम्पृणानां विधानादर्धपदाभागाः श्रुत्यभिमताः सन्तीति निश्चीयते । षट्त्रिंशच्छतानांसमाहारः षट्त्रिंशच्छती तस्याः विधेर्विधानात्तदर्धं पादभागार्धमर्धपादभागसंज्ञा इष्टकाः सिध्यन्तीति सूत्रार्थः ।। 9 ।।

ननु सूत्रकारेण वक्राः कथमवसिता इत्यत आह-

वक्रा क्षेत्रपूरणात् ।। 10 ।।

अर्धव्यामेन परिलिखितस्य क्षेत्रस्य पूरणाद्वक्रा अध्यवसिताः । अतएवोक्तं सूत्रकारेण शेषेऽर्धैः वक्रा" (इ.म. सू. 2/4) (का.श्रौ.सू 17.1.16)", इति अन्यथा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तावत्क्षेत्रं पूरयितुं न शक्यते । कथं क्षेत्रं तावद्वृत्तं वक्रा भिरेवेष्टकाभिःपूरयितुं शक्यते । न समचुरस्त्राभिः लोकेऽपि कूपचयनादौ तथैव दृष्टत्वात् ।। अतः क्षेत्रपूरणाद्धेतोः सूत्रकारेण वक्रा अध्यवसिता इति ।। 10 ।।

बृहतीशब्दाच्च ।। 11 ।।

गार्हपत्यचितौ श्रूयते - "स चतस्त्रः प्राचीरुपदधाति" (श. ब्रा. 7/1/1/18) इति । तासां चार्धबृहतीत्वं विहितं शाखान्तरे । ततः सूत्रकारेणोपनिबद्धं-- "मध्येऽर्धबृहतीश्चतस्त्रः" (का. श्रौ. सू. 17/1/8) इति । अतो बृहतीशब्दात्सूत्रकारेण बृहती-इष्टका ऽस्तीत्ववसितम् । यतो ऽर्धबृहती-अस्तीति तदैव वक्तुं शक्यते । तदा बृहती भवति । यथा-अर्धपद्या अर्धपादभाग उच्यते । पद्याच पादभागश्च विद्यते । एवमत्रापि अर्धबृहतीशब्दाद् बृहतीसद्भावो निर्धारितः अथवा-- "ऊर्वस्थमात्र्यो वर्षिष्ठाः स्युः" (श.ब्रा. 8/7/2/17) इति श्रुतिशब्दादेव बृहती-अध्यवसिता । शब्दाच्छतिवाक्यादित्यर्थः । उरो अस्थि ऊर्वस्थि तत्प्रमाणमासां ता उर्वस्थमात्र्यः । अतिशयेन वृद्धा महत्यो वर्षिष्ठाः । वर्षिष्ठा इष्टका ऊर्वस्थमात्र्यो भवन्तीति श्रुत्यर्थः ।। 11 ।।

चयनयोगात्त्रिग्रा हिणी जङ्घामात्र्यध्यर्धाः ।। 12 ।।

त्रिग्राहिण्यो जङ्घामात्र्योऽध्यर्धाः । चयनयोगाच्चयनयुक्तया सूत्रकारेणावसिताः । पादमात्र्यस्तु "पादमात्रीः प्रथमायां चोत्तमायां च चित्योरुपदध्यात्" (शं. ब्रा. 8/7/2/17) इचि श्रुतिवाक्यादेव साक्षात्सिद्धा इति नात्र तत्साधने युक्तिरभिहिता । एवमिष्टकानां पृथुत्वदीर्घयोः प्रमाणमुक्तम् ।। 12 ।।

अधुनोच्छ्रायस्य प्रमाणमाह--

षडङ्गुलं चतुरङ्गुलं वोत्सेधः ।। 13 ।।

उक्तानां पादभागीनां वक्रान्तानामिष्टकानां षडङ्गुलं उत्सेध उच्चत्वं भवति । अर्धेनोर्धोत्सेधानां पद्याऽर्धपद्यानामुत्सेधो भवति । षडङ्गुलपक्षे त्र्यङ्गुलमथवा चतुरङ्गुलमुत्सेधः कर्तव्यः । चतुरङ्गुलपक्षे चार्धोत्सेधानां च द्व्यङ्गुलमुच्चत्वं भवति ।। 13 ।।

मत्या वा ।। 14 ।।

अथवा मत्येच्छया, इष्टकानामुत्सेवो भवति । अत उत्सेधे त्रयो विकल्पाः । अस्मिन्नपि पक्षे किञ्चन परिमाणमवश्यं कर्तव्यम् । अन्यथाअर्धोत्सेधाद्यसिद्धेः ।।14।।

इति सम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिकप्रजापतिसुतयाज्ञिकवदेव-कृते कात्यायनीयेष्टकापूरणसूत्रभाष्ये प्रथमा कण्डिका परिसमाप्ता ।। 1 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ द्वितीया कण्डिका

एवमिष्टकानां परिमाणमुक्त्वा-इदानीं सर्वाचितिसाधारणां परिभाषामुपनिबध्नाति--

चयनमवचने यथायोगम् ।। 1 ।।

योगशब्देन "वर्षीयस्यो बाह्याः" इत्यादिवक्ष्यमाणा युक्तिरभिधीयते । योगमनतिक्रम्य यथायोगम् । अवचने वचनाभावे यथायोगं चयनं कर्तव्यम् । वक्ष्यमाणयुक्त्यनुसारेणैव चयनं कर्तव्यमित्यर्थः ।। 1 ।।

तमेव योगमाह--

वर्षीयस्यो बाह्याः ।। 2 ।।

अतिशयेन वृद्धा महत्यो वर्षीयस्यः । इष्टका बाह्या उपधेयाः । अर्थाद्वर्षीयस्योऽन्तरा मध्ये उपधेयाः । "अवचने" इत्यनुवर्तते।, वचनेतु सति वर्षीयस्योऽपि मध्ये उपधीयन्ते यथा--"अर्धबृहतीश्चतस्रः" (का.श्रौ.सू. 17/1/8) यथाच--" पुरस्तादभितो ऽनूकं जङ्घामात्र्यौ" (का.इ.पू.सू. 2/13) " अन्तःश्रोण्योर्बृहत्यौ" (का.इ.पू.सू. 6/8) इति अत्रोदाहरणं यथा-"पूर्वार्धे द्वादश पद्याः षोडश पश्चात् " इति । अत्रान्तिमलोकस्यापस्यामी रूद्धत्वात्संल्लग्नास्ताभ्यो मध्यत उपान्त्यलोके उपधीयन्ते । तथा- "शेषेषु चतुर्विंशति पादमात्रीणां द्वादशार्धपद्याः" (का.इ.पू.सू. 4/9) इति सामान्येनोक्तम् । अत्रापि पादमात्रीणां विभज्य सर्वेषु पुरुषेषु बाह्यप्रदेशे एवोपधानम् । तथा-षट्पंचाशतं पादमात्रीणां तिस्रोऽर्धपद्याः पञ्चाशेच शते पादभागानामेकैकस्मिन्पक्षेपक्षे" (का.इ.पू.सू. 3/20) इति सामान्येनोक्तम् । तत्रैतत्परिभाषाबलात्पद्या बाह्याः । ततोऽन्तराऽ र्धपद्यास्ततोऽप्यन्तरा पादभागा भवन्ति । तथा द्वितीयायामुक्तं--"चतुरश्चार्धपादभागानामात्मनि" (का.इ. पू. सू.4/9) "अर्धपादभागौच पुच्छे" (का.इ.पू.सू.4/11) इति तत्रार्धपदाभागानामतिलघुत्वान्मध्ये उपधानम् । एवं पंचम्यामपि मध्ये पादपादभागानां चतुः सप्ततीन्त्रि पंचशतान्युपदध्यात् चत्वारि चार्धपादभागानामित्यर्धपादभागानां मध्ये उपधानम् । कुतः? । श्रुतावग्नेः पशुत्वनिरूपणात् । "पशुरेष यदग्निः" ((शा.ब्रा. 8/3/2/12) इति । पशोश्च महान्त्यङ्गानि पार्श्वक्रोडसक्थ्यादीनी बाह्यानि । भवन्ति । लघूनिच यकृद्वृक्वानीन्यन्तरा भवन्ति । प्रसिद्धिश्च लोकेऽपि गृहप्राकारादौ बहिः स्थूलाभिरिष्टकाभिश्चित्वा मध्ये लघुभिः पूरयन्ति ।। 2 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

नाध्युपधानम् ।। 3 ।।

"अवचने" इत्यनुवर्तने,। अवचने वचन भावे इष्टकानामध्युपधानमुपर्युपधानं भवति । तिर्यक्प्रस्ताररीत्यैव चयनं कर्तव्यम् । नोपरिस्थलीकतया । वचने सत्यध्युपधानं भवति । यथा- पुष्पकरपर्णरुक्मपुरुषस्वयमातृण्णादूर्वाणाम् । यथा च उल्लूखलमुसलोखापशुशीर्षाणामधोत्सेधानांच । अतो वचनं विना तिर्यक्प्रस्तारमेव चयनं कर्तव्यमित्यर्थ । अत्र क्षेत्रपूरण एव तात्पर्यम् । कुतः? "स वै यजुष्मतीरूपधाय लोकम्पृणया प्रच्छादयति" (श.ब्रा. 8/7/2/8) इति । तथा "स यस्यां स्रवत्यां प्रथमे उपदधाति ततो दशर्भिदशभिः सन्छादयन्नैत्या स्वयमातृण्ण-यै स तेनैव दक्षिणावन्जघनेन स्वयमातृणां संछादयन्नेत्यानूक्याया । अथ पुनरेत्य तमवधिं संछादयत्यात्मानमग्रे संसादयत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरम् "(श.ब्रा. 8/7/2/12-13) इति छादनस्यैव विधानात् । तथा - "स एष प्राण एव यल्लोकम्पृणा तया सर्वमात्मानं प्रच्छादयति सर्वस्मिँस्तदात्मन्प्राणं दधाति तद्यद्धास्यैषाङ्ग नाभिप्राप्नुयात्प्राणो हास्य तदङ्गं नाभिप्राप्नुयाद्यदु वै प्राणोङ्गं नाभिप्राप्नोति शुष्यति वा वैतन्म्लायति वा तस्मादेनंसर्वमेवैतया प्रच्छादयेत् " (श.ब्रा. 8/7/2/14) इत्यर्थवादाच्च तथा "लोकम्पृण छिद्रं पृणं" (वा.सं.15/59) इति लोकंच पूरय पूरयेदिति मंत्रवर्णाच्च ।। 3 ।।

किञ्च -

शेषेष्टौऽवक्रा इति क्षेत्रपूरणात् ।। 4 ।।

शेषे क्षेत्रेऽष्टौ वक्रा संज्ञा ईष्टका उपधेयाः । अधुना वक्रेष्टकोपधानप्रकारेण क्षेत्रपूरणादप्येवं ज्ञायते । यदध्युपधानं भवति । एकप्रस्तारमेव चयनं भवति । यदि क्षेत्रपूरणे तात्पर्य न स्यात्तर्हि वक्राणाभिष्टकानामुपधानविधानं किमर्थं कुर्यात् । अतः क्षेत्रपूरणमेवात्र कर्तव्यमिति तात्पर्यं प्रतीयते । तच्चैकप्रस्तारेणापि भवतीति किमर्थं विना वचनमुपर्युपधानमाश्रीयते । किञ्च- प्रथमाचितिर्द्वितीयाचितिरित्यादि शब्दा अप्येकप्रस्तार एव चयने मुख्यार्था भवन्ति । इतरथा गौणाः स्युः ।। 4 ।।

किञ्च -

एकैकस्यां मज्जादिसम्पदश्च ।। 5 ।।

एकैकस्यामिष्टकायां- "मज्जा यजुरस्थीष्टका मांस सादनं त्वक्सूददोहा लोम पुरीषस्य यजुरन्नं पुरीषम् " (श.ब्रा. 8/ 1/4/5) इति सम्पदः । इति सम्पत्तेहर्तोश्चाध्युपधानं भवति । सम्पत्सम्मपत्तिः । सम्पद इति हेतौ पन्चमी । अत्रहि- तदाहुः कथमस्यैषो ऽग्निः सर्वः कृत्स्न इष्टकायामिष्टकायां संस्कृतो भवति (शा.ब्रा. 8/1/4/5) इति प्रश्नपूर्वकम् । अत्र च इष्टकायामिष्टकायां" इति वीप्सया सर्वास्विष्टकासु मज्जादिसम्पच्छ्रूयते । सा चाध्युपधाने कृते न भवति । यस्या

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उपर्युपधानं क्रियते तस्या पुरीषादिसम्बधाभावात् । अत एकैकस्यामिष्टकायां मज्जादिसम्पत्तिदर्शनादध्युपधानं भवतीति सूत्रार्थः । अस्मादेव "लोकम्पृणया प्रच्छादयति" (श. ब्रा. 8/7/2/11" इति वचनात् । "लोकम्पृण छिद्रं पृण" (वा. सं. 15/59) इति मंत्रवर्णात् "यदु वै प्राणोऽङ्गन्नाभिप्राप्नोति शुष्यति वा" वैतन्म्लायति वा (श.ब्रा.8/ 7/ 2/14) इत्यर्थवादाच्च संल्लग्नार्भिर्निरन्तराभिरेवेष्टकाभिश्चयनं कर्तव्यम् । यथाऽन्तरा भूमिर्न दृश्यत इत्यवधार्यते ।। 5 ।।

यजुष्मत्यः पादमात्र्यः ।। 6 ।।

"अथ यजुष्मत्यो दर्भस्तम्बो लोगेष्टकाः" (श.ब्रा.10/3/1/4) इत्यादिश्रुत्युक्ता यजुष्मत्यः पादमात्र्यः पद्या भवन्ति एतत्सामान्येन सर्वयजुष्मतीनां परिमाणमुक्तम् । अग्रेऽस्य सूत्रस्य बहूनि पदानि वक्ष्यति । पंचम्यां चिताविदं श्रूयते-"गार्हपत्यमुपदधाति" (शं.ब्रा. 8/6/3/7) इति । तथा "तं वा एवैरेव यजुभिरितयाऽऽवृता चिनोति" (श.ब्रा.8/6/3/ 7) इति । "एतया वृता इत्यनेन- "मध्ये ऽर्धबृहतीश्चतस्त्रः" (का. श्रौ. सू. 17/1/8) इत्यादिकं प्राप्नोति ।। 6 ।।

पञ्चम्यां गार्हपत्ये ऽर्धबृहतीनांस्थाने चतस्त्रोऽर्धपद्याः ।। 7 ।।

पन्चम्यां चितौ गार्हपत्ये--"मध्ये ऽष्टेष्टकं गार्हपत्यम् । (का.श्रौ.सू. 17/12/17) इत्येतत्सूत्राद्विहितेऽर्धबृहतीनां स्थाने चतस्त्रोऽर्धपद्या उपदधाति । अन्याश्चतस्त्रः पद्या एव । अत्राप्यन्यत्सर्वं गार्हपत्यचितिवत् तेन चतस्त्रो ऽर्धपद्या दक्षिणोत्तराः प्राग्लक्षणाः, पश्चात्पुरस्तात् द्वेद्वे तिर्यग्लक्षणे पद्ये । उपधानमन्त्रो विधिक्रमश्च पूर्ववत् ।। 7 ।।

अयुक्ष्वभितो नूक्यामर्धपद्ये ।। 8 ।।

इतः प्रभृति-"उष्णिग्विराजाश्चार्यपद्याश्चेत् " (का.इ. पू. सू. 2/18) इत्येतत्पर्यन्तं- "यजुष्मत्यः पादमात्र्यः" (का.इ. पू. सू. 2/6) इत्यास्यापवादसूत्राणि । पन्चम्यामित्यनुवर्तते। पन्चम्यां चितौ, अयुक्ष्वयुग्मास्विष्टाकासु या अनूक्या नूकस्योपरिभवा तामभितः पार्श्वद्वये उपधीयते । न पद्ये । "अत्रहि छन्दस्यास्तिस्त्रस्तिस्त्रः (का.श्रौ.सू. 17/12/4) इति । "सर्वतोऽषाढाबेलायांस्तोमभाग "रश्मिना सत्यायेति" (वा. सं. 15/9) प्रतिमंत्रं पञ्चदशं दक्षिणेनानूकम् " (श्रौ.सू.17/ 11/9/10) इति सूत्राभ्यामयुग्मा इष्टका विहिताः । तासुच- "अयुग्मगणमध्यमा नूके" (का.श्रौ.सू.16/7/22) इति सूत्रेण तिसृणां मध्ये मध्यमायां द्वितीयायामनूकस्योपर्युधानम् विहितम् । अतस्तां पद्यामुपधायाभितोऽर्धपद्ये उपधेये । एवं स्तोमभागस्वपि "दक्षिणतः सप्त" (का.इ.पू.सू. 2/24) इति विभागात्सप्तानां मध्यमा चतुर्थी, अनूकस्योपर्युपधेया । तामभितस्तृतीयापन्चम्यावर्धपद्ये । अनेन सूत्रेण पंचम्यां चित्तौ गायत्रीत्रिष्टुब्बृहतीककुप्पङ्क्तीद्विपदासु दक्षिणतः स्तोमभागासु चानूकमभितो द्वेद्वे अर्धपद्ये सिद्धे भवतः उष्णिहां तिसृणामध्यर्धपद्यात्वमुक्तं सूत्रकारेणैव ।। 8 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सृष्टीनां च ।। 9 ।।

"अनूक्यामभितोऽर्धपद्यते" इति चकारेणानुकृष्यते । चतुर्थां चितौ सृष्टीनामपुधानुमुक्तम् । "रेतः सिग्वेलायांच सप्तदश सर्वतो नव दक्षिणेनानूक सृष्टीरेकया स्तुवतेति (वा.सं. 14/ 28/31) प्रतिमंत्रम् "(का.श्रौ.सू. 17/10/17) इति । तासु "नव दक्षिणेनानूकम् " (का.श्रौ.सू.(17/10/17) इति विधानाद् दक्षिणस्यां दिशि पंच भवन्ति । तासां पंचानां मध्ये तृतीया मध्यमा सानूक्या तामभितोऽर्धपद्ये भवतः । पूर्वसूत्रेहि पञ्चम्यामित्यनुवृत्तेश्चतुर्थ्यां न प्राप्नोत्यप्राप्ते वचनम् । सृष्टीनां चानूक्यमभितोऽर्धपद्ये भवत इत्यर्थः ।। 9 ।।

अपस्यावालखिल्यानांच पूर्वापूर्वम् ।। 10 ।।

"अनूक्यामभितोऽर्धद्ये" इत्यनुवर्तते । प्रथमायां चितौ- - "अपस्याःपन्च पन्चानूकान्तेषु "(का.श्रौ.सू. 17/ 6/ 2) इत्यपस्याः सर्वासु दिक्षु विहिताः सन्ति । तृतीयायां चितौ च पुरस्तात्पश्चाञ्च सप्त सप्त वाल खिल्या विहिताः । "स वै सप्त पुरस्तादुपदधाति सप्त पश्चात् " (शा.ब्रा.8/3/4/1) इति सर्वासांच- "अयुग्मगणमध्यमाऽनूके" (का.श्रौ.सू.मू. 16/ 7/ 22) इति सूत्रेण मध्यमाऽनूक्या भवति । तत्राह- "अपस्यावालखिल्यानांच पूर्वोपूर्वाम् " दिश्यपहितामनूक्याममितोऽर्धपद्ये भवतः । "पूर्वापूर्वम् " । इति विशेषोपादानादन्यासु तिसृषु दिक्ष्वापस्याः सर्वा पद्या भवन्ति । वालखिल्या अपि पश्चात्सर्वाः पद्या एव । एतदस्यप्राप्तप्रापणार्थं वचनम् ।। 10 ।।

तृतीयायामप्यये ऽप्ययेष्टौ लोकान् ।। 11 ।।

"अभितोऽर्धपद्ये" इत्यनुवर्तते । तृतीयायांच चितौ छन्दस्यानामिष्टकानां दक्षिणतः पश्चादुत्तरतश्चोपधानमुक्तम् । "छन्दस्या द्वादशाप्य येषु " (का.श्रो.सू. 17/9/9) इति । अप्ययः पक्षुपच्छसन्धिः । तृतीयायां चितौ--अप्ययेऽप्यये तिसृष्वपि दिक्षु या इष्टका उपधीयन्ते छन्दस्यासंज्ञास्तासामष्टौ लोकानामभितो ऽर्धपद्ये उपधेये ।। 11 ।।

वयस्या अध्यर्धाः ।। 12 ।।

द्वितीयायां चितौ वयस्याः सर्वासु दिक्षु विहिताः ' 'वयस्याः पञ्च पंचानूकान्तेषु" (का.श्रौ.सू. 17/8/22) इति । ताः "यजुष्मत्यः पादमात्र्यः" (का.इ.पू. 2/6) इत्यनेन सूत्रेण पद्यांः प्राप्नुवन्ति तदपवाद आरभ्यते-वयस्यासंज्ञका इष्टका अध्यर्धा भवन्ति न तु पद्याः । द्वादशाङ्गुलविस्तारा अष्टादशाङ्गुलदीर्घा इष्टका अध्यर्धा इत्युच्यन्ते । अर्धेनाधिका अध्यर्धाः सार्धपद्या लोकव्यापिन्यः ।। 12 ।।

एवं सर्वासामपि वयस्यानामध्यवर्धात्वं प्राप्ते तदपवादमाह--

पुरस्तादभितोऽनूकं जङ्घामात्र्यः ।। 13 ।।

"वयस्याः पंच पंचानुकान्तेषु मूर्धावयः" (वा.सं. 14/9/10) इति प्रतिमंत्रं चतस्रः पुरस्तात् " (का.श्रौ.सू. 17/8/22-23) इत्युक्तम् । तत्राह--पुरस्तात्प्राच्यां

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दिशि चतसृणां वयस्यानां मध्ये ऽनूकमभितो ये द्वे वयस्ये ते जङ्घामात्र्यौ भवतः । नत्वध्यर्धे । अन्ये द्वे अध्यर्धे एव । अन्यासु दक्षिणपश्चिमोत्तरासु दिक्षु सर्वा अप्यध्यर्धा एव ।। 13 ।।

चतुर्थ्यां पश्चाच्च ।। 14 ।।

"पुरस्तादभितो ऽनूकं जङ् घामात्र्यौ" इत्यनुवर्तते चतुर्थ्यामनूकान्तेषु दक्षिणोत्तरे द्वेद्वे (का.श्रौ.सू. 17/10/1) इति सूत्रेण ये पुरस्तात् पश्चाच्च द्वेद्वे यजुष्मत्यौ विहितौ । तत्राह-चतुर्थ्यां चितौ पुरस्तात्प्राच्यां दिश्यनूकमभितो जङ्घामात्र्य भवतः । न पद्ये . केवलं पुरस्तात् । पश्चाच्चापरस्यां दिश्यनूकमभितो जङ्घामात्र्यवेव चतुर्थ्यां भवतः । दक्षिणोत्तरायास्तु पद्या एवं ।। 14 ।।

चतुर्दश चार्धपद्याम् ।। 15 ।।

चशव्दश्चतुर्थ्यामित्यस्यानुकर्षणार्थः । चतुर्थ्यां चितौ- पूर्वाभ्यामपराश्चतुदर्श (का.श्रौ.सू.17/10/2) इति या विहिताश्चचतुर्दश यजुष्मत्यस्ता अर्धपद्या भवन्ति । न पद्याः ।। 15 ।।

द्वितीयातृतीययौ रेतः सिग्वेलायां दक्षिणतस्तिरश्चालिखिताश्च ।। 16 ।।

अर्धपद्या इत्यनुवर्तते । द्वितीयायां चितौ तृतीयायां चितौ दक्षिणस्यां दिशि रेतः सिग्वेलाया या यजुष्मत्यो विहिताः सन्ति । ता अर्धपद्या भवन्ति । तिरश्चालिखिताश्च भवन्ति । द्वितीयायां हि दक्षिणस्यां दिशि रेतः सिग्वेलायामेकस्यामेव । द्वितीयापंचम्योराश्विनीवैश्वदेवीप्राणभृदपस्या विहिताः । तत्रैकस्मिन्नेव पद्यालोके द्वयोर्द्वयोरुपधानात् "दक्षिणामुत्तेरण पन्चमी" (का.श्रौ.सू. 17/8/6) इति विधिबलात्तिरश्चालिखिते । तृतीयायांच दक्षिणस्यां दिशि रेतः सिचिर्वेलायामनूकस्योपरि तथैव द्वितीयापंचम्यौ दिश्ये विहिते ते अपि प्रागयते अर्धपद्ये तिरश्चालिखिते भवतः ।। 16 ।।

नाकसत्पंचचूंडानां च ।। 17 ।।

"दक्षिणतोऽ र्धपद्यास्तिरश्चालिखिताश्च" इत्यनुवर्तते । पंचम्यां चितौ ऋतव्यावेलायां सर्वासु दिक्षु-आश्विनीवन्नाकसदः पंचचूडाश्च विहिताः सन्ति । "नाकसदो ऽनूकेषु पूर्वबर्जमृतव्याबेलायाम् " (का.श्रौ.सू. 17/12/1), इति । तथा -"पुरीषमोप्योपरि अयं पुरः" (वा.सं. 13/54) इति पंचचूडाः का:" (.श्रौ.सू. 17/12/2)।। तत्राह-तासां नाकसदानां पंचचूडानां पंचचूडानां या दक्षिणतो दक्षिणस्यां दिशि ऋतव्यायामनूकस्योपरि, एकस्मिन्पद्यालोके ये दक्षिणतो द्वेद्वे उपधीयन्ते । ते अप्यर्धपद्ये तिरश्चालिखिते सूत्रान्तरा दर्धोत्सेधे च भवतः ।। 17 ।।

उष्णिग्विराजश्चार्धपद्याश्चेत् ।। 18 ।।

"अर्धपद्यास्तिरश्चालिखिताश्च" इत्येतदनुवर्तते । पंचम्यां चितौ "अपरा गायत्रीभ्य उष्णिहः" "अग्ने वाजस्य" (वा.. सं. 15/ 35/37) (का.श्रौ.सू 17/12/12) इत्युष्णिहो विहिताः "विराजो दशदश प्रतिदिशम् " (का.श्रौ.सू. 17/12/15) इति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रतिदिशं विराजा विहिताः । ता एता उष्णिहो विराजश्च चेदर्धपद्या भवन्ति । तदा तिरश्चालिखिता भवन्ति । "प्राचो दक्षिणोत्तरे" (का.श्रौ.सू. 16/7/26) इति सूत्रानुरोधात् । एतस्माच्चेच्छिब्दाद्विराजामुष्णिहां चार्धपद्यात्वं वैकल्पिकमिति प्रतीयते । अत एवाह सूत्रकारः- "गायत्र्यसपत्नगणमध्ये सम्भवादुष्णिग्भ्यो वा परा अर्धपद्या उपधाय" (का.श्रौ.सू. 17/11/6/7) इति । अस्यार्थाः प्राच्यां दिशि विराजोऽन्तिमलोके नूकमभितो ऽर्धपद्या उपधीयन्ते । "अभितो युग्माः (का.श्रौ.सू. 16/7/24) इत्युक्तत्वात् । गायत्र्यसपत्नाश्च विराड्गणस्य मध्ये भवन्ति । कस्मात् ? पूर्वविराजामन्यत्रोपधानस्यासम्भवात् । कथमसम्भव इतिचेन्मध्यादारभ्य पूर्वान्तं गार्हपत्यात्रिष्टुब्बिश्वज्योर्तितव्यास्तोमभागाबृहती-ककुबुष्णिग्भिः सर्वलोकानां रुद्धत्वात् । अतः पुरस्तादित्यस्यामुख्यार्थत्वानुरोधरात् । प्रान्त एव विराजः पद्या उपधेयाः । गायत्र्यसपत्नानां चानन्यस्थानत्वद्विराड्गणस्य मध्ये उपधानं भवति । अतः पंच विराजो सपत्ना या उत्तरमुपधीयन्ते । पंच गायत्रीभ्यो दक्षिणत इति । अस्मिन्पक्षे विराज उष्णिहश्च पद्या एव भवन्ति विरोधाभावात् । ननुप्रान्ते ऽपि विराजामुपधाने गायत्र्यसपत्नाभिःस्थानस्य रुद्धत्वादसम्भवस्तुल्य एव । किमित्यत्रोपधीयन्ते । इति अत्रोच्यते । अत्र पुरस्ताच्छब्दस्यामुख्यार्थत्वमिति । दोषैक्यम् । इतरत्रोपधानेच दोषद्वयं पुरस्तादित्यस्य गौणत्वमिष्टकातरावरुद्धे देशे उपधानं चेति । अतोऽत्रैवोपधानं युक्तम् । पक्षान्तरमाह-- "उष्णिग्भ्यो वा ऽपरा, अर्धपद्या उपधाय" (का.श्रौ.सू. 17/11/7) इति । अथवा उष्णिहोप्यर्धपद्या उपधाय तत्र लोकभाजः कृत्वा ताभ्यो परा विराजोऽर्धपद्या उपधेयाः । एवं कस्याचिदपीष्टकागणस्य मध्ये उपधानं कृतं न भवतीत्येको गुणोऽस्मिन्पक्ष । अत उभयोरपि पक्षयोरेकैकदोषस्दभावन्नान्यतरावधारणा । अतो विकल्पः । तस्मात् साधूक्तं - "उष्णिग्विरचार्धपद्याश्चेत् " इति ।। 18 ।।

"सर्वतोऽषाढावेलायां स्तोमभागाः" (का.श्रौ.सू. (17/ 11/9) इति सूत्रकारेण सामान्येन स्तोभागा विहितास्तासांच प्रतिदिशं विभागेनोपधानमाह--

अष्टौ पुरस्तात्स्तोमभागाः ।। 19 ।।

एकोनत्रिंशत्संख्यानां त्रिंशत्संख्यानां वा स्तोमभागानां मध्ये-- अष्टौ स्तोमभागाः पुरस्तादुपदधाति । "अभितो युग्माः" (का.श्रौ.सू.16/7/24) इत्यनया रीत्या प्रागनूकमभितश्चतस्रश्चतस्रः ।। 19 ।।

पश्चाच्च ।। 20 ।।

पश्चादित्यपरस्यां दिश्यापि चशब्दादष्टावेव स्तोमभागा उपदधातीति प्राग्वत् ।। 20 ।।

दक्षिणतः सप्त ।। 21 ।।

दक्षिणस्यां दिशि-आषाढ वेलायां सप्त स्तोमभागा उपदधाति । अत्र-- "अयुग्ममणमध्यमाऽनूके" (का.श्रौ.सू. 16/7/22) इत्युक्तत्वात्सप्तानां मध्यमा चतुर्थी-- अनूकस्योपर्युपधेया तामभितो द्वे अर्धपद्ये । अन्याः पद्याः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उत्तरतः शिष्टाः ।। 22 ।।

शिष्टा अवशिष्टा एकोनत्रिशंत्पक्षे षट् । त्रिंशत्पक्षे सप्त । उत्तरत उत्तरस्यां दिश्युपधेयाः षट्पक्षे "अभितो युग्माः" (का.श्रौ.सू. 16/7/24) इति षडपि पद्याः । सप्तपक्षे "अयुग्मगणमध्यमाऽनूके" (का.श्रौ.सू. 16/7/22) इति मध्यमा ऽनूकस्योपरि । तामभितोऽर्धपद्ये । शेषाः पद्याः ।। 22 ।।

अर्धोत्सेधाः ।। 23 ।।

अतः परमर्धोनोत्सेध अभिधीयन्ते इति शेषः । अन्यासामिष्टक्रानां च उत्सेध उच्चत्वं यासां तां अर्धोत्सेधाः । षडङ गुलोत्सेधपक्षे त्र्यङ् गुलचतुरङ् गुलोत्सेधपक्षे द्व्यङ्गुलम् । मत्येति पक्षे तदर्धमिति ।। 23 ।।

कास्ता अर्धोत्सेधा इत्याशङ्क्याह--

तृतीयायामृतव्याः ।। 24 ।।

तृतीयायां चितौ ऋतव्याश्चतस्रो ऽप्यर्धोत्सेधा भवन्ति । यतस्तत्र ऋतव्ययो रुपरि पुन र्ऋतव्ययोरन्ययोरुपधानं विहितम् । अतः पार्श्ववर्तिनीभिरिष्टकभिः समोत्सेधत्वापादनाय ऋतव्यानामर्धोत्सेधमेवोक्तम् ।। 24 ।।

नाक्सत्पंचचूडाः ।। 25 ।।

"अर्धोत्सेधाः" इत्यनुवर्तते । पंचभ्यां, चितौ नाकसदः पंचचूडाश्चार्धोत्येधा भवन्ति । तासामप्युपर्युपधानविधानात् । आसांच तिस्रस्तिस्रः पद्याः । द्वे द्वे अर्धपद्ये तिरश्चालिखिते ।। 25 ।।

गार्हपत्यपुनश्चिचिति चोत्सेधयोगात् ।। 26 ।।

पंचम्यां चितौ गार्हपत्येष्टकाः पुनश्चितीष्टकाश्चार्धोत्सेधा एव भवन्ति । उपर्युपधानादेव । तासां चतस्रश्चतस्रोऽर्धपद्याः । चतस्रश्चतस्रः पद्या इति । कस्मात् ? उत्सेधयोगादिति सर्वत्र हेतुः । एवंहि सर्वासामिष्टकानां सम उत्सेधो युज्यते युक्तो भवति । इतरथा क्वचित्क्वचिदुच्चत्वादयुक्तो विरुद्ध एव स्यात् ।। 26 ।।

उलूखलोखानिखननं च ।। 27 ।।

"उत्सेधयोगात्" इत्युनुवर्तते । प्रथमायां चितौ - उलूखलोपधानं विधाय तस्योपर्युखोपधनं विहितम् । तस्या उखायाः सिकतापूर्णाया उपरि पशुशीर्षाणामुपधानं विहितम् । तत्राहं- उलूखलोखयोर्निखननं कर्तव्यम् । तत्स्थानेऽवटं खात्वा तत्रोलूखमुपधाय तस्योपर्युखाया उपधानं कर्तव्यम् । यथा तत्रोपहितानि पशुशीर्षाणि पाश्वेष्टकाभिः समोच्छ्र्याणि भवन्ति । कस्मात् ? उत्सेधयोगात् एवं कृते युक्त उत्सेधो भवति । इतरथा, प्रादेशमात्र उर्ध्व उलूखलस्तस्योपर्युखा । तस्या उपरि शिरांसि । एवंविध उत्सेधः पंचापि चितीरतिक्रामेत्तच्चायुक्त म् । अतो निखननमेव युक्त म् ।। 27 ।।

इति सम्राटस्थपतित्रिग्निचिन्महायाज्ञिकप्रजापतिसुतयाज्ञिक देवकृते कात्यायनीयेष्टकापूरणसूत्रभाष्ये द्वितीया कण्डिका परिसमाप्ता ।। 2 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ तृतीया कण्डिका

एवं यजुष्मतीनां बिवेकमुक्त्वा लोकम्पृणानां विवेकमाह लोकम्पृणाः।।1।।

विविच्य कथ्यन्ते इति शेषः । "द्विसाहस्त्री प्रथमा लोकम्पृणानां पंचाशदूनोत्तराश्च त्रिसाहस्र्युत्तमा" (का. श्रौ.सू. 17-7-21-23) इत्यभिहितं सूत्रकारेण । तासां लोकम्पृणानां मध्ये इयत्यः पद्या, इयत्योऽर्धपद्या, इयत्यः पादभागा, इयत्यो जङ्घामात्र्य, इयत्यस्त्रिग्राहिण्य, अयत्योऽध्यर्धा, इयत्योखर्धवृहती, इयत्यो बृहत्य, इयत्योऽर्धपादभागाः । इयत्य एवंविधाः प्रथमायां इयत्य एवंविधा द्वितीयायां इयत्य एवविधास्तृतीयां इयत्य, एवंनिधाश्चतुर्थ्या इयत्य एवंविधाः पंचम्यां, तथा-इयत्य एवंविधा एषु स्थानेष्वात्मनि इयत्य एवंविधाः पक्षपुच्छेषु । इत्यादिप्रकारेण विचिच्य लोकम्पृणाः सर्वासु चितिषूच्यन्ते ।। 1 ।।

तत्र तावत्प्रथमायां चितावाह--

प्रथमायां षद्सप्तति पादमात्रीणामुपदध्यादष्टाविशंतिमर्धपद्यानां पादभागानां नवशतानि चतुर्विंशत्यात्मनि ।। 2 ।।

प्रथमायां चितावात्मनि, अग्न्यात्मध्ये पादमात्रीणां पद्यानां षट्सप्ततिमुपदध्यात् तथा पादभागानां नवशतानि चतुर्विंशान्यधिकान्यु पदध्यात् ।। 2 ।।

तासां विभागः ।। 3 ।।

तासां सम्मुग्धाकारेणोपदिष्टानां पादमात्र्यर्धपद्यापादभागानां विभाग एतावतीनामस्मिन्प्रदेशे एतावतीनामस्मन्नित्येवंरूपो विभाग उच्यत इति शेषः ।। 3 ।।

प्राणभृदपस्यान्तरेषु षट्षट् पादमात्रीः ।। 4 ।।

"व्याधारणवत्सप्राणभृतः कर्णसहिता दशदश" (का.श्रौ.सू. 17 /6/3) इत्युक्तम् । "अपस्याः पंच पंचानूकान्तेषु" (का. श्रौ .सू. 17/6/2) इति च । तेन सर्वासु दिक्ष्वपस्या उपधीयन्ते । सर्वेषु कोणेषु प्राणभृतः तासां प्राणभृदपस्यानामष्टावन्तराणि तेष्वन्तरेष्वन्तरालेषु षट्षट् पादमात्रीरुपदधाति ।। 4 ।।

तन्मध्येष्वेकैकामर्धपद्याम् ।। 5 ।।

तन्मध्येषु तासां प्राणभृदपस्यान्तरालेषूपहितानां षण्णां षण्णां पादमात्रीणां मध्येष्वेकैकामर्धपद्यामुपदध्यत् ।। 5 ।।

पुरस्तात्तु पादमात्र्यौ ।। 6 ।।

तुशब्दो भेदे । पुरस्तात्प्राच्यां दिशि । प्राणभृदपस्यान्तरालोपहितानां षण्णा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पाद-मात्रीणां मध्ये पादमात्र्यौ पद्ये उपधेये । नार्धपद्ये । यत्कारणं पूर्वामपस्यामनूक्यामभितोऽर्धपद्ये । अतोऽपस्याप्रामभृदन्तरालस्यार्धपद्या सहिताभिः षड्भिः पद्याः पूरयितुमशक्यत्वात्पादमात्र्योरुपधानं युक्तम् त्वपस्यानां पंचनामपि पद्यात्वात्सार्धाभिरेव षड्भिः पद्याभिरेवान्तरालपूर्तेरर्धं पद्योपधानमेव ।। 6 ।।

अंसौ चापरेण द्वितीयेऽर्धपद्ये द्वेद्वे ।। 7 ।।

असंयोः कोणयोर्ये प्राणभृतावुपहिते तत्रांसशब्देन लक्ष्यते । तेनांसावपरेणांसयोरुपतिहितौ प्राणभृतौ चपरेणापरस्मिन्दक्षिणत उत्तरश्च द्वितीये लोके द्वे द्वे ऽर्धपद्ये उदगायते उदग्लक्षणे उपधेये ।। 7 ।।

कस्मात्ते द्वेऽर्धपद्ये उपधीयते इत्यतःआह--

अतिहृत्य पूर्वे इति श्रुतेः ।। 8 ।।

पंचम्यां चितौ लोकम्पृणोपधानप्रधानप्रारम्भस्थानविधायिका श्रुतिरियम् । "अतिहृत्य पूर्वे उत्तमे अनुपदधाति" (श. ब्रा. 8/7/2/5) इति । "पूर्वे" प्रथमायां चितौ ये प्रथमोपहिते ते अतिंहृत्यातिक्रम्योत्तमे उत्तमाचितिसम्बधिन्यावु-पदधातीति श्रुत्यर्थ । अत्र श्रुतौ पूर्वे इति द्विवचननिर्देशादसावपरेण द्वितीये लोके प्रथमायां द्वे इष्टकेऽउपहिते स्त इति गम्यते । ननु कथं ? ज्ञायते द्वितीये लोके द्वे इष्टके स्त इति । द्वितीये लोके एका पद्या तृतीये च लोके द्वितीया । एवं द्वे प्रथमायां पूर्वोपहिते । ते अतिक्रम्य पंचम्यां चतुर्थलोकादारभ्योपधानं कुतो न भवतीति ।। 8 ।।

अतस्तदुपपादनायाह--

प्रत्यगरत्निमात्रादिति च ।। 9 ।।

पंचभ्यां चितौ ह्येवं पठ्यते । दक्षिणां सात्प्रत्यगरत्निमात्रादधि लोकम्पृणाः पूर्ववदिति । अरत्निश्च पद्याद्वयेनैव भवति । अतो वाक्यादाहृत्य तृतीयलोकादारम्य लोकम्पृणानामुपधानं विधीयते । तेन चतुर्थलोको न भवति । ततश्चारत्निमात्रमर्ध्येऽसे प्राणभृद्या उपहिता सा यजुष्मती । अत एकस्मिन्नपरस्मिन्पद्यालोके द्वे इष्टऽकेर्धपद्ये एव भवतः । प्रत्यगरत्निमात्रादिति निर्देशादेवं गम्यते । यदसावपरेण द्वितीये लोकेऽर्धपद्ये भवतः । एवंच सति पूर्वपार्श्वे चतुर्दश पद्याः । अपरस्मिन्नात्मपार्श्वे द्वादश । दक्षिणोत्तरयोरेकादशैकादेशेति । एवं षट्सप्ततिर्मर्ध्येऽष्टाचत्वारिंशत्पद्या उपहिताः । अष्टाविंशतिरवशिष्यन्ते ।। 9 ।।

तासामुपधानस्थानमाह --

पूर्वार्धे द्वादश पद्याः ।। 10 ।।

आत्मनः पूर्वार्धे पूर्वभागे द्वादश पदा उपदध्यात् । ततश्चापस्यामपरेऽर्धापस्यासंलग्ना एवोपधेयाः "वर्षीयस्यो बाद्याः" (का. इ.पू.सू. 2/2) इति न्यायात् । "अभितो युग्माः" (का.श्रो.सू. 16/7/24) इति वचनाच्चानूकमभितः षट्षट् ।। 10 ।।

षोडश पश्चात् ।। 11 ।।

"पद्याः" इत्यनुवर्तते षोडश पद्याः पश्चादात्मनोऽपरस्मिप्रदेशे उपदधाति । ता

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अपि "वर्षीयस्यो बाह्याः" (का. इ.पू.सू. 5/2)" इति न्यायेनापस्यातः पुरस्तादपस्यासंल्लग्ना एव । प्रागनूकमभितोष्टकावष्टावुपदधाति । "अभितो युग्माः" (का. श्रू.सू. 16/7/24) इत्युक्तेः । एवं षट्सप्ततिः पद्या उपहिताः । अष्टाविशंतिसंख्यानामर्धपद्यानां मध्ये दशार्धपद्या उपहिताः ।। 11 ।।

शेषा अष्टादश सन्ति, तासां स्थानमाह--

विश्वज्योतिषमभितोऽर्धपद्ये ।। 12 ।।

विश्वज्योतिषमभितोऽर्धपद्ये । उभयपार्श्वे एकैकामुपदधाति ।। 12 ।।

पश्चात्तद्वेलायाम् ।। 13 ।।

पश्चादात्मनोऽस्मिन्भागे च तद्वेलायां तस्मिन्स्थाने यस्मिन्स्थाने पूर्वस्यां दिश्युपहिते पश्चादपि विश्वज्योतिर्वेलायामेव तस्मिन्स्थाने द्वेऽर्धपद्ये उपधेये ।। 13 ।।

न तृतीयायाम् ।। 14 ।।

प्रथमातृतीयोक्ते विवक्ष्यति । तेन तृतीयायामपि विश्वज्योतिषमभितोऽर्धपद्ये पश्चाच्च तद्वेलायामिति प्राप्नोति तन्निषिध्यते । न तृतीयायामिति । तृतीयायां चितौ विश्वज्योतिषमभितोऽर्धपद्ये न भवतः । पश्चाच्च तद्वेलायामिति च न भवति ।। 14 ।।

दिश्यास्त्वभितोऽर्धमद्याः ।। 15 ।।

तृतीयायां चितौ प्रतिदिशि दिश्यासंज्ञका इष्टका विहिताः । अनूकेषु पंच दिश्या वैश्वदेवीवदिति ता दिश्या अभितोऽर्धपद्या भवन्ति । अभितोऽर्धपद्ये यासां ताअभितोऽर्धपद्याः । एवं प्रतिदिशमुपहितामैकैकां दिश्यामभितो द्वेद्वेऽर्धपद्ये सिद्धे भवतः । दक्षिणस्यां तु द्वे दिश्येऽर्धपद्ये प्रागायते । अभितोऽर्धपाद्ये तूदगायते इति शेषः । "न तृतीयायाम् " इत्यस्य प्रसङ्गेनै तृतीयायांचितेरयं विशेष इहोक्ताः । "तृतीयायाम् " इत्यनुवृत्तिलोभात् ।। 15 ।। अथ प्रकृते उच्यते--

द्वियजुषं च ।। 16 ।।

"अभितोऽर्धपद्ये" इत्यनुवर्तते । द्वियजुषं चाभित उभयतो द्वेऽर्धपद्ये एवं षडर्धपद्या उपहिताः । पूर्वाभिर्दशभिः सह षोडश जाताः।। 16 ।।

सर्वतः शेषाः ।। 17 ।।

शेषा अवशिष्टा द्वादशार्धपद्याः सर्वतः सर्वेषु पुरुषेषु विभज्योपदधाति । एवं चतुर्षु पुरुषेष्वायान्ति ।। 17 ।।

तत्र विशेषमाह--

दक्षिणयोः पुरुषयोः पूर्वस्मात्पद्यामुद्धृत्यापरस्मिन्नुपदध्यात् ।। 18 ।।

दक्षिणयोः पुरुषयोरात्मनोर्दक्षिणभागस्थयोः पुरुषयोर्मध्ये पूर्वस्मातुपुरुषात्पद्यामुद्धृन्त्योद्धृत्यापरस्मिन्पुरुषे उपदध्यात् । अत्र विप्रतिपत्तिः । पद्याशब्देनार्धपद्याद्वयमुद्धृत्यापरस्मिन्नुपधेयमिति सम्प्रदायः । "पूर्वार्धे द्वादशपद्याः" (का.इ.पू.सू. 3/ 10) इत्यनेन विहितानां' द्वादशपद्यानां मध्याद् दक्षिणां पद्यामुद्धृत्यापरस्मिन्नुपदधाति । इत्यनन्तयाज्ञिकाः स्वकृते भाष्ये आदिष्टवन्तः । एतत्तु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

युक्तमिव दृश्यते । " पूर्वस्मात्पद्यामुद्धृत्य" इति वचनात् । इतरया " अर्धपद्ये उद् धृत्य" इत्येवमवक्ष्यत् । ननु पद्यामिति । अन्ये "पूर्वस्मात्पुरुषात्पद्याम् । " इति पद्यालोकव्यापिन्यौ द्वेऽर्धपद्ये उद्धृत्यापरस्मिन्नुपदध्यादित्याहुः । तन्मते द्वादशानामर्धपद्यानां मध्ये दक्षिणपूर्वपुरुषे एकार्धपद्योपधेया । दक्षिणापरे पंच । उत्तरापरे चतस्रः । पूर्वोत्तरे च द्वे इति । तदाह-सम्प्रदायपद्धतिकारः द्वाददशानामर्धपद्यानां पूर्वदक्षिणे पुरुषेऽर्धपद्याया उपधानम् । दक्षिणापरे पंचानामुपधानम् । उत्तरापरे चतसृणामुपधानम् । पूर्वोत्तरेऽर्धपद्ये उपधेये । एकत्रिशंदधिकशतद्वयंच पादभागानां प्रतिपुरुषविभागः ।। 18 ।।

अर्धपद्यामुत्तरयोः ।। 19 ।।

उत्तरयोः पुरुषयोर्मध्ये पूर्वस्मात्पुरुषादर्धपद्यामुद्धृत्यापरस्मिन्नुपदध्यात् । ततश्चापरस्मिन्पुरुषे चतस्रोऽर्धपद्याः । पूर्वस्मिन्द्वे । एवमष्टाविंश-त्यर्धपद्यानामुपधानमुक्तम् । एताश्च सर्वाः "वर्षीयस्यो बाह्याः" (का.इ.पू.सू. 2/2) इत्यनेन न्यायेनोपधेयाः । द्वादशानामर्धपद्यानामुपधानस्थानमभिधीयते । पूर्व-दक्षिणपुरुषे तिसृणामर्धपद्यानां मध्ये एकां द्वितीयां प्राणभृतमुत्तरेणा प्राग्लक्षणा । तामेव प्राणभृतमपरेण द्वे उदग्लक्षणे । दक्षिणापरपुरुषे श्व कोणे द्वितीयां प्राणभृतं पूर्वेण पूर्वस्मात्पुरुषाद्वादशानां पद्यानां मध्यत उद्धृत्य तां पद्यामुदुग्लक्षाणमुपधाय । तस्याः पुरस्तात्तिस्रोऽर्धपद्या उद्गायता उदग्लक्षणाः संलग्ना उपदध्यात् । उत्तरापरपुरुषे च द्वितीयां प्राणभृतं पूर्वेणोदगायता उदग्लक्षणाः संल्लग्नाश्चचस्रोऽर्धपद्या उपधेयाः उत्तरपूर्वपुरुषे च द्वितीयां प्राणभृतं दक्षिणत एका प्राग्लक्षणा । तामेव प्राणभूतमपरेणैकोदग्लक्षणोदगायतोपधेया । शेषे स्थाने चतुर्विंशत्याधिकानि नवशतानि पादभागानामुपदध्यात् ।। 19 ।।

षट्पंचाशतं पादमात्रीणां तिस्रोऽर्धपद्याः पंचाशे च शते पादभागानामेकैस्मिन्पक्षेपक्षे ।। 20 ।।

एकैकस्मिन्पक्षेपक्षे दक्षिणे पक्षे उत्तरेच पक्षे षट्पंचाशतं पद्यास्तिस्रोऽर्धपद्याः पंचाशदधिकं शतद्वयं पादभागानाम् । एतावदुपधेयं "वर्षीयस्यो बाह्याः" (का.इ. पू.सू. 2/2) इति न्यायेन बाह्यतः पद्या उपधाय । ततोऽन्तरार्धपद्याः । ततोऽप्यन्तराः पादभागा इति ।। 20 ।।

इदानीं पुच्छे लोकम्पृणा आह--

पंचाशतं पादमात्रीणां सप्तार्धपद्याः षड्विंशे च शते पादभागानां पुच्छे ।। 12 ।।

पंचाशतं पद्याः । सप्तार्धपद्याः । षडिवशत्यधिकं शतद्वयं पादभागाः । एतावत्पुच्छे उपधेयम् । तत्रापि "वर्षीयस्यो ब्राह्याः" (का.इ.पू.सू. 2/2) इति न्यायेन पार्श्वतः पद्या उपधाय तदन्तराऽर्धपद्या इति । अत्र पक्षपुच्छेषुपार्श्वतः सर्वतः पद्यानां द्वेद्वे पङ्क्ती उपधेये । द्वितीयपङ्क्तौ त्वात्मसहितौ । पद्यालोकद्वयमुभयपार्श्वे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अवशिष्यते । तत्र पूर्वस्मिन्पद्यालोकोकद्वये द्वेऽर्धपद्ये प्रथमपङि क्तिसंलग्ने बाह्ययत उद्गलक्षणे उपधेये । अपरयोः पद्यालोकयोर्द्वितीय- पंक्ति संलग्ने एकस्मिन्नेकामर्धपद्यां प्रथमपङ्क्ति संलग्नामुपदध्यात् । शेष पादभागात् । पुच्छे च द्वितीयापङ् क्तौ- आत्मसंल्लग्नं पद्यालोकत्रयमुभयपार्श्वेऽवशिष्यते । तत्र दक्षिणे पद्यालोकत्रये चतस्रोऽर्धप्रद्याः प्रागायता उपधेयाः । द्वितीयपङ्क्तिसंल्लग्ने द्वे इतरयोरेकैका प्रागायता प्रथमपङ्क्तिसंल्लग्ना । उत्तरे आत्मसंल्लग्ने पद्यालोकत्रये बाह्यप्रदेशे एकैकाऽर्धपद्या प्राग्लक्षणा प्रागायतोपधेया । शेषे पदभागा उपधेयाः । एवं पक्षयोर्यथायोगं चयनम् । तदेवं प्रथमाया लोकम्पृणाः पद्या द्विशतेऽष्टात्रिंशदधिके । एकचत्वारिशंदर्धपद्याः षोडशशतानि पंचादधिकानि पादभागानाम् । एवमेकोनविशंतिशतान्येकोनत्रिंशदधिकानि भवन्ति । "गार्हपत्यलोकम्पृणाः प्रथमायाम् " (कौ.श्रौ.सू. 17/7/26) इति वचनात् । "गार्हपत्यसम्बन्धीन्येकविशंति लोकम्पृणाः प्रथमायां गम्यन्ते । तेन पंचाशदूनं सहस्रद्वये लोकम्पृणाः प्रथमायां सम्पद्यन्ते । "द्विसाहस्री प्रथमालोकम्पृणानां पंचाशदूना" (का.श्रौ.सू. 17/7/21) इत्युक्तत्वात् ।। 21 ।।

इति सम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिक प्रजापतिसुतयाज्ञिक देव कृते कात्यायनीयेष्टकापूरणसूत्रभाष्ये तृतीया कण्डिका परिसमाप्ता ।।3।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ चतुर्थी कण्डिका

द्वितीयायां स्रक्तिषु जङ्घामात्रीः ।। 1 ।।

द्वितीयायां चितौ सर्वासु स्रक्तिषु दशस्वपिकोणेषु जङ्घामात्रीरिष्टका उपदधाति । आत्मनि चत्वारः कोणाः पक्षयोर्द्वेद्वे । पुच्छे च द्वे । एवं दश कोणाः ।।1।।

अभितो वयस्याः सर्वत एकैकामध्यर्धा त्रिग्राहिणी जङ्घामात्रीमर्ध्यर्धे च यथाक्रमम् ।। 2 ।।

"वयस्याः पंच पंचानूकान्तेषु" (का.श्रौ.सू. 17/8/22) इति प्रतिदिशं विहिताः । सर्वतः सर्वासु दिक्षु ता वयस्या अभितो यथाक्रमं पाठक्रमेणैकैकामध्यर्धा-मुपदध्यात् । तत एकैकां त्रिग्रहिणीमुपदध्यात् । एकैकां जङ्घामात्रीमुपदध्यात् । ततो द्वे द्वे अध्यर्धे उपदध्यात् । एवं कोणोपहितायां जङ्घामात्र्या वयस्यानां चान्तरालं पूरितं भवति । अत्र "वर्षीयस्यो बाह्यः" (कौ.इ.पू.सू. 2/2) इत्यस्य न्यायस्य बाधनाय यथाक्रममित्युक्तम् । अन्यथा त्रिग्राहिणी बाह्यतः । तदन्तरा जङ्घामात्र्यः । ततोऽन्तराऽध्यर्धा इति प्राप्नुयात् । तन्माभूदिति यथाक्रममित्युक्तम् ।। 2 ।।

त्रिग्राहिणीनां षडङ्गुलानि पक्षयोः ।। 3 ।।

दक्षिणस्यां दिशि पक्षसन्धौ द्वे त्रिग्राहिण्यौ । द्वे उत्तरस्यां पक्षसन्धावेव . तासां दक्षिणोत्तराणां चतसृणां चतसृणां त्रिग्राहिणीनां षडङ्गुलानि पक्षयोरुपधेयानि । शिष्टान्यष्टादशात्मनि ।। 3 ।।

आत्मनि पुच्छे ये त्रिग्राहिण्यौ ।। 4 ।।

पुच्छे ये त्रिग्राहिण्यावात्मसंल्लग्ने उपधीयते । तयोस्त्रिग्राहिण्यौ षडङ्गुलान्यात्मन्युपधेयानि ।। 4 ।।

तयोः पुरस्ताज्जङ्घामात्र्यौ ।। 5 ।।

तयोस्त्रिग्राहिण्यौ षडङ्गुलान्यात्मन्युपहितानि तयोः पुरस्तादात्मनि जङ्घामात्र्यवुपधेये । "सर्वत्र एकैकामध्यर्धां त्रिग्राहिणीम्" (का.इ.पू.सू. 4/2) इत्येतस्यास्त्रिग्राहिण्या अयमपवादः ।। 5 ।।

पूर्वार्धेत्रिग्राहिणीस्थाने च ।। 6 ।।

आत्मनः पूर्वार्धे च वयस्या अभितो यत्र त्रिग्राहिण्योः स्थानम् । "अभितो वयस्यः सर्वत एकैकामध्यर्धा त्रिग्राहिणीम्" (का.इ.पू.सू 4/2) इति । एतत्सूत्रोक्तं तत्र

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

जङ्घामात्र्यावुपदधाति । अत्रापि "त्रिग्राहिणीम्" इत्यस्यापवादः । आदावेव तत्र जङ् घामात्र्योरुपधानम् । त्रिग्राहिणीस्थानोपलक्षणार्थत्वात् ।। 6 ।।

पक्षपुच्छपार्श्वे त्रिग्राहिणीः ।। 7 ।।

पक्षेयोः पार्श्वेषु पुच्छापार्श्वयोश्च त्रिग्राहिणीरिष्टका उपदधाति । पक्षयोः पार्श्वेषूदगायताः । पुच्छपार्श्वयोः प्रागयता इति । ताश्च सर्वपार्श्वेषु पंचपंचम्यापदः ति । कोणेषु च जङ्घामात्र्य उपहिताः सन्ति । एतेन पार्श्वानां पूरणं जातम् । । कथं ? उच्यते । पक्षयोस्तावज्जङ्घामात्र्यः । सार्धपद्यालोकायतत्वात् त्रिग्राहिणीनां पद्यालोकद्वयायतत्वात् । अवशिष्टस्य षडङ् गुलस्यात्मत्रिग्राहिण्या आपूरणात् । पुच्छे च जङ् घामात्र्य पंचभिस्त्रिगाहिणीभिश्च सार्धैकादशलीकव्याप्तया अतिरिक्तस्य षडङ् गुलस्यात्मन्युपधानात् ।। 7 ।।

जङ्घामात्र्यन्तरेष्वध्यर्धाः ।। 8 ।।

"स्रक्तिषु जङ्घामात्रीः" (का.इ.पू.सू. 4/1) इत्युक्तेः पक्षपुच्छस्रक्तिषु जङ्घामात्र्य उपहिताः पक्षयोः पुच्छे च कोणयोरुपहितयोर्जङ्घामात्र्योरुत्तरेष्वध्यर्धाः सप्तसप्तोपधेयाः पक्षपुच्छयोर्दशपद्यालोकप्रमाणं पृथुत्वम् । तत्र सप्त लोका अध्यर्धाभिः पूरिताः परिशिष्ट लोकत्रयं जङ्मात्रीभ्यां पूर्यते । अध्यर्धाश्च पक्षयोरुदगायता उपधेया । पुच्छे च प्रागायता इति ।। 8 ।।

शेषे चतुर्विंशतिं पादमात्रीणां द्वादशार्धपद्याः षट्पंचाशानि नवशतानि पादभागानां चतुश्चार्धपादभागात्मात्मनि ।। 9 ।।

शेषे आत्मनि पादमात्रीणां चतुर्विंशतिमुपदध्यात् । द्वादशार्धपद्या उपदध्यात् । तत्र चतुरऽर्धपादभागाश्चत्मन्युपदध्यात् । तत्र चतुर्विंशतिः षट्पंचाशदधिकानि नवशतानि पादभागानामुपदध्यात् । पद्याः समं विभज्य प्रतिपुरुषं षट् षडुपधेयाः । ताश्च "वर्षीयस्या बाह्याः" (का.इ.पू.सू.2/2) इति न्यायात्पुरुषाणां बाह्यकोणेषूपधेयाः । द्वादशार्धपद्या अपि विभज्य प्रतिपुरुषं तिस्रस्तिस्र उपधेयाः यथायोगमत्र दक्षिण पूर्वपुरुषे कोणोपहितं जङ्घामात्रीसंल्लग्नामेकां पद्यां प्राग्लक्षणामुपधाय तामपरेण पद्याद्वयमुदग्लक्षणमुपधेयम् । तदपरेणैकोदगायताऽर्धपद्या जङ्घामात्र्यपरान्तसमोपधेया । ततः पूर्वोपहितां पद्यामुत्तरेण तिस्रः पद्याः प्राग्लक्षणा उपधेयाः । एवं षट्पद्या उपहिता भवन्ति । तस्य पद्यात्रयस्योत्तरतो द्वेऽर्धपद्ये प्रागायते उपधेते इति । त्रिग्राहिणीस्थानोपहितजङ्ध्घामात्र्युत्तरान्तसमे । ततो दक्षिणापरकोणोपहितजङ्घामात्रीसंल्लग्नामेवैकां पद्यामुदक् लक्षणामुपधाय तस्या उत्तरतो द्वे पद्ये प्राग्लक्षणे । तत एकामर्धपद्यां प्रागायतां जङ् घामत्रीस्थानोपहितजङ्ध्घामात्र्युत्तरातसामम् । ततः पूर्वोपहितपद्यां पूर्वेण तिस्रः पद्या उदग्लक्षणा उपधाय ततः पुरस्तात् द्वेऽर्धपद्ये उदगायते त्रिग्राहिणीपूर्वान्तसमे उपदध्यात् । एवमेवोत्तरापरकोणे कोणोपहितजङ्धामात्रीसंल्लग्नामेकां पद्यां प्राग्लक्षणामुपधाय तस्या दक्षिणतो द्वे पद्ये प्राच्यावुपधाय ताभ्यां दक्षिणामेकां प्रागायतामर्धपद्यां त्रिग्राहिणीस्थानोपहितजङ्घामात्रीदक्षिणान्तसमामुपदध्यात् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ततः पूर्वोपहितायाः पद्यायाः पूर्वास्तिस्र उदग्लक्षणाः पद्या उपधाय तासां पुरस्तात् द्वे उदगायतेऽर्धपद्ये त्रिग्राहिपूर्वान्तसमे उपधेये । उत्तरपूर्वपुरुषे च कोणोपहितजङ्घामात्रीसंल्लग्नामुदग्लक्षणां पद्यामुपधाय तस्या दक्षिणतस्तिस्रः पद्याः उपधाय तासां दक्षिणतस्त्रिग्राहिणीस्थानोपहितङ्घामात्रीदक्षिणान्तसमे द्वेऽर्धपद्ये प्रागायते उपदध्यात् ततः पूर्वोपहितां पद्यमपरेण द्वे पद्ये उदग्लक्षणे उपधाय तयोः पश्चादुदगायतामेकामर्धपद्यां जङ्घामात्र्यपरान्तरसमामुपदध्यात् एवं प्रतिपुरुषं षट्षट् पद्यास्तिस्रस्तिस्रोऽर्धपद्याश्चोपहिता भवन्ति ।) अर्धपादभागानामतिसूक्ष्तवादात्मध्ये उपधानम् । तेषां च प्रतिपुरुषमेकैकस्योपधानं न सम्भवति लोकभेदापत्तेः । अतोपरयोः पुरषयोरुपधीयन्ते पूर्वापेक्षया तयोरभ्यन्तरवर्तित्वात् । तत्रापि दक्षिणापरपुरुषस्येशानकोणेऽर्धपादभागद्वयमुदगायतमुपधेयम् । उत्तरापरपुरुषस्याग्नेयकोणे चार्धभागद्वयं प्रागायतमुपधेयम् । एवं लोकभेदो न भवति । अन्तर उपधानं कृतं भवति । अवशिष्टे आत्मन्युक्तसंख्याः पादभागा उपधेयाः । अत्रापरयोः पुरषयोर्द्वात्रिंशद्वात्रिंशत्सार्धपद्या लोका महतीभिर्व्याप्ता भवन्ति । पूर्वयोः पुरुषयोः पादोनास्त्रयस्त्रिंशत्त्रयस्त्रिंशत् । प्रतिपुरूषं च षटषट् पादमात्रयस्तिस्रोऽर्धपद्याः एकोनेचत्वारिंशे च शते पादभागा उपधेयाः अपरयोर्द्वौद्वावर्धपादभागावधिकौ ।। 9 ।।

द्वानवतेच शते पादभागनामर्ध्यपद्यां च पक्षेपक्षै ।। 10 ।।

"पक्षेपक्षे" इत्युभयोरपि पक्षयोः प्रत्येकं द्वानवत्यधिकं शतद्वयं पादभागनामुपध्येम् । एकैका चार्धपद्योपधेया । साच दक्षिणपक्षस्याग्नेयकोणे जङ्घामात्री त्रिग्राहिणींसंलग्ना चोदगायतोपधेया । तयोः कोणयोर्बाह्यत्वात् । अत्र प्रतिपक्षं षट्चत्वारिंशत्सार्धाः पद्यालोका महतीभिश्चव्याप्ता भवन्ति । पादभागैर्धपद्यया चावशिष्टव्याप्तिरिति ।। 10 ।।

पञ्चषष्टे च शते पादभागानामर्धपादभागौ च पुच्छे ।। 11 ।।

पंचषष्ट्या धिकं शतद्वयं पादभागानां पुच्छे उपधेयम् । द्वावर्धपाद भागौ । तौ चात्मसन्धौ पुच्छरेखांत उत्तरतः प्रागायताबुपधेयौ एवं लोकभेदो न भवति । अत्रे च सार्धास्त्रिचत्वारिंशत्पद्यालोका महतीभिर्व्याप्ताः । पादभागार्धपादभागाभिरवशिष्टव्याप्तिः । तदेवं द्वितीयायां द्वाविशंतिर्जङ्घमात्र्यो लोकम्पृणाः । चतुस्त्रिंशत्त्रिग्राहिण्यः पंचचत्वारिंशदध्यर्धाः । चतुर्विंशतिपद्याः चतुर्दश चार्धपद्याः षडर्धपादभागाः । अष्टादश शतानि पंचाधिकानि पादभागाः । एवं एकत्र गण्यमानाः पंचाशदूनं सहस्रद्वय द्वितीयायां लोकम्पृणाः सम्पद्यन्ते । तथा चोक्तं " द्विसाहस्त्री प्रथमा लोकम्पृणानां पंचाशदूनोत्तराश्च" (का.श्रौ.सू. 17/7/21-22) इति ।। 11 ।।

इति श्रीसम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिक श्रीप्रजापतिसुतयाज्ञिकदेवकृते कात्यायनीयेष्टाकापूरणसूत्रभाष्ये चतुर्थी कण्डिका परिसमाप्ता ।। 4 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ पञ्चमी कण्डिका

प्रथमया तृतीयोक्ता ।। 1 ।।

तृतीयाचितिः प्रथमयोक्ता । प्रथमाचितिकथनेनैव कथितेत्यर्थः । एतावदुक्तं भवति । षट्सप्ततिपादमात्रीणामुपदध्यादिति । पक्षपुच्छचयन प्रथमावदेव ।। 1 ।।

अथ विशेषः ।। 2 ।।

अथानन्तरं प्रथमाचितेः सकाशातृतीयायां यो विशेषः स उच्यत इति शेषः ।। 2 ।।

तत्रैव विशेषमाह--

षोडशार्धपद्या उपदध्यात् ।। 3 ।।

प्रथमायां हि - "अष्टाविशंतिमर्धपद्यानाम्" इत्युक्त म् । इह तु षोडशैवार्धपद्या उपदध्यात् ताश्च दिश्या अभितोऽ ष्टौ । सर्वतश्छन्दस्या अभितो द्वेद्वे एवं ताः षट् पश्चाद्वालखिल्या अभितो द्वे । एवं षोडशार्धपद्यानां नियोग इति ।। 3 ।।

चतस्रश्च बृहतीः स्रक्तिषु ।। 4 ।।

स्रक्ति ष्वात्मनश्चतुर्षु कोणेषु चतस्रो बृहतीसंज्ञका उपदधाति । तासां या बृहती दक्षिणाश्रोणावुर्ते से चोदग्लक्षणोपधेया । उत्तरा श्रोणौ दक्षिणेंऽसे च प्राग्लक्षेति अत्र बृहत्यो पूर्वा एव विधीयन्ते । नहि प्रथमायां बृहत्यः सन्ति ।। 4 ।।

विशंतिपादभागानधिक नात्मनि ।। 5 ।।

प्रथमायां चितौ पादभागानां नवशतानि चतुर्विंशत्यात्मनीत्युक्त म् । अत्र त्वेतत्संख्यातो विशंत्यधिकान् चतुश्चत्वारिशंदधिकानि नवशतानि पादभागानधिकानात्मन्युपदध्यात् ।। 5 ।।

षट्सप्ततिसंख्यानां पादमात्रीणां स्थानविशेषमाह--

प्राणभृत्स्थानेषु पादमात्रीः ।। 6 ।।

प्रथमायां चितौ येषु स्थानेषु लोकेषु प्राणभृत उपहिताः । अत्र तृतीयान्तेषु स्थानेषु लोकम्पृणाः पादमात्रीरूपदधाति । "व्याधारणवत्प्राणभृतः कर्णसहितादशदश" (का.श्रौ.सू. 17/ 6/3) इति । तथा - "रेतःसिग्वेलायां च ।

बृहतीसहिते चान्तर्द्वेद्वे ।। 7 ।।

चतुर्ष्वपि कोणेषु बृहतीसल्लग्ने द्वेद्वे पादमात्र्यावन्तर्मध्ये उपदधाति । बहिश्चेष्टकान्तरोपधानं विधास्यते तदर्थमन्तरित्युच्यते ।। एकैकं लोकं बहिः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परित्यजेदित्यर्थः । एवमष्टौ । एताः पूर्वाभिः सहिताश्चतुश्चत्वारिंशत्सम्पन्नाः ।। 7 ।।

पश्चाच्छन्दस्या अभितश्चैकैका सार्धा ।। 8 ।।

पश्चादपरस्यां दिशिं याश्छन्दस्यास्ता अमितः पार्श्वद्वये एकैका पादमात्री सार्धा र्धपद्यासहितोपधेया । तत्राप्यर्धपद्या छन्दस्यासंल्लग्नोपधेया । पादमात्री तु तद्बहिः ।। 8 ।।

दक्षिणोत्तरे च द्वेद्वे सार्धे ।। 9 ।।

"छन्दस्या अभितः" इत्यनुवर्तते । दक्षिणोत्तरे च दक्षिणपार्श्वे उत्तरपार्श्वे च याश्छन्दस्यास्ता अभितो द्वेद्वे पादमात्र्यौ सार्धे अर्धपद्यासहिते उपदध्यात् तत्राप्यर्धपद्ये उभयतश्छन्दस्यासंल्लग्ने ।। तद्बहिः पद्याः पूर्वाभिः सह चतुः पंचाशत् ।। 9 ।।

प्राणभूतां च तिस्रस्तिस्रः ।। 10 ।।

"अभितः" इत्यनुवर्तते । "पूर्वार्धे प्राणभृतो दश" (का. श्रौ.सू. 17/9/8) इति प्राणभृतो विहितास्तासां प्राणमृतास्तिस्रस्तिस्रः पादमात्रीरूपदधाति । एताः षट् । पूर्वाभिः सह षष्टिः ।। 10 ।।

वालखिल्यानां चतस्रश्चतस्रः ।। 11 ।।

"वालखिल्याः सप्त पुरस्तात्प्राणभृद्भ्यो वाऽपरा द्वादशभ्योऽपरास्तु" (का.श्रौ. सू. 17/9/11-13) इति पुरस्तात्पश्चाच्च वालखिल्या विहिताः । तासां चाभितश्चस्रश्चतस्रः पादमात्रीरुपदधाति ।। ।। ।।

पश्चिमाः सार्धाः ।। 12 ।।

पश्चिमाः पश्चाद् दिश्युपहिता वालखिल्या अभित उपधीयमानाश्चतस्रः पादमात्र्यः सार्धाः पद्यासहिता भवन्ति । तत्राप्यर्धपद्ये वालखिल्यासंल्लग्ने उपधेये पद्यास्तद्बहिः । एवमेताः षोडश पद्याः पूर्वाभिः स षट्सप्ततिः पूर्णाः । षोडाशार्धपद्या अप्युपहिताः । दिश्या अभितोऽष्टौ । "दिश्यास्त्वमितोऽर्धपद्याः" (का.इ.पू.सू. 3/15) इत्युक्तत्वात् । छन्दस्या अभितस्त्रिष्वपि स्थानेषु द्वे द्वे । एवं षट् । पश्चाद्वालखिल्या अभितश्च द्वे । एवमष्टौ । एवं षोडशार्धपद्याः संजाताः । अत्रापरयोः पुरुषयोश्चत्वारिंशच्चत्वारिंशत्पादाधिका महतीभिर्व्याप्ताः । तयोरेकोनचत्वारिशं शतद्वयं प्रतिपुरुषं पादभागा । उपधेयाः । पूर्वयोः पुरुषयोः पादोना द्वाचत्वारिंशल्लोका महतीभिर्व्याप्ताः । तयोस्त्रयस्त्रिंशदधिकं शतद्वयं पादभाग उपधेयाः ।। 12 ।।

अथ प्रथमान्ताः पक्षपुच्छेषु विशेषमाह--

पक्षपुच्छेभ्यस्तिस्रस्तिस्रोऽर्धपद्या उद्धृत्य षट्षट् पादभा गानधिकानुपदद्यात् ।। 13 ।।

"प्रथमया तृतीयोक्त" (का.इ.पू.सू. 5/1) इति सूत्रात्प्रथमचितिवत्पक्षपुच्छचयनम् । षट्पंचाशतं पादमात्रीणां तिस्रोऽर्धपद्याः पंचाशे च शते पादभागानामेमैकस्मिन्पक्षेपक्षे, पचाशतं पादमात्रीणां सप्तार्धपद्याः षड्विंश च शते

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पादभागनानां पुच्छे" (का.इ. पू.सू. 3/20-21) इति । तत्र विशेषमाह-"पक्षपुच्छेभ्यस्तिस्रस्तिस्रोऽर्धपद्या उद्धृत्य" पुच्छे च याः सप्तार्धपद्यास्तासां मध्यास्तिस्रस्तिस्रोऽर्धपद्या उद् धृत्य तासां स्थाने षट् षट् पादभागानधिकान्प्रथमायां पक्षपुच्छेषु या पादभागानां संख्या ततोऽधिकानुपदध्यात् । पक्षयोर्हि तत्र "पंचाशे च शते पादभागानाम्" इत्युक्तम् । इह षट्पंचाशदधिकं शतद्वयं पादभागानां पक्षयोरुपधेयम् । पुच्छे तु अत्र "षड्विंशे च शते," इत्युक्तम् । इह द्वात्रिंशदधिकं शतद्वयं पादभागनां पुच्छे उपधेयम् । पुच्छे चार्धपद्याद्वयं यस्मिँल्लोके तस्माल्लोकादेकोद्धरणीया योत्तरत उपहिता । आत्मसंल्लग्ने ये अर्धपद्ये द्वे ते उद्धरणीये । एवं तिस्रः तदेवमत्र लोकम्पृणा पद्या द्वे शते अष्टात्रिंशदधिके । विंशतिरर्धपद्याः चतस्रो बृहत्यः । अष्टाशीत्यधिकानि षोडश शतानि पादभागाः । एवं पंचाशदूनं सहस्रद्वयं भवति । " द्विसाहस्री प्रथमा लोकम्पृणानां पंचाशदूनोत्तराशच" (का. श्रौ.सू. 17/7/21-22) इत्युक्तत्वात् ।। 13 ।।

इति श्रीसम्राट्स्तपतित्रिरग्निचिन्महायाज्ञिक श्रीप्रजापति सुतयाज्ञिक देवकृते कात्यायनीयेष्टकापूरणसूत्रभाष्ये पंचमी कण्डिका परिसमाप्ता ।। 5 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ षष्ठी कण्डिका

द्वितीयावच्चतुर्थी ।। 1 ।।

चतुर्थीचितिर्द्वितीयावद्भवतीति शेषः । एतेन "स्रक्तिषु जङ्घामात्रीरभितो वयस्याः सर्वत एकैकामर्ध्यर्धां त्रिग्राहिणीं जङ् घामात्रीमध्यर्धे च यथाक्रमम् । त्रिग्राहिणीनां षडङ् गुलानि पक्षयोरात्मनि पुच्छे तयोः पुरस्ताज्जङ्घामात्र्यौ पूर्वार्धे स्थाने च पक्षपुच्छपार्श्वेषु त्रिग्राहिणीजङ्त्र्यन्तरेष्वध्यर्धाः (का.इ.प.सू.4/1-8) इति । तथा "द्वानवते च शते पादभागानामर्धपद्यां च पक्षेपक्षे । पंचषष्टे च शते पादभागानामर्धपादभागौ च पुच्छे" (का.इ.पू.सू.4/10-11) इति । "चतुश्चार्धभागानात्मनि" (का.इ.पू.सू. 4/9) इत्यादि सिद्धं भवति ।। 1 ।।

अथ विशेषः ।। 2 ।।

अभिधीयत इति शेषः । अथानन्तरं द्वितीयातो यचतुर्थ्यां विशेषः सोऽभिधीयत इत्यर्थः ।। 2 ।।

तमेव विशेषमाह--

पक्षाप्ययोर्दक्षिणोत्तरे अभितश्चतस्रश्चतस्रोऽर्धपद्याः ।। 3 ।।

अप्ययः सन्धिः । पक्षात्मनोः सन्धिः । पक्षाप्ययोः पक्षात्म सन्ध्योर्ये दक्षिणोत्तरे इष्टके । " चतुर्थ्यामनूकान्तेषु दक्षिणोत्तरे द्वे द्वे" (का.श्रौ. सू. 17/10/1) इति सूत्रविहिते । ते अभितश्चतस्रश्चतस्रोऽर्धपद्याः उपधेयाः । " दक्षिणोत्तरे अभितः" इति दक्षिणायोर्दक्षिणामभित उत्तरयोरुत्तरामभित इत्यर्थः । तस्याः पुरस्ताच्चतस्रस्तस्याः पश्चाच्चास्रउदगायता उपधेया इत्यभित इत्यस्यार्थ । एवमेताभिरष्टाभिरर्धपद्याभिर्दक्षिणोत्तेरष्टकासहिताभिर्दक्षिणोत्तरदेशे वयस्यानां स्थानं पूरितम् ।। 3 ।।

अथ पूर्वापरयोर्वयस्यास्थानपूरणार्थमाह--

पश्चाज्जङ्घामात्र्यावभितोध्यर्धे ।। 4 ।।

"चतुर्थ्यामनूकान्तेषु दक्षिणोत्तरे द्वेद्वे" (का.श्रौ. सू. 17/10/1) इति । सर्वासु दिक्ष्वनूकमभितो द्वे द्वे यजुष्मत्यौ विहिते तासां मध्येऽपरयोः पूर्वयोश्च जङ्घामात्रीत्वमुक्तं प्राक् । "पुरस्तादभितोऽनूकं जङ् घामत्रायौ चतुर्थ्यां पश्चाच्च" (का.इ.पू.सू. 3/13-14) इति । पश्चादपरस्यां दिश्यनूकमभितो ये जङ्घामात्र्यौ ते अभितो द्वे द्वे अध्यर्धे प्रागायते उपधेये । एतेनात्रापि वयस्या लोकाः पूरिताः ।। 4 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुरस्ताच्च ।। 5 ।।

चकारात्पुरस्तादप्यनूकमभितो ये जङ्घामात्र्यौ ते अभितो द्वे द्वे अध्यर्धेउपधेये प्रागायते । एतेनापि वयस्यास्थानं पूरितम् ।। 5 ।।

चतुर्दश चार्धपद्ये द्वे द्वे ।। 6 ।।

"अभितः" इत्यनुवर्तते । "पूर्वाभ्यामपराश्चतुर्दश" (का .श्रौ.सू.17/10/2) इति सूत्रेण विहिता याश्चचतुर्दशेष्टकाः । ता अभितो द्वे द्वे अर्धपद्ये लोकम्पृणे उपधेये । "चतुर्दश चार्धपद्याः" (का.इ.पू.सू. 2/5) इति सूत्रेण चतुर्दशानामप्यर्धपद्यात्वमुक्तामस्ति ।। 6 ।।

षट्चैकैके ।। 7 ।।

"अभितः" इत्यनुवर्तते । "ताभ्यां षट् " (का.श्रौ.सू. 17/10/3) इति विहिता याः पद्यास्ता अभित एकैकामर्धपद्यामुपदध्यात् ।। 7 ।।

अन्तः श्रोण्योर्बृहत्यौ ।। 8 ।।

आत्मनः श्रोण्योरन्तर्मध्ये जधामात्रीसन्निधावुपहितोरध्यर्धयोः पुरस्तात् बृहत्याविष्टके उपदधाति । एका दक्षिणाश्रोणावपरोत्तरश्रोणौ वृहत्यावेतावत्युक्ते जङ्घामात्रीस्थाने वहिरेव बृहत्योरुपधानं प्राप्नोति ।

"वर्षीयस्यो बाह्याः" (का.इ.पू.सू 2/2) इति न्यायात्तन्मामूदित्यन्तर्ग्रहणम् । अन्तर्मध्ये न बहिरित्यर्थः ।। 8 ।।

तदन्तरे त्रिग्राहिण्यौ ।। 9 ।।

तदन्तरे तयोर्बृहत्योरन्तरे द्वे त्रिग्राहिण्यावुपधेये । एका दक्षिणाबृहत्या उत्तरतः । अपरोत्तरश्रोण्युपहितबृहत्या दक्षिणतः उभे प्रागायते ।। (।।

पादमात्र्यौ च ।। 10 ।।

"तदन्तरे" इत्यनुवर्तते । तदन्तरे त्रिग्राहिण्योत्तरे द्वे पादमात्र्यावुपधेये त्रिग्राहिण्याः संल्लग्ने ।। 10 ।।

शेषे पादभागांश्चतुर्भिरधिकान् ।। ।। ।।

शेषे आत्मनिद्वितीयायां चितावात्मनि या पादभागनां संख्यां । ताः संख्यातश्चतुर्भिः पादभागैरधिकान्पादभागानुपदध्यात् । " षट्एंचाशानि नवशतानि पादभागानाम्" (का.इ पू.सू. 4/9) इति तत्रोक्तम् । अत्र षडधिकानि नवशतान्युपधेयानीत्यर्थः । अन्यत्सर्वं द्वितीयाचितिवत् अत्र पूर्वयोपुरुषयोश्चत्वारिंशच्चत्वारिंशत्पद्या महतीभिर्व्याप्ताः । अपरयोः पुरुषयोश्चत्वारिशंत् पादभागाः न्यूनाः । पूर्वयोः पादभागनां चत्वारिंशदधिक शतद्वयं च पादभागाः प्रतिपुरुषमुपधेयाः । अपरयोः पुरुषयोर्द्वौ द्वावर्धपादभागावधिकौ । अस्मिन्पक्षे चतुर्थ्यां चितौ द्वाविंशतिलोकम्पृणा जङ्घामात्र्यः । षट्त्रिंशत्त्रिग्राहिण्यः । एकोनपंचाशदध्यर्धाः । चतुर्विंशतिरर्धपद्याः । द्वे बृहत्यौ । द्वे पद्ये, षडर्धपादभागाः । अष्टादशशतानि नवाधिकानि पादभागाः । एवं पंचाशदून सहस्रद्वयं लोकम्पृणा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

भवन्ति । "द्विसाहस्त्री प्रथमा लोकम्पृणानां पंचाशदूनोत्तराश्च" (का.श्रौ.सू. 17/7/21-22) इत्युक्तेः ।। ।।

अथ चतुर्थ्यां चितावेव --"उत्तरा वा दक्षिणआभ्याम्" (का. श्रौ.सू. 17/10/5) इति सूत्रेण चतुर्दशानां षण्णां च दक्षिणस्यां दिशि वैकल्पिकमुपधानमुक्तम् । तस्मिन्पक्षे पूरणमाह--

उत्तराश्चेद्दक्षिणाभ्यां बृहतीत्रिग्रहिणीपादमात्रीरुत्तरतः श्रोण्यंसयोः पूर्ववत् ।। 12 ।।

ताश्चतुर्दशार्धपद्याः षट्पद्याश्च चेद्यदि दक्षिणाभ्यां दक्षिणस्यां दिश्यनूकान्ते उपहिताभ्यां यजुष्मतीभ्यामुत्तरा उपहिता भवन्ति । तदोत्तरत उत्तरयोः श्रोण्यंसयोर्बृहतीत्रिग्राहिणीपादमात्रीरुपदधातिं । " पूर्ववत्" इत्यनेन तदन्तरे त्रिग्राहिण्यावुदगायते पादमात्र्यौ च तत्संलग्ने इति लभ्यते । एवञ्च युक्तं वचनं भवति । अन्यत्सर्वं पूर्ववत् । लोकम्पृणासंख्या च पूर्ववत् ।। 12 ।।

दक्षिणस्यां च श्रोण्यामवान्तरदेशे चेत् ।। 13 ।।

एताश्चतुरर्दश षट्च पूर्वदक्षिणे वान्तर आत्मन्याग्नेयकोणे चेदुपधीयन्ते । तदा दक्षिणस्यां श्रोण्यां च बृहतीत्रिग्राहिणीपादमात्रीरुपदधाति । चकारादुत्तरयोः श्रोण्यंसयोश्च बृहतीत्रिग्राहिणीपादमात्रीः पूर्ववदुपधाति । दक्षिणास्यां च श्रोण्यां पूर्वमुदग्लक्षणा । ततः पुरस्तादुदगायतास्तिग्राहिणीः । ततः पुरस्तात्पद्याः । एवं सर्वपुरुषेषु सदृशश्चयनयागो भवति ।। 13 ।।

अन्यतरतश्चार्धपद्याः ।। 14 ।।

अस्मिन्पक्षे चतुर्दशानां षण्णां चान्यतर एवार्धपद्या भवन्ति नाभितः ।। 14 ।।

तस्मात्पुरुषात्षड्विंशतिं पादभागानुद्धृत्य द्विगुणांस्तावतोऽर्धपादभागानुपदध्यात् ।। 15 ।।

अस्मिन्पक्षेऽयं विशेषः । यस्मिन्म्पुरुषे एताश्चतुर्दश षट् चोपधीयन्ते । तस्मात्पुरुषात्षड्विंशतिं पादभागानुद्धृत्य तावतो द्विगुणान्द्वापंचाशत्संख्यानर्धपादभागांस्तस्मिन्पुरुषे उपदध्यात् । यतो दक्षिणश्रोणौ बृहतीत्रिग्राहिणी पादमात्रीभिर्द्वात्रिंशत्पादभागा व्याप्ताः । तेषां मध्ये "अ-न्यतरतश्चार्धपद्याः" (14) इत्युक्तत्वात्तिसृणामर्धपद्यानां स्थाने षट् पादभाग उपधीयन्ते । अतः षड्विंशतिः पादभागा अवशिष्यन्ते । तेषामुपधानस्थानाभावात्कि कर्तव्यमित्याशङ् कायामुपायमाह षड्विंशतिं पादभागानुदृधृत्य द्विगुणान्द्वापंचाशदर्धभागांस्तस्य पुरुषस्यात्ममध्यसमीपकोष्ठे उपदध्यात् । लोकम्पृणानां संख्यापूरणाय तेषां स्थानमेव आग्न्येयपुरुषस्य वायव्यकोणे तृतीयचतुर्थसृष्ट्योः पश्चाच्चतुर्षु लोकेषु तयोरेव सृष्ट्योः पुरस्ताद्वयक्रतव्याभ्या दक्षिणलोकस्यापारस्मिन्नर्धे च । एव सार्धेषु षट्सु लोकेषु द्वापंचाशदर्धपादभागानामुपधानम् । तेषां मध्ये द्वादशोदगायताः, शेषाः सर्वे

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रागायता इति यास्तिस्रोऽर्धपद्या उद्धृतास्तासां संख्या बृहत्यादिभिस्तिसृभिः पूरिताः । अतो लोकम्पृणानां सैव संख्या भवति । एवं पादभागनां नवतिशतान्यष्टाधिकानि द्वापंचाशदर्धपादभागा इति विशेषः ।। 15 ।।

इति श्रीसम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिकप्रजापति सुतयाज्ञिक देवकृते कात्यायनीयेष्टकापूरणसूत्रभाष्ये षष्ठी कण्डिका परिसमाप्ता ।। 6 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ सप्तमी कण्डिका

पंचम्यामन्तराविराजः ।। 1 ।।

पंचम्यां चितौ--अन्तराविराजोऽग्नेः पूरणमुच्यत इति शेषः । अन्तरा असपत्नाभ्यो मध्यमदेशे विराजो यस्यासावन्तराविराट् तस्यान्तराविराजः । बहिर्विराडप्यस्ति तस्य व्युदासार्थ मन्तराविराज इति । बहिर्विराजः पूरणमिहोक्तं नास्ति ।। 1 ।।

पुच्छस्रक्तयोः पादलोकावष्टौ च मध्यत आपूर्वान्तात्समध्यमो भागस्तस्मिनृज्वालिखिताः ।। 2 ।।

पुच्छस्थ स्रक्तिकोण तयोः पादलोकौ द्वौ पद्यालोकौ मध्यतः। तयोः पादलोकयोर्मध्ये वर्तमाना येऽष्टौ पादलोका आपूर्वान्तम् । आत्मनः पूर्वान्तं यावत्स मध्यमो भागः । यस्य भागस्य मध्यभाग इतीयं संज्ञा । तस्मिन्मध्यमे भागे ऋज्वालिखिता इष्टका उपदध्यात् । तत्र सर्वस्मिन्पक्षपुच्छेआग्नेयक्षेत्रे सप्तशतानि पंचाशदधिकानि पद्यालोकाः सन्ति । तत्रैवं त्रेधा विभागे कृते प्रतिभागं पंचाशदधिकं पद्यालोका भवन्तीति ज्ञेयम् ।। 2 ।।

दक्षिणोत्तरयोर्वक्रालिखिताः ।। 3 ।।

तस्मान्मध्यमभागाद् दक्षिणोत्तरभागयोर्वक्रालिखिता इष्टका उपदध्यात् । तथा च कात्यायनसूत्रं--"त्रिसाहस्रयुत्तमा वक्रालिखितानां दक्षिणोत्तरे मध्य इतरासाम्" (का.श्रौ.सू. 17/7/23-24) इति । तथाच श्रुतिः- "अथ पंचमी चितिमुपधाय त्रेधाऽग्निं विमिमीते स मध्यमे वितृतीये सहस्रमृज्वालिखिता उपदधाति तद्यानीमानि वयसः प्रत्यंचि शीर्ष्णं आपुच्छाद् दृजूनि लोमानि तानि तत्करोति । अथ सहस्रमित्यालिखिता दक्षिणत उपदधाति । अथ सहस्रमित्यालिखिता उत्तरत उपदधाति" (श.ब्रा. 10/2/1/9-11) इति च ।। 3 ।।

मध्यमे पादभागनां चतुः सप्ततीति पंचशतान्यपुध्यात् ।। 4 ।।

मध्यमे भागे चतुःसप्तत्यधिकानि पंचशतानि पादभागा उपधेयाः ।। 4 ।।

चत्वारि चार्धपादभागानाम् ।। 5 ।।

"मध्यमे शतानि" इति चानुवर्तते । मध्यमे भागे चत्वारि शतान्यर्धपादभागा उपधेयाः। तेषां स्थानं वक्ष्यामि- "विश्वज्योतिषः कोणेष्वेकैकं क्षिपेत् । तन्मध्यमर्धपादैस्तु पूरयेद् बुधः" (का.इ.पू. श्लोकः 7) इति ।। 5 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दक्षिणोत्तरयोरष्टात्रिंशान्यष्टावष्टौ शतानि पादभागानाम् ।। 6 ।।

दक्षिणोत्तरभागयोरष्टात्रिंशदधिकान्यष्टावष्टौ शतानि पादभागनुपदध्यात् ।।6।।

विंश विंश च शतमर्धपादभागानाम् ।। 7 ।।

दक्षिणोत्तरभागयोविंशत्यधिकं शतं विंशत्यधिकं शतमर्धपादभागानुपदध्यात् । तयोः स्थानमग्रे वक्ष्यति । " ऋतव्याषाढे ये वेले दक्षिणोत्तरभागयोः । चीयाद्वामेऽर्धभागैस्तु आषाढान्तौ विवर्जयेत्" (का.इ.पू. श्लोकौ 10/ 11) इति । अस्यार्थः-दक्षिणोत्तरर्भागयोर्ये ऋतव्याषाढे वेले ते अर्धपादभागैश्ची याच्चिनुयात् । तु पुनर्वामभागे उत्तरे भागे आषाढान्तावाषाढवेलाया अन्तौ द्वौ पद्यालोके विवर्जयेत् । तत्र पादभागानेवोपदध्यादिति ।। 7 ।।

उत्तरे षोडशपादभागानधिकानुपदध्यात् ।। 8 ।।

उत्तरे भागे उक्त संख्यातः षोडशपादभागानधिकानुपदध्यात् । "दक्षिणोत्तरयोरष्टात्रिंशान्यष्टावष्टौ शतानि पादभागानम् " (6) इत्येतत्संख्यातो धिकानीत्यर्थः ।। 8 ।।

दक्षिणेऽर्धपादभागान् ।। 9 ।।

अधिकानुपदध्यादिति शेषः । दक्षिणभागे षोडशार्धपादभागान्विंशं शतमर्धपादभागान्" इत्युक्त संख्यातोऽधिकानुपदध्यात् । दक्षिणभागे उत्तरभागादसपत्नातिछन्दसोरधिकत्वादष्टानांपादभागलोकानांताभ्यां व्याप्त-त्वात्षोडशपादभागानांमुपधानं न सम्भवतीत्यत उच्यते । "षोडषार्धपादभागान्" इति । ताश्च दक्षिणयोराषाढावेलान्तपद्यालोकयोरुपदध्यात् । अत एवोक्तं --" वामे आषाढान्तो विवर्जयेत् " इति। एवं ब्रुवन्दक्षिणे तयोरप्यर्धपादभागोपधानं दर्शयति । एवं सर्वेषु मध्यमादिभागेषु चतुःसप्तत्यधिकानि नवशतानि लोकम्पृणा भवन्ति । "धिष्णिया उत्तमायाम्" (का.श्रौ.सू. 17/8/27) इति वचनाद्धिष्ण्य सम्बन्धिन्यः " षड्विंशतिऋज्वालिखिता मध्यम भागमध्ये गणनीयाः । षड्विंशतिः षड्वंशतिर्वक्रालिखिता दक्षिणोत्तरभाग-योर्गणनीयाः । एवं सर्वेषु भागेषु सहस्त्रं लोकम्पृणाः सम्पद्यन्ते । "द्वाभ्यान्नाशीतिं घिष्ण्येषु" (शा.ब्रा. 10/4/3/13) इत्युक्त त्वात् । धिष्ण्येष्वष्टासप्ततिरिष्टकाः सन्ति । तासां मध्ये होतृधिष्ण्ये एको मध्ये पादभागः । अष्टौ चतुर्भागाः । ब्राह्मणाच्छँसिधिष्ण्येषु चैकः पादभागः । चतुरोऽर्ध पादभागाः । इतरेषु षट्स्वेकैकाः । एकैका अर्धपद्या एवं द्वादश । एवं सर्वा एकत्र गण्यमानाः षडिवंशतिं ऋज्वालिखिता भवन्ति । परिशिष्टा द्वापंचाशद्वक्रालिखिता । एवं त्रीणि लोकम्पृणा भवन्ति । "त्रिसाहस्र्युत्तमा" (कौ.श्रौ.सू. 17/7/23) इति वचनात् ।। 9 ।।

इति श्रीसम्राद् स्थपतित्रिरीगनचिन्महायाज्ञिकप्रजापतिसुतयाज्ञिक देवकृते कात्यायनीयेष्टकापूरणसूत्रभाष्ये कण्डिका परिसमाप्ता ।। 7।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ अष्टमी कण्डिका

अथ धिष्ण्यानां पूरणमुच्यते--

धिष्ण्येषु नवपादभागलोकाः ।। 1 ।।

धिष्णयानामतः परं पूरणमुच्यते । धिष्णयेषु विषये नवपादभागलोका भवन्ति ।। 1 ।।

पंचमीवद्विभागलक्षणानि ।। 2 ।।

"धिष्ण्येषु" इत्यनुवर्तते । । धिष्ण्येषु पंचमीचितिवद्विभागानि द्विप्रकाराणि लक्षणानि भवन्ति । मध्यमे ऋज्वालिखिता दक्षिणोत्तरयोर्वक्रालिखिता इति ।।२।।

मध्ये ऽर्धपद्यामुपदध्यात् ।। 3 ।।

धिष्ण्येषु मध्ये ऽर्धपद्यामुपदध्यात् । "वर्षीयस्यो बाह्याः" (का.इ. पु.सू. 2/2) इत्यस्य वाधनाय मध्यत इत्युक्तम् ।। 3 ।।

शेषे प्रादभागान् ।। 4 ।।

मध्यमे ऽर्धपद्यामुपधाय शेषे धिष्ण्यक्षेत्रे सप्तपादभागानुपदध्यात् । "अष्टेष्टकाश्चिनोति" (शा.ब्रा. 8/6/3/12) इत्युपदेशात् । एवं चयनम् । द्वौ-द्वौ पादभागावर्धपद्या ऽभितः । त्रीन्पश्चात् ।। 4 ।।

होत्रिये त्वंसयोः प्राच्यावर्धपादभागौ द्वौद्वौ ।। 5 ।।

होतुर्विशेषः होत्रिये होतुर्धिष्ण्यें ऽसयोः प्रांचौ प्रागायतौ द्वौ द्वावर्धपादभागौ वक्रालिखितावुपदधाति ।। 5 ।।

तदपरं च बाह्यमेकैकम् ।। 6 ।।

तदपरं तयोरसंयोरुपहितयोरर्धपादभागयोः पश्चात् । एकैकमर्धपादभागं बाह्यं बहिर्भवमुत्तरत उत्तरार्धपादभागसंल्लग्नं वक्रालिखितम् । दक्षिणतो दक्षिणार्धपादभागसंल्लग्नं वक्रालिखितं प्रागायतमुपदध्यात् ।। 6 ।।

अन्तरं चतुर्भागौ द्वौद्वौ ।। 7 ।।

तदपरयोरर्धपादभागयोरन्तरतो द्वौद्वौ चतुर्भागौ वक्रालिखितावुपदध्यात् पादभागस्य चतुर्थो भागश्चतुर्भाग इत्युच्यते । सच समचतुरस्त्रस्त्र्यङ्गुलः ।। 7 ।।

अर्धपद्यायाश्च स्थानेऽष्टौ ।। 8 ।।

अर्धपद्यास्थाने चाष्टौ चतुर्भागानृज्वालिखितानुपदध्यात् । "मध्येऽर्धपद्यामुपदध्यात्" (का.इ.पु.सू. 8/3) इत्येतदर्धपद्यायाः स्थानम् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अर्धपद्यायाः पश्चात्प्रदेशे पादभागत्रयमेव । एवमेकविंशतिरिष्टकं होतृधिष्ण्यं भवति । षडर्धपादभागाः । द्वादश चतुर्भागाः । त्रयः पादभागा इति ।। 8 ।।

ब्राह्मणाच्छंस्ये च चतुरोऽर्धपादभागान् ।। 9 ।।

चकरादर्धपद्यायाः स्थाने ब्राह्मणाच्छंसिनो धिष्ण्ये चतुरोऽर्धपादभागाः ऋज्वालिखितान्प्रागायतानुपदधाति । शेषे सप्तपादभागान् । एवमेकादशेष्टकाः ।।9।।

मार्जालीयेऽर्धपद्यामभितोऽर्धपद्येऽर्धपद्ये ।। 10 ।।

मार्जलीये धिष्ण्ये मध्य उपहितामर्धपद्यामभितो द्वे अर्धपद्ये वक्रालिखिते उपदधाति प्रागायते । शिष्टास्त्रयः पादभागाः षडिष्टका मार्जालीये भवन्ति । शेषेषु पंचसु धिष्ण्येष्वष्टावष्टाविष्टकाः । एकैका अर्धपद्या सप्त पाद भागा इति ।। 10 ।।

इति श्रीसम्राट् स्थपतित्रिग्निचिन्महहायाज्ञिक श्रीप्रजापतिसुतयाज्ञिकदेब कृते कात्यायनीयेष्टकापूरणसूत्रभाष्ये ऽष्टमी कण्डिका परिसमाप्ता ।। 8 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ नवमी कण्डिका

अथातः सर्वासां पक्वेष्टकानां समासेन संख्याप्रमाणान्यनुव्याख्यायास्यामः ।। 1 ।।

अथ सर्वचितिधिष्ण्यनिरूपणानन्तरमतो हेतोर्यतश्चितिषु निरूपितासु तद्गतेष्टकानां संख्या सुखेन निरूपयितुं शक्यते । सर्वासां पक्वेष्टकानां पक्वानामिष्टकानां समासेन सर्वचिति सम्बन्धीनीनां यजुष्मतीनां लोकम्पृणानां चैकत्र गणनेन संख्याप्रमाणानि संख्यायुक्तानि पादभागादीनि प्रमाणान्यनुव्याख्यास्यामः । "पक्वेष्टकानां" इति विशेषणोपादानात् "भिन्नकृष्णयोश्चयनम्" (का.श्रौ.सू. 16/ 7/27) इति प्रतिषेधाच्च पक्वेष्टका वक्ष्यमाणाः संख्यातोऽधिकाकर्तव्या इति गम्यते ।। 1 ।।

सकलेष्टकानां संख्यामाह--

सहस्राण्येकादश सप्ततिं च शतम् ।। 2 ।।

एकादश सहस्राण्येकशतं च सप्तत्यधिकम् ।। समस्तानामिष्टकानामियं संख्या । तत्र तावद्दशसहस्राण्यष्टौ लोकम्पृणाः । त्रीणि शतानि सप्तत्यधिकानि यजुष्मत्य इति । ननु शतपथे- "ताः सर्वाः पंचभिर्न चत्वारि शतानि" (शा.ब्रा. 10/4/3/19) इति यजुष्मत्यो गणिताः सन्ति । किमुच्यते सप्तत्यधिकानीति । उच्यते -तासां मध्ये दर्भस्तम्बादीनां दूर्वेष्टकान्तानां चतसृणां स्वयमातृण्णानां कूर्मोलूखलमुसलपशुशीर्षपृश्न्यश्माग्नीनां पंचविंशतिसंख्यानांमनिष्टकारुपत्वात् ।। 2 ।।

तिस्रश्च नैऋत्यः पादमात्र्योऽलक्षणाः ।। 3 ।।

तिस्रो नैऋत्यो निर्तिसंज्ञाः पादमात्र्योऽलक्षणा लक्षणरहिताः । ता उक्त संख्यातोऽधिकाः ।। 3 ।।

तासां विभागः ।। 4 ।।

तासामुक्त संख्यानां मध्ये एतावन्तः पादभागा एतावत्यः पद्या इत्यदिरूपो विभागो विधीयत इति शेषः ।। 4 ।।

पादभागानां नवसहस्राणि शते द्वे द्वाषष्टे ।। 5 ।।

उक्त संख्यानामिष्टकानां मध्ये नवसहस्राणि द्वे शते द्वाषष्ट्यधिके पादभागानां भवन्ति ।। 5 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्र वक्रालिखितानां सप्तदश शतानि द्वात्रिंशानि ।। 6 ।।

तत्र तेषूक्त संख्येषु पादभागेषु द्वात्रिंशदधिकानि शप्तदश शतानि वक्रालिखिताः पादभागा भवन्ति । परिशिष्टाः सार्धसप्तसहस्रसंख्यास्त्रिंशदधिका ऋज्वालिखिताः पादभागाः तेषां मध्ये प्रथमायां चितौ नव शताति चतुर्विंशान्यात्मनि । पंचाशदधिके द्वे द्वे शते उभयोः पक्षयोः । षट्त्रिंशदधिकं शतद्वयं पुच्छे एवं षोडश शतानि पंचदशधिकानि प्रथमायां भवन्ति । द्वितीयायां चात्मानि षट्पंचाशानि नव शतानि पादभागाः । द्वानवते द्वे द्वे शते पक्षयोः पंचषष्टे द्वे शते पुच्छे । एवमष्टादश शतानि पंचाधिकानि भवन्ति । तृतीयायां चात्मानि नव शतानि चतुश्चत्वारिशदधिकानि । पक्षयोर्द्वे शते षट्पंचाशदधिके । पुच्छेच द्वे शते द्वात्रिंशदधिके । एवं षोडश शतान्यष्टाशीत्यधिकानि तृतीयायां भवन्ति चतुर्थ्यां चात्मनि नव शतानि षष्ट्यधिकानि द्वानवते द्वेद्वे शते पक्षयोः । पंचषष्ट्यधिके द्वे शते पुच्छे । एवमष्टादश शतानि नवाधिकानि भवन्ति । पंचम्यां च मध्ये भागे चतुः सप्तत्यधिकानि पंच शतानि ऋज्वालिखिताः पादभागः । दक्षिणे भागेऽ ष्टात्रिशंन्यष्टावष्टौ शतानि वक्रालिखिताः पादभागाः । उत्तरे भागे चतुः पंचाशदधिकान्यष्टौ शतानि वक्रालिखिताः पादभागाः । एवं द्वाविंशतिशतानि षट्षष्ट्यधिकानि भवन्ति । अष्टासु धिष्ण्येष्वष्टौ पाद भागा ऋज्वालिखिताः । द्वाचत्वारिंशद्वक्रालिखिताः एवमृज्वालिखितानां वक्रालिखितानां च सर्वेषां पादभागनामुपधानं प्रदर्शितम् ।। 6 ।।

अर्धपादभागानां षट्शतान्यष्टासप्तत्यधिकानि ।। 7 ।।

अष्टासप्तत्यधिकानि षट्शतान्यर्धपादभागा भवन्ति ।।7 ।।

तत्र वक्रालिखितानां द्वे शते द्वाषष्टे ।। 8 ।।

तत्र तेष्वेवोक्त संख्येष्वर्धपादभागेषु द्वाषष्टयधिके शते अर्धपादवक्रालिखिता भवन्ति । परिशिष्टाश्चतुःशतानि षोडशाधिकानि ऋज्वालिखिताः । तेषां मध्ये चत्वारो द्वितीयायामायोयात्मनि द्वौ पुच्छे चत्वारश्चतुर्थ्यामात्मनि । द्वौ पुच्छे । चत्वारो ब्राह्मणाछँसिधिष्ण्ये । एवं षोडश चत्वारि शतानि पंचम्यां मध्यमे भागे । एवमृज्वालिखिताः पूर्णाः । वक्रालिखितानां पंचम्यां दक्षिणे भागे षट्त्रिंशदधिकं शतम् । उत्तरे विंशशतम् । षढ्ढोतृधिष्ण्ये । एवं वक्रालिखितानामर्धपादभागानामुपधानं स्थानम् ।। 8 ।।

चतुर्भागा द्वादश तत्र वक्रालिखिताश्चत्वारः ।। 9 ।।

द्वाद्वश चतुर्भागा भवन्ति । तेषु द्वादशसु मध्ये चत्वारो वक्रालिखिताः ।।9।।

पादमात्र्यः सप्त शतानि सप्तसप्तत्यधिकानि ।। 10 ।।

सप्तसप्तत्यधिकानि सप्त शतानि पद्या भवन्ति ।। 10 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तत्रार्धोत्सेधा अष्टादश ।। ।। ।।

तासामुक्तसंख्यानां पादमात्रीणां मध्येष्टादशार्द्धोत्सेधा भवन्ति । तासां मध्ये चतस्रस्तृतीयायामृतव्याः तिस्रो नाकसदः । तिस्रः पंचचूडाः । चतस्रो गार्हपत्ये । चतस्रः पुनश्चितौ । एवष्टादशार्धोत्सेधाः पद्याः परिशिष्टा एकोनषष्ट्यधिकानिसप्त शतानि पूर्णोत्सेधाः पद्याः । सर्वासामुपधानस्थानस्थानमुच्यते । प्रथमायाभकाद्वियजुद्विरेतः सिचौ । एका विश्वज्योतिः । द्वे ऋतव्ये । एकाऽषाढा । अष्टादशापस्याः। विशंतिमध्ये द्वयोरर्धपद्यात्वात् । पंचाशतां प्राणभृतां मध्ये षट्चत्वारिशंत् । एवमेकसप्ततिर्यजुष्मत्यः । षट्सप्ततिर्लोकम्पृणा आत्मतिन । षट्पंचाशद् दक्षिणे पक्षे । षट्पंचाशादुत्तरे । पंचाशत्पुच्छे । एवं प्रथमायां त्रीणि शतानि नवाधिकानिपद्या भवन्ति । सप्त गार्हपत्यचितौ । तिस्रो नैऋत्यः पद्याः। ताभिः सहैकोनविशंत्याधिकानि त्रीणि शतानि । द्वितीयायां तिस्र आश्विन्यः । द्वे ऋतव्ये. तिस्रो वैश्व देव्यः । तिस्रः प्राणभृतः । तिस्रोऽपस्याःएवं चतुर्दश पद्या यजुष्मत्यः। चतुर्विंशतिपद्या लोकम्पृणा आत्मनि एवमष्ठात्रिंशत् । तृतीयायां तिस्रो दिश्याः । एका विश्वज्योतिः । चतस्र ऋतव्याः । दश प्राणभृतः । त्रिंशच्छन्दस्याः । द्वादशबालखिल्याः । एवं षष्टिसंख्या यजुष्मत्यः पद्याः ।षट्सप्ततिर्लोकम्पृणा आत्मनि । षट्पंचाशद्दक्षिणे । षट्पंचाशदुत्तरे । पंचाशत्पुच्छे । एवमष्टानवत्यधिकं शतद्वयं पद्या भवन्ति । चतुर्थी दक्षिणोत्तरे द्वे दक्षिणतो दक्षिणोत्तरे द्वे उत्तरतः । "ताभ्यः" षट्" (का.श्रौ.सू. 17/10/3) इति षट् । द्वे ऋतव्ये । पंचदश सृष्टयः । द्वयोरर्धपद्यात्वात् । एवं सप्तविंशतिर्यजुष्मत्यः । द्वे लोकम्पृणे । तदन्तरे व्रिग्राहिण्यौ पादमात्र्यौ च " (का.इ.पु.सू. 6/9/10) इत्यनेन सूत्रेण विहिते । एवमेकानत्रिंशत्पद्या भवन्ति । पञ्चम्यां पंचासपत्नाः । त्रिंशत् विराजः। सप्तविशंतिः स्तोमभागाः । तिस्रो नाकसदः । तिस्रः पंचचूड़ा । एकत्रिंशच्छन्दस्यानां मध्ये एकैका गायत्रीत्रिष्टुब्जग-त्यनुष्टुव्वृहतीककुप् पंक्तिच्छन्दपदानामेकैकाः पद्याः । एवं दश छन्दस्याः। इतरासामर्धपद्यात्वात् । चतस्रो गार्हपत्ये । चतस्रः पुनश्चितौ । द्वे ऋतव्ये । एका विश्वज्योतिः । एवमेकोननवतिर्यजुष्मत्य एव भवन्ति । न लोकम्पृणाः । एवं सर्वपद्यानां निवियोगो दर्शितः ।। ।। ।।

अर्धपद्या अष्टाशीति शतम् ।। 12 ।।

अष्टाशीत्यधीकं शतमेकमर्धपद्या भवन्ति ।। 12 ।।

तत्रार्धोत्सेधा द्वादश ।। 13 ।।

तास्वर्धपद्यासु मध्ये द्वादशार्धोत्सेधा अर्धपद्या भवन्ति । चतस्रो गार्हपत्ये । चतस्रः पुनश्चितौ । द्वे नाकसदौ । द्वे पंचचूडे च । एताश्चतस्रस्तिरश्चालिखिताः ।।13।।

तत्र तिरश्चालिखिताः सप्तविंशतिः ।। 14 ।।

तत्र तास्वेवार्धपद्यासु सप्तविशंतिस्तिरश्चालिखिता भवन्ति । तासां मध्ये चतस्रोर्धोत्सेधा नाकसत्पंचचूड़ा पूर्वप्रदर्शितदक्षिणस्यां दिश्युपधीयन्ते । परिशिष्टास्तु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

त्रयोविशंति पूणोत्सेधा अर्धपद्या भवन्ति । तासां दश विराजः । तिस्र उष्णिहः । अष्टौ द्वितीयायां चितौ दक्षिणतो रेतः सिग्वेलायामाश्विनी-वैश्वदेवीप्राणभृदपस्याः। तृतीयायां चितौ दक्षिणतो रेतः सिग्वेलायामनूके द्वे दिश्ये। एवं सर्वासां तिरश्चालिखितानां विनियोग उक्तः । एका प्राणभृत्स्वयमातृण्णासंल्लग्नोत्तरांसे उपधीयमाना प्राणभूतां मध्ये दर्शमी । सा तु पूरणकारेणा न गणिता । प्रथमायामपस्ये । तथा दक्षिणेंऽसे उपधीयमानानां प्राण भृतां या दशमी सा प्यर्धपद्यैव । साऽपि पूरणकृतोक्ता नास्ति । अष्टाविंशति रर्धपद्या आत्मनि । तिस्रउत्तरे दक्षिणपक्षे । तिस्र सप्त पुच्छे । एवं त्रिचत्वारिं शत् । द्वे प्राणभूतौ यदि गण्येते तदा पंचचत्वारिंशद्भवन्ति । ते तु कथमपि न गणिते इति स एव वेद । द्वितीयायां द्वादश लोकम्पृणा अर्धपद्याः । द्वे पक्षयोः । अष्टावाश्विन्याद्यास्तिरश्चालिखिता यजुष्मत्यः । एवं द्वाविंशतिः । तृतीयायां दक्षिणतो द्वे दिश्ये तिरश्चालिखिते । षट् छन्दस्याः । द्वे वालखिल्ये । षोडश लोकम्पृणा आत्मनि । चतस्रः पुच्छे । एवं चतुर्थ्यां यजुष्मत्यः । द्वे सृष्टी । चतस्रश्चतुर्दशाभितः । द्वे षडभितः । षोडश दक्षिणोत्तरे अभितः । द्वे पक्षयोः । एवं चत्वारिशंत् । पंचम्यां चितौ दशविराजः । तिस्र उष्णिहः । द्वे स्तोमभागौ । द्वे नाकसदौ तिरश्चौ । द्वे पंचचूडे तिरश्चालिखिते । अष्टादश छन्दस्याः । चतस्रो गर्हपत्ये अर्धोत्सेधाः । चतस्रः पुनश्चितावर्धोत्सेधाः । एवं पंचचत्वारिशंत् । द्वे अर्धपद्ये गार्हपत्यश्चितौ । अष्टौ घिष्ण्येषु । ता दश । एवं सर्वा एकत्र गण्यमाना द्वानवत्यधिकं शतं भवति । तथाचार्धपद्याश्च द्वानवतिशतं तत्रार्धोत्सेधा द्वादश तत्र तिरश्चालिखिता अष्टाविंशतिरिति पठनीयम् । संख्येयं प्रधानत्वात्संख्योपबन्धनस्य ।। 14 ।।

तत्र वक्रालिखिते द्वे ।। 15 ।।

आस्वर्धपद्यासु द्वे वक्रालिखिते भवतः । ते मार्जाजीये घिष्ण्ये उपधेये । मार्जालीयेऽर्धपाद्यामभितोऽर्धपद्ये इत्येते ।। 15 ।।

जङ्घामात्र्यः पंचाशत् ।। 16 ।।

जङ्घामात्र्य इष्टकाः पंचाशत्संख्या भवन्ति । ताश्च द्वितीयायां द्वे वयस्ये पुरस्तात् । द्वाविंशतिर्लोकम्पृणा जङ्घामात्र्यः । तासां दश स्रक्तिषु । चतस्रः पूर्वाभागे आत्मनि । चतस्रस्ताश्चापरभागे । द्वे दक्षिणे । द्वे उत्तरे । एवं द्वाविंशतिः यजुष्मतीभ्यां सह चतुर्विंशतिर्द्वितीयायां चितौ । चतुर्थ्यां द्वे पुर स्तादभितोऽनूकम् । द्वे । पश्चादनूकमभितः । शेषा द्वितीयावत् । एवं षड्विंशतिर्जङ्घामात्र्यः । एवं पंचाशतां विनियोगः ।। 16 ।।

अध्यर्धा एकादशोत्तरं शतम् ।। 17 ।।

एकादशाधिकं शतमेकशतमध्यर्धा भवन्ति । तासां विनियोगो लिख्यते । सप्तदश वयस्याः चतुर्विंशतिरात्मपार्श्वेषु । एकविंशतिर्जङ्घामात्र्यन्तरेषु पक्षपुच्छेषु ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

एवं द्वाषष्टिर्द्वितीयाम् । चतुर्थ्यामष्टाविशंतिरात्मपार्श्वेषु । एकविंशतिर्जङ्घामात्र्यन्तरेषु पक्षपुच्छेषु । एवमेकोनपंचाशनत् । एताश्चोभयोश्चित्योरेकत्र गण्यमाना एकादशोत्तरं शतं भवन्ति ।। 17 ।।

बृहत्यः षट् सप्त वा ।। 18 ।।

षट् सप्त वा बृहत्यो भवन्ति । तासां मध्ये चतस्रस्तृतीयायां चितौ स्रक्तिषु । द्वे वा तिस्रो वा चतुर्थ्यां दक्षिणस्यां च श्रोण्यामवान्तरेदशे चे (दि) त्यस्मिन्पक्षे सप्त । इतरयोः पक्षयोर्द्वे एव । सप्त वेति पक्षे त्रिग्राहिणीपद्या चोक्त संख्यात एकैकाधिका भवति । । "सप्त वा" इत्येतदुपलक्षणं सर्वचितिषु विकल्पपक्षाश्रयेण त्रिग्राहिणी पद्यानां चोक्त संख्यातो न्यूनाधिकत्वात् । तद्यथा--त्रिशंत्संख्याः स्तोमभागाः पक्षे । उत्तरतोऽपि द्वयोरर्धपद्ययोरुपधानात्पद्यासंख्यैकोना । अर्धपद्यासंख्या द्वाभ्यामधिकेति ।। 18 ।।

चतुस्रोऽर्धबृहत्यः ।। 19 ।।

चतस्रोऽर्धबृहत्यो भवन्ति । ताश्च गार्हपत्यचितौ नियुज्यन्ते ।। 19 ।।

त्रिग्राहिण्यः सप्ततिः ।। 20 ।।

सप्ततिस्त्रिग्राहिण्यो भवन्ति । तासां विभागोऽभिधीयते । द्वितीयायां चतस्रस्त्रिग्राहिण्य आत्मनि । त्रिंशत्पक्षपुच्छेषु । एवं चतुस्त्रिंशत् । एवं चतुर्थ्यामात्मनि तदन्तरे त्रिग्राहिण्याविति द्वे अधिके । एवं षट्त्रिंशत् । सर्वा एकत्र गण्यमानाः सप्ततिर्भवन्ति । सप्तबृहतीपक्षे त्रिग्राहिण्यो प्येकसप्ततिर्भवन्ति । पादमात्र्योऽप्यधिका भवन्ति । "बृहत्यः सप्त वा" इति सप्तग्रहणस्योपलक्षणार्थत्वात् ।। 20 ।।

अष्टौ वक्राः ।। 21 ।।

अष्टौ वक्रा इष्टका भवन्ति । ताश्च गार्हपत्यचितौ नियुज्यन्ते ।। 21 ।।

द्वे पादोने ।। 22 ।।

द्वे पादोने पादेन चतुर्भागेनोने भवतः। ते प्राणभृतौ दक्षिणापर प्राणभृतां दशम्यौ स्वयमातृण्णासंल्लग्ने पश्चाद्भागे । अनेनैव ज्ञापकेन पूर्वभागे स्वयमातृण्णासंल्लग्ने प्राणभृतावर्धपद्ये ।। 22 ।।

एकोखा तिस्रो वा ।। 23 ।।

उखैका भवति । तिस्रो वोखा भवन्ति । "ता हैके तिस्रः कुर्वन्ति " (शा.ब्रा. 6/5/2/22) इति श्रुतेः ।। 23 ।।

इति विभागः ।। 24 ।।

इत्यनेन प्रकारेण समासेनोपदिष्टानां विभागोऽवगन्तव्यः ।। 24 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इष्टकापाकशोषाभ्यां त्रिंशन्मानात्तुहीयते त्रिंशन्मानात्तु हीयत इति ।। 25 ।।

"पाकशोषाभ्यां" पंचनं पाकः, शोषणंः शोषः । ताभ्यां पाकेन शोषेण चेष्टकास्त्रिशन्मानात्त्रिंशद्भागाद्ध्रसीयन्ते । आर्द्रावस्थप्रामाणाः शोषणेन पचनेन चोनप्रमाणं सम्पद्यन्ते । आर्द्रावस्थाप्रामाणं त्रिंशद्भागाधिकं सर्वेष्टकानां कर्तव्यम् । द्विरभ्यासः समाप्तिसूचनार्थः। पक्षान्तरं चोक्तं परिशिष्टे–"ह्रसते पाक शोषाभ्यां द्वात्रिंशद्भागमिष्टका । तस्मादार्द्रप्रमाणं तु कार्यां मानाधिकं बुधैः" (का.शु.सू.श्लोक. 30) अयं ह्रासः पादभागविषयः । पद्यादिषु द्विगुणत्रिगुणचतुर्गुणादि यथायथमधिको ज्ञेयः । इति शुल्बवृत्तिकारा रामचन्द्राचार्या आहुः । तेन पादभागाया द्वात्रिशंद् भागो ह्रासः । पद्यायाः षोडशभागो ह्रासः । बृहत्या अष्टमांश इति । तस्मात्पादभागस्यार्धप्रमाणं स्वत्रिंशांशाधिकं कार्यम् । स्वद्वात्रिशाधिकं वा । पद्याप्राणं स्वत्रिशाशंद्वयाधिकं वा । स्वद्वात्रिंशद्वयाधिकं वा कार्यम् । अध्यर्घदैर्घ्य प्रमाणजङ्घामात्रीप्रमाणत्रिग्राहीतिर्यक्प्रमाणानि स्वत्रिंशांशत्रयाधिकानि वा स्वद्वात्रिशांशत्रयाधिकानि कार्याणि । बृहतीवक्रात्रिग्राहिणीदैर्घ्यप्रमाणानि स्वत्रिशांशचतुष्काधिकानि कार्याणीति सिद्धम् ।। 25 ।।

इति श्रीसम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिकप्रजापतिसुत याज्ञिक देवकृते कात्यायनीयेष्टकापूरणसूत्रभाष्ये नवमी कण्डिका परिसमाप्ता ।। 9 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ दशमी कण्डिका

श्लोक भाग

अथ यजुष्मतीभिः प्रथमादिषुचितिषु प्रतिपुरुषमेतावन्त एतावन्तः पद्यालोका व्याप्यन्त इति ज्ञापनार्थमाह--

प्रथमायां यजुष्मत्यः पूर्वयोरेकविशंतिः ।
सपादा दक्षिणे वेद्या न्यूनाः पादेन चोत्तरे ।। 1 ।। [१]
अष्टादश समाख्याताः सपादा दक्षिणापरे ।
एकोनविंशतिर्न्यूना पादेन चोत्तरापरे ।। 2 ।।

प्रथमायां चितौ पूर्वयोः पुरुषयोर्मध्ये दक्षिणे पुरुषे एकविशंतिः सपादाः एकविंशतिसंख्याश्चतुर्थभागसहिता यजुष्मत्यो यजुष्मतीभिर्व्याप्ताः पद्यालोका वेद्या ज्ञेयाः । तथा पूर्वयोरेव मध्ये उत्तरे पुरुषे पादेन न्यूना एकविंशतिर्वेद्याः । तथा दक्षिणापरे पुरुषेऽष्टादश सपादाः समाख्याताः कथिताः । तद्यथा-दक्षिणपूर्वपुरुषे नव सार्धाः प्राणभृतः पादभागो दूर्वेष्टकायाः पादभागः स्वयमातृण्णाया एवं दश । अर्धं द्वियजुषः । एका रेतःसिक् । अर्ध विश्वज्योतिषः । एका ऋतव्या । अर्धमषाढायाः । एकः कूर्मः । लोकद्वयमपस्यानां पूर्वासाम् । अर्धलोकद्वयं दक्षिणापस्यानाम् । रेतः सिग्वेलायामुपहिते द्वे प्राणभृतौ । एवमेकविशंतिः । स च एकः पादभागः तेन सपादैकविंशतिः । एवमेवोत्तरपूर्वे पुरुषे । तत्र कूर्मो नास्ति ।

---

1. इतोऽग्रे श्रीमदुपेन्द्र कृत पूरणश्लोक निरूपणश्लोकत्वेनाधस्तनं सोऽर्धश्लोकद्वयमधिकम् तद्यथा-पुरुषे पुरुषेपद्यालोकाः स्थाप्या शतं शतम् । तत्र यजुष्मती व्याप्ताः पद्यालोकाभवन्त्यमी ।।
अवशिष्टेषुलोकेषु लोकम्पृण विभागतः । चेयालोकम्पृणाः सूत्रेष्वष्टमेवं प्रपञ्चितम् । एकैकापूर्वयोः पुंसोर्न्यूना वाह्य प्रदेशतः ।।
तत्रोपेन्द्रकृतं विशेष विवरणम् प्रथमायां यजुष्मत्य इति सार्धचतुष्टयस्य दक्षिणोत्तरापस्यानां षट्कस्यगणना पूर्वपुरुषाभ्यां सहकर्तव्या । तेनचत्वारिंशदिष्टकाः पद्याः पूर्वयोः पुरुषयोर्भवन्ति । तत्र चतस्रोऽर्धपद्या वर्तन्ते । तासां स्थाने पद्या अप्युपहिता वर्तन्ते । तदर्थ तासां पद्यात्वेनपरिगणना एवंषट्त्रिंशत्पद्या भवन्ति । "न्यूनावाह्य प्रदेचत" अर्धप्रमाणेन पादप्रमाणं बोध्यम् । एतत् सार्धलोकद्वयं देवयाज्ञिककर्ककृत पूरणश्लोकभाष्ययोर्न दृश्यत इति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उखाया अर्धपद्याऽधिका । अन्यत्सर्वं समानम् । तेन पादेन न्यूनैकविंशतिरत्र । दक्षिणापरे पादेन न्यूना दश प्राणभृतः । एकः पादभागः स्वयमातृण्णायाः । तिस्त्रोरेतः सिग्वेलायां प्राणभृतः । द्वे सार्धे दक्षिणापस्यानाम् । द्वे सार्धे अपरापस्यानाम् । एवमष्टादश । स च एकः पादभागः । तेन सपादाः उत्तरापरे चोखाया अर्धे अर्धपद्यालोकप्रमाणमधिकम् । तेन पादभागेन न्यूनैकोनविंशतिः ।। 2 ।।

द्वितीयायां चितावाह–

प्रतिपुंसं द्वितीयायां सार्धा एकादशेष्टकाः ।
ऋतव्ये चाधिके पुंसोरुपधत्तेऽनुपूर्वयोः ।। 3 ।।

द्वितीयायां चितौ सार्धा एकादशेष्टकाः सार्धा एकादश पद्याः प्रतिपुंसं प्रतिपुरुषं चतुर्ष्वपि पुरुषेषु यजुष्मतीभिर्व्याप्यन्ते । तु पुनः पूर्वयोः पुरुषयोर्ऋतव्ये उक्त संख्यातोऽधीके उपधत्ते । तद्या-- सर्वेषु पुरुषेषु चतस्त्रो लोका आश्विनी वैश्वदेवी प्राणभृदपस्यानाम् । सार्धाः सप्तसप्ताध्यर्धानाम् । एवं सार्धा एकादश लोकाः प्रतिपुरुषम् पूर्वयोर्ऋतव्ये अधिके इति तयोः । सार्धा द्वादश द्वादश ।। 3 ।।

अथ तृतीयामाह--

एकैकस्मिँस्तृतीयायां यजुष्मत्यस्तु षोडश ।
सपादाः पूर्वयोर्न्यूना पादेनामपरयोस्तथा ।। 4 ।।

तृतीयायां चितौ– एकस्मिन्पुरुषे षोडश यजुष्मत्यो भवन्ति । षोडष पद्या लोका यजुष्मतीभिर्व्याप्ता भवन्तीत्यर्थः । इयांस्तु विशेषः पूर्वयोः पुरुषयोः षोडश सपादा भवन्ति । तथाऽपरयोः पुरुषयोः पादेन न्यूनाः षोडश भवन्ति । तथाहि सार्धाः पंच छन्स्याः पंच प्राणभृतस्तिस्त्रो बालखिल्या एका ऋतव्या । विश्वज्योतिषोऽर्धम् । अर्धं पूर्वदिश्यायाः । अर्धं दक्षिणापस्यायाः । एवं षोडश । पूर्वदक्षिणे पुरुषे स्वयमातृण्णापादभागेन सपादाः । एवमेवोत्तरपुरुषे । दक्षिणापरे चैकादश लोका दक्षिणापरछन्दस्याभिर्व्याप्ताः । सार्धास्त्रियोबालखिल्याभिः । एको दक्षिणापरदिश्यायाः । एवं सार्धाः पंचदश । स्वयमातृण्णापादभागेन पादेन न्यूनाः षोडश भवन्ति । इति एवमेवोत्तरापरे ।। 4 ।।

अथ चतुर्थ्यामाह–

अपरयोश्चतुर्थ्यां च सपादाः सप्त सप्त वै ।
व्यर्धास्त्रिंशद्यजुष्मत्यः समभागेन पूर्वयेः ।। 5 ।।

चतुर्थ्यां चितौ-अपरयोः पुरुषयोर्वै निश्चितम् । सपादाः सप्त सप्त पद्यालोका यजुष्मतीभिर्व्याप्यन्ते । तथा पूर्वयोः पुरुषयोरर्धेन विहीना व्यर्धास्त्रिंशत्संख्या यजुष्मत्यः समभागेन विभक्ताः । उभयोः पंचदश पादोना भवन्तीत्यर्थः। तथा हि–दक्षिणापरे एका जङ्घामात्री तस्या नव पादभागाः । तैः सपादे द्वे पक्षे । चतस्त्रः सृष्टीभिः । अर्धमर्धःदक्षिणोत्तरयोः पद्ययो । एवं सम्पादाः सप्त । एवमेवोत्तरेपरे ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दक्षिणपूर्वे तु तचस्त्रः सृष्टयः । षण्णां तिस्त्रः पद्याः । चतुर्दशानामर्धद्यानां सप्तार्धपद्याः । ताभिः सार्धास्तिस्त्रः पद्याः । सपादे द्वे जङ्घामात्र्यौ । एका ऋतव्या । दक्षिणोत्तरयोः पद्ययोरर्धमर्धम् । एवं पादोनाः पंचदश एवमवेवोत्तरे पूर्वे ।। 5 ।।

अथ पंचम्यामाह--

पंचम्यां मध्यमे सार्धाः षट्पंचाशद्यजुष्मतीः ।
दक्षिणेत्रयोविंशतिरेक विशति चोत्तरे ।। 6 ।।

पंचम्यां चितौ मध्यमे भागे सार्धाः षट्पंचाशद्यजुष्मतीर्विद्यात् । दक्षिणे भागे त्रयोविशंतिः सार्धाः ज्ञेयाः । उत्तरे भागे एकविंशतिः सार्धा विज्ञेया इति । तथाहि--मध्यमे भागे पश्चादष्टौ विराजःपद्याः । तिस्रो द्विपदा असपत्नाभिः । अष्टौ स्तोमभागाः । द्वे अनुष्टुभौ । द्वे जगतीभिः । षट् गार्हपत्ये । न द्वे त्रिष्टुब्भिः । एका विश्वज्योतिः । द्वे ऋतव्ये । अष्टौ स्तोमभागाः । द्वे बृहतीभिः । द्वे कुकुब्भिः । चतुस्त्रोऽष्टाभिर्विराजार्धपद्याभिः । एका सार्धा तिसृभिरुष्णिग्भिः । द्वे नाकसदौ । तिस्त्रोऽसपत्ना गायत्रीभिः एवं मध्ये भागे षट्पचंशत्सार्धाः पद्यालोकाः । दक्षिणे भागे दशविराजः । तिस्रोऽसपत्नाः पङ्क्तिभिः । द्वे असपत्ने अतिच्छन्दसौ । षट् स्तोमभागाभिः । एका नाकसद्वयाम् । एक पश्चाद्विराट् । पूर्वासां विराजामेकाऽर्धपद्या । एवं सार्धास्त्रयोविशंतिः पद्यालोका उत्तरे भागे दश विराजः तिस्त्रोऽसपत्नाः पङ्क्तिभिः । षट् स्तोमभागाः । एका नाकसत् । एका पश्चाद्विराट् । एकाऽर्धपद्या पूर्वासां विराजाम् । एवं सार्धा एकविंशतिः ।। 6 ।।

अथ पंचम्यां चितावेव मध्यमे भागे विहितानां चतुःशतसंख्याना - मृज्वालिखितानामर्धपादभागानामुपधानमाह-

विश्वज्योतिषकोणेषु एकैकं पादकं क्षिपेत् ।
तन्मध्यमर्धपादैस्तु पंचम्यां पूरयेद् बुधः ।। 7 ।।

विश्वज्योतिर्वेलायां चतुर्षु कोणेषु एकैकं पादकं क्षिपेत् । एकैकं पादभागमुपदध्यात् . तन्मध्यं तेषां चतुर्णां पादभागानामनन्तरं यजुष्मतीरुद्धव्य तिरक्त प्रदेशेऽर्धपादभागैः पूरयेत्। एतञ्च " वर्षीयस्यो बाह्याः" (का.इ.पू.सू. 2/2) इत्येन सिद्धमपि स्फुटत्वार्थ पुनरुच्यते ।। 7 ।।

अथ वक्रालिखितानामर्धपादभागानां दक्षिणोत्तरयोरुपधानस्थाने "वर्षीयस्यो बाह्यः" (का.इ.पू.सू. 2/2) इत्यनेन लब्धमपि सुखेन ज्ञापयितुं स्फुटमाह-

ऋतव्याषाढे ये वेले दक्षिणोत्तरभागयोः ।
चीयाद्वामेऽर्धभागैस्तु अषाढान्तौ विवर्जयेत् ।। 8 ।।

दक्षिणोत्तरभागयोर्ये ऋतव्याषाढे वेले तेऽर्धपादभागैश्चीयाच्चिनुयात् । दक्षिणभागे उत्तरभागे च समग्रायामप्याढावेलायामृतव्यावेलायां चार्धभागानुपदध्यादित्यर्थः । अपवादमाह- तु पुनः वामभागे अषाढान्ताव- षाढावेलान्तौ पद्यालोकौ वर्जयेत् । तयोः पद्यालोकयोरष्टौ

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पादभागानेवोपदध्यात् । दक्षिणे भागे तयोरप्यषाढावेलान्त्यपद्यालोकयोः षोडशार्धपादभागानेवोपदध्यात् । अतएवोक्तं उत्तरे शोडश पादभागानधिकानुपदध्यात् । दक्षिणोऽर्धपादभागानिति । ये डशार्धपाभागा अधिका विधीयन्ते ते अनयोः पद्यालोकोयोरुपधेयाः। मध्यमे भागे पुरुस्तात्पश्चाच्च या आषाढावेलायाः स्तोमभागाभिर्व्याप्ताः । ऋतव्यावेलायां च पुरस्तादष्टानां मध्ये नाकसदृतव्याभिस्त्रयो लोका व्याप्ताः । नाकसद् उत्तरतो द्वौ लोकौ । ऋतव्ययोद-'क्षिणतस्त्रयः । एवं पंच परिशिष्यन्ते । तेषु पादभागा वोपधेयाः तथा पश्चादृतव्यावेलामष्टानां पद्यालोकानां मध्ये एक एव लोको परलोकौ नाकसदा व्याप्तः तामीभितः सार्धास्त्रयस्त्रयो लोकाः परिशिष्यन्ते । एवं सप्त लोका भवन्ति । तेष्वपि पादभागा एवोपधेयाः । तथा गार्हपत्यस्य पुरस्तात्त्रिष्टुबन्तरालेऽर्धपादभागानामेका पङ्क्तिः प्रागायतोपधेया । गार्हपत्यस्य पश्चाज्जागतीभ्यः पुरस्ताच्चार्धपादभागानामेवैका पङ्क्तिः प्रागायतोपधेया ।। 8 ।।[1]

अथ सर्वासु चितिष्वात्मनि अक्षणयारज्वोपलक्षिते प्रदेशे या इष्टका उपधीयन्ते तासां लक्षणमाह--

दक्षिणांसोत्तर श्रोण्योरनूकः प्रागनूकवत् ।
ज्ञेयस्तिर्यगनूकवदन्यस्त्रक्तिसमुद्भवः ।। 9 ।।

दक्षिणांसोत्तरश्रोण्योः सम्बन्धी अनूकोऽक्ष्णयारज्वोपलिक्षितः प्रदेशः प्रागनूकवज्ज्ञेयः । प्रागनूके यथा प्राग्लक्षणा इष्टका उपधीयन्ते एवमत्रापीत्यर्थः

---

1. ११९७० सर्वा इष्टकाः । १०८०० तत्र लोकम्पृणाः १३७० यजुष्मत्यः । एताभ्योऽतिरिक्ताः-(दर्भस्तम्ब, दूर्वेष्टका स्वयमातृण्णा-कूर्मोलूखलाद्याः पञ्चविंशतयोऽधिकाः । तथा तिस्रो नैर्ऋत्यश्चाधिकाः) १२६२ आसूक्ताइस्वष्टकासु पादभागाः । १७३२ तत्र वक्रालिखिताः अर्था- ⌣ देतच्चिन्हाङ्किताः पादभागाः । ७५३० ऋज्वालिखिताः अर्था । देतच्चिन्हाङ्किताः अर्धपादभागाः । ६७८ अर्धपादभागाः । २६२ तत्र वक्रालिखिता ⌣ एतच्चिन्हाङ्किताः अर्धपादभागाः । ४१६ ऋज्वालिखिताः । एतच्चिन्हाङ्किताअर्धपादभागाः । १२ चतुर्भागा । ४ तत्र ⌣ वक्रालिखिताः एतच्चिन्हाङ्किताश्चतुर्भागाः । ८ ऋज्वा लिखिता । एतच्चिन्हाङ्किताश्चतुर्भागः । ७७७ पद्याः । ७५९ तत्र पूर्णोत्सेधाः पद्याः । १८ पूर्णोत्सेधाः पद्याः । १८८ अर्धपद्याः । १२ तत्रार्धोत्सेधा अर्धपद्याः । ४ तत्रापि तिरश्चालिखिता-एतच्चिहाङ्किता अर्धोत्सेधाः । ८ ऋज्वालिखिता । एतच्चिन्हाङ्किता अर्धोत्सेधा । २६ तिरश्चालिखिता - एतच्चिन्हाङ्किताः । ९३ 'पूर्णोएत्सेधाः । ४ अर्धोत्सेधाः । शेषा ऋज्वालिखिता । एतच्चिन्हाङ्किताः । २ वक्रालिखिते ⌣ एतच्चिन्हाङ्किते अर्धपद्ये पूर्णोत्सेधे । ५० जङ्घामात्र्यः । ७० त्रिग्राह्विण्यः । ८ वक्राः । १११ अध्यर्धाः । ६ वा ७ बृहत्यः । ४ अर्धबृहत्यः । २ पादोने । इति ।

पञ्चचितिका इष्टका चयन प्रस्तारा इष्टकाकृतयश्चास्मत् प्रकाशिते सायणभाष्यसमेते शतपथब्राह्मणे तृतीयभागे ... पुनर्मुद्रयन्ते ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तथाऽन्यस्त्रक्तिसमुद्भवोऽ नूक उत्तरांस दक्षिणश्रोण्योरनूकोऽक्ष्णयारज्वोपलक्षितः प्रदेशस्तिर्यगनूकवज्ज्ञेयः. तिर्यगनूके यथोदग्लक्षणा इष्टका उपधीयन्ते एवमत्रापीत्यर्थ ।। 9 ।।

अथ शास्त्रान्ते मङ् गलमाचरति[1]

अयुतं च सहस्त्रं च शतं च सप्ततिं तथा । (11170)
संख्यैषा शाण्डिलस्याग्नेस्तस्मै च मुनये नमः ।। 10 ।।

इति ।। 10 ।।

इति श्रीमस्त्राद्स्थपतित्रिरग्निचिन्महायाज्ञिकप्रजापतिसूतयाज्ञिकदेवकृते कात्यायनीतेष्टकापूरणसूत्राभाष्ये । श्लोकरूपा दशमी कण्डिका परिसमाप्ता ।।10।।

इति कात्यायनीयं दशममिष्टकापूरणपरिशिष्टं परिसमाप्तम् ।

---

1. इतोऽग्रे श्रीमदुपेन्द्रकृत पूरण श्लोक निरूपणे पूरणश्लोकत्वेनाधस्तनाश्चत्वारः श्लोका अधिकाः । तेच यथा - एतापक्वेष्टकाज्ञेया अग्नौवाजसनेयके ।
इतोऽन्याश्च यजुष्यत्यस्त्वपक्वाः पञ्चविंशतिः ।।
तुषपक्वास्ततोऽप्यन्यास्तिस्रो नैर्ऋति संज्ञका ।
न ता लोकम्पृणा नापि यजुष्मत्य इति श्रुते ।। १२ ।।
ज्ञेयास्तत्र यजुष्मत्यः पञ्च न्यून चतुःशती ।
अयुतञ्च शतान्यष्टौ ज्ञेया लोकम्पृणेष्टकाः ।। १३ ।।
तिस्रो नैर्ऋति संज्ञाश्च भवन्त्येवमिहेष्टकाः ।
अयुतञ्च सहस्रञ्च द्वाभ्यामूनं शतद्वयम् ।। १४ ।।
तत्रोपेन्द्रकृतं विशेषाः विवरणम्-
एता आकृतिविशेषाः इष्टका अग्निपक्वा एकादश सहस्राणि सप्तत्युत्तरं शतम् । उखया सहैकसप्तत्युत्तरं शतं भवन्ति । इतोऽन्या इत्यर्धस्य सिकताः, पुष्करपर्णं रूक्मः, पुरुषो हिरण्मयः स्रुचौ स्वयमातृण्णास्तिस्रः दूर्वा, कूर्मः उलूखलं, मुसलं शिरांसि पञ्चविकर्णी, लोगेष्टकाश्चतस्रः, पृश्न्यश्मा, आहृत्यचतुर्विंशतिरपक्वाः । उखापञ्चविंशतिरुपशयापूरितत्वात् । तुषपक्वा इति सार्धत्रयस्य स्पष्टोऽर्थः । गार्हपत्य त्रिचिति पक्षे इष्टकावर्द्धते । वक्रपक्षचित्ये द्रोणादीनां चयने चेष्टकाः सङ्ख्यात एतावत्यो यथास्युस्तथा करणानि रचयेत् । इति ।
एते चत्वारः श्लोकाः देवयाज्ञिकर्क कृत पूरणश्लोकभाष्ययोर्न दृश्यन्त इति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यूपलक्षणम्

अत्र कात्यायनीय प्रथमपरिशिष्टं यूपलक्षणात्मकम् -

चातुर्वर्ण्यं प्रवक्ष्यामि वृक्षाणां पशुभिः सह ।
वृक्षच्छेदेन विज्ञेया वर्णेन पशवस्तथा ।। 1 ।।
श्वेतस्तु ब्राह्मणो ज्ञेयः पिञ्जरः क्षत्रियः स्मृतः ।
वैश्यस्तु धूम्रवर्णः स्यात्कृष्णं शूद्रं विनिर्दिशेत् ।। 2 ।।
ब्राह्मणे ब्राह्मणो यूपः क्षत्रिये क्षत्रियो भवेत् ।
वैश्ये तु वैश्ययूपः स्यात् कृष्णं शूद्रं तु वर्जयेत् ।। 3 ।।
अथैवात्मा तथा यूपो यूपे ह्यात्मा प्रतिष्ठितः ।
आत्मा वै यज़मानस्य यूपत्वमनुगच्छति ।। 4 ।।
निन्दां प्रशस्ति वक्ष्यामः कात्यायनमतं यथा ।
यूपस्य सचषालस्य, अध्वर्युः कारयेत्सदा ।। 5 ।।
आत्मानं यज़मानस्य यूपमाहुर्मनीषिणः ।
यूपं श्रेष्ठतमं कुर्यादध्वर्युः सर्वकर्मसु ।। 6 ।।
समभूमिषु ये जाता विविक्ते काननान्तरे ।
स्निग्धा बहुलपर्णाश्च ते यूपा यज्ञकर्मणि ।। 7 ।।
वर्जयेत्कन्दरे जातं तटजातं तथैव च ।
गिरिमूर्द्धनि ये जाता नदीकूलाश्रिताश्च ये ।। 8 ।।
वल्लीभिर्वेष्टिताश्चैव वज्रैर्विनिहतास्तथा ।
सुषिरा . जर्जराश्चैव कोटरैराश्रिताश्च ये ।। 9 ।।
शीर्णाश्च कटसम्बन्धान् यूपांस्तु परिवर्जयेत् ।
छेदनेन प्रमाणस्तु तन्तुको यदि दृश्यते ।। 10 ।।
तन्तुकेन तु विज्ञेयः कण्टो वा यदि वा कृमिः ।
मन्जिष्ठवर्णसङ्काशे शल्ये भवति दर्दुरः ।। 11 ।।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पीतके मण्डले गोधा नीले विद्याद्भुजङ्गमम् ।
श्यामं वा यदि वा कृष्णं मण्डलं यदि दृश्यते ॥ 12 ॥
दीर्घसर्पविकारः स्याद् दृश्यते नात्र संशयः ।
कपिले मूषकं विद्यात्कृकलासं तथा रूणे ॥ 13 ॥
शुक्लवर्णे तु पाषाणं कपोते गृहगोधिकाम् ।
क्षते च रुधिरस्रावं गोविद्धे रोगिता तथा ॥ 14 ॥
शूलकं वर्जयेन्नित्यं सर्वयज्ञेषु निश्चितम् ।
उच्छ्रितो यजमानस्य पशुपुत्रविनाशकृत् ॥ 16 ॥
अव्रणो न च शुष्काग्रो मध्ये चोपनतो भवेत् ।
अग्रे चोपनतः किंचित्स यूपो यज्ञियः स्मृतः ॥ 17 ॥
उच्छ्रीयमाणो यूपस्तु दक्षिणा पतितो यदि ।
तस्मिन् संवत्सरे मृत्युर्यजमानस्य निर्दिशेत् ॥ 18 ॥
प्रत्यगुत्तरतो बापि यस्य यूपोन्नतो भवेत् ।
प्रागेव तु विनाशः स्याद् ध्रुवमप्सु भयं भवेत् ॥ 19 ॥
चौराद्राज कुलाद्वापि उभयत्र भयं भवेत् ।
अथ तस्यैव यूपस्य यदष्टाश्रीणि कुर्वते ॥ 20 ॥
प्रथमाश्रिविनाशे च लक्ष्मीर्न नियता भवेत् ।
द्वितीयस्यामिष्टनाशस्तृतीया तु प्रजां हरेत् ॥ 21 ॥
चतुर्थ्यां मरणं विद्यात्पंचम्यां तु धनक्षयः ।
षष्ठी पत्नीविनाशाय सप्तम्यामनिलाद्भयम् ॥ 22 ॥
चौराद्राजकुलाद्वापि अष्टम्यां भयमिष्यते ।
प्रथमा अग्निदैवत्या द्वितीया सोमदेवता ॥ 23 ॥
तृतीया वारुणी प्रोक्ता चतुर्थी यमदेवता ।
पंचमी नागदेवत्या षष्ठी अनिलदेवता ॥ 24 ॥
सप्तमी पितृदेवत्या अष्टमी सूर्यदेवता ।
अश्रीणां देवता ह्येता यूपो वैष्णव उच्यते ॥ 25 ॥
वज्रस्य देवता ह्येता एतत्ते यूपलक्षणमिति ॥ 26 ॥

यूपलक्षणं समाप्तम्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वैदिक् वाङ्मयस्य संक्षिप्तविवरणम् तत्रादौ ऋग्वेदखण्डः

ऋग्वेदसंहिताया अष्टकादीनां विभागः अधोनिर्दिष्ट चक्रतोऽवगन्तव्यः

क्रमसंख्या	अष्टकादीनां नामानि	संख्या
1--	अष्टकाः	8
2--	अध्ययाः	64
3--	वर्गाः	2006
4--	मण्डलानि	10
5--	अनुवाकाः	85
6--	सूक्तानि	1017
7--	मन्त्राः	14004
8--	शब्दाः	153826
9--	अक्षराणि	432000

सम्पूर्णः शाखाः एकविशंतिः (21)

साम्प्रतमुपलब्धाः-

1--शाकलः, 2- वाष्कलः, 3- आश्वलायनः, 4- शांखायनः 5 माण्डूकायनः ।

ब्राह्मणम्	एतरेयंब्राह्मणम् , कौषीतकि शाङ्खायन
आरण्यकम्	ऐंतरेय आरण्यकम्
उपनिषत्	ऐतरेय उपनिषत्
श्रौतसूत्रम्	आश्वलायन, शांख्यायन
स्मार्तसूत्रम्	आश्वलायन, शांख्यायन
धर्मसूत्रम्	वशिष्ठधर्मसूत्रम्
शुल्वसूत्रम्	--
प्रातिशाख्यम्	ऋक्प्रातिशाख्यम् (शौनकप्रणीतम्)
शिक्षा	शौनकीया ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्रमसं.	ग्रन्थाः	भाष्यकाराः	कालः
1-	ऋग्वेदः	1--स्कन्दः	वि.सं. 682
		2- नारायणः	वि.सं.7
		3- उद्गीथः	वि.सं. 7
		4- माधवभट्ट	वि.सं.7
		5--वेंकेटमाधवः	वि.सं. 1050-1150
		6--धनुष्कयज्वा	वि.सं. 1300
		7--आनन्दतीर्थः	वि.सं.1350-1450
		8--आत्मानन्दः	
		9--सायण	ई. 144
		10- भरतस्वामी	ई.1400 मध्ये:
		11--गुणविष्णु.	ई.1200-1300
2-	ऐतरेयब्राह्मणम्	1--गोस्वामी	वि.सं. 88
		2--षड्गुरुशिष्यः	वि.सं. 1200
3-	आश्वलायन श्रौतसूत्रम्		
4-	शांख्यायन श्रौ.शांख्यायनः		
5-	आश्वलायन गृ. आश्वलायनः		
6-	शांख्यायन गृ. सांख्या.		
7-	कौषीतकि गृ.		
8-	वशिष्ठधर्मसू. वशिष्ठः		
9-	विष्णुधर्मसू.		
10-	प्रातिशाख्यम् (शौनकः)	1- उवटः	11 वीं शती (मध्ये)
11-	शिक्षा (शौनकीया)		

यजुर्वेदखण्डः

शुक्लयजुर्वेद माध्यन्दिन संहिता

क्रमसंख्या	अध्यायादीनां नामानि	संख्या
1--	अध्यायाः	40
2--	मन्त्राः	1975
3--	अक्षराणि	90525
4--	ह्रस्वदीर्घ गूं	1230

कण्वसंहिता

1--	अध्यायाः	40
2--	अनुवाकाः	328
3-	मंत्रसंख्या	2086

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शाखाः- (शुल्क + कृष्ण = सम्पूर्णः शाखाः 101.

शुक्लयजुषः (15) पंचदशशाखाः[1]

ब्राह्मणम्	–	शतपथब्राह्मणम् । कण्वशतपथ ब्रह्मणम्
आरण्यकम्	–	बृहदारण्यकम् ।
उपनिषत्	–	ईशोपनिषत्, बृहदारण्यकोपनिषत्
श्रौतसूत्रम्	–	कात्यायनश्रौतसूत्रम् ।
स्मार्तसूत्रम्	–	पारस्करगृह्यसूत्रम्
धर्मसूत्रम्	–	याज्ञवल्क्यस्मृतिः
शुल्बसूत्रम्	–	कात्यायनशुल्बसूत्रम्
प्रातिशाख्यम्	–	वाजसनेयिप्रातिशाख्यम् ।
शिक्षा	–	याज्ञवल्क्य शिक्षा

परिशिष्टानि - तत्र परिशिष्टानि भवन्ति, यूपलक्षणं छागलक्षणं प्रतिज्ञा नुवाकसङ्ख्याचरणव्यूहश्राद्धकल्पशुल्यकानि पार्षदमृग्यजूंषीष्टकापूरणं प्रवराध्यायोक्थशास्त्रक्रतुसङ्ख्यानिगमा यज्ञपार्श्वहोत्रकं प्रसवोत्थानं कूर्मलक्षमित्यष्टादश परिशिष्टानि भवन्ति ।

कृष्णयजुषः - चतस्त्रः शाखा । 1- तैत्तरीय, 2- मैत्रायणी, 3- कठ, 4-कपिष्ठलकठ ।

ब्राह्मणम्	–	तैत्तरीयसंहिताब्राह्मणम, मैत्रायणीसंहिता ब्राह्मणम् । कठसहिंताब्राह्मणम् । कपिष्ठलकठ संहिताब्राह्मणम् ।
आरण्यकम्	–	तैत्तरीयारण्यकम्
उपनिषत्	–	तैत्तरीयउपनिषत्, महानारायणोपनिषत् । मैत्रायणीयोपनिषत्, कठोपनिषत्, श्वेताश्वतरोपनिषत् ।
श्रौतसूत्रम्	–	बौधायन श्रौ., आपस्तम्बश्रौ., हिरण्यकेशि श्रौ, (सत्याषाढ श्रौ.), वैखानसश्रौ. भारद्वाज श्रौ., मानवगृ., काठक गृ., सत्याषाढगृ. ।
धर्मसूत्रम्	–	बौधायनधर्मसूत्रम्, आपस्तम्बधर्मसूत्रम्, हिरण्केशीधर्मसूत्रम् ।
शुल्बसूत्रम्	–	बौधायनशुल्बसूत्रम्, आपस्तम्बशुल्बसू. मानवशुल्बसू. ।
प्रातिशाख्यम्	–	तैत्तरीयप्रातिशाख्यम् ।
शिक्षा	–	व्यासशिक्षा ।

1. वाजसनेया नाम पंचदश भेदा भवन्ति, जावाला बौद्धयनाः . काण्वा माध्यन्दिनेयाः शाफेयास्तापीयाः कपोलाः पौण्ड्रवत्सा आवटिकाः परमावटिकाः पाराशरा वैणेया अद्धा बौधेयाश्चेति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्रमसं.	ग्रन्थाः	भाष्यकाराः	कालः
1-	शु.यजर्वेद मा.सं.	1--उवटः	11शती (मध्ये)
		2- महीधरः	16 शती (उत्तरार्धः)
3-	शतपथ-ब्राह्मणम्	1- सायणः	14 ई.
		2- हरिःस्वामी	
3-	बृहदारण्यकम्	1--शंकराचार्यः	
4-	ईशावास्यम्	1--शंकराचार्यः	
		2- उवटः	
		3--महीधर,	
5-	कात्यायन श्रौ.सू.	1--कर्कः	
		2--देवयाज्ञिकः	
		3--विद्याधरः	1900 शताब्दी
6-	पारस्कर गृह्यसू.	1--कर्कः	12 शताब्दीतः पूर्वम् ।
		2- गदाधरः	13-14 शताब्दीतःपूर्वम् ।
		3- हरिहरः	12 शताब्दी
		4- जयरामः	
		5- विश्वनाथः	1600 शताब्दी
7-	धर्मसूत्रम्		
8-	कात्यायनः शु.सू.	1- कर्कः	
		2- महीधरः	
		3- विद्याधरः	1900 शताब्दी ।

सामवेदखण्डः

क्रमसंख्या	अध्यायाः	खण्ड	मन्त्र सं
1--(पूर्वार्चिक)	6	68	650
2--(उत्तरार्चिक)	21	120	1225
योगः	27	188	1875

1- शाखाः 1--राणायनीया । 2- जैमिनीया ।

2- ब्राह्मणम् 1- ताण्ड्यब्राह्मणम्, 2 मन्त्रब्रा., 3- अर्षेब्रा.
4- सामविधानब्रा., 5- विंशब्रा. 6- षडविंशब्रा.
7- पंचविंशब्रा., 8- देवताध्यायब्रा.
(जैमिनीयब्र., जै. आर्षेयब्रा., जै. पनिषद्ब्रा.)
9- सहितोपनिषद्ब्रा.

3- आरण्यकम् 1- तवलकार

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

4- उपनिषत् 1- छान्दोग्यउपनिषत्
5- श्रौतसूत्रम् 1- लाट्यायनीय श्रौतसूत्रम्, 2- मशक श्रौतसूत्रम्,
3- द्राह्यायणश्रौतसूत्रम्, 4- जैमिनीय श्रौतसूत्रम्
6- स्मार्तसूत्रम् 1- जैमिनीयगृहसूत्रम् 2-गोभिलगृह्यसूत्रम् ,
3- खादिरगृह्यसूत्रम्
7- धर्मसूत्रम् 1- गौतमधर्मसूत्रम्
8- शुल्बसूत्रम्
9- प्रातिशाख्यम् 1- पुष्पसूत्रम्, 2--ऋक्तन्त्रम् 3- सामतन्त्रम् ।
10- शिक्षा 1- नारदशिक्षा
11- परिशिष्टानि

क्रमसं. ग्रन्थाः	भाष्यकाराः
1- सामवेदसं.	सायणः
2- ताण्ड्य ब्राह्मणम्	1- जयस्वामी 2- सायर्ण
3- मन्त्र ब्राह्मणम्	1- गुणविष्णु 2- सायण
4- आर्षेय- ब्राह्मणम्	1- भास्करमिश्र 2- सायण
5- सामविधानम्	1- भरतस्वामी 2- सायणः
6- छान्दोग्योपनिषत् ।	
7- लाटयायन श्रौ.	
8- मशकश्रौ.	
9- गोभिलगृ.	
11- पुष्पसूत्रम्	1--अजातशत्रु
12- ऋक्तन्त्रम्	
13- नारदशिक्षा	1- गोपालचन्द्र मिश्रः

अथर्ववेदखण्डः

क्रमसंख्या	काण्डदीनां नामानि	संख्या
1--	काण्डम्	20
2-	प्रपाठकाः	36
3-	सूक्तानि	730
4-	मन्त्राः	5987

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कमसं. ग्रन्थाः		भाष्यकाराः
1- शाखाः	1- पैप्लादः	2- शौनकः
2- ब्राह्मणम्	1- गोपथः	
3- आरण्यकम्		
4- उपनिषत्	1- मुण्डकोपनिषत्,	2- माण्डूक्योपनिषत् ।
5- श्रौतसूत्रम्	1- वैतानश्रौतसूत्रम्	
6- स्मार्तसूत्रम्	1- कौशिकगृंह्यसूत्रम्	
7- धर्मसूत्रम्		
8- शुल्बसूत्रम्		
9- प्रातिशाख्यम्	1- शौनकीयाचतुरध्यायिका,	2- अथर्ववेदप्रातिशाखयम्
10- शिक्षा	माण्डूकीशिक्षा ।	

क्रमसं. ग्रन्थाः	भाष्यकाराः
1- अथर्ववेद संहिता	सायणः
2- गोपथब्राह्मण्	
3- मुण्डकोपनिषत्	शंकराचार्यः
4- माण्डूक्योपनिषत्	शंकराचार्यः ।
5- वैतानश्रौतसूत्रम्	
6- कौशिकगृह्यसूत्रम्	
7- अथर्ववेदप्रातिशाख्यम्	
8- मण्डूकीशिक्षा	
11- परिशिष्टानि	

शुल्व प्रयुक्त-पारिभाषिक मानानां प्रमाणविवरणम् ।

120 अङ् गुलानि	=	पुरुषः
पुरुषपंचमांशः (24अं.)	=	अरत्निः
चतुर्गुणो रत्निः(96 अं.)	=	व्यामः
अरत्न्यर्धः (12 अं.)	=	वितस्तिः
अरत्नेः चतुर्विंशोभागः	=	अङ्गुलम्
अङ् गुलस्य षष्ठांशः	=	यवः
यवस्य पंचमांशः	=	सर्षपः
सर्षपस्यार्द्ध	=	अर्धसर्षपः
अर्धसर्पपस्य तृतीयोभागः	=	त्रिग्राहिणी बालः ।
त्रिग्राहिणीबालस्य षष्ठभागः	=	पुष्करनालतन्तुः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

केषाचिन्मानवाचकशब्दानामर्थः

1- तिर्यङ्मानी तिर्यङ्मीयते यया सा । दक्षिणोत्तरगता रेखा (रज्जुर्वा) ।
2- पार्श्वमानी पार्श्वं पार्श्वौ वा मीयते यया सा प्राक्प्रत्यग्गामीरज्जुः ।
3- अक्ष्णया कर्णरज्जुः
4- विष्कम्भः वृत्तव्यासः
5- अभ्यासः आवृत्तिः, उपरिक्षेपो वा ।
6- पृष्ठ्या अभीष्टक्षेत्रमध्ये प्राचीप्रतीचीमीयमाना रज्जुः । पृष्ठे भवा पृष्ठ्या
7- चत्वालः यतो यज्ञार्थं मृदाऽऽहरन्ति । समतुरष्कोणगर्तविशेषः ।
8- अन्तः पात्यः सोमयागीयशालयोर्मध्ये परित्यक्ताभूः अन्तः पात्यशब्देनोच्यते ।
9- दण्डरज्जुः क्षेत्रायाममितैका रज्जुः ।
10- निरंछनम् । आकृष्यते रज्जुरनेनेति, विमानार्थं गृहीतायां रज्ज्वां चिन्ह विशेषः । अनेनचिन्हें नाकृष्यते ।

अत्रविशेषः-

"क" प्रथमनिरंछनम्-1/12, सूत्रोक्तनिरंछनमत्र मया प्रथमनिरंछनरूपेण गृहीतम् ।

"ख" द्वितीयनिरंछनम्-1/14. सूत्रोक्तनिरंछनमत्र मया द्वितीयनिरंछनरूपेण गृहीतम् ।

11- अन्तः पश्चिमः ।

मानवाचशब्दानामङ्गुलैर्विवरणम्

क्र.सं. शब्द	अंगुलैर्मानम्	हस्तमानम्	विशेषविवरण
1- व्यामः	96	4	तिर्यक्प्रसारितौहस्तौ । " व्यामस्यात्रप्रमाणं तु चतुन्यूनं श्नतगुलम् । श्लोक. शु. 26.
2- ईषा	188	7ह.20अं.	रथेप्रागपराऽऽयतः काष्ठविशेषः ।
3- अक्षः	104	4ह.8 अ.	रथस्यपश्चाद्भागेर्त्यिक् स्थकाष्ठकम् ।
4- युगम्	86	3ह.14अं.	वृषकन्धोपरिदीयमानं काष्ठम् ।
5- पुरुषः	120	5ह.4 अँ	पुरुषस्यप्रमाणन्तु विंशतिस्तु शताधिका श्लोक.शु.26.

CC-0. Public Domain. Vipin Kumar Collection, Deoband.

Digitized by Madhuban Trust

क.सं.	शब्द	अंगुलैर्मानम्	हस्तमानम्	विशेषविवरण
6-	शम्या	32	1ह.8 अं.	युगछिद्रप्रवेश्यंकाष्ठं रथांगमुच्यते ।
7-	पदम्	12	अर्धहस्तः	द्वादशाङ्गुलं पदम् का.श्रौ.सू.16/8/21.
8-	प्रक्रमः (आघाने)	12	अर्धहस्तः	आधानेपदिकंकुर्यात् .
	प्रक्रमः (सोमे)	24	एकहस्तः	सोमे तु द्विपदोभवेत्
	प्रक्रमः (अग्नौ)	36	1ह. 12 अं.	अग्नौतु त्रिपदं कुर्यात् . श्लोक शु. 34.
9-	प्रादेशः	12	अर्धहस्त	अङ्गुष्ठस्योत्तरं पर्व तर्यन्युपरियद्भवेत् प्रादेशस्तुसोद्देशः या.व.शि., पृ. 36..
10-	प्रादेशः	24	1ह.	चतुर्विंशागुलोऽरत्निः। श्लोक शु. 25.
11-	हस्तः	24	1ह.	पुरुषपंचमभागः कृतोर्ध्ववाह्वोः प्रपदोच्छ्रतस्यपंच मांशः ।।
12--	वितस्तितः	12	अर्धहस्त.	वितस्तिद्वादिशांगुलः श्लो. शु.255.
13-	जानुः	32	1ह8..अं.	द्वित्रिंशज्जानुः । बौ.शु.सू.1/12.
14-	अङगुल			अङ्गुलस्यप्रमाणन्तु षड्यवाः पार्श्वसंस्थिताः । श्लो सु.25.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इष्टि वितान-मानचक्रम्

क.सं.	वैतानिक स्थानाति	शास्त्रोक्तमानम्	अंगुल्या मानम्	शास्त्रीय प्रमाणम्	स्वरूपादिविशेषविवरणम्
1.	गार्हपत्य	सार्द्धत्रयोदशां	13-1/ 2		रथक्राकृतिः श्लो.शु. 21.
2.	आहवनीयः	अरत्निमात्रम्	24 अं	श्लो.शु. 21	चतुरस्रं, श्लोका.शु. 21.
3.	दक्षिणाग्निः	यावधिकैकोन विंशतिः	19.1 यवः	श्लोकशु.38	अर्धचन्द्रः श्लोका शु. 21.
4.	उत्करः	त्र्यङ्गुलः	3	का.शु.सू. 28-30	वृत्ताकारम् ।
5.	अंसः	त्र्यरत्निः	72	का.श्रौ.सू.2/6/1	
6.	श्रोणिः	चतुररत्निः	96	का.श्रौ.सू.2/6/11	
7.	वेदिमानम्	यरत्निः	72	का.श्रौ.सू. 2/6/11	
8.	संग्रहः	एकोनविशंतिः	19		महीधरसंगृहीत श्लो.शु.19,20,
9.	मेखला	चतुरंगुलः	4	श्लो.शु. 22	
10.	गार्हपत्या हवनीययो-रन्तरालः	द्वादशप्र. एकादशप्र. अष्टप्र.	144 132 96.	का.श्रौ. सू .4/8/17	

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मानेषुवैमत्यम्

पदम्	–	पंचदशांगुलानीति बौधायनः । शु.सू.1/8.. द्वादशेति कात्यायनः । श्रौ.सू 16/8/21.
शम्या	–	षट्त्रिंशच्छम्येतिबौधायनः । शु.सू. 1/13. चत्वारोष्टकाशम्येति कात्यायनः । शु.सू.2/5.
प्रक्रमः	–	द्विपदः प्रक्रमः "बौ.शु.सू.1/4 द्विपदीस्त्रिपरदो वेति आपस्तम्बः । शु.सू.2/5,
अरत्निः	–	द्वौप्रादेशौ । बौ.शु.सू, 1/15. मुष्ट्या तु बद्धया स रत्निः स्यादरत्निस्तुनिष्कनिष्ठेन मुष्ठिना । "क" अ. को., पृ.118, श्लो. 1246.
व्यामः	–	पंचारत्निः । बौ.शु.सू., पृ सू. 10. व्यामः चतुररत्निः । बौ.शु.सू. 1/19. व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् ।। अ. को.(ख) 2 का / म. व. / 87 श्लो.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कात्यायनशुल्बसूत्रस्य सूत्रान्तरेषु प्रभावः

क्रम सं	कात्यायनशुल्बसूत्रम्	बौधायनशुल्बसूत्रम्	आपस्तम्बशुल्बसूत्रम्
1.	एवमुत्तरतः विपर्यस्येतरतः ससमाधिः का.शु.सू. 1, 9, 10. 11		एवमुत्तरतोविपर्यस्येतरतस्ससमाधिः, 1/1/5
2.	प्रमाणमभ्यस्यासचतुर्थे लक्षणं करोतितन्निरंछनम् । 1/12	प्रमाणाद्विवगुणां रज्जुमुभ्यतः पाशां कृत्वा मध्ये लक्षणं करोति स प्राच्यर्थः । 1/24, अपरस्मिन्नर्धे चतुर्भागोनेलक्षणं करोति तन् न्यछनम् । 1/25.	आयामंवाभ्यस्यागन्तुचतुर्थमायामस्याण यारज्जुस्तिर्यङ्मानी शेषः । 1/1/7
3.	दीर्घचतुरस्रस्याक्ष्णारज्जुस्तिर्यङ्मानी पार्श्वामानी च यत्पृथग्भूते कुरुतस्तदुभ्यं करोतीति क्षेत्रज्ञानम् । 2/11.	दीर्घचतुरस्राक्षणयारज्जुः पार्श्वमानी तिर्यङ् मानी च यत् पृथग्भूतेकुरुतस्तदुभयंकरोति । 1/37	दीर्घस्याक्ष्णयारज्जुः पार्श्वमानीतिर्यङ् मानी च यत्पृथग्भूतेकुरुतस्तदु भयं करोति। 1/1/8
4.	समचतुरस्रस्याक्ष्णयारज्जुर्द्विकरणी । 2/12..	समचतुरस्रस्याक्षणयारज्जुर्द्विस्तावतीं भूमिं करोति 1/34 .	चतुरस्रस्याक्ष्णयारज्जुद्विस्तावतीं भूमिं करोति समस्य द्विकरणी ।1/1/10

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्रम सं	कात्यायनशुल्बसूत्रम्	वौधायनशुल्बसूत्रम्	आपस्तम्बशुल्ब- सूत्रम्
5.	करणींतृतीयेनवर्धतेयेत्तच्च स्वचतुर्थेनात्मचतुस्त्रिशोनेन स विशेष इति विशेषः 2/13	प्रमाणंतृतीयेनवर्द्धयेत्तच्च चतुर्थेनात्मस्त्रिंशोनेन सविशेषः । 1/50	प्रमाणंतृतीयेन वर्धयेत्तच्चतुर्थे नात्मचतुस्त्रिशोनेन स विशेषः । 1/1/10
6.	प्रमाणंतिर्यग्द्विकरण्यायामस्तस्याक्षणयारज्जुस्त्रिकरणी । 2/14	प्रमाणंतिर्यग्द्विकरण्यायामस्तस्याक्षणसारज्जुस्त्रिकरणी । 1/35	प्रमाणं तिर्यग् द्विकरण्यायामः तस्याभ्याक्षणयारज्जुस्त्रिकरणी । 1/2/3
7.	तृतीयकरण्येतेनव्याख्याता । प्रमाण विभागस्तुनवधा । 2/15-16	तृतीयकरण्येतेनव्याख्याता । नवमस्तुभूमेर्भागोभवतीति । 1/36	तृतीयकरण्येतेन व्याख्याता विभागस्तु नवधा । 1/2/4
8.	तुल्यप्रमाणानां समचतुरस्राणामुक्तसमासः 2/21		तुल्ययोश्चचतुरश्रयोरुक्तस्समासः। नाना प्रमाणयोश्चतुरश्रोयोस्सस्मासः । 1/2/5
9.	नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयसोऽपच्छिन्द्यात्तस्याक्ष्णारज्जुरुभेसमस्यतीति समासः । 2/22	नानाचतुरस्रे समस्यन् कनीयसः करण्या वर्षीयसो वृध्रमुल्लिखेद् वृध्रस्याक्षणयारज्जुः समस्तयोः पार्श्वमा नीभवति । 1/39	ह्रसीयतः करण्या वर्षीयसो वृद्धमुल्लिखेत् । वृद्धस्याक्षणयारज्जुरुभे समस्यति । तदुक्तम् । 1/2/6

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्रम सं	कात्यायनसुल्बसूत्रम्	बौधायनशुल्बसूत्रम्	आपस्तम्बशुल्वसूत्रम्
10.	चतुरस्राच्चतरस्रं निर्जिहीर्षन् यावन्निर्जिहीर्षेत्तावदुभयतोऽपच्छिद्यशंकू निखाय पार्श्वमानीं कृत्वा पार्श्वमानीसम्मितामक्षणयां तत्रोपसंहरति समासेऽच्छेदः सा करण्येष निर्हासः ।3/1	चतुरस्राच्चतुरस्रं निर्जहीर्षन् यावन्निर्जहीर्षेत्तस्य करण्या वर्षीयसोवृध्रमुल्लिखेत् । वृध्रस्य पार्श्वमानीमक्ष्णयेतरत्पार्श्व मुपसंहरेत् । सा यत्रनिपतेत् तदपच्छिन्द्यात् छिन्नया निरस्तम् । 1/40	चतुरस्राच्चतुरस्रं निर्जहीर्षन् यावन्निहीर्षेत्तस्य करण्या वृध्र मुल्लिखेत् । वृध्रस्य पार्श्वमानीमक्ष्णयेतरत् पार्श्वमुपसंहरेत्, सा यत्रनिपतेत्तदपछिन्द्यात् । छिन्नया निरस्तम्, 1/2/7-10
11.	दीर्घचतुरस्रं समचतुरस्रं चिकीहर्षन्मध्ये तिर्यगपच्छिद्यान्यतरद्विभज्येतरत्पुरस्ताद्दक्षिणातश्चोपध्याच्छेषमागन्तुना पुरयेत्तरस्योक्त निर्ह्रासः । 3/2	दीर्घचतुरस्रं समचतुरस्रं चिकीर्षस्तिर्यङ्मानीं करणीं कृत्वा शेषं द्वेधा विभज्य पार्श्वयोर्विपर्यस्येतरत्रोपदध्यात् । खण्डमावापेन तत्संपूरयेत् तस्यनिर्हार उक्तः । 1/43	दीर्घचतुरस्रंसमचतुरस्रं चिकीर्षन् तिर्यङ्मान्याऽपछिद्य शेषं विभज्योभयत उपदध्यात् खण्डमागन्तुना संपूरयेत् । तस्यनिर्हासःउक्तः 1/2/12-15
12.	समचतुरस्रं दीर्घचतुरस्रंचिकीर्षन्मध्येऽक्ष्णया पछिद्यविभज्येतरत्पुरस्तादुत्तरतश्चोपदध्याद्, विषमं चेद्यथायोगमु पसंहरेदिति व्यासः । 3/4	समचतुरस्रं दीर्घचतुरस्रं चिकीर्षस्तँदक्ष्णयापछिद्य भागं द्वेधा विभज्य पार्श्वयोरुपदध्याद् यथा योगम् । 1/41	समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन् यावच्चिकीर्षेत् तावतीं पार्श्वमानीं कृत्वा यदधिकं स्याद्यथायोगमुपदध्यात् । 1/3/1

CC-0. Public Domain. Vipin Kumar Collection, Deoband

क्र म सं	कात्यायनसुल्व.सूत्रम्	बौधायनशुल्बसूत्रम्	आपस्तम्बशुल्बसूत्रम्
13.	चतुरस्त्रंमण्डलं चिकीर्षन्मध्यादंसे निपात्य पार्श्वतः परिलिख्य तत्र यदतिरिक्तं भवति तस्य तृतीयेन सह मण्डलं परिलिखेत् स समाधिः । 3/13	चतुरस्त्रं मण्डलचिकीर्षन् अक्ष्णयार्ध मध्यात् प्राचीमभ्यापातयेत् । यदतिशिष्यते तस्य सहतृतीयेन मण्डलं परिलिखेत् । 1/47	चतुरस्त्रंमण्डलं चिकीर्षन्मध्यात्कोट्यां निपातयेत् । पार्श्वतः परिष्कृष्यातिशय तृतीयेन सह मण्डलं परिलिखेत् । सानित्या मण्डलम् । 1/3/3-5
14.	मण्डलं चतुरस्त्रं चिकीर्षन् विष्कम्भं पंचदशभागान् कृत्वाद्ववुद्धरंच्छेषः करणी । 3/14	मण्डलं चतुरस्त्रं चिकीर्षन् विष्कम्भमष्टौभागान् कृत्वा भागमकोनत्रिंशधाविभज्याष्टाविंशति भागानुद्धरेत् भागस्य च षष्ठ मष्टमभागोनम् । 1/48	मण्डलं चतुरस्त्रं चिकीर्षन् विष्कम्भं पंचदशभागान् कृत्वा द्वावुद्धरेत् । त्रयो दशावशिष्यन्ते । सा नित्या चतुरस्त्रम् । 1/3/6
15.	यावत्प्रमाणारज्जुर्भवति तावन्तस्ता वन्तो वर्गाभवन्ति तान्ससमस्येत् । 3/7		यावत् प्रमाणारज्जुस्तावतस्तावतोवर्गान् करोति । 1/3/11
16.	अर्धप्रमाणेन पादप्रमाणं विधीयते । 3/8		अर्धप्रमाणेनपादप्रमाणं विधीयते । 1/3/16
17.	तृतीयेन नवमोऽशं, 3/9		तृतीयेन नवमीकला, 1/3/18

Digitized by Madhuban Trust
CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रबन्धोपयुक्तानां ग्रन्थानां निदर्शिका

क्रमसंख्या	ग्रन्थनाम तथा विवरणम्	संक्षिप्तनाम निर्देशः
1.	शुल्बसूत्रम् विद्याधर गौडकृतसर लवृत्तिसहितम्	का.शु.सू.
2.	शुल्बसूत्रम् "ख" कर्कमही धरवृत्तिहितम्	का.शु.सू. "ख"
3.	चरणव्यूहसूत्रम् शौनकोक्तम् । वैदिकशिरोमणि महीदासकृतभाष्यसहितम् ।	च. व्यू.
4.	आपस्तम्बशुल्बसूत्रम् कपर्दिभाष्य करविन्दसुन्दरराजव्याख्याभ्यां च सहितम् ।	आप. शु.सू.
5.	मण्डपकुण्डसिद्धिः पण्डितप्रवर श्री विठ्ठलदीक्षित विरचिता । शुक्लोपाव्हो-लक्ष्मीशंकर शर्माणाविरचितया पदार्थ मंजूषाभिधया संस्कृतटीकया, गुर्जर भाषानुवादेन च सम्वलिता ।	म.कु.सि.
6.	अग्निष्टोपमद्धतिः आध्वर्यवः औद्गात्रहौत्रपद्धतिस्त्रयोपेता । 1934	अ.ष्टो.प.
7.	बौधायनशुल्बसूत्रम् श्री व्यंकटेश्वरदीक्षितविरचितया, श्रीद्वारिकानाथयज्ज्वकृत व्याख्यया समलंकृतम् । सम्पादकः श्रीविभूतिभूषण भट्टाचार्यः ।	बौशु.सू.
8.	श्रौतपदार्थनिर्वचनम् काशीराजकीयप्रधान पाठशालायां आंग्लसंस्कृतविभागे अध्यापकेन विश्वनाथ शास्त्रिणा संशोधितम्, 1991 सन्	श्रौ.प.नि.
9.	कात्यायनश्रौतसूत्रम् श्रीविद्याधरशर्मणाविरचितया सरलव्याख्यया वृत्त्यासमेतम् ।	का.श्रौ.सू.
10.	शतपथब्राह्मणम् सायणभाष्योपेतम्, श्रीधरशास्त्रिकृत उपोद्घातसमेतम् ।	श.ब्रा. "क"
11.	शतपथब्राह्मणम् "ख" पं. चिन्नस्वामिशास्त्रिणा पं. पट्टाभिरामशास्त्रिणा च विशोधितम् ।	श. ब्रा."ख"
12.	अमरकोषः संक्षिप्तमाहेश्वर्या टीकयासमेतः । ढुण्ढिराजशात्रिणा संशोधितः ।	अ.को."क"

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्रमसंख्या	ग्रन्थनाम तथा विवरणम्	संक्षिप्तनामनिर्देशः
13.	अमरकोशः म.म. भट्टोजिदीक्षितात्मज श्रीभानुदीक्षितकृता व्याख्यासुधाख्यया सहिता । द्वितीयसंस्करण	अ.को. "ख"
14.	श्रीमदभागवतम् (मूल) गीताप्रेस गोरखपुर	श्री.भा.
15.	श्रीमद्देवीभागवतम् (मूल) सम्पादक श्रीमुन्नालाल अभिमन्युः एम.ए.।	श्रीदे.भा.
16.	मनुस्मृतिः मणिप्रभाहिन्दीटिकासहिता, टिकाकार, गोविन्दशास्त्री,	मनु.
17.	कातीयपरिशिष्टदशकम् विषमपदालङ्कृतया व्याख्यया समेतम् । सम्पादक-म.म. पं. श्रीधरअण्णा शास्त्रि वारे, नासिक ।	का.प.द.
18.	वाजसनेयीप्रतिशाख्यम् उवटभाष्य-अन्तभट्टभाष्याभ्यां सहितम् । सम्पादक एवं व्याख्याकार डॉ. वीरेन्द्र कुमारवर्मा,	वा.स.प्रा.शा.
19.	निरुक्तम् दुर्गाचार्यविरचितटिकासमेतम् ।	निरु.
20.	न्यायकुसुमांजलिः हरिदासव्याख्यया विभूषितः	न्या.कु.ज.
21.	पूर्णिमा इतिहास प्रधानत्रैमासिक पत्रिका 4 वर्ष । अंक, सम्पादक गौतमव्रज, वज्राचार्यमहेश्वरापत्तनम् ।	पू.प
22.	सूरिसर्वस्वम् श्रीगोविन्दक विभूषणसामन्तराय विरचितम्	सू.स.
23	लीलावती व्याख्याकारः श्रीलखनलाल झा,	ली.व.
24.	सिद्धान्तशिरोमणिः "क" द्वितीयभागः, श्रीमद्भाष्कराचार्योपयज्ञ वासना भाष्यसहितः	सि शि."क"
25.	सिद्धान्त शिरोमणिः"ख" वासना भाष्यसहितः ।	सि शि."ख"
26.	सूर्यसिद्धान्तः श्रीरंगनाथविरचितया व्याख्यया समेतः	सू.सि.
27.	मेदिनीकोषः प्र.जयदासहरिदासगुप्त,	

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

मण्डपकुण्डसिद्धिः -

अस्तिमण्डपकुण्डसिद्धिग्रन्थः यत्र कुण्डार्काद्येकोनविंशतिमूलग्रन्थाः सहैव सङ्कलिताः संलग्नाश्च सन्ति । सोऽयग्रन्थः श्रीकृष्णदासात्मज गंगा विष्णुनास्वकीये "लक्ष्मीवेंकटेश्वर" मुद्राणलये मुद्रयित्वा प्रकाशितो वर्तते । संवत्, 1982, शताब्दाः 1847, कल्याण मुम्बई।)

एतस्मादेवग्रन्थात् प्रमाणार्थः कुण्डप्रदीपादि ग्रन्थाः समुद्धृताः सन्ति तेषां नामान्यत्रप्रदीयन्ते ।

कमसंख्या	ग्रन्थनाम तथा विवरणम्	संक्षिप्तनाम निर्देशः
28.	कुण्डरत्नाकरः	कु.र.
29.	कुण्डोद्योतः	कु.द्यो.
30.	कुण्डतत्वप्रदीपः	कु.त.प्र.
31.	कुण्डकल्पद्रुमः	कु.क.द्रु.
32.	कुण्डमार्तण्डः	कु.मा.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

शुल्बसूत्राणां श्लोकानां चाकारानुक्रमणिका

पृष्ठाङ्काः	सूत्राणि	कण्डिकाः
	अ	
65	अक्ष्णया तिर्यङ्मानी शेषः	1/13
70	,, ,,	1/15
205	अग्नीनां तु खरः का.	7/22
264	अग्नेरुदक्	7/38
260	अङ्गुलस्य.	7/25
129	अङ्गुलैरथ.	7/12
256	अजीर्णा.	7/12
261	अज्ञात्वा शु.	7/31
158	अतिदीर्घञ्चेत्.	3/3
89	अपरिमितं.	1/23
117	अपि वां न्तरं.	1/29
259	अरत्निश्चतु.	7/21
172	अर्धप्रमाणेन.	3/8
	आ	
210	आद्योग्नी द्वि.	4/10
262	अधाने पदिकं	7/34
	इ	
93	इतरस्य.	1/26
	उ	
209	उत्तरेषु	4/9
140	उपदिष्टं युग	2/9
200	उभयतः प्रउगं.	4/7
197	उभयतः प्रउगे.	4/5
	ए	
204	एककर्णानां	4/10
255	एकतक्ष	7/9
214	एकवि.श.	4/11
251	एके प्रथमे	6/12

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठाङ्काः	सूत्राणि	कण्डिकाः
85	एतेन.	1/19
202	एतेनैव	4/8
63	एवमुत्तरतः	1/9
241	एवमैकेक	6/5
175	एष निर्हास.	3/11
	क	
138	करणी तत्करणी.	2/7
146	करणीतृतीयं	2/16
143	करणीं तृतीयेन	2/12
262	कृत्तिका श्रवणः पु.	7/35
260-	कृष्णालं त्रियवं.	7/28
	ग	
94	गार्हपत्याहवनीययो.	1/27
	च	
175	चतुरस्रं.	3/13
256	चतुरस्रं मु.	7/11
153	चतुरस्राच्चतु.	3/1
173	चतुर्थेन षोड.	3/10
130	चतुःशतमक्षः	2/3
130	चत्वारोष्टका	2/5
	त	
129	तत्राष्टाशीति.	2/2
89	तत्रोदीची	1/21
56	तदन्तरं. रज्वा.	1/3
190	तद्दशमेना.	4/3
259	तन्तुः पुष्करै.	7/23
219	तस्य दशमेन	5/6
254	तिर्यङ् मान्याश्च.	7/5
49	तुल्यप्रमाणाना.	2/19
146	तृतीयकर.	2/15
173	तृतीयेन	3/9

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठाङ्काः	सूत्राणि	कण्डिकाः
248	तेन वेदिं निर्माय.	6/10
259	त्रयस्त्रिहायणी.	7/24
148	त्रिकरणी.	2/20
260	त्रीणि चैव.	7/29
	द	
261	दण्डरज्ज्वर्द्ध	7/32
141	दीर्घचतुरस्रस्याक्ष्णया	2/11
155	दीर्घचतुरस्रं	3/3
180	द्रोणे चिद्रथ.	4/1
190	द्रोणे यावानग्निः सम.	4/2
237	द्वितीये वा	6/3
140	द्विपदा तिर्यङ्मानी	2/9
255	द्विवितस्ति.	7/8
171	द्विप्रमाणा.	3/6
253	द्विहस्ते.	7/2
	न	
253	न जलात्समम्.	7/4
148	नव भागास्त्रय.	2/17
257	नवके लक्षणं	7/15
149	नानाप्रमाण.	2/2
241	नान्तः पात्य.	5/6
228	नारत्निवितस्तीनां	4/19
258.	नीहारेण	7/18
	प	
257	पञ्चदशमेक.	7/15
224	पंचदशमा.	5/8
224	पञ्चारत्निः	5/9
263	पञ्चाशच्छर्करा	7/36
240	पदंतिर्यङ्मानी	2/8
257	पदस्याक्ष्णया.	7/17
249	पार्श्वयोर्वा	6/11
220	पुरुषं वा.	4/15

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठाङ्काः	सूत्राणि	कंण्डिकाः
225	पुरुषं वा स.	5/10
215	पुरुषाभ्यासे.	4/22
136	पैतृक्यां	2/6
197	प्रउगं चतु.	4/6
195	प्रउगे	4/4
239	प्रक्रमेण वा.	239
64	प्रमाणमभ्यस्य	1/12
147	प्रमाणवि.	2/16
171	प्रमाणं चतु.	3/5
258	प्रमाणं च प्र.	7/19
144	प्रमाणं तिर्यद्वि.	2/13
68	प्रमाणार्द्धंवा.	1/14
72	प्रमाणार्द्धे.	1/16
92	प्रमाणे.	1/24
62	प्राच्यन्तयोःश.	1/6
255	प्रादेशमात्र.	6/9
	भ	
253	भवन्ति चात्र.	7/13
	म	
178	मण्डलं चतुरस्र.	3/14
193	मण्डलेऽप्येवम्	4/3
	य	
230	यथाग्नि वेदी.	6/1
258	यथा न क्षीयते.	7/20
247	.यथायूपं—	6/8
231	या करणी	6/2
248	या रज्जुरे.	5/9
172	यावत्प्रमाणा.	3/7
175	यावत्प्रमाणा.	3/12
243	यावत्प्रमाणानि.	6/7
261	यावत्प्रमाणा रज्जुः	7/33
93	योग श्च	1/25

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठाङ्का:	सूत्राणि	कण्डिका:
256	रज्जुर्मुञ्जमयी.	7/14
47	रज्जुसमासं व.	1/1
59	रज्ज्वन्तोः पाश.	1/4
	व	
63	विपर्यस्ये.	1/10
120	विपर्यस्ये.	1/28
101	विपर्यस्योत्त.	130
259	व्यामस्यात्र	7/26
	श	
85	शकटमुखस्य.	1/18
263	शंस्यचतु.	7/37
256	शाणी वा बाल्वजी	7/13
88	शालामानं च	1/20
254	शास्त्रबुद्ध्या	7/6
74	शास्त्रवदर्धे	1/17
60	श्रोण्यंस.	1/5
62	,,	1/7
254	षडङ्गुलप्र.	7/7
130	षडशीतिर्युगम्	2/4
	स	
89	सदसश्चैवम्	1/22
162	समचतुरस्र.	3/4
141	समचतुरस्रस्या.	2/12
215	समस्तं	4/13
44	समे शङ्कु.	1/2
64	स समाधिः	1/11
264	सूत्रदोष.	7/39
251	सैषा शिख.	6/13
148	सौत्राम.	2/19
253	संख्याज्ञः	7/3
260	स्वर्णकारो.	6/29

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पृष्ठाङ्काः	सूत्राणि	कण्डिकाः
	ह	
260	हिरण्यशकल.	7/27
260	हृसते	7/30

रमेशचन्द्रविप्रेणव्याख्योपपत्यलङ्कृतः
ग्रन्थोऽयं प्रस्तुतस्तेन प्रीणातु परमेश्वरः ।।

* * * * * * * * *
* * * * * * *
* * * *

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

परिचय

डा. रमेश चन्द्रदाश शर्मा

पिता श्रीकृष्णचन्द्रदाश शर्मा

जन्मस्थान—वुगुडा, जिला-गंजाम (उड़ीसा प्रदेश)

शैक्षिक योग्यता

वेदाचार्य (लब्ध स्वर्णपदक)

विद्यावारिधि (Ph. d)

सेवा कार्य

१—श्रीवैकुण्ठनाथ पवहारि संस्कृत महाविद्यालय, वैकुण्ठपुर देवरिया (U.P) वेद शिक्षक (१.१.१९७८-१९.१०.१९८६)

२—राजकीय संस्कृत कालेज सरमथुरा धोलपुर (राजस्थान) वरिष्ठ व्याख्याता (वेद) (२०.१०.८६ – २४-८.१९८७)

३—श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, कटवरिया सराय, नई दिल्ली, व्याख्याता (वेद) २५.८.८७ से निरन्तर

प्रकाशन कार्य

१. विकृति विमर्शः (लघु शोध प्रबन्ध)

२. रेखागणिते शुल्वसूत्रस्य योगदानम् । (लेख)

३. वैदिक संस्कृति ,,

४. तिलैस्तर्पणमात्तरेत् ,,

५. वैदिग्वाग् विमर्शः ,,

६. सरस्वती स्तोत्र पञ्चकम् (पद्य)

७. वैराग्य संदीपनी ,,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 400.00
Bhagavata Mahapurana—
4 vols 2304 pp Set 1000.00
Bhavishya Mahapurana—
3 vols 1400 pp Set 900.00
Brahma Mahapurana
728 pp 450.00
Devi Bhagavata Mahapurana
1154 pp 800.00
Garuda Mahapurana
668 pp 400.00
Harivansha Purana—2 vols
1802 pp Set 900.00
Kurma Mahapurana
298 pp 250.00
Linga Mahapurana
774 pp 400.00
Markandeya Mahapurana
828 pp 450.00
Narada Mahapurana
932 pp 600.00
Padma Mahapurana—4 vols
2381 pp Set 1500.00
Shiva Mahapurana— 2 vols
1504 pp Set 750.00
Shiva Purana (Small Type)
412 pp 250.00
Skanda Mahapurana—8 vols
5600 pp Set 3500.00
Skanda Mahapurana—3 vols (Small)
1452 pp 1000.00
Vamana Mahapurana
472 pp 300.00
Vayu Mahapurana
540 pp 350.00
Vishnudharmottara Mahapurana
1246 pp 900.00
Vishnu Mahapurana—
with two commentaries
608 pp 400.00
Kalki Purana
316 pp 120.00
Vasuki Purana
260 pp 100.00
Saura Purana
290 pp 100.00
Narsimha Purana
380 pp 100.00
Ekamra Purana
490 pp 100.00
Ashtadasha Purana Darpana
Contents of 18 Puranas
pp 432 180.00

PURANAS WITH TEXT, TRANS. & NOTES IN ENGLISH VERSEWISE

Vishnu Purana—
H.H. Wilson
1065 pp 2 vols Set 400.00
Matsya Purana—
N.S. Singh
1252 pp 2 vols 400.00
Narasimha Purana-Dr.S. Jena
1100 pp 400.00
Kalika Purana—
Prof. Biswanarayan Shastri
3 Vol Set 900.00

CC-0. Public Domain. Vipin Kumar Collection, Deoband